श्रीगणेशाय नमः ॥

मीमांसादर्शनम् ॥

श्रीजैमिनीयसूत्रभाष्यम् ।

श्रीशबरस्वामिविरचितम् ॥

अथातो धर्मजिज्ञासा ॥ १ ॥

लोके येष्वर्थेषु प्रसिद्धानि पदानि, तानि सति सम्भवे तदर्थान्येव सूत्रेष्वित्यवगन्तव्यं, नाऽध्याहारादिभिरेषां परिकल्पनीयोऽर्थः परिभाषितव्यो वा । एवं वेदवाक्यान्येवैभिर्व्याख्यायन्ते । इतरथा वेदवाक्यानि व्याख्येयानि, स्वपदार्थाश्च व्याख्येया इति प्रयत्नगौरवं प्रसज्येत । तत्र लोकेऽयमथशब्दो वृत्तादनन्तरस्य प्रक्रियार्थो दृष्टः । न चेह किञ्चिद् वृत्तमुपलभ्यते । भवितव्यन्तु तेन, यस्मिन् सत्यनन्तरं धर्मजिज्ञासाऽवकल्प्यते । तथाहि । प्रसिद्धपदार्थकः स कल्पितो भवति । तत्तु वेदाध्ययनम् । तस्मिन् हि सति सोऽवकल्पते नासति । नैतदेवम् । अन्यस्यापि कर्मणोऽनन्तरं धर्मजिज्ञासा युक्ता, प्रागपि च वेदाध्ययनात् । उच्यते, मादृशां तु धर्मजिज्ञासामधिकृत्य अथशब्दं प्रयुक्तवानाचार्य्यः । या वेदाध्ययनमन्तरेण न सम्भवति । कथम् । वेदवाक्यानामनेकविधो विचार इह वर्त्तिष्यते । अपिच नैव वयमिह वेदाध्ययनात् पूर्वं धर्मजिज्ञासायाः प्रतिषेधं शिष्मः, परस्ताच्चानन्तर्य्यम् । न ह्येतदेकं वाक्यं पुरस्ताच्च वेदाध्ययनाद्धर्मजिज्ञासां प्रतिषेधिष्यति, परस्ताच्चानन्तर्य्यं प्रकरिष्यति । भिद्येत हि तथा वाक्यम् । अन्या हि वचनव्यक्तिरस्य पुरस्ताद् वेदाध्ययनाद्धर्मजिज्ञासां प्रतिषेधति, अन्या च परस्तादानन्तर्य्यमुपदिशति । वेदानधीत्य इति एकस्यां विधीयतेऽनूद्य आनन्तर्य्यं, विपरीतमन्यस्याम् । अर्थैकत्वाच्चैकवाक्यतां वक्ष्यति । किञ्चाधीते वेदे द्वयमापतति, गुरुकुलाच्च समावर्त्तितव्यं, वेदवाक्यानि च विचारयितव्यानि । तत्र गुरुकुलान्मा समावर्त्तिष्ट, कथं नु वेदवाक्यानि विचारयेदित्येवमर्थोऽयमुपदेशः ।

यद्येवं, न तर्हि वेदाध्ययनं पूर्वं गम्यते। एवं हि समामनन्ति, वेदमधीत्य स्नायादिति। इह च वेदमधीत्य स्नास्यन् धर्मं जिज्ञासमानः इममाम्नायमतिक्रामेत्। न चाम्नायो नाम अतिक्रमितव्यः। तदुच्यते–अतिक्रमिष्याम इममाम्नायम्। अनतिक्रामन्तो वेदमर्थवन्तं सन्तमनर्थकमवकल्पयेम। दृष्टो हि तस्यार्थः कर्मावबोधनं नाम। न च तस्याध्ययनमात्रात् तत्र भवन्तो याज्ञिकाः फलं समामनन्ति। यदपि च समामनन्तीव, तत्रापि, द्रव्यसंस्कारकर्मसु परार्थत्वात् फलश्रुतिरर्थवादः स्यादित्यर्थवादतां वक्ष्यति। न चाऽधीतवेदस्य स्नानानन्तर्यमेतद् विधीयते। न ह्यत्रानन्तर्यस्य वक्ता कश्चिच्छब्दोऽस्ति। पूर्वकालतायां क्त्वा स्मर्य्यते, न आनन्तर्य्ये। दृष्टार्थता वाऽध्ययनस्य आनन्तर्य्ये व्याहन्येत। लक्षणया त्वेषोऽर्थः स्यात्। न वा इदं स्नानमदृष्टार्थं विधीयते। किन्तु लक्षणया अस्नानादिनियमस्य पर्य्यवसानं वेदाध्ययनसमकालमाहुः। वेदमधीत्य स्नायाद्, गुरुकुलान्मा समावर्त्तिष्टेति– अदृष्टार्थतापरिहारायैव। तस्माद् वेदाध्ययनमेव पूर्वमभिनिवर्त्यानन्तरं धर्मो जिज्ञासितव्य इति अथशब्दस्य सामर्थ्यम्। न च ब्रूमोऽन्यस्य कर्मणोऽनन्तरं धर्मजिज्ञासा न कर्त्तव्येति, किन्तु वेदमधीत्य त्वरितेन न स्नातव्यम्। अनन्तरं धर्मो जिज्ञासितव्य इति अथशब्दस्यार्थः॥

अतःशब्दो वृत्तस्यापदेशको हेत्वर्थः। यथा, क्षेमसुभिक्षोऽयम् अतोऽहमस्मिन् देशे प्रतिवसामीति। एवम् अधीतो वेदो, धर्मजिज्ञासायां हेतुर्ज्ञातः, अनन्तरं धर्मो जिज्ञासितव्य इति अतःशब्दस्य सामर्थ्यम्। धर्माय हि वेदवाक्यानि विचारयितुमनधीतवेदो न शक्नुयाद्, अतः = एतस्मात् कारणादनन्तरं धर्मं जिज्ञासितुमिच्छेदित्यतःशब्दस्यार्थः॥

धर्माय जिज्ञासा धर्मजिज्ञासा, सा हि तस्य ज्ञातुमिच्छा। स कथं जिज्ञासितव्यः, को धर्मः, कथंलक्षणः, कान्यस्य साधनानि, कानि साधनाभासानि, किंपरश्चेति। तत्र को धर्मः, कथंलक्षण इति एकेनैव सूत्रेण व्याख्यातं– चोदनालक्षणोऽर्थो धर्म इति। कानि अस्य साधनानि, कानि साधनाभासानि, किंपरश्चेति शेषलक्षणेन व्याख्यातम्। क्व पुरुषपरत्वं, क्व वा पुरुषो गुणभूत इत्येतासां प्रतिज्ञानां पिण्डस्यैतत् सूत्रम्, अथाऽतो धर्मजिज्ञासेति। धर्मः प्रसिद्धो

धर्मः स्याद्, अप्रसिद्धो वा । स चेत् प्रसिद्धो, न जिज्ञासितव्यः । अथाऽप्रसिद्धो, नतराम् । तदेतदनर्थकं धर्मजिज्ञासाप्रकरणम् । अथवाऽर्थवत् । धर्मं प्रति हि विप्रतिपन्ना बहुविदः । केचिदन्यं धर्ममाहुः, केचिदन्यम् । सोऽयमविचार्य्य प्रवर्त्तमानः कञ्चिदेवोपाददानो विहन्येत, अनर्थं च ऋच्छेत् । तस्माद्धर्मो जिज्ञासितव्य इति । स हि निःश्रेयसेन पुरुषं सँय्युनक्तीति प्रतिजानीमहे । तदभिधीयते ॥ १ ॥ ॥

धर्मजिज्ञासाऽधिकरणम् ॥ १ ॥

चोदनालक्षणोऽर्थो धर्मः ॥ २ ॥

चोदना इति क्रियायाः प्रवर्त्तकं वचनमाहुः । आचार्य्यचोदितः करोमीति हि दृश्यते । लक्ष्यते येन तल्लक्षणं, धूमो लक्षणमग्नेरिति हि वदन्ति । तया यो लक्ष्यते, सोऽर्थः पुरुषं निःश्रेयसेन सँय्युनक्तीति प्रतिजानीमहे । चोदना हि भूतं, भवन्तं, भविष्यन्तं, सूक्ष्मं, व्यवहितं, विप्रकृष्टमित्येवञ्जातीयकमर्थं शक्नोत्यवगमयितुं, नान्यत् किञ्चनेन्द्रियम् । न च तथाभूतमप्यर्थं ब्रूयाच्चोदना, यथा यत्किञ्चन लौकिकं वचनं, नद्यास्तीरे फलानि सन्ति इति । तत् तथ्यमपि भवति, वितथमपि भवतीति । उच्यते । विप्रतिषिद्धमिदमुच्यते, ब्रवीति वितथञ्चेति । ब्रवीति—इति उच्यतेऽवबोधयति, बुध्यमानस्य निमित्तं भवतीति । यस्मिँश्च निमित्तभूते सति अवबुध्यते सोऽवबोधयति । यदि च चोदनायां सत्यामग्निहोत्रात् स्वर्गो भवतीति गम्यते कथमुच्यते न तथा भवतीति । अथ न तथा भवतीति कथमवबुध्यते । असन्तमर्थमवबुध्यते इति विप्रतिषिद्धम् । न च, स्वर्गकामो यजेतेत्यतो वचनात् सन्दिग्धमवगम्यते, भवति वा स्वर्गो, न वा भवतीति । न च निश्चितमवगम्यमानमिदं मिथ्या स्यात् । यो हि जनित्वा प्रध्वंसते, नैतदेवमिति, स मिथ्याप्रत्ययः । न चैष कालान्तरे, पुरुषान्तरे, अवस्थान्तरे, देशान्तरे वा विपर्य्येति । तस्मादवितथः । यत्तु लौकिकं वचनं, तच्चेत् प्रत्ययितात् पुरुषात्, इन्द्रियविषयं वा, अवितथमेव तत् । अथाऽप्रत्ययितात् अनिन्द्रियविषयं वा तावत् पुरुषबुद्धिप्रभवमप्रमाणम् । अशक्यं हि तत् पुरुषेण ज्ञातुम्, ऋते वचनात् । अपरस्मात् पौरुषेयाद्वचनात् तदवगतमिति चेत् । तदपि तेनैव तुल्यम् । नैवञ्जातीयकेष्वर्थेषु पुरुषवचनं प्रामाण्यमुपैति, जात्य-

न्धानामिव वचनं रूपविशेषेषु । न च विदुषामुपदेशो नाऽवकल्प्यते । उपदिष्टवन्तश्च मन्वादयस्तस्मात् पुरुषात् सन्तो विदितवन्तश्च । यथा चक्षुषा रूपमुपलभ्यते इति दर्शनादेवावगतम् । उच्यते । उपदेशा हि व्यामोहादपि भवन्ति । असति व्यामोहे वेदादपि भवन्ति अपि च पौरुषेयाद्वचनात् । एवमयं पुरुषो वेदेति भवति प्रत्ययो, नैवमयमर्थ इति । विप्लवते हि खल्वपि कश्चित् पुरुषकृताद् वचनात् प्रत्ययः । न तु वेदवचनस्य मिथ्यात्वे किञ्चन प्रमाणमस्ति । ननु सामान्यतो दृष्टं पौरुषेयं वचनं वितथमुपलभ्य वचनसाम्यादिदमपि वितथमवगम्यते । न । अन्यत्वात् । न ह्यन्यस्य वितथभावेऽन्यस्य वैतथ्यं भवितुमर्हति, अन्यत्वादेव । न हि देवदत्तस्य श्यामत्वे यज्ञदत्तस्यापि श्यामत्वं भवितुमर्हति । अपि च पुरुषवचनसाधर्म्याद् वेदवचनं वितथमिति अनुमानं व्यपदेशादवगम्यते । प्रत्यक्षस्तु वेदवचनेन प्रत्ययः । न चानुमानं प्रत्यक्षविरोधि प्रामाणं भवति । तस्माच्चोदनालक्षणोऽर्थः श्रेयस्करः । एवं तर्हि श्रेयस्करो जिज्ञासितव्यः । किं धर्मजिज्ञासया । उच्यते । य एव श्रेयस्करः, स एव धर्मशब्देनोच्यते । कथमवगम्यताम् । यो हि यागमनुतिष्ठति, तं, धार्मिक इति समाचक्षते । यश्च यस्य कर्त्ता स तेन व्यपदिश्यते । यथा, पाचकः, लावक इति । तेन यः पुरुषं निःश्रेयसेन संयुनक्ति, स धर्मशब्देनोच्यते । न केवलं लोके, वेदेऽपि, यज्ञेन यज्ञमयजन्त देवाः तानि धर्माणि प्रथमान्यासन् इति यजतिशब्दवाच्यमेव धर्मं समामनन्ति । उभयमिह चोदनया लक्ष्यते, अर्थोऽनर्थश्चेति । कोऽर्थः । यो निःश्रेयसाय, ज्योतिष्टोमादिः । कोऽनर्थः । यः प्रत्यवायाय, श्येनो, वज्रः, इषुरित्येवमादिः । तत्र, अनर्थो धर्म उक्तो मा भूदिति अर्थग्रहणम् । कथं पुनरसावनर्थः । हिंसा हि सा । हिंसा च प्रतिषिद्धेति । कथं पुनरनर्थः कर्त्तव्यतयोपदिश्यते । उच्यते । नैव श्येनादयः कर्त्तव्या विज्ञायन्ते । यो हि हिंसितुमिच्छेत्, तस्यायमभ्युपाय इति हि तेषामुपदेशः । श्येनेनाऽभिचरन् यजेतेति हि समामनन्ति, न अभिचरितव्यमिति । नन्वऽशक्तमिदं सूत्रम् इमावर्थावभिवदितुम्– चोदनालक्षणो धर्मः, न इन्द्रियादिलक्षणः; अर्थश्च धर्मः. न अनर्थ इति । एकं हीदं वाक्यं, तदेवं सति भिद्येत । उच्यते । यत्र वाक्यादर्थोऽवगम्यते, तत्रैवम् । तत्तु वैदिकेषु, न सूत्रेषु । अन्यतोऽवगतेऽर्थे, सू-

त्रम् एवमर्थमिदमित्यवगम्यते । तेन च, एकदेशः सूत्र्यत इति सूत्रम् । तत्र भिन्नयोरेव वाक्ययोरिमावेकदेशावित्यवगन्तव्यम् । अथवा अर्थस्य सतश्चोदनालक्षणस्य धर्मत्वमुच्यते इत्येकार्थमेवेति ॥ २ ॥ धर्मलक्षणाऽधिकरणम् ॥ २ ॥

तस्य निमित्तपरीष्टिः ॥ ३ ॥

उक्तमस्माभिः, चोदनानिमित्तं धर्मस्य ज्ञानमिति । तत् प्रतिज्ञामात्रेणोक्तम्, इदानीं तस्य निमित्तं परीक्षिष्यामहे । किं चोदनैवेति, अन्यदपीति । तस्मान्न तावन्निश्चीयते चोदना लक्षणोऽर्थो धर्म इति । तदुच्यते ॥ ३ ॥ ॥ धर्मप्रामाण्यपरीक्षाऽधिकरणम् ॥ ३ ॥

सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षम् अनिमित्तं विद्यमानोपलम्भनत्वात् ॥ ४ ॥

इदं परीक्ष्यते । प्रत्यक्षं तावदनिमित्तम् । किं कारणम् । एवंलक्षणकं हि तत् । सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म, तत् प्रत्यक्षम् । सति इन्द्रियार्थसम्बन्धे या पुरुषस्य बुद्धिर्जायते, तत् प्रत्यक्षम् । भविष्यँश्च एषोऽर्थो न ज्ञानकालेऽस्तीति । सतश्चैतदुपलम्भनं, नासतः । अतः प्रत्यक्षमनिमित्तम् । बुद्धिर्वा, जन्म वा, सन्निकर्षो वेति नैषां कस्यचिदवधारणार्थमेतत् सूत्रम् । सति इन्द्रियाऽर्थसम्प्रयोगे, नासति इत्येतावदवधार्य्यते । अनेकस्मिन्नवधार्य्यमाणे भिद्येत वाक्यम् । प्रत्यक्षपूर्वकत्वाच्चानुमानोपमानार्थापत्तीनामप्यकारणत्वमिति ॥ ४ ॥ ॥ धर्मे प्रत्यक्षस्याऽप्रामाण्याऽधिकरणम् ॥ ४ ॥

अभावोऽपि नास्ति यतः ।

औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत् प्रमाणं बादरायणस्यानपेक्षत्वात् ॥ ५ ॥

औत्पत्तिक इति नित्यं ब्रूमः । उत्पत्तिर्हि भाव उच्यते लक्षणया । अवियुक्तः शब्दार्थयोर्भावः सम्बन्धो, नोत्पन्नयोः पश्चात् सम्बन्धः । औत्पत्तिकः शब्दस्यार्थेन सम्बन्धः, तस्य अग्निहोत्रादिलक्षणस्य धर्मस्य निमित्तं प्रत्यक्षादिभिरनवगतस्य । कथम् । उपदेशो हि भवति । उपदेश इति विशिष्टस्य शब्दस्य उच्चारणम् । अव्यतिरेकश्च

ज्ञानस्य । न हि तदुत्पन्नं ज्ञानं विपर्य्येति । यच्च नाम ज्ञानं न विपर्य्येति, न तच्छक्यते वक्तुं, न एतदेवमिति । यथा भवति– यथा विज्ञायते, न तथा भवति यथैतच्च विज्ञायते, तथैतदिति । अन्यद्स्य हृदये, अन्यद्वाचि स्यात् । एवं वदतो विरुद्धमिदं गम्यते, अस्ति, नास्ति चेति तस्मात् तत् प्रमाणमनपेक्षत्वात् । न ह्येवं सति प्रत्ययाऽन्तरमपेक्षितव्यं, पुरुषान्तरं वापि । अयं प्रत्ययो ह्यसौ । बादरायणग्रहणं बादरायणस्येदं मतं कीर्त्यते बादरायणं पूजयितुं, नात्मीयं मतं पर्य्युदसितुम् ॥

वृत्तिकारस्तु अन्यथेमं ग्रन्थं वर्णयाञ्चकार, तस्य निमित्तपरीष्टिरित्येवमादिम् । न परीक्षितव्यं निमित्तं, प्रत्यक्षादीनि हि प्रसिद्धानि, प्रमाणानि, तदन्तर्गतं च शास्त्रम्, अतस्तदपि न परीक्षितव्यम् । अत्रोच्यते । व्यभिचारात् परीक्षितव्यम् । शुक्तिका हि रजतवत् प्रकाशते यतः, तेन प्रत्यक्षं व्यभिचरति, तन्मूलत्वाच्चानुमानादीन्यपि तत्रापरीक्ष्य प्रवर्त्तमानोऽर्थाद् विहन्येत, अनर्थं चाप्नुयात् कदाचित् । नैतदेवं यत् प्रत्यक्षं, न तद् व्यभिचरति, यद् व्यभिचरति, न तत् प्रत्यक्षम् । किं तर्हि प्रत्यक्षम् । तत्संप्रयोगे पुरुषस्य इन्द्रियाणां बुद्धिजन्म सत्प्रत्यक्षम् । यद्विषयं ज्ञानं तेनैव संप्रयोगे इन्द्रियाणां पुरुषस्य बुद्धिजन्म सत्प्रत्यक्षं, यदन्यविषयज्ञानमन्यसंप्रयोगे भवति, न तत् प्रत्यक्षम् । कथं पुनरिदमवगम्यते- इदं तत्संप्रयोगे, इदमन्यसंप्रयोगे इति । यद् न अन्यसंप्रयोगे, तत् तत्संप्रयोगे, एतद्विपरीतमन्यसंप्रयोगे इति । कथं ज्ञेयम् ? यच्छुक्तिकायामपि रजतं मन्यमानो रजतसंनिकृष्टं मे चक्षुरिति मन्यते । बाधकं हि यत्र ज्ञानमुत्पद्यते, नैतदेवं, मिथ्याज्ञानमिति तत् अन्यसंप्रयोगे । विपरीतं तत्संप्रयोगे इति । प्राग्बाधकज्ञानोत्पत्तेः कथमवगम्यते, यदा न तत्काले सम्यग्ज्ञानस्य मिथ्याज्ञानस्य वा कश्चिद्विशेषः । यदा हि चक्षुरादिभिरुपहतं मनो भवति, इन्द्रियं वा तिमिरादिभिः, सौक्ष्म्यादिभिर्बाह्यो वा विषयः, ततो मिथ्याज्ञानम् । अनुपहतेषु हि सम्यग्ज्ञानम् । इन्द्रियमनोऽर्थसंनिकर्षो हि सम्यग्ज्ञानस्य हेतुः । असति तस्मिन्मिथ्याज्ञानम् । तदुभयगतो दोषो मिथ्याज्ञानस्य हेतुः । दुष्टेषु हि ज्ञानं मिथ्या भवति । कथमवगम्यते । दोषापगमे संप्रतिपत्तिदर्शनात् । कथं दुष्टादुष्टावगम इति चेत्, प्रयत्नेनान्विच्छन्तो न चेद्दोषमवगच्छेमहि, प्रमाणा-

भावादुदुष्टमिति मन्येमहि । तस्माद् यस्य च दुष्टं करणं, यत्र च मिथ्येति प्रत्ययः, स एवासमीचीनः प्रत्ययो, नान्य इति ॥

ननु सर्व एव निरालम्बनः स्वप्नवत् प्रत्ययः । प्रत्ययस्य हि निरालम्बनता स्वभाव उपलक्षितः स्वप्ने । जाग्रतोऽपि, स्तम्भ इति वा, कुड्य इति वा प्रत्यय एव भवति । तस्मात् सोऽपि निरालम्बनः । उच्यते । स्तम्भ इति जाग्रतो बुद्धिः सुपरिनिश्चिता कथं विपर्यसिष्यतीति । स्वप्नेऽप्येवमेव सुपरिनिश्चिताऽऽसीत् । प्राक् प्रबोधनाद्. न तत्र कश्चिद्विशेष इति । न । स्वप्ने विपर्ययदर्शनात् । अविपर्ययाच्च इतरस्मिन् । तत्सामान्यादितरत्रापि भविष्यतीति चेत् । यदि प्रत्ययत्वात् स्वप्नप्रत्ययस्य मिथ्याभावः, जाग्रत्प्रत्ययस्यापि तथा भवितुमर्हति । अथ प्रतीतिस्तथाभावस्य हेतुः, न शक्यते प्रत्ययत्वाद् अयमन्य इति वक्तुम् । अन्यतस्तु स्वप्नप्रत्ययस्य मिथ्याभावो विपर्ययादवगतः । कुत इति चेत् । सनिद्रस्य मनसो दौर्बल्यान्निद्रा मिथ्याभावस्य हेतुः स्वप्नादौ स्वप्नान्ते च । सुषुप्तस्याभाव एव । अचेतयन्नेव हि, सुषुप्त इत्युच्यते । तस्माज्जाग्रतः प्रत्ययो न मिथ्येति ॥ ननु जाग्रतोऽपि करणदोषः स्यात् । यदि स्याद्, अवगम्येत । स्वप्नदर्शनकालेऽपि नावगम्यते इतिचेत् । तत्र प्रबुद्धो ह्यवगच्छति निद्राक्रान्तं मे मन आसीदिति ॥

शून्यस्तु । कथम् । अर्थज्ञानयोराकारभेदं नोपलभामहे । प्रत्यक्षा च नो बुद्धिः । अतस्तद्भिन्नमर्थरूपं नाम न किञ्चिदस्तीति पश्यामः । स्यादेतदेवं, यद्यर्थाकारा बुद्धिः स्याद्, निराकारा तु नो बुद्धिः । आकारवान् बाह्योऽर्थः । स हि बहिर्देशसंबद्धः प्रत्यक्षमुपलभ्यते । अर्थविषया हि प्रत्यक्षबुद्धिः, न बुद्ध्यन्तरविषया । क्षणिका हि सा, न बुद्ध्यन्तरकालमवस्थास्यते इति । उत्पद्यमानैवासौ ज्ञायते । ज्ञापयति च अर्थान्तरं, प्रदीपवदिति यद् उच्यते । तन्न । न ह्यज्ञातेऽर्थे कश्चिद् बुद्धिमुपलभते । ज्ञाते तु अनुमानादवगच्छति । तत्र यौगपद्यमनुपपन्नम् । ननूत्पन्नायामेव बुद्धौ, ज्ञातोऽर्थ इत्युच्यते, नानुत्पन्नायाम् । अतः पूर्वं बुद्धिरुत्पद्यते, पश्चाज्ज्ञातोऽर्थः । सत्यम् । पूर्वं बुद्धिरुत्पद्यते, न तु पूर्वं ज्ञायते । भवति हि कदाचिदेतद्, यज्ज्ञातोऽप्यर्थः सन् अज्ञात इत्युच्यते । न चार्थव्यपदेशमन्तरेण बुद्धेः रूपोपलम्भनम् । तस्मान्नाव्यपदेश्या बुद्धिः, अव्यपदेश्यं च नाप्रत्यक्षम् । तस्मादप्रत्यक्षा

बुद्धिः । अपि च काममेकरूपत्वे बुद्धेरेवाभावः, नार्थस्य प्रत्यक्षस्य सतः । न च ऐकरूप्यम् । अनाकारामेव हि बुद्धिमनुमिमीमहे, साकारं चार्थं प्रत्यक्षमेवावगच्छामः । तस्मादर्थालम्बनः प्रत्ययः । अपिच, नियतनिमित्तस्तन्तुष्वेवोपादीयमानेषु पटप्रत्ययः । इतरथा तन्त्वादानेऽपि कदाचिद् घटबुद्धिरविकलेन्द्रियस्य स्यात् । न चैवमस्ति । अतो न निरालम्बनः प्रत्ययः । अतो न व्यभिचरति प्रत्यक्षम् ॥

अनुमानं ज्ञातसम्बन्धस्यैकदेशदर्शनादेकदेशान्तरेऽसन्निकृष्टेऽर्थे बुद्धिः । तत्तु द्विविधं-प्रत्यक्षतोदृष्टसंबन्धं, सामान्यतोदृष्टसंबन्धं च । प्रत्यक्षतोदृष्टसंबन्धं यथा, धूमाकृतिदर्शनादग्न्याकृतिविज्ञानम् । सामान्यतोदृष्टसंबन्धं यथा, देवदत्तस्य गतिपूर्विकां देशान्तरप्राप्तिमुपलभ्यादित्यगतिस्मरणम् । शास्त्रं शब्दविज्ञानादसन्निकृष्टेऽर्थे विज्ञानम् ॥

उपमानमपि, सादृश्यम् असन्निकृष्टेऽर्थे बुद्धिमुत्पादयति । यथा, गवयदर्शनं गोस्मरणस्य ।

अर्थापत्तिरपि-दृष्टः, श्रुतो वाऽर्थोऽन्यथा नोपपद्यते इत्यर्थकल्पना । यथा, जीवति देवदत्ते गृहाभावदर्शनेन बहिर्भावस्यादृष्टस्य कल्पना ॥

अभावोऽपि प्रमाणाभावो, नास्ति-इत्यस्यार्थस्यासन्निकृष्टस्य ॥ तस्मात् प्रसिद्धत्वान्न परीक्षितव्यं निमित्तम् ॥

ननु प्रत्यक्षादीन्यन्यानि भवन्तु नाम प्रमाणानि, शब्दस्तु न प्रमाणम् । कुतः ? । अनिमित्तं विद्यमानोपलम्भनत्वात् । अनिमित्तम् । अप्रमाणं शब्दः । यो ह्युपलम्भनविषयो नोपलभ्यते, स नास्ति । यथा शशस्य विषाणम् । उपलम्भकानि चेन्द्रियाणि पश्वादीनाम् । न च, पशुकामेष्ट्यनन्तरं पशव उपलभ्यन्ते । अतो नेष्टिः पशुफला । कर्मकाले च फलेन भवितव्यम् । यत्कालं हि मर्दनं, तत्कालं मर्दनसुखम् । कालान्तरे फलं दास्यति इति चेन्न । न कालान्तरे फलमिष्टेः—इत्यवगच्छामः । कुतः ? । यदा तावदसौ विद्यमाना आसीत्, तदा फलं न दत्तवती । यदा फलमुत्पद्यते, तदाऽसौ नास्ति । असती कथं दास्यति ? । अपिच तत्काल एव फलं श्रूयते, यागः करणमिति वाक्यादवगम्यते, कारणं चेदुत्पन्नं, कार्य्येण भवितव्यमिति ॥

प्रत्यक्षं च फलकारणमन्यदुपलभामहे । न च दृष्टे कारणे सति, अदृष्टं कल्पयितुं शक्यते । प्रमाणाभावात् । एवं दृष्टापचारस्य वेदस्य स्वर्गाद्यपि फलं न भवतीति मन्यामहे । दृष्टविरुद्धमपि भवति किञ्चिद्वचनम् । पात्रचयनं विधायाह– स एष यज्ञायुधी यजमानोऽञ्जसा स्वर्गं लोकं यातीति प्रत्यक्षं शरीरकं व्यपदिशति । न च तत् स्वर्गं लोकं यातीति । प्रत्यक्षं हि तद्दह्यते । न चैष याति इति विधिशब्दः । एवञ्जातीयकं प्रमाणविरुद्धं वचनमप्रमाणम् । अम्बुनि मज्जन्त्यलाबूनि, ग्रावाणः प्लवन्ते इति यथा । तत्सामान्यादग्निहोत्रादिचोदनास्वप्यनाश्वासः । तस्मान्न चोदनालक्षणोऽर्थो धर्मः ॥

औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धस्तस्य ज्ञानम् । तुशब्दः पक्षं व्यावर्त्तयति । अपौरुषेयः शब्दस्यार्थेन संबन्धः । तस्य अग्निहोत्रादिलक्षणस्यार्थस्य ज्ञानं प्रत्यक्षादिभिरनवगम्यमानस्य । तथाच चोदनालक्षणः सम्यक् संप्रत्यय इति । पौरुषेये हि शब्दे यः प्रत्ययः, तस्य मिथ्याभाव आशङ्क्येत । परप्रत्ययो हि तदा स्यात् । अथ शब्दे ब्रुवति कथं मिथ्येति ? । न हि तदानीमन्यतः पुरुषाद् अवगतिमिच्छामः । ब्रवीतीत्युच्यते— बोधयति बुद्ध्यमानस्य निमित्तं भवतीति शब्दे च निमित्ते स्वयं बुद्ध्यते । कथं विप्रलब्धं ब्रूयाद्, नैतदेवमिति । नचास्य चोदना, स्याद्वा न इति सांशयिकं प्रत्ययमुत्पादयति । न च मिथ्यैतदिति कालान्तरे, देशान्तरेऽवस्थान्तरे, पुरुषान्तरे वा पुनरव्यपदेश्यप्रत्ययो भवति । योऽप्यस्य प्रत्ययविपर्य्यासं दृष्ट्वाऽत्रापि विपर्य्यसिष्यतीत्यानुमानिकः प्रत्यय उत्पद्यते, सोऽप्यनेन प्रत्यक्षेण प्रत्ययेन विरुद्ध्यमानो बाध्यते । तस्माच्चोदनालक्षण एव धर्मः ॥

स्यादेतदेवं, नैव शब्दस्यार्थेन सम्बन्धः, कुतोऽस्य पौरुषेयता अपौरुषेयता वेति । कथम् ? । स्याच्चेदर्थेन सम्बन्धः, क्षुरमोदकशब्दोच्चारणे मुखस्य पाटनपूरणे स्याताम् । यदि संश्लेषलक्षणं सम्बन्धमभिप्रेत्योच्यते । कार्य्यकारणनिमित्तनैमित्तिकाऽऽश्रयाश्रयिभावसंयोगादयस्तु सम्बन्धाः शब्दस्यानुपपन्ना एवेति ॥

उच्यते । यो ह्यत्र व्यपदेश्यः सम्बन्धः, तमेकं न व्यपदिशति भवान्, प्रत्याय्यस्य, प्रत्यायकस्य च यः सञ्ज्ञासञ्ज्ञिलक्षण इति । आह । यदि प्रत्यायकः शब्दः, प्रथमश्रुतः किं न प्रत्याययति ? उच्यते । सर्वत्र नो दर्शनं प्रमाणम् । प्रत्यायक इति हि प्रत्ययं दृष्ट्वा-

ऽवगच्छामो, न प्रथमश्रुत इति प्रथमश्रवणे प्रत्ययमद्दष्ट्वा । यावत्कृत्व श्रुतेन, इयं संज्ञा, अयं संज्ञीत्यवधारितं भवति, तावत्कृत्वः श्रुतादर्थावगम इति । यथा चक्षुर्दृष्टृ, न बाह्येन प्रकाशेन विना प्रकाशयतीत्यद्रष्टृ न भवति । यदि प्रथमश्रुतो न प्रत्याययति, कृतकस्तर्हि शब्दस्यार्थेन सम्बन्धः । कुतः । स्वभावतो ह्यसम्बन्धावेतौ शब्दार्थौ, मुखे हि शब्दमुपलभामहे, भूमावर्थम् । शब्दोऽयं न त्वर्थः, अर्थोऽयं न शब्द इति च व्यपदिशन्ति । रूपभेदोऽपि भवति । गौः इतीमं शब्दमुच्चारयन्ति, सास्नादिमन्तमर्थमवबुध्यन्ते इति । पृथग्भूतयोश्च यः सम्बन्धः, स कृतको दृष्टो, यथा रज्जुघटयोरिति ॥

अथ, गौः इत्यत्र कः शब्दः ? । गकारौकारविसर्जनीया इति भगवानुपवर्षः, श्रोत्रग्रहणे हि अर्थे लोके शब्दशब्दः प्रसिद्धः । ते च श्रोत्रग्रहणाः । यद्येवम्, अर्थप्रत्ययो नोपपद्यते । कथम् । एकैकाक्षरविज्ञानेऽर्थो नोपलभ्यते । न चाक्षरव्यतिरिक्तोऽन्यः कश्चिदस्ति समुदायो नाम, यतोऽर्थप्रतिपत्तिः स्यात् । यदा गकारः, न तदा औकारविसर्जनीयौ । यदौकारविसर्जनीयौ, न तदा गकारः । अतो गकारादिव्यतिरिक्तोऽन्यो गोशब्दोऽस्ति, यतोऽर्थप्रतिपत्तिः स्यात् । अन्तर्हिते शब्दे स्मरणादर्थप्रतिपत्तिश्चेन्न ; स्मृतेरपि क्षणिकत्वादक्षरैस्तुल्यता । पूर्ववर्णजनितसंस्कारसहितोऽन्त्यो वर्णः प्रत्यायक इत्यदोषः ॥

नन्वेवं, शब्दादर्थं प्रतिपद्यामहे इति लौकिकं वचनमनुपपन्नं स्यात् । उच्यते । यदि नोपपद्यते, अनुपपन्नं नाम । न हि लौकिकं वचनमनुपपन्नमित्येतावता प्रत्यक्षादिभिरनवगम्यमानोऽर्थः शक्योऽभ्युपगन्तुम् । लौकिकानि वचनान्युपपन्नार्थानि, अनुपपन्नार्थानि च दृश्यन्ते । यथा, देवदत्त ! गामभ्याज इत्येवमादीनि, दश दाडिमानि षडपूपा इत्येवमादीनि च ॥

ननु च शास्त्रकारा अप्येवमाहुः-पूर्वापरीभूतं भावमाख्यातेनाचष्टे व्रजति, पचति इत्युपक्रमप्रभृत्यऽपवर्गपर्य्यन्तमिति यथा । न शास्त्रकारवचनमप्यऽलमिममर्थमप्रमाणकमुपपादयितुम् । अपिच, नैवैतद् अनुपपन्नार्थम् । अक्षरेभ्यः संस्काराः, संस्कारादर्थप्रतिपत्तिरिति सम्भवति अर्थप्रतिपत्तौ अक्षराणि निमित्तम् । गौण एवार्थप्रतिपत्तौ शब्द इति चेद्, न गौणोऽक्षरेषु निमित्तभावः । तद्भावे भावात्, तदऽभावे चाऽभावात् ॥

अथापि गौणः स्यात् । न, गौणः शब्दो मा भूदिति प्रत्यक्षादिभिरनवगम्यमानोऽर्थः शक्यः परिकल्पयितुम् । न हि, अग्निर्माणवक इत्युक्ते, अग्निशब्दो गौणो मा भूदिति ज्वलन एव माणवक इत्यध्यवसीयते । न च प्रत्यक्षो गकारादिभ्योऽन्यो गोशब्द इति । भेददर्शनाभावात्, अभेददर्शनाच्च । गकारादीनि हि प्रत्यक्षाणि । तस्माद् 'गौः' इति गकारादिविसर्जनीयान्तं पदम् अक्षराण्येव । अतो न तेभ्यो व्यतिरिक्तमन्यत् पदं नामेति । ननु संस्कारकल्पनायामप्यदृष्टकल्पना । उच्यते । शब्दकल्पनायां सा च, शब्दकल्पना च । तस्मादक्षराण्येव पदम् ॥

अथ, गौः–इत्यस्य शब्दस्य कोऽर्थः । सास्नादिविशिष्टाऽऽकृतिरिति ब्रूमः । नन्वाकृतिः साध्याऽस्ति वा, न वा ? इति । न प्रत्यक्षा सती साध्या भवितुमर्हति । रुचकः, स्वस्तिको, वर्द्धमानक इति हि प्रत्यक्षं दृश्यते । व्यामोह इति चेन्न । न, असति प्रत्ययाविपर्यासे व्यामोह इति शक्यते वक्तुम् । असत्यप्यर्थान्तरे एवञ्जातीयको भवति प्रत्ययः–पङ्क्तिः, यूथं, वनमिति यथेति चेत् । न । असम्बद्धमिदं वचनमुपन्यस्तम् । किम्, असति वने वनप्रत्ययो भवतीति ? । प्रत्यक्षमेवाक्षिप्यते, वृक्षा अपि न सन्तीति । यद्येवं, प्रत्युक्तः स माहाजानिकः पक्षः । अथ किमाकृतिसद्भाववादी उपालभ्यते, सिद्धान्तान्तरं ते दुष्यति इति, वनेऽपि सति वनप्रत्ययः प्राप्नोतीति । एवमपि, प्रकृतं दूषयितुमशक्नुवतस्तत्सिद्धान्तान्तरदूषणे निग्रहस्थानमापद्यते । असाधकत्वात् । स हि वक्ष्यति–दुष्यतु, यदि दुष्यति, किं तेन दुष्टेन, अदुष्टेन वा प्रकृतं त्वया साधितं भवति, मदीयो वा पक्षो दूषितो भवति ? इति । न च वृक्षव्यतिरिक्तं वनं यस्मान्नोपलभ्यते, अतो वनं नास्तीत्यवगम्यते । यदि वने अन्येन हेतुना सद्भावविपरीतः प्रत्यय उत्पद्यते, मिथ्यैव वनप्रत्यय इति । ततो, वनं नास्तीत्यवगच्छामः । न च गवादिषु प्रत्ययो विपर्येति । अतो वैषम्यम् । अथ वनादिषु नैव विपर्येति, न ते न सन्तीति । तस्मात् असम्बद्धः पङ्क्तिवनोपन्यासः । अत उपपन्नं जैमिनिवचनम्–आकृतिः शब्दार्थ इति । यथा च आकृतिः शब्दार्थस्तथोपरिष्टान्निपुणतरमुपपादयिष्याम इति ॥

अथ, सम्बन्धः क इति । यत्, शब्दे विज्ञातेऽर्थो विज्ञायते । स

तु कृतक इति पूर्वमुपपादितम् । तस्मान्मन्यामहे केनापि पुरुषेण शब्दानामर्थैः सह सम्बन्धं कृत्वा संव्यवहर्त्तुं वेदाः प्रणीता इति । तदिदानीमुच्यते, अपौरुषेयत्वात् सम्बन्धस्य सिद्धमिति । कथं पुनरिदमवगम्यते, अपौरुषेय एष सम्बन्ध इति । पुरुषस्य सम्बन्धुरभावात् । कथं सम्बन्धा नास्ति ? । प्रत्यक्षस्य प्रमाणस्याभावात्, तत्पूर्वकत्वाच्चेतरेषाम् । ननु चिरवृत्तत्वात् प्रत्यक्षस्याविषयो सवेदिदानीन्तनानाम् । न हि चिरवृत्तः सन् न स्मर्य्येत । न च हिमवदादिषु कूपारामादिवदस्मरणं भवितुमर्हति । पुरुषवियोगो हि तेषु भवति, देशोत्सादेन कुलोत्सादेन वा । न च शब्दाऽर्थव्यवहारावियोगः पुरुषाणामस्ति ।

स्यादेतत्–सम्बन्धमात्रव्यवहारिणो निष्प्रयोजनं कर्त्तृस्मरणमनाद्रियमाणा विस्मरेयुरिति । तन्न । यदि हि पुरुषः कृत्वा सम्बन्धं व्यवहारयेत् व्यवहारकाले अवश्यं स्मर्त्तव्यो भवति । संप्रतिपत्तौ हि कर्त्तृव्यवहर्त्रोरर्थः सिद्ध्यति, न विप्रतिपत्तौ । न हि वृद्धिशब्देन अपाणिनेर्व्यवहारत आदैचः प्रतीयेरन्, पाणिनिकृतिमननुमन्यमानस्य वा । तथा मकारेण अपिङ्गलस्य न सर्वगुरुस्त्रिकः प्रतीयेत, पिङ्गलकृतिमननुमन्यमानस्य वा । तेन कर्तृव्यवहर्त्तारौ संप्रतिपद्येते । तेन वेदे व्यवहरद्भिरवश्यं स्मरणीयः सम्बन्धस्य कर्त्ता स्यात्, व्यवहारस्य च । न हि विस्मृते, वृद्धिरादैच् इत्यस्य सूत्रस्य कर्त्तरि, वृद्धिर्यस्याचामादिरिति किञ्चित् प्रतीयेत ॥

तस्मात् कारणादवगच्छामो–न, कृत्वा संबन्धं व्यवहारार्थं केनचिद् वेदाः प्रणीता इति । यद्यपि च विस्मरणमुपपद्येत, तथापि न प्रमाणमन्तरेण संबन्धारं प्रतिपद्येमहि । यथा, विद्यमानस्याप्यनुपलम्भनं भवतीति, नैतावता विना प्रमाणेन शशविषाणं प्रतिपद्यामहे । तस्मादपौरुषेयः शब्दस्यार्थेन संबन्ध इति ॥

नन्वऽर्थापत्त्या संबन्धारं प्रतिपद्येमहि । न ह्यकृतसंबन्धाच्छब्दादर्थं प्रतिपद्यमानान् उपलभामहे । प्रतिपद्येरँश्चेत्, प्रथमश्रवणेऽपि प्रतिपद्येरन् । तदनुपलम्भनादवश्यं भवितव्यं संबन्धेतिचेन्न । सिद्धवदुपदेशात् । यदि संबन्धुरभावाद् नियोगतो नाऽर्था उपलभ्येरन्, ततोऽर्थापत्त्या सम्बन्धारमवगच्छामः । अस्ति तु अन्यः प्रकारः । वृद्धानां स्वार्थेन संव्यवहरमाणानामुपशृण्वन्तो बालाः प्रत्यक्षमर्थं

प्रतिपद्यमाना दृश्यन्ते । तेऽपि वृद्धा यदा बाला आसँस्तदाऽन्येभ्यो वृद्धेभ्यः, तेऽप्यन्येभ्य इति, नास्त्यादिरित्येवं वा भवेत् । अथवा न कश्चिदेकोऽपि शब्दस्यार्थेन सम्बन्ध आसीत्, अथ केनचित् सम्बन्धाः प्रवर्त्तिता इति । अत्र वृद्धव्यवहारे सति नार्थादापद्येत सम्बन्धस्य कर्त्ता । अपिच व्यवहारवादिनः प्रत्यक्षमुपदिशन्ति कल्पयन्ति इतरे सम्बन्धारम् । न च प्रत्यक्षे प्रत्यर्थिनि कल्पना साध्वी । तस्मात् सम्बन्धुरभावः ॥

अव्यतिरेकश्च । यथा अस्मिन् देशे सास्नादिमति गोशब्दः, एवं सर्वेषु दुर्गमेष्वपि बहवः सम्बन्धारः कथं सङ्गस्यन्ते । एको न शक्नुयात् । अतो नास्ति सम्बन्धस्य कर्त्ता । अपर आह, अव्यतिरेकश्च । न हि सम्बन्धव्यतिरिक्तः कश्चित् कालोऽस्ति, यस्मिन् न कश्चिदपि शब्दः केनचिदर्थेन सम्बद्ध आसीत् । कथम् । सम्बन्धक्रियैव हि नोपपद्यते । अवश्यमनेन सम्बन्धं कुर्वता केनचिच्छब्देन कर्त्तव्यः । येन क्रियेत, तस्य केन कृतः । अथान्येन केनचित् कृतः,तस्य केनेति, तस्य केनेति ? नैवावतिष्ठते । तस्मादवश्यमनेन सम्बन्धं कुर्वता अकृतसम्बन्धाः केचन शब्दा वृद्धव्यवहारसिद्धा अभ्युपगन्तव्याः । अस्ति चेत् व्यवहारसिद्धिः, न नियोगतः सम्बन्धा भवितव्यमिति अर्थापत्तिरपि नास्ति ॥

स्यादेतत्, अप्रसिद्धसम्बन्धा बालाः कथं वृद्धेभ्य प्रतिपद्यन्ते इति । नास्ति दृष्टेऽनुपपन्नं नाम । दृष्टा हि बाला वृद्धेभ्यः प्रतिपद्यमानाः । न च प्रतिपन्नसम्बन्धाः सम्बन्धस्य कर्तुः । तस्माद्वैषम्यम् ॥

अर्थेऽनुपलब्धे । अनुपलब्धे च देवदत्तादावर्थेऽनर्थकं संज्ञाकरणम् । अशक्यं च । विशेषान् प्रतिपत्तुं हि संज्ञाः क्रियन्ते । विशेषाँश्चोद्दिश्य, तद्विशेषेष्वज्ञायमानेषु उभयमप्यनवक्लृप्तम् । तस्माद् अपौरुषेयः शब्दस्यार्थेन सम्बन्धः । अतश्च तत् प्रमाणमनपेक्षत्वात् । न चैवं सति पुरुषान्तरं प्रत्ययान्तरञ्चापेक्ष्यते । तस्माच्चोदनालक्षण एव धर्मो, नान्यलक्षणः । बादरायणग्रहणमुक्तम् ॥

अथ यदुक्तम्- अनिमित्तं शब्दः, कर्मकाले फलादर्शनात्, कालान्तरे च कर्माभावात् प्रमाणं नास्तीति । तदुच्यते । न स्यात् प्रमाणं, यदि पञ्चैव प्रमाणान्यभविष्यन् । येन येन हि प्रमीयते तत्तत् प्रमाणम् । शब्देनापि प्रमीयते, ततः शब्दोऽपि प्रमाणम् । यथैव प्रत्यक्षम् । न च

प्रमाणेनावगतं प्रमाणान्तरेणानवगतमित्येतावता अनवगतं भवति । न चैवं श्रूयते कृते कर्म्मणि तावतैव फलं भवति, किन्तु, कर्मणः फलं प्राप्यते इति। यच्च– कालान्तरे फलस्यान्यत् प्रत्यक्षं कारणमस्तीति । नैष दोषः । तच्चैव हि तत्र कारणं, शब्दश्चेति ॥

यत्तु प्रत्यक्षविरुद्धं वचनमुपन्यस्तं– स एष यज्ञायुधी यजमानोऽञ्जसा स्वर्गं लोकं यातीति प्रत्यक्षं शरीरकं व्यपदिशतीति । तदुच्यते, शरीरसम्बन्धात् । यस्य तच्छरीरं, सोऽपि तैर्यज्ञायुधैर्यज्ञायुधीत्युच्यते ॥

आह— कोऽसावन्यो ? नैनमुपलभामहे । प्राणाऽऽदिभिरेनमुपलभामहे, योऽसौ प्राणिति, अपानिति, उच्छ्वसिति, निमिषति, इत्यादि चेष्टितवान्, सोऽत्र शरीरे यज्ञायुधी इति । ननु शरीरमेव प्राणिति अपानिति च । न । प्राणादयः शरीरगुणविधर्माणः । अयावच्छरीरभावित्वात् । यावच्छरीरं, तावदस्य गुणा रूपादयः । प्राणादयस्तु सत्यपि शरीरे न भवन्ति । सुखादयश्च स्वयमुपलभ्यन्ते, न रूपादय इव शरीरगुणाः परेणापीति । तस्माच्छरीरगुणवैधर्म्यादन्यः शरीराद् यज्ञायुधीति ॥

आह– कुत एष संप्रत्ययः, सुखादिभ्योऽन्यस्तद्वानस्तीति ? न हि सुखादिप्रत्याख्यानेन तस्य स्वरूपमुपलभामहे । तस्माच्छशविषाणवदसौ नास्ति । अथोच्यते, तेन विना कस्य सुखादय इति ?। न कस्यचिदपीति वक्ष्यामः । न हि यो य उपलभ्यते, तस्य तस्य संबन्धिना भवितव्यम् । यस्य संबन्धोऽप्युपलभ्यते, सम्बन्धी च तस्यायं सम्बन्धीति गम्यते। न हि चन्द्रमसम्, आदित्यं वोपलभ्य सम्बन्धान्वेषणा भवति, कस्यायमिति। न कस्य चिदपीत्यवधार्यते । तस्मान्न सुखादिभ्योऽन्यस्तद्वानस्तीति। अथ, उपलब्धस्यावश्यं कल्पयितव्यः सम्बन्धी भवति। तत आत्मानमप्यनेन प्रकारेणोपलभ्य, कस्यायमिति सम्बन्ध्यन्तरमन्विष्येम । तमपि कल्पयित्वाऽन्यमपि कल्पयित्वा, अन्यमित्यव्यवस्थैव स्यात् । अथ कञ्चित् कल्पयित्वा न सम्बन्ध्यन्तरमपि कल्पयिष्यसि, तावत्येव विरंस्यसि, तावता च परितोष्यसि, ततो विज्ञाने एव परितुष्य तावत्येव विरन्तुमर्हसि ॥

अत्रोच्यते । यदि विज्ञानादन्यो नास्ति कस्तर्हि, जानाति–इत्युच्यते ?। ज्ञानस्य कर्त्तुरभिधानमनेन शब्देनोपपद्यते । तदेष शब्दो-

ऽर्थवान् कर्त्तव्य इति ज्ञानाद् व्यतिरिक्तमात्मानं कल्पयिष्याम इति।

आह– वेदा एनं शब्दमर्थवन्तं कल्पयिष्यन्ति, यदि कल्पयितव्यं प्रमंस्यन्ते। बहवः खल्विह जनाः, अस्ति आत्मा, अस्ति आत्मा इत्यात्मसत्तावादिन एव शब्दस्य प्रत्यक्षवक्तारो भवन्ति, तथापि नाऽऽत्मसत्तां कल्पयितुं घटन्ते किमङ्ग पुनः, जानाति–इति परोक्षशब्ददर्शनात्। तस्माद् असदेतत्॥

उच्यते। इच्छया आत्मानमुपलभामहे। कथमिति?। उपलब्धपूर्वे हि अभिप्रेते भवतीच्छा। यथा, मेरुमुत्तरेण यान्यस्मज्जातीयैरनुपलब्धपूर्वाणि स्वादूनि वृक्षफलानि, न तानि प्रति अस्माकमिच्छा भवति। नो खल्वन्येन पुरुषेणोपलब्धेऽपि विषयेऽन्यस्योपलब्धुरिच्छा भवति। भवति च अन्येद्युरुपलब्धे अन्येद्युरिच्छा। तेन उपलम्भनेन समानकर्त्तृका सा इत्यवगच्छामः। यदि विज्ञानमात्रमेवेदमुपलम्भकमभविष्यत्, प्रत्यस्ते तस्मिन् कस्यापरेद्युरिच्छाऽभविष्यत्?। अथ नु विज्ञानादन्यो विज्ञाता नित्यः। तत एकस्मिन्नहनि य एवोपलब्धाऽपरेद्युरपि स एवैषिष्यतीति। इतरथा हीच्छा नोपपन्ना स्यात्।

अत्रोच्यते– अनुपपन्नमिति नः क संप्रत्ययः?। यन्न प्रमाणेनाऽवगतम्। विज्ञानात्तावदन्यं नोपलभामहे, यन्नोपलभामहे तच्छशविषाणवदेव नास्तीत्यवगच्छामः। न च तस्मिन्नसति विज्ञानसद्भावोऽनुपपन्नः। प्रत्यक्षावगतत्वादेव। क्षणिकत्वं चाऽस्य प्रत्यक्षपूर्वकमेव। न च ज्ञातरि विज्ञानादन्यस्मिन्नसति, ज्ञाने चाऽनित्ये अपरेद्युरिच्छा अनुपपन्ना प्रत्यक्षावगतत्वादेव। न खल्वप्येतद् दृष्टं, य एवान्येद्युरुपलब्धा स एवान्येद्युरेषिता इति। इदं तु दृष्टं, यत् कश्चिद् अन्येन दृष्टमन्य इच्छति, कश्चिन्न। समानायां सन्ततावन्य इच्छति सन्तत्यन्तरेणेच्छतीति। तस्मान्न सुखादिव्यतिरिक्तोऽन्योऽस्तीति॥

अत्रोच्यते। न ह्यस्मर्त्तार इच्छन्तीत्युपपद्यते, न वा अदृष्टपूर्वे स्मृतिर्भवति। तस्मात् क्षणिकविज्ञानस्कन्धमात्रे स्मृतिरनुपपन्नेति॥

अत्राह–स्मृतिरपि इच्छावत् पूर्वज्ञानसदृशं विज्ञानं, पूर्वविज्ञानविषयं वा, स्मृतिरित्युच्यते। तच्च द्रष्टरि विनष्टेऽपि अपरेद्युरुत्पद्यमानं नानुपपन्नम्। प्रत्यक्षावगतत्वादेव। अन्यस्मिन् स्कन्धघनेऽन्येन स्कन्धघनेन यज्ज्ञानं, तत्सन्ततिजेनान्येनोपलभ्यते, नातत्सन्ततिजेनाऽन्येन। तस्माच्छून्याः स्कन्धघना इति। अथास्मिन्नर्थे ब्राह्मणं भव-

ति- विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवाऽनुविनश्यति, न प्रेत्य संज्ञास्तीति । उच्यते । नैतदेवम् । अन्येद्युर्दृष्टेऽपरेद्युरहमिदमऽद्रर्शमिति भवति प्रत्ययः । प्रत्यगात्मनि चैतद्भवति, न परत्र । अपरो ह्यसावऽन्येद्युर्दृष्टवान् । तस्मात् तद्व्यतिरिक्तोऽन्योऽस्ति, यत्राऽयम् अहंशब्दः ॥

आह-परत्राप्यहंशब्दो भक्त्या दृश्यते । यथा, अहमेव पुत्रः, अहमेव देवदत्तः, अहमेव गच्छामीति । अत्रोच्यते । न वयम् अहमितीमं शब्दं प्रयुज्यमानमन्यस्मिन्नर्थे हेतुत्वेन व्यपदिशामः । किं तर्हि-शब्दाद् व्यतिरिक्तं प्रत्ययं प्रतीमो वयम् । इममर्थं वयमेवान्येद्युरुपलभामहे, वयमेवाद्य स्मराम इति । तस्माद् वयमिममर्थमवगच्छामो वयमेव ह्यः, वयमेवाद्य इति । ये ह्यः, अद्य च, न ते विनष्टाः । अथाऽप्यस्मिन्नर्थे ब्राह्मणं भवति, स वा अयमात्मेति प्रकृत्य आमनन्ति । अशीर्यो न हि शीर्य्यते इति । तथा, अविनाशी वा अरे अयमात्मा अनुच्छित्तिधर्मा इति । विनश्वरं च विज्ञानम् । तस्माद्विनश्वरादन्यः स इत्यवगच्छामः । न च शक्यमेवमवगन्तुं- यथोपलभ्यन्ते अर्थाः, न तथा भवन्तीति, यथा तु खलु नोपलभ्यन्ते तथा भवन्तीति । तथा हि सति शशो नास्ति, शशस्य विषाणमस्तीत्यवगम्येत । न चाहम्प्रत्ययो व्यामोह इति शक्यते वक्तुम् । बाधकप्रत्ययाभावात् । तस्मात् सुखादिभ्यो व्यतिरिक्तोऽस्ति । एवञ्चेत् स एव, यज्ञायुधी इति व्यपदिश्यते ॥

आह- यदि विज्ञानादन्यदस्ति विज्ञातृ, विज्ञानमपास्य तन्निदर्श्यताम्- इदं तद् ईदृशं चेति न च तन्निदर्श्यते । तस्मान्न ततोऽन्यदस्तीति । अत्रोच्यते । स्वसंवेद्यः स भवति, नासावन्येन शक्यते द्रष्टुं, कथमसौ निदर्श्येतेति । यथा च कश्चिच्चक्षुष्मान् स्वयं रूपं पश्यति, न च शक्नोत्यन्यस्मै जात्यन्धाय तन्निदर्शयितुम् । न च, तद् न शक्यते निदर्शयितुमित्येतावता, नास्तीत्यवगम्यते । एवमसौ पुरुषः स्वयमात्मानमुपलभते, न चान्यस्मै शक्नोति दर्शयितुम् । अन्यस्य द्रष्टुस्तं पुरुषं प्रति दर्शनशक्त्यभावात् । सोऽप्यन्यः पुरुषः स्वयमात्मानमुपलभते, न च परात्मानम् । तेन सर्वे स्वेन स्वेनात्मना आत्मानमुपलभमानाः सन्त्येव, यद्यपि परपुरुषं नोपलभन्ते इति । अथाऽस्मिन्नर्थे ब्राह्मणं भवति, शान्तायां वाचि किं ? ज्योतिरेवायं पुरु-

षः, आत्मज्योतिः सम्राडिति होवाचेति । परेण नोपलभ्यते इत्यत्राऽपि ब्राह्मणं भवति, अगृह्यो न हि गृह्यते इति । परेण न गृह्यते इत्येतदभिप्रायमेतत् । कुतः ? । स्वयञ्ज्योतिष्ट्ववचनात् । अथापि ब्राह्मणं भवति, अत्रायं पुरुषः स्वयञ्ज्योतिर्भवतीति । केन पुनरुपायेन अयमन्यस्मै कथ्यते इति । तत्राप्युपाये ब्राह्मणं भवति, स एव नेति नेत्यात्मेति होवाचेति । असौ एवंरूप इति न शक्यते निदर्शयितुम् । यच्च परः पश्यति, तत्प्रतिषेधस्तस्योपदेशोपायः । शरीरं परः पश्यति, तेनात्मा उपदिश्यते । शरीरं नात्मा, अस्ति शरीरादन्य इति । स चात्मेति शरीरप्रतिषेधेनोपदिश्यते । तथा प्राणादयो नात्मान, तत्प्रतिषेधेन तेभ्योऽन्य उपदिश्यते । तथा परस्थाः सुखादयः परेण लिङ्गैरुपलभ्यन्ते । तेऽपि नात्मान इति तत्प्रतिषेधेनान्य उपदिश्यते । यः स्वयं पश्यति, न ततोऽन्यः पुरुष इत्येतदपि पुरुषप्रवृत्त्याऽनुमीयते । यदाऽसौ पुरुषः पूर्वेद्युः सामिकृतानामर्थानां प्रतिसमाधाने शेषानुष्ठाने च यतते । अतः प्रवृत्त्याऽवगम्यते– नूनमसावनित्यान् नित्यमवगच्छतीति ॥

उपमानाच्चोपदिश्यते, यादृशं भवान् स्वयमात्मानं पश्यति, अनेनोपमानेनावगच्छ—अहमपि तादृशमेव पश्यामीति । यथा कश्चिदात्मीयां वेदनां परस्मा आचक्षीत, दह्यमानस्येव मे भवति, यास्यमानस्येव मे भवति, रुद्ध्यमानस्येव मे भवतीति । अतः स्वयमवगम्यमानत्वादस्ति तद्व्यतिरिक्तः पुरुष इति ॥

यदुच्यते– विज्ञानमपास्य तद् निदर्श्यतामिति । यद्युपायमेव निषेधसि, न शक्यमुपायमन्तरेणोपेयमुपेतुम् । अयमेवाभ्युपायो ज्ञातव्यानामर्थानां, यो यथा ज्ञायते स तथेति । तद् यथा, कः शुक्लो नाम यत्र शुक्लत्वमस्ति । किं शुक्लत्वं नाम । यत्र शुक्लशब्दप्रवृत्तिः । क तस्य प्रवृत्तिः । यच्छुक्लशब्दे उच्चरिते प्रतीयते । तस्मान्न विज्ञानं प्रत्याख्याय कस्यचिद्रूपं निदर्शयितुं शक्यम । न च नियोगतः प्रत्यये प्रतीते प्रत्ययार्थः प्रतीतो भवति । अप्रतीतेऽपि हि प्रत्यये सति अर्थः प्रतीयते एव । न हि विज्ञानं प्रत्यक्षम । विज्ञेयोऽर्थः प्रत्यक्ष इति । एतत् पूर्वमेवोक्तम । तदवश्यकर्त्तव्येऽपह्नवे कामं विज्ञानमपह्नूयेत, नार्था इत्येतदुक्तमेव । तस्मादस्ति सुखादिभ्योऽन्यो नित्यः पुरुष इति ॥

अथ यदुक्तं, विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञाऽस्ति इति । अत्रोच्यते । अत्रैव मा भगवान् मोहान्तमपीपदद्विति पर्यनुयोगोत्तरकाले अपह्नुत्य मोहाऽभिप्रायमस्य वर्णितवान्- न वा अरे मोहं ब्रवीमि अविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मा, मात्रासंसर्गस्त्वस्य भवतीति । तस्मान्न विज्ञानमात्रं, तस्माद्वैषम्यम् ॥

यदुक्तं, न चैषयातीति विधिशब्द इति। मा भूद्विधिशब्दः, स्वर्गकामो यजेतेति वचनान्तरेणावगतमनुवदिष्यते । तस्मादविरोधः ॥ ५ ॥ ॥ धर्मे वेदप्रामाण्याऽधिकरणम् ॥ ५ ॥

कर्मैके तत्र दर्शनात् ॥ ६ ॥

उक्तं, नित्यः शब्दार्थयोः सम्बन्ध इति । तदनुपपन्नम् । शब्दस्यानित्यत्वात् । विनष्टः शब्दः पुनरस्य क्रियमाणस्यार्थेन अकृतकः सम्बन्धो नोपपद्यते । न हि प्रथमश्रुताच्छब्दात् कश्चिदर्थं प्रत्येति । कथं पुनरनित्यः शब्दः । प्रयत्नादुत्तरकालं दृश्यते यतः । अतः प्रयत्नानन्तर्यात्, तेन क्रियते इति गम्यते । नन्वभिव्यञ्ज्यात् स एनम् । नेति ब्रूमः । न हि अस्य प्रागभिव्यञ्जनात् सद्भावे किञ्चन प्रमाणमस्ति। सँश्चाभिव्यज्यते, नासन् ॥ ६ ॥

अस्थानात् ॥ ७ ॥

नो खल्वप्युच्चरितं मुहूर्त्तमप्युपलभामहे । अतो विनष्ट इत्यवगच्छामः । न च सन्, नोपलभ्यते । अनुपलम्भकारणानां व्यवधानादीनामभावेऽप्यनुपलम्भनात् । न चासौ विषयमप्राप्तः। आकाशविषयत्वात् । कर्णच्छिद्रेऽप्यनुपलम्भनात् ॥ ७ ॥

करोतिशब्दात् ॥ ८ ॥

अपिच, शब्दं कुरु, मा शब्दं कार्षीरिति व्यवहर्त्तारः प्रयुञ्जते । न त नूनमवगच्छन्ति, स एवायं शब्द इति ॥ ८ ॥

सत्त्वान्तरे च यौगपद्यात् ॥ ९ ॥

नानादेशेषु च युगपच्छब्दमुपलभामहे । तदेकस्य नित्यस्यानुपपन्नमिति । असति विशेषे नित्यस्य नानेकत्वं, कार्याणान्तु बहूनां नानादेशेषु क्रियमाणानामुपपद्यतेऽनेकदेशसम्बन्धः, तस्मादप्यनित्यः ॥९॥

प्रकृतिविकृत्योश्च ॥ १० ॥

अपिच, दध्यत्र इत्यत्र, इकारः प्रकृतिः, यकारो विकृतिरित्युपदिशन्ति । यद्विक्रियते, तदनित्यम् । इकारसादृश्यं च यकारस्योपलभ्यते । तेनापि तयोः प्रकृतिविकारभावो लक्ष्यते ॥ १० ॥

वृद्धिश्च कर्त्तृभूम्नाऽस्य ॥ ११ ॥

अपिच बहुभिरुच्चारयद्भिर्महान् शब्दः श्रूयते । स यदि अभिव्यज्यते, बहुभिरल्पैश्चोच्चार्यमाणस्तावानेवोपलभ्येत । अतो मन्यामहे— नूनमस्य एकैकेन कश्चिदवयवः क्रियते, यत्प्रचयादयं महानुपलभ्यते ॥ ११ ॥ ॥ पूर्वपक्षः ॥

समं तु तत्र दर्शनम् ॥ १२ ॥

तुशब्दात् पक्षो विपरिवर्त्तते । यदुक्तं, प्रयत्नादुत्तरकाले दर्शनात् कृतकोऽयमिति । यदि विस्पष्टेन हेतुना शब्दस्य नित्यत्वं वक्तुं शक्ष्यामः । ततो नित्यप्रत्ययसामर्थ्यात् प्रयत्नेनाभिव्यज्यते इति भविष्यति । यदि प्रागुच्चारणादनभिव्यक्तः प्रयत्नेनाभिव्यज्यते । तस्मादुभयोः पक्षयोः सममेतत् ॥ १२ ॥

सतः परमदर्शनं विषयानागमात् ॥ १३ ॥

यदपरं कारणमुक्तम् । उच्चरितप्रध्वस्त इति । अत्रापि यदि शक्ष्यामो नित्यतामस्य विस्पष्टं वक्तुं, ततो नित्यप्रत्ययसामर्थ्यात् कदाचिदुपलम्भं, कदाचिदनुपलम्भं दृष्ट्वा किञ्चिदुपलम्भस्य निमित्तं कल्पयिष्यामः । तच्च संयोगविभागसद्भावे सति भवतीति, संयोगविभागावेवाभिव्यञ्जकाविति वक्ष्यामः । उपरतयोः संयोगविभागयोः श्रूयते इति चेत् । नैतदेवम् । न नूनमुपरमन्ति संयोगविभागाः, यत उपलभ्यते शब्द इति । न हि ते प्रत्यक्षा इति ॥

यदि शब्दं संयोगविभागा एवाभिव्यञ्जन्ति, न कुर्वन्ति, आकाशविषयत्वाच्छब्दस्य । आकाशस्यैकत्वाद् य एवायमत्र श्रोत्राकाशः, स एव देशान्तरेष्वपीति स्रुघ्नस्थैः संयोगविभागैरभिव्यक्तः पाटलिपुत्रेऽप्युपलभ्येत । यस्य पुनः कुर्वन्ति, तस्य वायवीयाः संयोगविभागा वाय्वाश्रितत्वाद् वायुष्वेव करिष्यन्ति । यथा तन्तवस्तन्तुष्वेव पटम् । तस्य पाटलिपुत्रेष्वनुपलम्भो युक्तः, स्रुघ्नस्थत्वात्तेषाम् । यस्याप्यभिव्यञ्जन्ति, तस्याप्येष न दोषः । दूरे सत्याः कर्णशष्कुल्याः अनुपकारकाः संयोगविभागाः । तेन दूरे यच्छ्रोत्रं, तेन नोपलभ्यते

इति । नैतदेवम् । अप्राप्ताश्चेत् संयोगविभागाः श्रोत्रस्योपकुर्युः, सन्निकृष्टविप्रकृष्टदेशस्थौ युगपच्छब्दमुपलभेयाताम् । न च युगपदुपलभेते । तस्मान्नाप्राप्ता उपकुर्वन्ति । न चेदुपकुर्वन्ति, तस्मादनिमित्तं शब्दोपलम्भने संयोगविभागाविति ॥

नैतदेवम् । अभिघातेन हि प्रेरिता वायवस्तिमितानि वाय्वन्तराणि प्रतिबाधमानाः सर्वतोदिक्कान् संयोगविभागानुत्पादयन्ति, यावद्वेगमभिप्रतिष्ठन्ते । ते च वायोरप्रत्यक्षत्वात् संयोगविभागा नोपलभ्यन्ते । अनुपरतेष्वेव तेषु शब्द उपलभ्यते, नोपरतेषु । अतो न दोषः । अत एव चानुवातं दूरादुपलभ्यते शब्दः ॥ १३ ॥

प्रयोगस्य परम् ॥ १४ ॥

यदपरं कारणमुक्तं– शब्दं कुरु, मा कार्षीरिति व्यवहर्त्तारः प्रयुञ्जते । यद्यसंशयं नित्यः शब्दः, शब्दप्रयोगं कुर्विति भविष्यति । यथा गोमयान् कुर्विति संवाहे ॥ १४ ॥

आदित्यवद्यौगपद्यम् ॥ १५ ॥

यत्तु, एकदेशस्य सतो नानादेशेषु युगपद्दर्शनमनुपपन्नमिति । आदित्यं पश्य देवानाम्प्रिय! एकः सन्ननेकदेशावस्थित इव लक्ष्यते । कथं पुनरवगम्यते, एक आदित्य इति । उच्यते । प्राङ्मुखो देवदत्तः पूर्वाह्णे सम्प्रति पुरस्तादादित्यं पश्यति, तस्य दक्षिणतोऽवस्थितो न द्वौ पश्यति । आत्मनश्च सम्प्रति न तिरश्चीनं देवदत्तस्यार्जवे । तस्मादेक आदित्य इति । दूरत्वादस्य देशो नावधार्यते, अतो व्यामोहः । एवं शब्देऽपि व्यामोहादनवधारणं देशस्य । यदि श्रोत्रं संयोगविभागदेशमागत्य शब्दं गृह्णीयात्, तथापि तावदनेकदेशता कदाचिदवगम्येत । न च तत् संयोगदेशमागच्छति । प्रत्यक्षा हि कर्णशष्कुली तद्देशा गृह्यते । वायवीयाः पुनः संयोगविभागा अप्रत्यक्षस्य वायोः कर्णशष्कुलीप्रदेशे प्रादुर्भवन्तो नोपलभ्यन्ते इति नानुपपन्नम् । अत एव व्यामोहो, यन्नानादेशेषु शब्द इति । आकाशदेशश्च शब्द इति । एकं च पुनराकाशम् । अतोऽपि न नानादेशेषु । अपि च, ऐकरूप्ये सति देशभेदेन कामं देशा एव भिन्ना, न तु शब्दः । तस्माद् अयमप्यदोषः ॥ १५ ॥

वर्णान्तरमविकारः ॥ १६ ॥

न च दध्यत्र इत्यत्र प्रकृतिविकारभावः । शब्दान्तरम् इकाराद् यकारः । न हि यकारं प्रयुञ्जाना इकारमुपाददते । यथा कटं चिकीर्षन्तो वीरणानि । न च सादृश्यमात्रं दृष्ट्वा प्रकृतिर्विकृतिर्वा उच्यते । न हि दधिपिटकं दृष्ट्वा कुन्दपिटकं च प्रकृतिविकारभावोऽवगम्यते । तस्मादयमप्यदोषः ॥ १६ ॥

नादवृद्धिपरा ॥ १७ ॥

यच्चैतद् बहुभिर्भेरीमाध्मनद्भिः शब्दमुच्चारयद्भिर्महान् शब्द उपलभ्यते, तेन प्रतिपुरुषं शब्दावयवप्रचय इति गम्यते । नैवम् । निरवयवो हि शब्दः । अवयवभेदानवगमाद्, निरवयवत्वाच्च महत्त्वानुपपत्तिः । अतो न वर्द्धते शब्दः । मृदुरेकेन । बहुभिश्चोच्चार्यमाणे तान्येवाक्षराणि कर्णशष्कुलीमण्डलस्य सर्वां नेमिं व्याप्नुवद्भिः संयोगविभागैर्नैरन्तर्येणानेकशो ग्रहणान्महानिव,अवयववानिवोपलभ्यन्ते। संयोगविभागा नैरन्तर्येण क्रियमाणाः शब्दमभिव्यञ्जन्तो नादशब्दवाच्याः । तेन नादस्यैषा वृद्धिः, न शब्दस्येति ॥ १७ ॥ ॥ उत्तरम् ॥

नित्यस्तु स्याद्दर्शनस्य परार्थत्वात् ॥ १८ ॥

नित्यः शब्दो भवितुमर्हति ।कुतः। दर्शनस्य परार्थत्वात् । दर्शनमुच्चारणं, तत् परार्थं, परमर्थं प्रत्याययितुम् । उच्चारितमात्रे हि विनष्टे शब्दे न चाऽन्योऽन्यान् अर्थं प्रत्याययितुं शक्नुयात् । अतो न परार्थमुच्चार्येत । अथ न विनष्टः, ततो बहुश उपलब्धत्वादर्थावगम इति युक्तम् । अर्थवत्सादृश्यादर्थावगम इति चेत् । न कश्चिदर्थवान्, सर्वेषां नवत्वात् । कस्यचित् पूर्वस्य कृत्रिमः संबन्धो भविष्यतीति चेत् । तदुक्तम् । सदृश इति चावगते व्यामोहात् प्रत्ययो व्यावर्तेत; मालाशब्दान्मालाप्रत्यय इव । यथा गावीशब्दात् सास्नादिमति प्रत्ययस्यानिवृत्तिः, तद्वद्भविष्यतीति चेत् । न हि, गोशब्दं तत्रोच्चारयितुमिच्छा । नेहान्यशब्दोच्चिचारयिषा । न चैकेनोच्चारणायत्नेन संव्यवहारश्चार्थसंबन्धश्च शक्यते कर्तुम् । तस्माद्दर्शनस्य परार्थत्वान्नित्यः शब्दः ॥ १८ ॥ ॥ सिद्धान्तः ॥

सर्वत्र यौगपद्यात् ॥ १९ ॥

गोशब्दे उच्चरिते सर्वगवीषु युगपत् प्रत्ययो भवति । अतः आकृतिवचनोऽयम् । न चाऽऽकृत्या शब्दस्य संबन्धः शक्यते कर्तुम् ।

निर्दिश्य ह्याकृतिं कर्त्ता संबध्नीयात् । गोपिण्डे च बहूनामाकृतीनां सद्भावाच्छब्दमन्तरेण गोशब्दवाच्यां विभक्तामाकृतिं केन प्रकारेणोपदेक्ष्यति ? । नित्ये तु सति गोशब्दे बहुकृत्व उच्चरितः श्रुतपूर्वश्चाऽन्यासु गोव्यक्तिष्वन्वयव्यतिरेकाभ्यामाकृतिवचनमवगमयिष्यति । तस्मादपि नित्यः ॥ १९ ॥

संख्याऽभावात् ॥ २० ॥

अष्टकृत्वो गोशब्द उच्चरित इति वदन्ति, नाऽष्टौ गोशब्दा इति । किमतो ? यद्येवम् । अनेन वचनेनावगम्यते, प्रत्यभिजानन्तीति । वयं तावत् प्रत्यभिजानीमो, न नः करणदौर्बल्यम् । एवमन्येऽपि प्रत्यभिजानन्ति, स एवायमिति । प्रत्यभिजानानाः प्रत्यभिजानन्ति चेद् वयमिवान्येऽपि, नान्य इति वक्तुमर्हन्ति । अथ मतम्, अन्यत्वे सति सादृश्येन व्यामूढाः, स-इति वक्ष्यन्ति । तन्न । न हि ते सदृश इति प्रतियन्ति, किं तर्हि, स एवायमिति । विदिते च स्फुटेऽन्यत्वे, व्यामोह इति गम्यते । न च, अयमन्य इति प्रत्यक्षमन्यद्वा प्रमाणमस्ति ॥

स्यादेतत् । बुद्धिकर्म्मणी अपि ते प्रत्यभिज्ञायेते, ते अपि नित्ये प्राप्नुतः । नैष दोषः । न हि ते प्रत्यक्षे । अथ प्रत्यक्षे नित्ये एव । ह्यस्तनस्य शब्दस्य विनाशादन्योऽद्यतन इति चेत् । नैष विनष्टः । यत एनं पुनरुपलभामहे । न हि प्रत्यक्षदृष्टं मुहूर्त्तमदृष्ट्वा पुनरुपलभ्यमानं प्रत्यभिजानन्तो विनष्टं परिकल्पयन्ति । परिकल्पयन्तो, द्वितीयसंदर्शने मातरि, जायायां, पितरि वा नाऽऽश्वस्युः । न ह्यनुपलम्भमात्रेण नास्तीत्यवगम्य, नष्ट इत्येव कल्पयन्ति । अप्रमाणतायां विदितायां, नास्तीत्यवगच्छामः । न हि प्रमाणे प्रत्यक्षे सति, अप्रमाणता स्यात् । अस्तीति पुनरव्यामोहेनावगम्यमाने, न कचिदप्यभावः । न चाऽसिद्धे अभावे व्यामोहः । न च सिद्धोऽभावः । तस्मादसति व्यामोहे, नाभावः । तदेतदानुपूर्व्या सिद्धम् । तस्मात् पुरस्तादनुच्चरितमनुपलभाना अपि न विनष्ट इत्यवगन्तुमर्हन्ति । यथा गृहान्निर्गताः सर्वगृहजनमपश्यन्तः पुनः प्रविश्योपलभमाना अपि, न प्राक् प्रवेशाद् विनष्टा इत्यवगच्छन्ति । तद्वदेनमपि, न अन्य इति वक्तुमर्हन्ति । येऽपि सर्वेषां भावानां प्रतिक्षणं विनाशमभ्युपगच्छन्ति, तेऽपि न शक्नुवन्ति शब्दस्य घटितुम् । अन्ते हि क्षयदर्शनात् ते मन्यन्ते । न च शब्दस्यान्तः । न च क्षयो लक्ष्यते । स इति प्रत्यक्षः प्रत्ययः, सदृश इत्यानुमानि-

कः। न च प्रत्यक्षविरुद्धमनुमानमुदेति, स्वकार्य्यं वा साधयति। तस्मान्नित्यः॥ २०॥

अनपेक्षत्वात्॥ २१॥

येषामनवगतोत्पत्तीनां द्रव्याणां भाव एव लक्ष्यते, तेषामपि केषाञ्चिदनित्यता गम्यते येषां विनाशकारणमुपलभ्यते यथाऽभिनवं पटं दृष्ट्वा न चैनं क्रियमाणमुपलब्धवान्। अथवा अनित्यत्वमवगच्छति रूपमेव दृष्ट्वा। तन्तुव्यतिषङ्गजानतोऽयं तन्तुव्यतिषङ्गविनाशात् तन्तुविनाशाद्वा विनश्यतीत्यवगच्छति। नैवं शब्दस्य किञ्चित् कारणमवगम्यते, यद्विनाशाद्विनङ्क्ष्यतीत्यवगम्यते॥ २१॥

प्रख्याभावाच्च योगस्य॥ २२॥

इदं पदेभ्यः केभ्यश्चिदुत्तरं सूत्रम्। ननु वायुकारणकः स्यादिति वायुरुद्गतः संयोगविभागैः शब्दो भवतीति। तथाच शिक्षाकाराः आहुः– वायुरापद्यते शब्दतामिति। नैतदेवम्। वायवीयश्चेच्छब्दो भवेद् वायोः सन्निवेशविशेषः स्यात्। न च वायवीयान् अवयवान् शब्दे सतः प्रत्यभिजानीमो, यथा पटस्य तन्तुमयान्। न चैवं भवति। स्याच्चेदेवं, स्पर्शनेनोपलभेमहि। न च वायवीयानवयवान् शब्दगतान् स्पृशामः। तस्मान्न वायुकारणकः। अतो नित्यः॥ २२॥

लिङ्गदर्शनाच्च॥ २३॥

लिङ्गं चैवं भवति, वाचा विरूपनित्ययेति। अन्यपरं हीदं वाक्यं वाचो नित्यतामनुवदति। तस्मान्नित्यः शब्दः॥ २३॥ ॥ हेतुः॥ ॥ शब्दनित्यताऽधिकरणम्॥ ६॥

उत्पत्तौ वाऽवचनाः स्युरर्थस्यातन्निमित्तत्वात्॥ २४॥

यद्यप्यौत्पत्तिको नित्यः शब्दोऽर्थसम्बन्धश्च तथापि, न चोदनालक्षणो धर्म्मः। चोदना हि वाक्यम्। न हि, अग्निहोत्रं जुहुयात् स्वर्गकाम इत्यतो वाक्यादन्यतमस्मात् पदाद्, अग्निहोत्रात् स्वर्गो भवतीति गम्यते। गम्यते तु पदत्रये उच्चारिते। न चाऽत्र चतुर्थः शब्दोऽस्त्यन्यदतः पदत्रयसमुदायात्। न चाऽयं समुदायोऽस्ति लोके, यतोऽस्य व्यवहारादर्थोऽवगम्यते। पदानि अमूनि प्रयुक्तानि, तेषां नित्योऽर्थः। अप्रयुक्तश्च समुदायः तस्मात् समुदायस्यार्थः कृत्रिमो व्यामोहो वा। न च पदार्था एव वाक्यार्थः। सामान्ये हि पदं प्र-

वर्त्तते विशेषे वाक्यम् । अन्यच्च सामान्यम्, अन्यो विशेषः । न च पदार्थाद्वाक्यार्थावगतिः, असंम्बन्धात् । असति चेत् सम्बन्धे, कस्मिंश्चित् पदार्थेऽवगतेऽऽर्थान्तरमवगम्येत, एकस्मिन्नवगते सर्वमवगतं स्यात् । न चैतदेवं भवति । तस्मादन्यो वाक्यार्थः ॥

स्यादेतद्, अप्रयुक्तादपि वाक्यादसति सम्बन्धे स्वभावादर्थोऽवगम इति । यदि कल्प्येत — शब्दो धर्ममात्मीयं व्युत्क्रामेत् । न चैष शब्दधर्मो, यदऽप्रयुक्तादपि शब्दादर्थः प्रतीयते । न हि प्रथमश्रुतात् कुतश्चिच्छब्दात् केचिदर्थं प्रतियन्ति । तदभिधीयते–पदधर्मोऽयं, न वाक्यधर्मः । वाक्याद्धि प्रथमावगतादपि प्रतियन्तोऽर्थं दृश्यन्ते । नैतदेवम् । यदि प्रथमश्रुतादवगच्छेयुः, अपि तर्हि सर्वेऽवगच्छेयुः पदार्थविदोऽन्ये च । न त्वपदार्थविदोऽवगच्छन्ति । तस्मान्नैतदेवम् ॥ ननु पदार्थविद्भिरप्यवगच्छद्भिरकृत एव वाक्यार्थसम्बन्धो भविष्यति, पदार्थवेदनेन हि संस्कृताः अवगमिष्यन्ति, यथा तमेव पदार्थं द्वितीयादिश्रवणेनेति । नेति ब्रूमः । यदि वाक्येऽन्त्यो वर्णः पूर्ववर्णजनितसँस्कारसहितः पदार्थेभ्योऽर्थान्तरं प्रत्याययति, उपकारस्तु तदानीं पदार्थज्ञानादवकल्प्यते । तस्मात् कृत्रिमो वाक्यार्थप्रत्ययो व्यामोहो वा, न पदार्थद्वारेण संभवति वाक्यार्थज्ञानमिति ॥

नन्वेवं भविष्यति सामान्यवाचिनः पदस्य, गौरिति वा, अश्व इति वा, विशेषकं शुक्ल इति वा, कृष्ण इति वा पदम् अन्तिकादुपनिपतति यदा तदा वाक्यार्थोऽवगम्यते । तन्न । न हि कथमिव गौरिति वा, अश्व इति वा सामान्यवाचिनः पदात् सर्वगवीषु सर्वाश्वेषु च बुद्धिरुपसर्पन्ती श्रुतिजनिता, वाक्यानुरोधेन कुतश्चिद्विशेषादपवर्त्तेत । न च शुक्ल इत्यादेर्विशेषवचनस्य कृष्णादिनिवृत्तिर्भवति शब्दार्थः । न चानर्थको मा भूदित्यर्थपरिकल्पना शक्या । अतो न पदार्थजनितो वाक्यार्थः । तस्मात् कृत्रिमः । पदसङ्घाताः खल्वेते सङ्घाताश्च पुरुषकृता दृश्यन्ते । यथा, नीलोत्पलवनेष्वद्य चरन्तश्चारुसंरवाः * नीलकौशेयसंवीताः प्रणश्यन्तीव कादम्बाः । अतो वैदिका अपि पुरुषकृता इति ॥ २४ ॥ ॥ पूर्वपक्षः ॥

तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात् ॥ २५ ॥

तेष्वेव पदार्थेषु भूतानां वर्तमानानां पदानां क्रियाऽर्थेन समु-

कारणम् । न अनपेक्ष्य पदार्थान् पार्थगर्थ्येन वाक्यमर्थान्तरप्रसिद्धम् । कुतः । प्रमाणाभावात् । न किञ्चन प्रमाणमस्ति, येन प्रमिमीमहे । न ह्यनपेक्षितपदार्थस्य वाक्यान्त्यवर्णस्य पूर्ववर्णजनितसंस्कारसहितस्य शक्तिरस्ति पदार्थेभ्योऽर्थान्तरे वर्त्तितुमिति ॥

नन्वर्थापत्तिरस्ति, यत् पदार्थव्यतिरिक्तमर्थमवगच्छामः । न च शक्तिमन्तरेण तदवकल्प्यते इति । तन्न । अर्थस्य तन्निमित्तत्वात्, भवेदर्थापत्तिर्यद्यसत्यामपि शक्तौ नाऽन्यन्निमित्तमवकल्प्येत । अवगम्यते तु निमित्तम् । किम् ? । पदार्थाः । पदानि हि स्वं स्वं पदार्थमभिधाय निवृत्तव्यापाराणि, अथेदानीं पदार्था अवगताः सन्तो वाक्यार्थं गमयन्ति । कथम् । यत्र हि, शुक्ल इति वा, कृष्ण इति वा गुणः प्रतीतो भवति, भवति खल्वसावलं गुणवति प्रत्ययमाधातुम् । तेन गुणवति प्रत्ययमिच्छन्तः केवलं गुणवचनमुच्चारयन्ति, संपत्स्यते एषां यथासंकल्पितोऽभिप्रायः । भविष्यति विशिष्टार्थसंप्रत्ययः । विशिष्टार्थसंप्रत्ययश्च वाक्यार्थः । एवं चेद्, अवगम्यते अन्यत एव वाक्याऽर्थः । को जातुचिद्, अदृष्टा पदसमुदायस्य शक्तिरर्थाद् अवगम्यत इति वदिष्यति । अपिचाऽन्वयव्यतिरेकाभ्यामेतदवगम्यते । भवति हि कदाचिदियमवस्था मानसाद्व्याघाताद् यदुच्चरितेभ्यः पदेभ्यो न पदार्था अवधार्य्यन्ते, तदानीं नियोगतो वाक्यार्थं नावगच्छेयुः, यद्यस्य अपार्थगर्थ्यमभविष्यत्, नियोगतस्तु नावगच्छन्ति । अपिचाऽन्तरेणापि पदोच्चारणं यः शौक्ल्यमवगच्छति, अवगच्छत्येवाऽसौ शुक्लगुणकम् । तस्मात् पदार्थप्रत्यये एव वाक्यार्थो, नास्य पदसमुदायेन सम्बन्धः । यत्तु- श्रौतः पदार्थो न वाक्यानुरोधेन कुतश्चिद्विशेषादपवर्त्तितुमर्हतीति । सत्यम् । एवमेतत् । यत्र केवलः पदार्थः प्रयुज्यमानः प्रयोजनाभावादनर्थकः सञ्जायते इत्यवगतं भवति, तत्र वाक्यार्थोऽपि तावद्भवत्विति विशिष्टार्थताऽवगम्यते, न सर्वत्र । एवञ्च सति, गुणान्तरप्रतिषेधो न शब्दार्थ इत्येतदपि परिहृतं भवति । अपिच प्रातिपदिकावुच्चरन्ती द्वितीयादिविभक्तिः,प्रातिपदिकार्थो विशेषक इत्याह । सा च विशेषश्रुतिः सामान्यश्रुतिं बाधेत । यच्च, एते पदसङ्घाताः पुरुषकृता दृश्यन्ते इति, परिहृतं तदस्मरणादिभिः । अपिचैवञ्जातीयकेऽर्थे वाक्यानि संहर्त्तुं न किञ्चन पुरुषाणां बीजमस्ति ॥

लोके सन्नियमात् प्रयोगसन्निकर्षः स्यात् ॥ २६ ॥

लौकिकेषु पुनरर्थेषु प्रत्यक्षेणार्थमुपलभ्य, सन्नियमः सन्निबन्धनं शक्यं तत्र संहर्त्तुम् । एवञ्जातीयकानि वाक्यानि, नीलोत्पलवनेष्वघेति । तस्माद्, अग्निहोत्रं जुहुयात् स्वर्गकाम इत्येतेभ्य एव पदेभ्यो ये अर्था अवगतास्तेभ्य एवैतदवगम्यते, अग्निहोत्रात् स्वर्गो भवतीति । पदेभ्य एव पदार्थप्रत्ययः, पदार्थेभ्यो वाक्यार्थ इति ॥ २६ ॥ ॥

॥ उत्तरम् ॥ ॥ सिद्धान्तः ॥ ॥ वेदस्याऽर्थप्रत्यायकत्वाऽधिकरणम् ॥७॥

वेदाँश्चैके सन्निकर्षं पुरुषाख्याः ॥ २७ ॥

उक्तं, चोदनालक्षणोऽर्थो धर्म इति । यतो न पुरुषकृतः शब्दस्याऽर्थेन सम्बन्धः । तत्र पदवाक्याश्रय आक्षेपः परिहृतः । इदानीमन्यथाऽऽक्षेप्स्यामः । पौरुषेयाश्चोदना इति वदामः । सन्निकृष्टकालाः कृतका वेदा इदानीन्तनाः । ते च चोदनानां समूहाः । तत्र पौरुषेयाश्चेद्वेदाः, असंशयं पौरुषेयाश्चोदनाः । कथं पुनः, कृतका वेदा इति केचिन्मन्यन्ते । यतः, पुरुषाख्याः । पुरुषेण हि समाख्यायन्ते वेदा – काठकं, कालापकं, पैप्पलादकं, मौद्गलमिति । न हि सम्बन्धादृते समाख्यानम् । न च पुरुषस्य शब्देन अस्ति सम्बन्धोऽन्यतः कर्त्ता पुरुष, कार्य्यः शब्द इति । ननु प्रवचनलक्षणा समाख्या स्यात् । नेति ब्रूमः । असाधारणं हि विशेषणं भवति । एक एव हि कर्त्ता, बहवोऽपि प्रब्रूयुः । अतोऽस्मर्यमाणोऽपि चोदनाया कर्त्ता स्यात् । तस्मान्न प्रमाणं, चोदनालक्षणोऽर्थो धर्म इति ॥ २७ ॥

अनित्यदर्शनाच्च ॥ २८ ॥

जननमरणवन्तश्च वेदार्थाः श्रूयन्ते । बबरः प्रावाहणिरकामयत, कुसुरुविन्दः औद्दालकिरकामयतेत्येवमादयः । उद्दालकस्यापत्यं, गम्यते औद्दालकिः । यद्येवं, प्राग् औद्दालकिजन्मनो नाऽयं ग्रन्थो भूतपूर्वः । एवमप्यनित्यता ॥ २८ ॥ ॥ पूर्वपक्षः ॥

उक्तं तु शब्दपूर्वत्वम् ॥ २९ ॥

उक्तमस्माभिः, शब्दपूर्वत्वमध्येतृणाम् । केवलम् आक्षेपपरिहारो वक्तव्यः, सोऽभिधीयते ॥ २९ ॥ ॥ सिद्धान्तः ॥

आख्या प्रवचनात् ॥ ३० ॥

यदुक्तं, कर्तृलक्षणा समाख्या काठकाद्येति । तदुच्यते । नेयमर्थापत्तिः । अकर्तृभिरपि ह्येनामाचक्षीरन् । प्रकर्षेण वचनमनन्यसा-

धारणं कठादिभिरनुष्ठितं स्यात् । तथापि हि समाख्यातारो भवन्ति। स्मर्यते च, वैशम्पायनः सर्वशाखाध्यायी, कठः पुनरिमां केवलां शाखामध्यापयाम्बभूवेति । स बहुशाखाध्यायिनां सन्निधावेकशाखाध्यायी अन्यां शाखामनधीयानः । तस्यां प्रकृष्टत्वादसाधारणमुपपद्यते विशेषणम् ॥ ३० ॥

परन्तु श्रुतिसामान्यमात्रम् ॥ ३१ ॥

यच्च, प्रावाहणिरिति । तन्न । प्रवाहणस्य पुरुषस्याऽसिद्धत्वाद्, न प्रवाहणस्यापत्यं प्रावाहणिः । प्रशब्दः प्रकर्षे सिद्धा वहतिश्च प्रापणे न त्वस्य समुदायः क्वचित् सिद्धः । इकारस्तु यथैवापत्ये सिद्धस्तथा क्रियायामपि कर्त्तरि । तस्माद् यः प्रवाहयति, स प्रावाहणिः । बबरइति शब्दानुकृतिः । तेन यो नित्योऽर्थस्तमेवैतौ शब्दौ वदिष्यतः । अत उक्तं, परन्तु श्रुतिसामान्यमात्रमिति ॥ ३१ ॥ ॥ उत्तरम् ॥

कृते वा विनियोगः स्यात् कर्मणः सम्बन्धात् ॥ ३२ ॥

अथ कथमवगम्यते—नायमुन्मत्तबालवाक्यसदृश इति !! तथाहि पश्यामः— वनस्पतयः सत्रमासत, सर्पाः सत्रमासतेति । यथा, जरद्गवो गायति मत्तकानि । कथं नाम जरद्गवो गायेत् । कथं वा वनस्पतयः सर्पा वा सत्रमासीरन्निति । उच्यते । विनियुक्तं हि दृश्यते परस्परेण संबन्धार्थम् । कथम् । ज्योतिष्टोम इत्यभिधाय, कर्त्तव्य इत्युच्यते। केनेत्याकाङ्क्षिते, सोमेनेति। किमर्थमिति स्वर्गायेति। कथमिति । इत्थमनया इति कर्त्तव्यतयेति । एवमवगच्छन्तः, पदार्थैरेभिः संस्कृतं पिण्डितं वाक्यार्थं कथमुन्मत्तबालवाक्यसदृशमिति वक्ष्यामः ? ॥

नन्वनुपपन्नमिदं दृश्यते, वनस्पतयः सत्रमासतेत्येवमादि । नानुपपन्नम् । नानेन, अग्निहोत्रं जुहुयात् स्वर्गकाम इत्येवमादयोऽनुपपन्नाः स्युः । अपि च, वनस्पतयः सत्रमासतेत्येवमादयोऽपि नानुपपन्नाः । स्तुतयो ह्येताः सत्रस्य । वनस्पतयो नामाऽचेतना इदं सत्रमुपासितवन्तः, किं पुनर्विद्वांसो ब्राह्मणाः । तद्यथा लोके, सन्ध्यायां मृगा अपि न चरन्ति, किं पुनर्विद्वांसो ब्राह्मणा इति । अपिच अविगीतः सुहृदुपदेशः सुप्रतिष्ठितः कथमिवाशङ्क्येत उन्मत्तबालवाक्यसदृश इति !! । तस्माच्चोदनालक्षणोऽर्थो धर्म इति सिद्धम् ॥ ३२ ॥ ॥ वेदस्याऽपौरुषेयत्वाधिकरणम् ॥ ८ ॥ ॥ इति श्रीशबरस्वामिकृते मीमांसाभाष्ये प्रथमाऽध्यायस्य प्रथमः पादः ॥१॥१॥ तर्कपादोऽयम् ॥

अथ प्रथमाध्यायस्य द्वितीयः पादः ॥ १ ॥ १ ॥

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते ॥ १ ॥

सोऽरोदीत्, यदरोदीत्, तद् रुद्रस्य रुद्रत्वम्, प्रजापतिरात्मनो वपामुदक्खिदत्, देवा वै देवयजनमध्यवसाय दिशो न प्रजानन्नि-त्येवमादीनि समाम्नातारः समामनन्ति वाक्यानि। तानि किं कञ्चित् धर्मं प्रमिमते, उत न ? इति भवति विचारणा। तदभिधीयते। क्रिया कथमनुष्ठेयेति तां वदितुं समाम्नातारो वाक्यानि समामनन्ति। तद्, यानि वाक्यानि क्रियां नावगमयन्ति, क्रियासम्बद्धं वा किञ्चित्। एवमेव भूतमर्थमन्वाचक्षते– रुदितवान् रुद्रः, वपामुच्चिखेद प्रजापतिः, देवा वै दिशो न प्रजज्ञिर इत्येवञ्जातीयकानि, तानि कं धर्मं प्रमिमीरन् ?। अथोच्येत, अध्याहारेण वा विपरिणामेन वा, व्यवहितकल्पनया वा, व्यवधारणकल्पनया वा, गुणकल्पनया वा कश्चिद-ऽर्थः कल्पयिष्यते इति। स कल्प्यमानः कः कल्प्येत ?। रुद्रः किल रुरोद, अतोऽन्येनाऽपि रोदितव्यम्। उच्चिखेद आत्मवपां प्रजापतिरतोऽन्योऽप्युत्खिदेदात्मनो वपाम्। देवा वै देवयजनकाले दिशो न प्रज्ञातवन्तोऽतोऽन्योऽपि दिशो न प्रजानीयादिति।
तच्चाशक्यम्। इष्टवियोगेनाभिघातेन वा यद् वाष्पनिर्मोचनं, तद् रोदनमित्युच्यते। न च तदिच्छातो भवति। न च कश्चिदात्मनो वपामुत्खिद्य तामग्नौ प्रहृत्य तत उत्थितेन तूपरेण पशुना यष्टुं शक्नुयात् न च देवयजनाध्यवसानकाले केचिद् दिशो मुह्येयुः। अतः एषामानर्थक्यम्। तस्मादेवञ्जातीयकानि वाक्यानि अनित्यानीत्युच्यन्ते। यद्यपि च नित्यानि, तथापि न नित्यमर्थं कुर्वन्तीति। स एष वाक्यैकदेशस्याक्षेपो, न कृत्स्नस्य वाक्यस्य। नन्वेकदेशाद्विना साकाङ्क्षः पदसमूहो न पर्य्याप्तः स्वस्मै प्रयोजनाय, अत आक्षिप्त एवेति। नैवं भवति हि कश्चित् पदसमूहो, योऽर्थवादेभ्यो विनाऽपि विदधाति कञ्चिदर्थम्। यानि पुनस्तैः सह संयुज्यार्थान्तरे वर्त्तन्ते, तान्येकदेशाक्षेपेणाक्षिप्यन्ते ॥ १ ॥

शास्त्रदृष्टविरोधाच्च ॥ २ ॥

स्तेनं मनः, अनृतवादिनी वागित्येवञ्जातीयकानां धर्मं प्रति

अप्रामाण्यम् । भूतानुवादात् । विपरिणामादिभिरपि कल्प्यमाने स्तेयं मृषोद्यञ्च कर्त्तव्यमित्यापतति । तच्चाशक्यं स्तेयानृतवादप्रतिषेधमबाधमानेनानुष्ठातुम् । न च विकल्पः, वैषम्यात् । एकः कल्प्यो विधिः, एकः प्रत्यक्षः ॥

अथ दृष्टविरोधः । तस्माद् धूम एवाऽग्नेर्दिवा ददृशे नार्चिः । तस्मादर्चिरेवाग्नेर्नक्तं ददृशे न धूम इति । अस्माल्लोकादुत्क्रम्याऽग्निरादित्यं गतः, रात्रौ आदित्यस्तमित्येतदुपपादयितुमिदम् । उभयमपि दृष्टविरुद्धमुच्यते । तस्मान्नैषाऽवधारणा सिद्ध्यतीति । अपरो दृष्टविरोधः । न चैतद् विद्मो वयं ब्राह्मणा वा स्मः, अब्राह्मणा वेति अक्रियार्थत्वादनर्थकम् । अथायमर्थः । नैवैतज्ज्ञायते, किं वा ब्राह्मणा वयम् उताब्राह्मणा एवेति प्रत्यक्षविरुद्धमप्रमाणम् । अपरः शास्त्रदृष्टेन विरोधः । को हि तद्वेद, यदमुष्मिँल्लोकेऽस्ति वा, न वेति । यदि प्रश्नोऽयम्, अक्रियार्थत्वादनर्थकः । अथानवक्लृप्तिः, शास्त्रदृष्टेन विरोधः । अतः प्रत्यक्षविरुद्धमप्रमाणम् ॥ २ ॥

तथाफलाभावात् ॥ ३ ॥

गर्गत्रिरात्रब्राह्मणं प्रकृत्य उच्यते, शोभतेऽस्य मुखं य एवं वेदेति । यदि भूतानुवादः, अनर्थकः । अथाध्ययनफलानुवादः, ततोऽसदनुवादः । कालान्तरे फलं भविष्यतीति चेन्न ह्यत्र प्रमाणमस्ति । विधिः स्यादिति चेन्नैष विधिपरः । द्रव्यसंस्कारकर्मस्विति चिन्तयिष्यति एतदुपरिष्टात्, किं फलविधिरुतार्थवाद इति । इह तु किं भूतानुवादः, क्रियार्थो वेति । तेन न, फलविधित्वान्निराकृतस्य इहानर्थकोऽर्थवादविचार इति । आऽस्य प्रजायां वाजी जायते य एवं वेदेति च उदाहरणम् ॥ ३ ॥

अन्यानर्थक्यात् ॥ ४ ॥

पूर्णाहुत्या सर्वान् कामानवाप्नोति, पशुबन्धयाजी सर्वाँल्लोकानभिजयति, तरति मृत्युं, तरति ब्रह्महत्यां योऽश्वमेधेन यजते, य उ चैनमेवं वेदेति । यदि भूतानुवादमात्रमनर्थकम् । अथ फलविधिः, इतरेषामानर्थक्यम् । न ह्यकृत्वा पूर्णाहुतिमग्निहोत्रादयः क्रियन्ते । न चानिष्ट्वा अग्नीषोमीयेन सोमेन यजन्ते । न चानधीत्य अश्वमेधेन यजन्ते । तद्यथा, पथि जाते अर्के मधु उत्सृज्य, तेनैव पथा मध्वार्थिनः पर्वतं न गच्छेयुस्तादृशं हि तत् । अपि चाहुः । अर्के चेन्मधु विन्देत

किमर्थं पर्वतं व्रजेत् * इष्टस्यार्थस्य संसिद्धौ को विद्वान् यत्नमाचरेदिति ॥ ४ ॥

अभागिप्रतिषेधाच्च ॥ ५ ॥

न पृथिव्यामग्निश्चेतव्यो नान्तरिक्षे न दिवीत्यप्रतिषेधभागिनमर्थं प्रतिषेधन्ति । विज्ञायते एवैतद् । अन्तरिक्षे, दिवि चाग्निर्न चीयते इति । पृथिवीचयनप्रतिषेधार्थं च यद्वाक्यं, भवेच्चयनप्रतिषेधार्थमेव तत् । अथाप्रमाणम् । नैष विरोधो भवति । कथं तत् प्रमाणं ?, यद् विध्यन्तरमाकुलयेत्, स्वयं चाफलं स्यात् । न चेतव्यं, हिरण्यं निधाय चेतव्यमिति ॥ ५ ॥

अनित्यसंयोगात् ॥ ६ ॥

अनित्यसंयोगश्च वेदप्रामाण्ये नास्ति । परन्तु श्रुतिसामान्यमात्रमिति परिहृतः । इदानीं वेदैकदेशानामाक्षिप्तानां पुनरुपोद्बलक उत्तिष्ठति, बबरः प्रावाहणिरकामयतेति ॥ ६ ॥ ॥ पूर्वपक्षः ॥

विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः ॥७॥

इदं समाम्नायते— वायव्यं श्वेतमालभेत भूतिकामः । वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयतीति । वायुर्वै क्षेपिष्ठा देवतेत्यतो यद्यपि क्रिया नाऽवगम्यते, क्रियासंबद्धं वा किञ्चित् । तथापि विध्युद्देशेनैकवाक्यत्वात् प्रमाणम् । भूतिकाम इत्येवमन्तो विध्युद्देशः । तेनैकवाक्यभूतो, वायुर्वै क्षेपिष्ठा देवतेत्येवमादिः । कथमेकवाक्यभावः ? । पदानां साकाङ्क्षत्वाद्विधेः स्तुतेश्चैकवाक्यत्वं भवति । भूतिकाम आलभेत । कस्माद् ? यतो वायुः क्षेपिष्ठेति । नायमभिसम्बन्धो विवक्षितः, भूतिकामेनालब्धव्यमिति । कथं तर्हि आलभेत ? । यतः, ततो भूतिरिति भिन्नाविमावर्थौ । उभयाभिधाने वाक्यं भिद्येत ॥

किमर्था स्तुतिरितिचेत् । कथं रोचेत ? नोऽनुष्ठीयेतेति । ननु प्राक् स्तुतिवचनाद् अनुष्ठानं भूतिकामान्तात् सिद्धं, स्तुतिवचनमनर्थकम् । न हि यदा स्तुतिपदाऽसन्निधानं, तदा पूर्वेणैव विधिः, यदा स्तुतिपदसम्बन्धो, न तदा भूतिकामस्यालम्भो विधीयते । यथा, पटो भवतीति, पट उत्पद्यते इत्यर्थः । निराकाङ्क्षं च पदद्वयम् । यदा च तस्मिन्नेव, रक्त–इत्यपरं श्रूयते, तदा रागसम्बन्धो भवतीत्यर्थः । भवति च रक्तं प्रत्याकाङ्क्षा । एवं यदा न स्तुतिपदानि, विधिशब्दैनै-

च तदा प्ररोचना, यदा स्तुतिवचनं तदा स्तवनेन। नन्वेवं सति किं स्तुतिवचनेन यस्मिन् सति अविधायकं, मा भूत् तत्। तदभावेऽपि पूर्वविधिनैव प्ररोचयिष्यते इति। सत्यं, विनाऽपि तेन सिद्ध्येत् प्ररोचनम् अस्ति तु तत् तस्मिन् विद्यमाने योऽर्थो वाक्यस्य, सोऽवगम्यते स्तुतिप्रयोजनम्। तयोस्तस्मिन्नविद्यमाने विधिना प्ररोचनामिति ॥ ननु सत्स्वपि स्तुतिपदेषु पूर्वस्य विधिस्वरूपत्वाद्विधिरभिप्रेतः स्याद्, न विवक्ष्येत स्तुतिपदसम्बन्धः । आह-- स्तुतिपदानि ह्यनर्थकान्यभविष्यन् साकाङ्क्षाणि । भवन्त्वनर्थकानीति चेत् न, गम्यमानेऽर्थे अविवक्षितार्थानि भवितुमर्हन्ति। योऽसौ विध्युद्देशः, स शक्नोति निरपेक्षोऽर्थं विधातुं, शक्नोति च स्तुतिपदानां वाक्यशेषीभवितुम् । प्रत्यक्षश्च वाक्यशेषभावः। अतोऽस्माद्विधेः स्तुतिमवगच्छामः ॥

ननु निरपेक्षादपि विधिमवगमिष्यामः। भवत्वेवम्। नैवं सति कश्चिद्विरोधः, किन्त्वशक्यः स्तुतिपदसम्बन्धे सति विध्यर्थो विवक्षितुम्। वाक्यं हि सम्बन्धस्य विधायकम् द्वौ चेत् सम्बन्धौ विदध्याद्— भूतिकाम आलभेत, आलम्भेन च एष गुणो भविष्यतीति; भिद्येत तर्ह्येवं सति वाक्यम्। अथ यदुक्तं– न क्रिया गम्यते, न तत्सम्बद्धं वा किञ्चिदिति । स्तुत्यर्थेन विधीनां स्युः। स्तुतिशब्दाः स्तुवन्तः क्रियां प्ररोचयमाना अनुष्ठातॄणामुपकरिष्यन्ति क्रियायाः । एवमिमानि सर्वाण्येव पदानि कञ्चिदर्थं स्तुवन्ति विदधाति । अतः प्रमाणम्। एवञ्जातीयकानि, वायुर्वै क्षेपिष्ठा देवतेति ॥७॥ ॥ सिद्धान्तः ॥

तुल्यं च साम्प्रदायिकम् ॥ ८ ॥

अथोच्येत– प्राक् स्तुतिपदेभ्यो, निराकाङ्क्षाणि विधायकानि, विधिस्वरूपत्वात्। स्तुतिपदानि तु प्रमादपाठ इति। तन्न। एवमर्थावगमात्। तुल्यश्च साम्प्रदायिकम्। सम्प्रदायः प्रयोजनं येषां धर्माणां, सर्वे ते विधिपदानाम् अर्थवादपदानां च तुल्याः। अध्यायाऽनध्यायते, गुरुमुखात्प्रतिपत्तिः, शिष्योपाध्यायता च सर्वस्मिन्नेवञ्जातीयके आवन्दनाऽर्थे तुल्यमाद्रियन्ते। स्मरणं च दृढम्। अतो न प्रमादपाठ इति ॥८॥

अप्राप्ता चानुपपत्तिः प्रयोगे हि विरोधः स्याच्छब्दार्थस्त्वप्रयोगभूतस्तस्मादुपपद्येत ॥ ९ ॥

अपि च, या एषाऽनुपपत्तिरुक्ता- शास्त्रदृष्टविरोधादित्येवमाख्या सा, सोऽरोदीदित्येवमादिषु न प्राप्नोति । कुतः । प्रयोगे हि स्तेयादीनामुच्यमाने विरोधः स्यात् । शब्दार्थस्त्वप्रयोगभूतः । तस्मादुपपद्यते- स्तेनं मनः, अनृतवादिनी वागिति ॥ ९ ॥

गुणवादस्तु ॥ १० ॥

यदुक्तं विधेयस्य प्ररोचनार्था स्तुतिरिति । तदिह कथमवकल्प्येत ?, यत्रान्यद्विधेयम्, अन्यच्च स्तूयते । यथा, वेतसशाखयाऽवकाभिश्चाग्निं विकर्षतीति । वेतसाऽवके विधीयेते,आपश्च स्तूयन्ते-आपो वै शान्ता इति । तदुच्यते ॥ गुणवादस्तु ॥ गौण एष वादो भवति, यत् सम्बन्धिनि स्तोतव्ये सम्बन्ध्यन्तरं स्तूयते । अभिजनो ह्येष वेतसावकयोः । ततस्ते जाते । अभिजनसंस्तवेन चाभिजातः स्तुतो भवति । यथा-अस्माकाभिजनो देवदत्तोऽस्माकेषु स्तूयमानेषु स्तुतमात्मानं मन्यते, एवमत्रापि द्रष्टव्यम् ॥

अथ, सोऽरोदीदिति कस्य विधेः शेषः ?। तस्माद् बर्हिषि रजतं न देयमित्यस्य । कुतः ? । साकाङ्क्षत्वात् पदानाम् । सोऽरोदीत्, यदरोदीत् तद् रुद्रस्य रुद्रत्वमित्यत्र, स इति प्रकृतापेक्षः । तत्प्रत्ययात् । तस्य यदश्रु अशीर्य्यत इति तस्येति पूर्वप्रकृतापेक्ष एव । उपपत्तिश्चोपरितनस्य, यो बर्हिषि रजतं दद्यात् पुराऽस्य संवत्सराद् गृहे रोदनं भवतीत्यस्य हेतुत्वेनायं प्रतिनिर्दिश्यते—तस्माद्बर्हिषि रजतं न देयमिति । एवं सर्वाणि साकाङ्क्षाणि कथं विधेरुपकुर्वन्तीति ? । गुणवादेन रोदनप्रभवं रजतं बर्हिषि ददतो रोदनमापद्यते । तत् प्रतिषेधस्य गुणो यद् अरोदनमिति । कथं पुनररुदति, अरोदीदिति भवति ? कथं वाऽनश्रुप्रभवे रजतेऽश्रुप्रभवमिति वचनम् ? पुराऽस्य संवत्सरादसति रोदने, कथं रोदनं भवतीति । तदुच्यते ॥ गुणवादस्तु ॥ गौणा एते शब्दाः । रुद्र इति रोदननिमित्तस्य शब्दस्य दर्शनाद् । यदरोदीदित्युच्यते । वर्णसारूप्यान्निन्दन्ननश्रुप्रभवमप्यश्रुप्रभवमित्याह । निन्दन्नेव च धनत्यागे दुःखदर्शनात् पुराऽस्य संवत्सराद् गृहे रोदनं भवतीत्याह ॥

तथा, यः प्रजाकामः पशुकामो वा स्यात् स एतं प्राजापत्यं तूपरमालभेत इति आकाङ्क्षितत्वादस्य विधेः शेषोऽयं-स आत्मनो वपामुदक्खिददिति । कथं गुणवादः ? इत्थं नाम नासन् पशवो यद्

आत्मनो वपामुदक्खिददिति । एतच्च कर्मणः सामर्थ्यं, यद् अग्नौ प्रहृतमात्रायां वपायामजस्तूपर उदगाद्, इत्थं बहवः पशवो भवन्तीति । कथं पुनरनुत्खिन्नायां वपायां प्रजापतिरात्मनो वपामुदक्खिददित्याह ?। उच्यते। असद्वृत्तान्तान्वाख्यानं, स्तुत्यर्थेन प्रशंसाया गम्यमानत्वात् । इहान्वाख्याने वर्त्तमाने, द्वयं निष्पद्यते- यच्च वृत्तान्तज्ञानं, यच्च कस्मिँश्चित् प्ररोचना द्वेषो वा तत्र वृत्तान्तान्वाख्यानं न प्रवर्त्तकं, न निवर्त्तकं चेति प्रयोजनाभावादनर्थकमित्यऽविवक्षितम् । प्ररोचनया तु प्रवर्त्तते, द्वेषाद् निवर्त्तते इति तयोर्विवक्षा। वृत्तान्तान्वाख्यानेऽपि विधीयमाने आदिमत्ता दोषो वेदस्य प्रसज्ज्येत । कथं पुनरिदं निरालम्बनमन्वाख्यायते ? इति । उच्यते । नित्यः कश्चिदर्थः प्रजापतिः स्याद् वायुराकाश आदित्यो वा स आत्मनो वपामुदक्खिददादिति-वृष्टिं, वायुं, रश्मिं वा तामग्नौ प्रागृह्णात्, वैद्युते आर्चीसि लौकिके वा । ततोऽज इत्यन्नं, बीजं, विरुद् वा । तमालभ्य तमुपयुज्य प्रजाः पशून् प्राप्नोतीति गौणाः शब्दाः ॥

आदित्यः प्रायणीयश्चरुरादित्य उदयनीयश्चरुरित्यस्य विधेः शेषो, देवा वै देवयजनमध्यवसाय दिशो न प्रजानन्नित्याकाङ्क्षितत्वात् । सर्वेऽप्यामोहानामादित्यश्चरुर्नाशयिता, अपि दिङ्मोहस्येति स्तुतिः । कथमसति दिङ्मोहे दिङ्मोहशब्द इति । उच्यते । अप्राकृतस्य बहोः कर्मसमूहस्योपस्थितत्वाद् गौणो मोहशब्दोऽवधारणावकाशदानादिभिर्ज्ञापयतीति गौणता ॥ १० ॥

रूपात् प्रायात् ॥ ११ ॥

हिरण्यं हस्ते भवति अथ गृह्णातीति, साकाङ्क्षत्वादस्य विधेः शेषः- स्तेनं मनोऽनृतवादिनी वागिति । निन्दावचनं हिरण्यस्तुत्यर्थेन यथा-किम् ऋषिणा, देवदत्त एव भोजयितव्यः । कथं पुनरस्तेनं मनो निन्दितुमपि स्तेनशब्देनोच्यते, वाचं चाऽननृतवादिनीमपि, अनृतवादिनीति ब्रूयात् ? गुणवादस्तु रूपात् । यथा स्तेनाः प्रच्छन्नरूपाः, एवं च मन इति गौणः शब्दः । प्रायाच्च अनृतवादिनी वागिति ॥ ११ ॥

दूरभूयस्त्वात् ॥ १२ ॥

दृष्टविरोधे उदाहरणं, तस्माद्धूम एवाग्नेर्दिवा ददृशे, नार्चिः। तस्मादर्चिरेवाग्नेर्नक्तं ददृशे,न धूम इति अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति

५

सायं जुहोति, सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातरिति मिश्र-लिङ्गमन्त्रयोर्विधानस्याकाङ्क्षितत्वाच्छेषः । उभयोर्देवतयोः सन्निधाने होम इतिः स्तुतेरुपपत्तिः दूरभूयस्त्वाद् धूमस्याग्नेश्चाऽदर्शने गौणः शब्दः ॥ १२ ॥

अपराधात् कर्तुश्च पुत्रदर्शनम् ॥ १३ ॥

दृष्टविरोधे एव उदाहरणं, न चैतद्विद्म इति । तत्, प्रवरे प्रव्रियमाणे देवाः पितर इति ब्रूयादित्याकाङ्क्षितत्वादस्य विधेः शेषः । अब्राह्मणोऽपि ब्राह्मणः प्रवरानुमन्त्रणेन स्यादिति स्तुतिः । दुर्ज्ञानत्वादज्ञानवचनं गौणम् । स्त्र्यपराधेन कर्त्तुश्च पुत्रदर्शनेन, अप्रमत्ता रक्षत तन्तुमेनमित्यादिना दुर्ज्ञानम् ॥ १३ ॥

आकालिकेप्सा ॥ १४ ॥

शास्त्रदृष्टविरोधे उदाहरणं, को हि तद्वेदेति, दिक्ष्वतीकाशान् करोतीति साकाङ्क्षत्वादस्य विधेः शेषः । प्रत्यक्षफलत्वेन स्तुतिः । अनवक्लृप्तिवचनं विकृष्टकालफलत्वाद्गौणम् ॥ १४ ॥

विद्याप्रशंसा ॥ १५ ॥

तथाफलाभावादित्यत्रो दाहृतं शोभतेऽस्य मुखमिति गर्गत्रिरात्रविधेराकाङ्क्षितत्वाच्छेषः । वेदानुमन्त्रणस्य च, आऽस्य प्रजायां वाजी जायते इति शेषः । मुखशोभा वाजिमत्त्वं च गुणवचनत्वाद्गौणः शब्दः । शोभते इव शिष्यैरुद्वीक्ष्यमाणम् । कुले सन्तताध्ययनश्रवणान्मेधावी जायते इति स प्रतिग्रहादन्नं प्राप्नोतीति ॥ १५ ॥

सर्वत्वमाधिकारिकम् ॥ १६ ॥

अन्यानर्थक्यवाक्ये उदाहरणं, पूर्णाहुत्या सर्वान् कामानवाप्नोतीति पूर्णाहुतिं जुहोतीत्याकाङ्क्षितत्वादस्य विधेः शेषः । य उ चैनमेवं वेदेति, तरति मृत्युमित्यस्याकाङ्क्षितत्वाच्छेषः । फलवचनं स्तुतिः, सर्वकामफलस्य निमित्ते सर्वकामावाप्तिवचनं गौणम् । असर्वेषु सर्ववचनमधिकृतापेक्षम् ॥ १६ ॥

फलस्य कर्मनिष्पत्तेस्तेषां लोकवत्परिमाणतः फलविशेषः स्यात् ॥ १७ ॥

अन्वारुह्य वचनमिदं यद्यपि विधिस्तथाप्यऽर्थवत्ता परिमाणतः सारतो वा फलविशेषात् ॥ १७ ॥

अन्त्ययोर्यथोक्तम् ॥ १८ ॥

अभागिप्रतिषेधादित्यादावुदाहृतं— न पृथिव्यामग्निश्चेतव्यो नान्तरिक्षे न दिवीति, हिरण्यं निधाय चेतव्यमित्याकाङ्क्षितत्वादस्य विधेः शेषः । पृथिव्यादीनां निन्दा हिरण्यस्तुत्यर्था । असति प्रसङ्गे प्रतिषेधो नित्यानुवादः । यच्चानित्यदर्शनं, बबरः प्रावाहणिरकामयत इति । तत् परिहृतम् । अर्थवादाक्षेपेण पुनरुत्थितमिदानीमर्थवादप्रामाण्ये तेनैव परिहारेण परिहरिष्यते इति ॥ १८ ॥ ॥ उत्तरम् ॥ ॥ अर्थवादाधिकरणम् ॥ १ ॥

विधिर्वा स्यादपूर्वत्वाद्वादमात्रं ह्यनर्थकम् ॥ १९ ॥

इह ये विधिवन्निगदा अर्थवादास्ते उदाहरणम् । औदुम्बरो यूपो भवत्यूर्ग्वा उदुम्बर ऊर्क्पशव ऊर्जैवास्मा ऊर्जं पशूनाप्नोति ऊर्जोऽवरुध्यै इति । किमस्य विधिः कार्यम्, उतास्यापि स्तुतिरिति ? । किं तावत्प्राप्तम् । विधिर्वा स्यादपूर्वत्वाद्वादमात्रं ह्यनर्थकम् । विधिवन्निगदेष्वेवञ्जातीयकेषु फलविधिः स्यात् । फलं ह्यवगम्यते । तथा ह्यपूर्वम् अर्थं विधास्यति, इतरथा स्तुतिवादमात्रमनर्थकं स्यात् । स्तुतश्च अस्तुतश्च तावानेव सोऽर्थः । अपि च, ऊर्जोऽवरुध्यै इति प्रयोजनं श्रूयते । न च, प्रशस्तोऽयमर्थ इति कश्चिच्छब्दोऽस्ति । लक्षणया तु स्तुतिर्गम्यते । श्रुतिश्च लक्षणायाः ज्यायसीति ॥ १९ ॥ ॥ पूर्वपक्षः ॥

लोकवदिति चेत् ॥ २० ॥

इति चेत् पश्यसि— स्तुतिरनर्थिका, न च शब्देनावगम्यते इति । लौकिकानि वाक्यानि भवन्तो विदाङ्कुर्वन्तु । तद्यथा— इयं गौः क्रेतव्या देवदत्तीया, एषा हि बहुक्षीरास्त्र्यपत्या अनष्टप्रजा चेति । क्रेतव्येत्युक्ते गुणाभिधानात् प्रवर्त्तन्तेतरां क्रेतारः । बहुक्षीरेति च गुणाभिधानमवगम्यते । तद्वद् वेदेऽपि भविष्यति ॥ २० ॥ पूर्वपक्षे आशङ्का ॥

न पूर्वत्वात् ॥ २१ ॥

नैतदेवम् । लोके विदितपूर्वा अर्था उच्यन्ते बहुक्षीरादयः । तेषां विज्ञानमेव न प्रयोजनम् । अतः प्रशंसा गम्यते । अविदितवादे न श्रद्दधीरन्, पूर्ववचनादिव । विदितत्वादेव च प्ररोचयन्ते । वैदिकेषु पुनर्यदि विधिशब्देन न प्ररोचयन्ते, नतरामर्थवादेन । जाताशङ्को हि विधिशब्देन स तदानीम् । अथ विधिशब्देन प्ररोचितः,

किम् अर्थवादशब्देन ? । अपि च वेदे व्यक्तमसंवादः, ऊर्जोऽवरुद्धै इत्यप्रसिद्धं वचनम्, ऊर्ग्वा उदुम्बर इति हेतुत्वं चाप्रसिद्धम् । यस्माद् ऊर्गुदुम्बरः, तस्मात् तन्मयो यूपः कर्त्तव्य इति । ऊर्गुदुम्बर इत्यनृतवचनादन्यदप्यनृतमिति परिकल्प्येत ॥ २१ ॥ ॥ आशङ्कानिरासः ॥

उक्तं तु वाक्यशेषत्वम् ॥ २२ ॥

उक्तमस्माभिर्वाक्यशेषत्वं, विधिना त्वेकवाक्यत्वादिति । ननु उक्तं, फलवचनमिह गम्यते न स्तुतिरिति । यदिह फलवचनं, तदौदुम्बरस्य यूपस्य । न च अविहित औदुम्बरो यूपोऽस्ति । तत्र फलवचनमेवानर्थकम् । स्तुतिवचनः शब्दो नास्तीतिचेत् । इह फलवचनेन फलवत्ता प्रतीयते, फलवांश्च प्रशस्त इति ॥

तत्र फलवत्तायामानर्थक्यमिति यो द्वितीयोऽर्थः प्रशंसा नाम स गम्यते । लक्षणेति चेन्न । लक्षणायामपि अर्थवत्ता भवत्येव । लक्षणाऽपि हि लौकिकी । ननूक्तम् असंवादो वेदे, न ह्यूर्गुदुम्बर इति । गुणवादेन प्ररोचनार्थतां ब्रूमहे । गौणत्वात्संवादः । किं सादृश्यम् । यथाऽन्नं प्रीतेः साधनम्, एवमिदमपि प्रीतिसाधनशक्तियुक्तं प्रशंसितुं प्रशंसावाचिना प्रीतिसाधनशब्देन उच्यते । शक्यते हि तत् पक्षफलसम्बन्धादूर्गिति वक्तुम् ॥ २२ ॥ ॥ सिद्धान्तः ॥

विधिश्चानर्थकः क्वचित्तस्मात् स्तुतिः प्रतीयेत, तत्सामान्यादितरेषु तथात्वम् ॥ २३ ॥

अप्सुयोनिर्वा अश्वो अप्सुजो वेतस इति अप्सुयोनिरश्वः कर्त्तव्य इति विधेरशक्यत्वादानर्थक्यम् । तत्रावश्यं स्तुतिः कल्पयितव्या, शमयित्रीभिरद्भिरश्वस्य अवकानां च सम्बन्धो यजमानस्य कष्टं शमयतीति । तत्सामान्यादितरेषु तथात्वं तथेतियावत्, तावत्तथात्वमिति । किं तत्सामान्यम् । विध्यसम्भवः स्तुतिसम्भवश्च ॥ २३ ॥

प्रकरणे सम्भवन्नपकर्षो न कल्प्येत, विध्यानर्थक्यं हि तं प्रति ॥ २४ ॥

इतश्च पश्यामः स्तुतिरिति । कुतः । इदं समामनन्ति, यो विदग्धः स नैर्ऋतः, योऽशृतः स रौद्रः, यः शृतः स दैवतः । तस्मादविदहता श्रपयितव्यः स दैवतत्वायेति । यदि स्तुतिः, दर्शपूर्णमासयोरेव शृतः स्ताविष्यते । तथा सम्भवन्नपकर्षो न कल्प्येत । अ-

प्रकृष्यते इत्यपकर्षः । विधिपक्षे तु यत्र नैर्ऋतस्तत्र विदग्धता नीयेत । तथा सति प्रकरणं बाधितं भवेत् । दर्शपूर्णमासकर्म प्रति नैर्ऋताभावाद् विदग्धविधानमनर्थकं स्यात् । तस्मात् स्तुतिरेव ॥२४॥

विधौ च वाक्यभेदः स्यात् ॥ २५ ॥

औदुम्बरो यूपो भवतीति विधावतस्मिन्नाश्रीयमाणे, ऊर्जोऽवरुद्ध्यै इत्येतस्मिंश्च वाक्यं भिद्येत । इत्थम् औदुम्बरो यूपः प्रशस्तः, स चोर्जोऽवरुद्ध्यै इति । तस्माद् विधिवन्निगदानामपि स्तुतिरेव कार्यमर्थवादानामिति ॥२५॥ सिद्धान्ते युक्तिः॥विधिवन्निगदाधिकरणम्२॥

हेतुर्वा स्यादर्थवत्त्वोपपत्तिभ्याम् ॥ २६ ॥

अथ ये हेतुवन्निगदाः, शूर्पेण जुहोति तेन ह्यन्नं क्रियते इत्येवमादयस्तेषु सन्देहः । किं स्तुतिस्तेषां कार्यम्, उत हेतुरिति । किं प्राप्तम् । हेतुः स्यादन्नकरणं होमस्य । नन्वप्रसिद्धे कार्यकारणभावे न हेतूपदेशः । सत्यमेवं लोके, विधायिष्यते तु वचनेन वेदे । शूर्पेण होमे कर्त्तव्ये अन्नकरणं हेतुरित्युपदिश्यते । किं प्रयोजनम् । अन्यदपि दर्वीपिठरादि अन्नकरणं यत्, तेनापि नाम कथं होमः क्रियेतेति । कुतः ? तस्याप्यन्नक्रियायामर्थवत्ता, शक्यते च तेनाप्यन्नं कर्तुम् । एतद्धि, क्रियते इत्युच्यते । न हि, वर्त्तमानकालः कश्चिदस्ति । यस्यार्थं प्रतिनिर्देशः । हेतौ च श्रुतिः शब्दः, स्तुतौ लक्षणा । यदि च दर्वीपिठरादि न साक्षादन्नं करोतीति नान्नकरणमित्युच्यते । व्यर्थे तस्मिन् शूर्पस्तुतिरनर्थिका स्यात् । शूर्पमपि हि न साक्षादन्नं करोतीति तेन विनाऽर्थेन शूर्पस्य स्तुतिर्नोपपद्यते ॥ २६ ॥ पूर्वपक्षः ॥

स्तुतिस्तु शब्दपूर्वत्वादचोदना च तस्य ॥ २७ ॥

न त्वेतदस्ति शब्दपूर्वकोऽयमर्थः, अन्नकरणं हेतुरिति । शब्दश्चाऽन्नकरणं शूर्पहोमे हेतुरित्याह । न च दर्वीपिठरहोमे तेन शब्दपूर्वं शूर्पे, न च दर्वीपिठरादेश्चोदना ॥ २७ ॥ ॥ सिद्धान्तः ॥

व्यर्थे स्तुतिरन्याय्येति चेत् ॥ २८ ॥

इति पुनर्यदुक्तं, तत् परिहर्त्तव्यम ॥ २८ ॥ सिद्धान्ते आशङ्का ॥

अर्थस्तु विधिशेषत्वाद् यथा लोके ॥ २९ ॥

अस्मत्पक्षेऽर्थोऽस्ति । वाक्यशेषो हि स विधेस्तदा भवति । संवादश्च स्तुतिवचनत्वेन यथा वयं शूर्पेणान्नं क्रियमाणं जानीमस्तथा

शूर्पेणान्नं क्रियते इत्येव गम्यते । तदा चावर्त्तमानं स्तोतुं वर्त्तमानमित्युपदिशति । त्वत्पक्षे एष दोषो, यस्य ते हेतुविधिः । विधौ हि न परः शब्दार्थः प्रतीयते । न च वर्त्तमानमुपदिशन् वेदः शक्यमर्थं विदध्यात्। अस्मत्पक्षे तु एष परशब्दः परत्र वर्त्तते यथा लोके, बलवान् देवदत्तो यज्ञदत्तादीन् प्रसहते इति । प्रकृष्टबलेऽपि बलवच्छब्दो वर्त्तमानो न सिंहं शार्दूलं वाऽपेक्ष्य प्रयुज्यते, ये देवदत्तात्तु निकृष्टबलास्तान् अपेक्ष्य भवति । एवं, तेन ह्यन्नं क्रियते इति प्रकृष्टान्नकरणेन संस्तवः शूर्पस्य, निकृष्टान्यऽन्यानि अन्नकरणान्यपेक्ष्य भविष्यति ॥ ॥ २९ ॥ ॥ आशङ्कानिरासः ॥

यदि च हेतुरवतिष्ठेत निर्देशात् सामान्यादितिचेदव्यवस्था विधीनां स्यात् ॥ ३० ॥

यद्यपि च भवेदन्नकरणं हेतुर्दर्वीपिठरप्रकाराणां, तथापि शूर्प एवावतिष्ठेत। शब्दादन्नकरणं हेतुरिति विज्ञायते । शब्दश्च शूर्पस्याह, न दर्वीपिठरादीनाम् । तद्धि निर्दिश्यते यस्मात् शूर्पेणान्नं क्रियते, तस्मात् शूर्पेण जुहोतीति । यथा, यस्माद् बलवदुपध्मातोऽग्निस्तेन मे गृहं दग्धमिति, न अनग्निरपि बलवदुपध्मातो दहतीति गम्यते। अथ मतं, येन येनान्नं क्रियते प्रणाड्या, शूर्पादन्येनापि तेन तेनापि होमः क्रियते इति । अव्यवस्था विधीनां स्यान्न केनाचित् । प्रणाड्याऽन्नं क्रियते । तत्र यावदुक्तं स्यात्, जुहोति– इति, तावदेवाऽन्नकरणेन जुहोतीति । अस्मत्पक्षे पुनः शूर्पं स्तूयते । तेन ह्यन्नं क्रियते इति वृत्तान्तान्वाख्यानं न च वृत्तान्तज्ञापनाय, किं तर्हि प्ररोचनयैवं । तस्माद्धेतुवन्निगदस्यापि स्तुतिरेव कार्य्यमिति ॥ ३० ॥ सिद्धान्ते युक्तिः ॥ हेतुवन्निगदाधिकरणम् ॥ ३ ॥

तदर्थशास्त्रात् ॥ ३१ ॥

अथेदानीं, किं विवक्षितवचना मन्त्राः, उताविवक्षितवचनाः ? किमर्थप्रकाशनेन यागस्योपकुर्वन्ति, उतोच्चारणमात्रेणेति । यद्युच्चारणमात्रेण तदा न नियोगतो, बर्हिर्देवसदनं दामीत्येष बर्हिर्लवने विनियुज्येत । अभिधानेन चेत्, प्रकरणेन विज्ञाताङ्गभावो नान्यत्रोपकर्त्तु शक्नोतीत्यन्तरेणापि वचनं बर्हिर्लवन एव विनियुज्यतेति । तदेवमवगच्छामः । उच्चारणमात्रेणैवोपकुर्वन्तीति । कुतः । तदर्थशास्त्रात्

यदभिधानसमर्थो मन्त्रस्तत्रैवैनं शास्त्रं निबध्नाति। उरुप्रथा उरु प्रथस्वेति पुरोडाशं प्रथयतीति वचनमिदमनर्थकं, यद्यर्थाभिधानेनोपकुर्वन्ति। अथोच्चारणमात्रेण, ततो वक्तव्यो विनियोग उक्तश्च। अतो नाऽर्थाभिधानेन। यथा साक्षः पुरुषः परेण चेन्नीयते, नूनमक्षिभ्यां न पश्यतीति गम्यते ॥

नन्वर्थवादार्थं भविष्यतीति चेत्। न हि येन विधीयते, तस्य वाक्यशेषोऽर्थवाद इत्युक्तम्। न च निरपेक्षेण विहिते अर्थवादेन किञ्चिदपि प्रयोजनं क्रियते। अतो नार्थवादार्थं वचनम् ॥

तथाऽभ्यादानसमर्था मन्त्रा उदाहरणम्। लिङ्गादेव आदाने प्राप्ता वचनेन विधीयन्ते। तां चतुर्भिरादत्ते इति। चतुःसंख्यार्थमिति चेन्न। समुच्चयशब्दाभावात् ॥

तथा, इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते इत्युदाहरणम्। रशनादाने प्राप्तस्य रशनादाने एव शास्त्रं विनियोजकम्। तद् विवक्षितार्थत्वे न घटतेति। ननु गर्दभरशनां परिसंख्यास्यति। न शक्नोति परिसंख्यातुम्। परिसञ्चक्षाणो हि स्वार्थं च जह्यात्, परार्थञ्च कल्पेत, प्राप्तं च बाधेत। तस्मान्न विवक्षितवचना मन्त्राः अतो न प्रमाणं, बर्हिर्देवसदनं दामीत्यस्य रूपं बर्हिर्लवने विनियोगस्य ॥ ३१ ॥

वाक्यनियमात् ॥ ३२ ॥

नियतपदक्रमा हि मन्त्रा भवन्ति। अग्निमूर्द्धा दिव इति, न विपर्ययेण। यद्यर्थप्रत्यायनार्थाः, विपर्ययेणाप्यर्थः प्रतीयत इति नियमोऽनर्थकः स्यात्। अथोच्चारणविशेषार्थाः, विपर्यये अन्यदुच्चारणमिति नियम आश्रीयते। तेन यतरस्मिन् पक्षे नियमोऽर्थवान्, स नूनं पक्ष इति। नन्वर्थवत्स्वपि नियमो दृश्यते। यथा, इन्द्राग्नी इति। युक्तं तत्र तत्। विपर्ययेऽर्थप्रत्ययाभावात् ॥ ३२ ॥

बुद्धशास्त्रात् ॥ ३३ ॥

बुद्धे खल्वपि पाठादर्थे तदभिधानसमर्थो मन्त्रो भवति। अग्नीदऽग्नीन् विहरेति। स बुद्धे किं बोधयेत्? । अथ नु उच्चारणविशेषार्थाः, बुद्धेऽप्युच्चारणविशेषोऽत्रकल्प्येतेति। ननु पुनर्वचनात् संस्कारविशेषो भविष्यति। एवमस्मत्पक्षमेवाश्रितोऽसि वचनमुच्चारणम्। तद्धि शक्यते कर्त्तुं, नार्थप्रत्यायनम्। तत् प्रतीतेऽशक्यम्।

यथा, सोपानत्के पादे द्वितीयामुपानहमशक्यत्वान्नोपादत्ते ॥ ३३ ॥

अविद्यमानवचनात् ॥ ३४ ॥

यज्ञे साधनभूतः प्रकाशयितव्यः । न च तादृशोऽर्थोऽस्ति, यादृशमभिदधति । यथा, चत्वारि शृङ्गा इति । न हि चतुःशृङ्गं त्रिपादं द्विशिरस्कं सप्तहस्तं किञ्चिद् यज्ञसाधनमस्ति । तदत्राभिधानार्थः किमभिदध्यात् । उच्चारणार्थे त्ववक्लृप्यते । तथा, मा मा हिंसीः इत्यसत्यामपि हिंसायां किमभिदध्यात् ॥ ३४ ॥

अचेतनेऽर्थबन्धनात् ॥ ३५ ॥

अचेतनेऽर्थे खल्वर्थं निबध्नन्ति, ओषधे त्रायस्वैनमिति । अभिधानेनोपकुर्वन्त एवञ्जातीयका ओषधिं पशुत्राणाय प्रतिपादयेयुः । न चासावचेतना शक्या प्रतिपादयितुम् । उच्चारणार्थे तु नैष दोषो भवति । तस्मादुच्चारणार्थाः । शृणोत ग्रावाण इति चोदाहरणम् ॥ ३५ ॥

अर्थविप्रतिषेधात् ॥ ३६ ॥

अर्थविप्रतिषेधोऽपि भवति । अदितिर्द्यौरदितिरन्तरिक्षमिति । सैव द्यौः, तदेवान्तरिक्षमिति को जातुचिदवधारयेत् । अनवधारयँश्च किमभिधानेनोपकुर्यात् ? । उच्चारणमात्रे तु नैव विरोधो भवति । तस्मादुच्चारणार्था मन्त्राः । एको रुद्रो न द्वितीयोऽवतस्थे, असंख्याताः सहस्राणि ये रुद्रा अधिभूम्यामिति चोदाहरणम् ॥ ३६ ॥

स्वाध्यायवदवचनात् ॥ ३७ ॥

स्वाध्यायकाले पूर्णिकाऽवहन्ति करोति ! माणवकोऽवहन्तिमन्त्रमधीते । नाऽसौ तेन मन्त्रेण तदभिधानमभ्यस्यति, अक्षरानुपूर्व्याः अवधारणे एव यतते । येन च नाम प्रयोजनं, तदभ्यसितव्यम् । अत उच्चारणाभ्यासादुच्चारणेन प्रयोजनमित्यवगच्छामः ॥ ३७ ॥

अविज्ञेयात् ॥ ३८ ॥

अपि च केषाञ्चिन्मन्त्राणामशक्य एवार्थो वेदितुम् । यथा, अम्यक् सात इन्द्र ऋष्टिरस्मे इति, सृण्येव जर्भरी तुर्फरीतू इति, इन्द्रः सोमस्य काणुका इति च । एते किं प्रत्याययेयुः ? । उच्चारणार्थे तु न दोषः । तस्मादुच्चारणार्था मन्त्रा इति ॥ ३८ ॥

अनित्यसंयोगान्मन्त्रानर्थक्यम् ॥ ३९ ॥

अनित्यसंयोगः खल्वपि भवेन्मन्त्रेष्वभिधानार्थेषु । यथा, किं ते

कृण्वन्ति कीकटेषु गाव इति । कीकटा नाम जनपदाः, नैचाशाखं नाम नगरं, प्रमङ्गन्दो राजेति । यद्यभिधानार्थाः, प्राक् प्रमङ्गन्दादनाऽयं मन्त्रोऽनुभूतपूर्व इति गम्यते । तदेतैस्तदर्थशास्त्रादिभिः कारणैर्मन्त्राणामविवक्षितवचनता ॥ ३९ ॥ ॥ पूर्वपक्षः ॥

अविशिष्टस्तु वाक्यार्थः ॥ ४० ॥

अविशिष्टस्तु लोके प्रयुज्यमानानां वेदे च पदानामर्थः । स यथैव लोके विवक्षितस्तथैव वेदेऽपि भवितुमर्हति । नैवम् । लोके तैरर्थैरवबुद्धैः संव्यवहारः । इह देवताभिरप्रत्यक्षाभिर्यज्ञाङ्गैश्चाऽचेतनैः संलापे न कश्चिद् यज्ञस्योपकारः । यद्यदृष्टं परिकल्प्येत, उच्चारणादेव तद्भवितुमर्हति । यद्धि कर्त्तव्यं, तत् प्रयोजनवत् । उच्चारणं च न कथञ्चित् । न कर्त्तव्यं, यद्यपूर्वाय । यद्यर्थाय, यद्यर्थो न प्रत्याय्यते । न किञ्चित् अनर्थकम् । यदि न प्रयुज्यते, समाम्नानानर्थक्यम् । तस्माद्युच्चारणादपूर्वम् । तथाच तदर्थशास्त्रादि उक्तम् । तदुच्यते । अर्थप्रत्यायनार्थमेव यज्ञे मन्त्रोच्चारणम् । यदुक्तं, न देवताभिर्यज्ञाङ्गैश्च संलापे प्रयोजममस्तीति । यज्ञे यज्ञाङ्गप्रकाशनमेव प्रयोजनम् । कथम् । न ह्यप्रकाशिते यज्ञे यज्ञाङ्गे च यागः शक्योऽभिनिर्वर्त्तयितुम् । तस्मात्तन्निर्वृत्त्यर्थमर्थप्रकाशनं महानुपकारः कर्मणः, तच्च करोतीत्यवगम्यते । तस्माद्स्त्यस्य प्रयोजनम् । तच्च दृष्टं न शक्यमपवदितुम् । न अर्थाभिधानं प्रयोजनमिति । नन्वर्थाभिधानेनोपकुर्वन्तु, तां चतुर्भिरादत्ते इत्येवमाद्यनर्थकं भवति । काममनर्थकं भवतु, न जातुचिदपजामीमहे दृष्टमर्थाभिधानस्योपकारकत्वम् ॥४०॥ ॥ सिद्धान्तः ॥

अथ किं तच्छास्त्रमनर्थकमेव ? । न हि ॥

गुणार्थेन पुनः श्रुतिः ॥ ४१ ॥

यदुक्तं, तां चतुर्भिरादत्ते इति समुच्चयशब्दाभावाद् न समुच्चयार्थमिति । चतुःसंख्याविशिष्टमादानं कर्त्तव्यमिति वाक्यादवगम्यते । तदेकेन मन्त्रेण गृह्णन् न यथाश्रुतं गृह्णीयादिति ॥ ४१ ॥

परिसंख्या ॥ ४२ ॥

परिसञ्चक्षाणे च, इमामगृभ्णन्नित्यश्वाभिधानीमादत्ते इति त्रयो दोषाः प्रादुःष्युरिति । नैवं सम्बन्धः-इत्यादत्ते इति । कथं तर्हि ? इत्यश्वाभिधानीमिति । लिङ्गाद्रशनामात्रे, शब्दात्तु विशेषे अश्वाभि-

धान्यामिति। सति च वाक्ये लिङ्गं विनियोजकम्। तच्चास्य प्रकरणा-म्नानानुमितं वाक्यं नास्ति। कतरत्तत् ?। एतेन मन्त्रेणादानं कुर्यादिति, यस्मिन् सति रशनामात्रे लिङ्गात् प्राप्नोति । अश्वाभिधान्यां तु प्रत्यक्षमेव वचनम्। अस्मिन् सति तद् आनुमानिकं नास्ति। तेन गर्दभरशनायां न प्राप्तिरेवेति ॥ ४२ ॥

अर्थवादो वा ॥ ४३ ॥

उरु प्रथा उरु प्रथस्वेति पुरोडाशं प्रथयतीत्यर्थवादार्थेन पुनः श्रुतिः, यज्ञपतिमेव तत् प्रथयतीति । ननु नाऽयं मन्त्रस्य वाक्यशेषः न च प्राप्तस्य स्तुत्या प्रयोजनम्। सत्यम्। नायं मन्त्रस्य विधिः, न संस्तवः। प्रथनमेव तत्र स्तूयते। मन्त्र· पुनः रूपादेव प्राप्त इहानूद्यते प्रथनं स्तोतुम्। इत्थं प्रथनं प्रशस्तं, यत् क्रियमाणमेवंरूपेण मन्त्रेण क्रियते। कस्तदा भवति गुणः । यज्ञपतिमेव तत् प्रजया पशुभिः प्रथयति। किमेतदेवास्य फलं भवति। नेति ब्रूमः। स्तुतिः कथं भविष्यतीति। एवमुच्यते। कथमसति प्रथने प्रथयतीति शब्दः । मन्त्राभिधानात्। मन्त्रेण पुरोडाशमध्वर्युः प्रथस्वेति ब्रूते। यश्चैवं प्रथस्वेति ब्रूते, स प्रथयति। यथा, यः कुर्विति ब्रूते, स कारयति ॥ ४३ ॥

अविरुद्धं परम् ॥ ४४ ॥

यदुक्तं, पदनियमस्यार्थवत्त्वादविवक्षितार्था मन्त्रा इति। काममनर्थको नियमो, न दृष्टमप्रामाणम्। नियतोच्चारणम् अदृष्टायेति चेत्, अविरुद्धा अदृष्टकल्पनाऽस्मत्पक्षेऽपि। एवं प्रत्याय्यमानमभ्युदयकारि भवतीति ॥ ४४ ॥

संप्रैषे कर्मगर्हानुपालम्भः संस्कारत्वात् ॥ ४५ ॥

अथ यदुक्तं, प्रोक्षणीरासादयेति बुद्धबोधनमशक्यम्, अत उच्चारणाददृष्टमिति। तत्र कर्त्तव्यमित्यपि विज्ञाते अनुष्ठानकाले स्मृत्या प्रयोजनम्। उपायान्तरेणापि सा प्राप्नोति। अतोऽनेनोपायेन कर्त्तव्येति नियमार्थमाम्नानम्। संस्कारत्वात् ॥ ४५ ॥

अभिधानेऽर्थवादः ॥ ४६ ॥

चत्वारि शृङ्गा इत्यसदभिधाने गौणः शब्दः । गौणी कल्पनाप्रमाणवत्त्वादुच्चारणाददृष्टमाणम्। चतस्रो होत्राः शृङ्गाणीवाऽस्य। त्रयोऽस्य पादा इति सवनाभिप्रायम्। द्वे शीर्षे इति पत्नीयजमानौ।

सप्त हस्तास इति छन्दांस्यऽभिप्रेत्य । त्रिधा बद्ध इति त्रिभिर्वेदैर्बद्धः । वृषभः कामान् वर्षतीति, रोरवीति शब्दकर्मा, महो देवो मर्त्यान् आविवेशेति मनुष्याधिकाराभिप्रायम् । तद् यथा, चक्रवाकस्तनी हंसदन्तावली काशवस्त्रा शैवालकेशी नदीति नद्याः स्तुतिः । यज्ञसमृद्धये साधनानां चेतनसादृश्यमुपपादयितुकाम आमन्त्रणशब्देन लक्षयति । औषधे ! त्रायस्वैनमिति, शृणोत ग्रावाण इति । अतः परं प्रातरनुवाकानुवचनं भविष्यति, यत्राचेतनाः सन्तो ग्रावाणोऽपि शृणुयुः, किं पुनर्विद्वांसोऽपि ब्राह्मणा इति । इत्थञ्चाचेतना अपि ग्रावाण आमन्त्र्यन्ते ॥ ४६ ॥

गुणादविप्रतिषेधः स्यात् ॥ ४७ ॥

अदितिर्द्यौरिति गौण एष शब्दः । अतो न विप्रतिषेधः । यथा, त्वमेव माता पितेति, तथैकरुद्रदैवत्ये, एको रुद्र, शतरुद्रदैवत्ये, शतं रुद्रा इत्यविरोधः ॥ ४७ ॥

विद्यावचनमसंयोगात् ॥ ४८ ॥

यत्तु–अक्रर्मकालेऽवहन्तिमन्त्रेण माणवको न पूर्णिकाऽवहन्ति प्रकाशयितुमिच्छतीति । अयज्ञसंयोगाद्, न यज्ञोपकारायैतत् प्रकाशयितुमिच्छति । ननु प्रकाशनानभ्यासोऽक्षराभ्यासश्च परिचोदितः । उच्यते । सौकर्यात् प्रकाशनानभ्यासः, दुर्ग्रहत्वाच्चाक्षराभ्यासः ॥ ४८ ॥

सतः परमविज्ञानम् ॥ ४९ ॥

विद्यमानोऽप्यर्थः प्रमादालस्यादिभिर्नोपलभ्यते । निगमनिरुक्तव्याकरणवशेन धातुतोऽर्थः कल्पयितव्यः । यथा, शृण्येव जर्भरी तुर्फरीतू इत्येवमादीनि अश्विनोरभिधानानि द्विवचनान्तानि लक्ष्यन्ते । अनेन, अश्विनोः काममप्रा इत्याश्विनं सूक्तमवगम्यते । देवताभिधानानि च घटन्ते, जर्भरीत्येवमादीनि । अवयवप्रसिद्ध्या च लौकिकेन अर्थेन विशेष्यन्ते । जर्भरी भर्त्तारौ । तुर्फरीतू हन्ताराविति । एवं सर्वत्र ॥

उक्तश्चानित्यसंयोगः ॥ ५० ॥

परन्तु श्रुतिसामान्यम् इत्यत्रेति ॥ ५० ॥ ॥ उत्तरम् ॥

लिङ्गोपदेशश्च तदर्थवत् ॥ ५१ ॥

आग्नेय्याऽग्नीध्रमुपतिष्ठते इति विधानाद् विवक्षितार्थानामेव मन्त्राणां भवति लिङ्गेनोपदेशः । यदि तेऽग्निप्रयोजनास्ततस्ते आग्ने-

ष्याः, नाग्निशब्दसन्निधानात् ॥ ५१ ॥

ऊहः ॥ ५२ ॥

ऊहदर्शनं च विवक्षितार्थानामेव भवति । किमूहदर्शनम् । न पिता वर्द्धते, न मातेति । अन्ये वर्द्धन्ते इति गम्यते । प्रत्यक्षं कौमारयौवनस्थाविरैर्वर्द्धन्ते मात्रादयः । शब्दो न वर्द्धत इति ब्रूते । का पुनः शब्दस्य वृद्धिः । यद् द्विवचनबहुवचनसंयोगः ॥ ५२ ॥

विधिशब्दाश्च ॥ ५३ ॥

विधिशब्दाश्च विवक्षितार्थानेव मन्त्राननुवदन्ति । शतं हिमाः शतं वर्षाणि जीव्यासमित्येतदेवाहेति ॥५३॥ ॥ सिद्धान्ते युक्तिः ॥ ॥ मन्त्रलिङ्गाधिकरणम् ॥ ४ ॥ ॥ इति श्रीशबरस्वामिकृतौ मीमांसाभाष्ये प्रथमाध्यायस्य द्वितीयः पादः ॥ १ ॥ २ ॥ ॥ अर्थवादपादोऽयम् ॥

अथ प्रथमाध्यायस्य तृतीयः पादः ॥ १ ॥ ३ ॥

धर्मस्य शब्दमूलत्वादशब्दमनपेक्षं स्यात् ॥ १ ॥

एवं तावत् कृत्स्नस्य वेदस्य प्रामाण्यमुक्तम् । अथेदानीं यत्र न वैदिकं शब्दमुपलभेमहि, अथ च स्मरन्ति—एवमयमर्थोऽनुष्ठातव्यः, एतस्मै च प्रयोजनाय इति । किमसौ तथैव स्यान्न वेति । यथा, अष्टकाः कर्त्तव्याः, गुरुरनुगन्तव्यः, तड़ागं खनितव्यम्, प्रपा प्रवर्त्तयितव्या, शिखाकर्म कर्त्तव्यमित्येवमादयः । तदुच्यते । धर्मस्य शब्दमूलत्वादशब्दमनपेक्षं स्यादिति । शब्दलक्षणो धर्म इत्युक्तम् । चोदनालक्षणोऽर्थो धर्म इति । अतो निर्मूलत्वान्नापेक्षितव्यमिति । ननु ये विदुरित्थमसौ पदार्थः कर्त्तव्य इति, कथमिव ते वदिष्यन्त्यकर्त्तव्य एवायमिति ? । स्मरणानुपपत्त्या । न ह्यननुभूतोऽश्रुतो वाऽर्थः स्मर्य्यते, न चास्यावैदिकस्याऽलौकिकस्य च स्मरणमुपपद्यते । पूर्वविज्ञानकारणाभावादिति । या हि वन्ध्या स्मरेत्— इदं मे दौहित्रकृतमिति, न मे दुहिताऽस्तीति मत्वा, न जातुचिदसौ प्रतीयात्— सम्यगेतज्ज्ञानमिति । एवमपि यथैव पारम्पर्येणाऽविच्छेदाद्, अयं वेद इति प्रमाणमेषां स्मृतिरेवमियमपि प्रमाणं भविष्यतीति । नैतदेवम् । प्रत्यक्षेणोपलब्धत्वाद् ग्रन्थस्य, नानुपपन्नं पूर्वविज्ञानम् । अष्टकादिषु त्वदृष्टार्थेषु पूर्वविज्ञानकारणाभावाद् व्यामोहस्मृतिरेव गम्यते । तद्

यथा, कश्चिज्जात्यन्धो वदेत्, स्मराम्यहमस्य रूपविशेषस्येति। कुतस्ते पूर्वविज्ञानमिति च पर्य्यनुयुक्तो जात्यन्धमेवाऽपरं विनिर्दिशेत्। तस्य कुतः ?। जात्यन्धान्तरात्। एवं जात्यन्धपरम्परायामपि सत्यां नैव जातुचित् संप्रतीयुर्विद्वांसः सम्यग्दर्शनमेतदिति। अतो न आदर्त्तव्यमेवञ्जातीयकमनपेक्षं स्यादिति ॥ १ ॥ ॥ पूर्वपक्षः ॥

अपि वा कर्तृसामान्यात् प्रमाणमनुमानं स्यात् ॥२॥

अपि वेति पक्षो व्यावर्त्यते । प्रमाणं स्मृतिः । विज्ञानं हि तत् किमित्यन्यथा भविष्यति। पूर्वविज्ञानमस्य नास्ति, कारणाभावादिति चेत्। अस्या एव स्मृतेर्द्रढिम्नः कारणमनुमास्यामहे। तत्तु नानुभवनम्, अनुपपत्त्या। न हि मनुष्या इहैव जन्मन्येवञ्जातीयकमर्थमनुभवितुं शक्नुवन्ति। जन्मान्तरानुभूतं च न स्मर्यते। ग्रन्थस्तु अनुमीयेत, कर्तृसामान्यात् स्मृतिवैदिकपदार्थयोः । तेनोपपन्नो वेदसंयोगस्त्रैवर्णिकानाम् ॥

ननु नोपलभन्ते एवञ्जातीयकं ग्रन्थम्। अनुपलभमाना अप्यनुमिमीरन्, विस्मरणमप्युपपद्यते इति तदुपपन्नत्वात् पूर्वविज्ञानस्य त्रैवर्णिकानां स्मरतां, विस्मरणस्य चोपपन्नत्वाद् ग्रन्थानुमानमुपपद्यते इति प्रमाणं स्मृतिः ॥

अष्टकालिङ्गाश्च मन्त्रा वेदे दृश्यन्ते, यां जनाः प्रतिनन्दन्तीत्येवमादयः । तथा प्रत्युपस्थितनियमानामाचाराणां दृष्टार्थत्वादेव प्रामाण्यम्। गुरोरनुगमात् प्रीतो गुरुरध्यापयिष्यति, ग्रन्थग्रन्थिभेदिनश्च न्यायान् परितुष्टो वक्ष्यतीति। तथाच दर्शयति, तस्माच्छ्रेयांसं पूर्वं यन्तं पापीयान् पश्चादन्वेतीति। प्रपास्तडागानि च परोपकाराय, न धर्मायेत्येवावगम्यते। तथा च दर्शनम्। धन्वन्निव प्रपा असीति, तथा, स्थलयोदकं परिगृह्णन्तीति च । गोत्रचिह्नं शिखाकर्म, दर्शनञ्च, यत्र बाणाः सम्पतन्ति कुमारा विशिखा इवेति । तेन ये दृष्टार्थास्ते तत एव प्रमाणम् । ये त्वदृष्टार्थास्तेषु वैदिकशब्दानुमानमिति ॥ २ ॥ ॥ सिद्धान्तः ॥ ॥ स्मृतिप्रामाण्याधिकरणम् ॥ १ ॥

विरोधे त्वनपेक्ष्यं स्यादसति ह्यनुमानम् ॥ ३ ॥

अथ यत्र श्रुतिविरोधस्तत्र कथम्। यथा औदुम्बर्याः सर्ववेष्टनम्, औदुम्बरीं स्पृष्ट्वोद्गायेदिति श्रुत्या विरुद्धम् । अष्टाचत्वारिंशद्वर्षाणि वेदब्रह्मचर्यचरणम्, जातपुत्रः कृष्णकेशोऽग्नीनादधीतेत्येनेन

विरुद्धम् । क्रीतराजको भोज्यान्न इति, तस्मादग्नीषोमीये संस्थिते यजमानस्य गृहेऽशितव्यमित्यनेन विरुद्धम् । तत् प्रमाणम् । कर्तृसामान्यादित्येवं प्राप्ते ब्रूमः । अशक्यत्वाद् व्यामोह इत्यवगम्यते । कथमशक्यता । स्पर्शविधानान्न सर्वा शक्या वेष्टयितुम्, उद्गायता स्प्रष्टुञ्च । तामुद्गायता स्प्रष्टव्यामवगच्छन्तः केनेमं सम्प्रत्ययं बाधेमहि, सर्ववेष्टनस्मरणेनेति ब्रूमः ॥

ननु निर्मूलत्वाद् व्यामोहस्तत् स्मरणमिति वैदिकं वचनं मूलं भविष्यतीति । भवेद् वैदिकं वचनं मूलं, यदि स्पर्शनं व्यामोहः । अव्यामोहे त्वशक्यत्वादनुपपन्नम् । यथाऽनुभवनमनुपपन्नमिति न कल्प्यते, तथा वैदिकमपि वचनम् । कथं तर्हि सर्ववेष्टनस्मरणम् । व्यामोहः । कथं व्यामोहकल्पना । श्रौतविज्ञानविरोधात् । अथ, किमर्थं नेमौ विधी विकल्प्येते, व्रीहियववद् बृहद्रथन्तरवद्वा । नासति व्यामोहविज्ञाने विकल्पो भवति यदि सर्ववेष्टनविज्ञानं प्रमाणं, स्पर्शनं व्यामोहः । यदि स्पर्शनं प्रमाणं, स्मृतिर्व्यामोहः । विकल्पंन्तु वदन् स्पर्शनस्य पक्षे तावत् प्रमाण्यमनुमन्यते । तस्य च मूलं श्रुतिः । सा चेत् प्रमाणमनुमता, न पाक्षिकी । पाक्षिकं च सर्ववेष्टनस्मरणं पक्षे तावन्न शक्नोति श्रुतिं परिकल्पयितुम् । स्पर्शविज्ञानेन बाधितत्वात् । ततश्च अव्यामोहे च तस्मिन्न शक्या श्रुतिः कल्पयितुम् । न चाऽसावव्यामोहः पक्षे, पक्षे व्यामोहो भविष्यतीति । यदेव हि तस्यैकस्मिन् पक्षे मूलं, तदेवेतरस्मिन्नपि । एकस्मिंश्चेत् पक्षे न व्यामोहः, श्रुतिप्रामाण्यतुल्यत्वादितरत्राप्यव्यामोहः । न चासावेकस्मिन् पक्षे श्रुतिर्निबद्धाक्षरा हि सा, न प्रमादपाठ इति शक्या गदितुम् । तेन नैतत्पक्षे विज्ञानं व्यामोहात् पक्षान्तरं संक्रान्तमित्यवगम्यते । तत्र दुःश्रुतस्वप्नादिविज्ञानमूलत्वं तु सर्ववेष्टनस्येति विरोधात् कल्प्यते । न हि तस्य सति विरोधे प्रामाण्यमभ्युपगन्तव्यमिति किञ्चिदस्ति प्रमाणम् । तस्माद् यथैवैकस्मिन् पक्षे न शक्या श्रुतिः कल्पयितुम्, एवमपरस्मिन् पक्षे, तुल्यकारणत्वात् ॥

अपि चेतरेतराश्रयेऽन्यतः परिच्छेदात् । केयमितरेतराश्रयता । प्रमाणायां स्मृतौ स्पर्शनं व्यामोहः, स्पर्शने प्रमाणे स्मृतिर्व्यामोहः तदेतदितरेतराश्रयं भवति । तत्र स्पर्शनस्य क्लृप्तं मूलं, कल्प्यं स्मृतेः । सोऽसावन्यतः परिच्छेदः कल्प्यमूलत्वात् स्मृतिप्राण्यमनवक्ल-

क्षम्। तदप्रामाण्यात् स्पर्शनं न व्यामोहः। तदव्यामोहात् स्मार्त्तश्रुतिकल्पनाऽनुपपन्ना प्रमाणाभावात्। नन्वेवं सति व्रीहिसाधनत्वविज्ञानस्याप्यव्यामोहाद् यवश्रुतिर्नोपपद्येत। सत्यं नोपपद्यते, यद्यप्रत्यक्षा स्यात्। प्रत्यक्षात्वेषा। न हि प्रत्यक्षमनुपपन्नं नामास्ति। द्वयोस्तु श्रुत्योर्भावात्। द्वे ह्येते वाक्ये। तत्रैकेन केवलयवसाधनता गम्यते, एकेन केवलव्रीहिसाधनता। न च वाक्येनावगतोऽर्थोऽपह्नूयते। तस्माद् व्रीहियवयोरुपपन्नो विकल्पः, बृहद्रथन्तरयोश्च। तस्मादुक्तं श्रुतिविरुद्धा स्मृतिरप्रमाणमिति। अतश्च सर्ववेष्टनादि नादरणीयम्॥ ३॥ ॥ श्रुतिप्राबल्याधिकरणम्॥ २॥

हेतुदर्शनाच्च॥ ४॥

लोभाद्वास आदित्समाना औदुम्बरीं कृत्स्नां वेष्टितवन्तः केचित्। तत् स्मृतेर्बीजम्। बुभुक्षमाणाः केचित् क्रीतराजकस्य भोजनमाचरितवन्तः। अपुंस्त्वं प्रच्छादयन्तश्चाष्टाचत्वारिंशद्वर्षाणि वेदब्रह्मचर्यं चरितवन्तः। तत एषा स्मृतिरित्यवगम्यते॥

अधिकरणान्तरं वा वैसर्जनहोमीयं वासोऽध्वर्युर्गृह्णातीति, यूपहस्तिनो दानमाचरन्तीति। तत् कर्तृसामान्यात् प्रमाणमिति प्राप्तेऽप्रमाणं स्मृतिः। अत्रान्यन्मूलम्। लोभादाचरितवन्तः केचित् तत एषा स्मृतिः। उपपन्नतरञ्चैतत्। वैदिकवचनकल्पनात्॥ ४॥ ॥ दृष्टमूलकस्मृत्यप्रामाण्याधिकरणम्॥ ३॥

शिष्टाकोपेऽविरुद्धमिति चेत्॥ ५॥

आचान्तेन कर्त्तव्यं, यज्ञोपवीतिना कर्त्तव्यं, दक्षिणाचारेण कर्त्तव्यमित्येवंलक्षणान्युदाहरणानि। किमेतानि श्रुतिविरुद्धानि न कर्त्तव्यानि, उताविरुद्धानि कार्याणीति चेत् पश्यसि, तैरप्यनुष्ठीयमानैर्वैदिकं किञ्चिन्न कुप्यति। तस्मादविरुद्धानीति॥५॥ ॥ पूर्वपक्षे पूर्वपक्षः॥

न शास्त्रपरिमाणत्वात्॥ ६॥

नैतदेवम्। शास्त्रपरिच्छिन्नं हि क्रमं बाधेरन्। कथम्। वेदं कृत्वा वेदिं कुर्वीतेतीमां श्रुतिमुपरुन्ध्यादन्तरा वेदं वेदिं चानुष्ठीयमानमाचमनादि। दक्षिणेन चैकहस्तेनानुष्ठीयमानेषु पदार्थेषु कदाचित् प्रधानं स्वकालमतिक्रामेत्। उभाभ्यां हस्ताभ्यामनुतिष्ठन् प्रधानकालं संभावयिष्यति॥ ६॥ ॥ पूर्वपक्षः॥

अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन् ॥ ७ ॥

अपि वेति पक्षव्यावृत्तिः । अगृह्यमाणकारणा एवञ्जातीयकाः प्रमाणम् । ननु क्रमकालौ विरुन्धन्ति । विरुन्धन्तु, नैष दोषः । आचमनं पदार्थः, पदार्थानां च गुणः क्रमः । न च गुणानुरोधेन पदार्थो न कर्त्तव्यो भवति । अपिच प्राप्तानां पदार्थानामुत्तरकालं क्रम आपतति । यदा पदार्थः प्राप्नोति, तदा क्रम एव नास्ति, केन सह विरोधो भविष्यति ? इति । तथा यदि दक्षिणेन नाचर्यते, कालो मा विरोधीदिति तत्र कालानुरोधेन पदार्थो नाऽन्यथात्वमभ्युपगच्छेत् । प्रयोगाङ्गं हि कालः पदार्थानामुपकारकः । अतो न कालानुरोधेन व्यथयितव्यः पदार्थः । अपिच शौचं दक्षिणाचारता यज्ञोपवीतित्वं चैवञ्जातीयका अर्था व्यवधातारो न भवन्ति । सर्वपदार्थानां शेषभूतत्वात् । तस्मादाचमनादीनां प्रामाण्यम् ॥ ७ ॥ ॥ पदार्थप्राबल्याधिकरणम् ॥ ४ ॥

तेष्वदर्शनाद्विरोधस्य समा विप्रतिपत्तिः स्यात् ॥ ८ ॥

यवमयश्चरुः, वाराही उपानहौ, वैतसे कटे प्राजापत्यान् सञ्चिनोतीति यववराहवेतसशब्दान् समामनन्ति । तत्र केचिद्दीर्घशूकेषु यवशब्दं प्रयुञ्जन्ते, केचित् प्रियङ्गुषु । वराहशब्दं केचिच्छूकरे, केचित् कृष्णशकुनौ । वेतसशब्दं केचिद् वञ्जुलके, केचिज्जम्ब्वाम् । तत्रोभयथा पदार्थावगमाद्विकल्पः ॥ ८ ॥ ॥ पूर्वपक्षः ॥

शास्त्रस्था वा तन्निमित्तत्वात् ॥ ९ ॥

वाशब्दः पक्षं व्यावर्त्तयति । यवशब्दो यदि दीर्घशूकेषु, सादृश्यात् प्रियङ्गुषु भविष्यति । यदि प्रियङ्गुषु, सादृश्याद् यवेषु । किं सादृश्यम् । पूर्वसस्ये क्षीणे भवन्ति दीर्घशूकाः प्रियङ्गवश्चैतत् तयोः सादृश्यम् । कः पुनरत्र निश्चयः । यः शास्त्रस्थानां, स शब्दार्थः । के शास्त्रस्थाः । शिष्टाः । तेषामविच्छिन्ना स्मृतिः शब्देषु वेदेषु च । तेन शिष्टा निमित्तं श्रुतिस्मृत्यवधारणे । ते ह्येवं समामनन्ति यवमयेषु करम्भपात्रेषु विहितेषु वाक्यशेषं, यत्रान्या ओषधयो म्लायन्ते अथैते मोदमाना इवोत्तिष्ठन्तीति दीर्घशूकान् यवान् दर्शयति वेदः । वेदे दर्शनात् अविच्छिन्नपारम्पर्यो दीर्घशूकेषु यवशब्द इति गम्यते । तस्मात् प्रियङ्गुषु गौणः । तस्माद् दीर्घशूकानां पुरोडाशः कर्त्तव्यः । तस्माद्वराहं गावोऽनुधावन्तीति शूकरं वराहशब्दं दर्शयति, अप्सुजो

वेतस इति वञ्जुले वेतसशब्दम् । शूकरं हि गावोऽनुधावन्ति । वञ्जुलोऽप्सु जायते । जम्बूवृक्षः स्थले, गिरिनदीषु वा ॥ ९ ॥ सिद्धान्तः ॥ ॥ शास्त्रप्रसिद्धपदार्थप्रामाण्याधिकरणम् ॥ ५ ॥

चोदितं तु प्रतीयेताविरोधात् प्रमाणेन ॥ १० ॥

अथ यान् शब्दान् आर्या न कस्मिंश्चिदर्थे आचरन्ति, म्लेच्छास्तु कस्मिंश्चित् प्रयुञ्जन्ते; यथा, पिक नेम सत तामरसादिशब्दास्तेषु सन्देहः । किं निगमनिरुक्तव्याकरणवशेन धातुतोऽर्थः कल्पयितव्यः, उत यत्र म्लेच्छा आचरन्ति स शब्दार्थ इति ॥ शिष्टाचारस्य प्रामाण्यमुक्तं, नाशिष्टस्मृतेः । तस्मान्निगमादिवशेनार्थकल्पना । निगमादीनां चैवमर्थवत्ता भविष्यति । अनभियोगश्च शब्दार्थेष्वशिष्टानाम्, अभियोगश्चेतरेषाम् । तस्माद्धातुतोऽर्थः कल्पयितव्य इत्येवं प्राप्ते, ब्रूमः । चोदितमशिष्टैरपि शिष्टानवगतं प्रतीयेत, यत् प्रमाणेनाविरुद्धं तदवगम्यमानं न न्याय्यं त्यक्तुम् । यत्तु शिष्टाचारः प्रमाणमिति, तत् प्रत्यक्षानवगतेऽर्थे । यत्त्वभियुक्ताः शब्दार्थेषु शिष्टा इति । तत्रोच्यते अभियुक्ततराः पक्षिणां पोषणे बन्धने च म्लेच्छाः । यत्तु, निगमनिरुक्तव्याकरणानामर्थवत्तेति । तत्रैषामर्थवत्ता भविष्यति, न यत्र म्लेच्छैरप्यवगतः शब्दार्थः । अपि च निगमाऽऽदिभिरर्थे कल्प्यमाने अव्यवस्थितः शब्दार्थो भवेत् । तत्राऽनिश्चयः स्यात् । तस्मात् पिक इति कोकिलो ग्राह्यः, नेमोऽर्द्धं, तामरसं पद्मं, सत इति दारुमयं पात्रं, परिमण्डलं शतच्छिद्रम् ॥१०॥ म्लेच्छप्रसिद्धार्थप्रामाण्याधिकरणम् ॥६

प्रयोगशास्त्रमिति चेत् ॥ ११ ॥

इह कल्पसूत्राण्युदाहरणम् । माशकं, हास्तिकं, कौण्डिन्यकमिति । एवं लक्षणकानि किं प्रमाणमप्रमाणं वेति सन्दिग्धानि । किं प्राप्तम् । प्रयोगस्य शास्त्रं प्रमाणमेवञ्जातीयकमिति ब्रूमः । सत्यवाचामेतानि वचनानि । कथमवगम्यते । वैदिकैरेषां संवादो भवति । य एव हि वेदे ग्रहास्त एवेह, या एव वेदे इष्टकास्ता एवेह । तस्मात् सत्यवाच आचार्याः । आचार्यवचः प्रमाणमिति च श्रुतिः । प्रत्यक्षतः प्रामाण्यमनवगतमिति यद्युच्येत, प्रमाणान्तरेण वचनेनावगतमिति न दोषः । वेदवाक्यैश्चैषां तुल्य आदरः । तस्मात् प्रमाणम् ॥११॥ ॥ पूर्व० ॥

न असन्नियमात् ॥ १२ ॥

नैतदेवम्। असन्नियमात्। नैतत् सम्यङ्निबन्धनम्। स्वराभावात्॥ १२॥ ॥ सिद्धान्तः॥

अवाक्यशेषाच्च॥ १३॥

ऋत्विजो वृणीते, वृता यजन्ति, देवयजनमध्यवस्यन्तीति। नात्र विधिर्गम्यते वर्त्तमानकालप्रत्ययनिर्देशात्। न चात्र वाक्यशेषः स्तावकोऽस्ति। तस्मादप्रमाणम्। यश्चादर उक्तः, स नान्तरीयकत्वाद् वेदवाक्यमिश्रसमाम्नानात्। यत्तु श्रुतिरिति नैतत्। अर्थवादत्वात्। कथमर्थवादः। विध्यन्तरं ह्यस्ति, आग्नेयोऽष्टाकपाल इति। अत्राचार्यो वेदोऽभिप्रेतः। आचिनोत्यस्य बुद्धिमिति। यद्वा आचार्यवचनं प्रमाणं तदपेक्षम्' कतरत्तत्। यत् प्रमाणगम्यम्॥१३॥ ॥ सिद्धान्तः॥

यच्चोक्तं, सत्यवाचामेतानि वचनानीति। तन्न॥

सर्व्वत्र च प्रयोगात् सन्निधानशास्त्राच्च॥ १४॥

आचार्यवचनं हि भवति पूर्वपक्षे। सर्वासु तिथिष्वमावास्येति। सन्निहितञ्च शास्त्रं, पौर्णमास्यां पौर्णमास्या यजेत, अमावास्यायाममावस्यया यजेतेति। तेन श्रुतिविरुद्धवचनान्न सत्यवाचः। तस्मादप्रमाणम्॥१४॥ ॥ उ०॥ कल्पसूत्राऽस्वतःप्रामाण्याधिकरणम्॥७॥

अनुमानव्यवस्थानात्तत्संयुक्तं प्रमाणं स्यात्॥ १५॥

अनुमानात् स्मृतेराचाराणां च प्रामाण्यमिष्यते। येनैव हेतुना ते प्रमाणं, तेनैव व्यवस्थिताः प्रामाण्यमर्हन्ति। तस्माद् होलाकादयः प्राच्यैरेव कर्त्तव्याः, आह्नीनैबुकादयो दाक्षिणात्यैरेव, उद्वृषभयज्ञादय उदीच्यैरेव। यथा शिखाकल्पो व्यवतिष्ठते– केचित् त्रिशिखाः, केचित् पञ्चशिखा इति॥ १५॥ ॥ पूर्वपक्षः॥

अपि वा सर्व्वधर्मः स्यात् तन्न्यायत्वाद्विधानस्य॥१६॥

अपि वेति पक्षव्यावृत्तिः। एवञ्जातीयकः सर्वधर्मः स्यात्। कुतः। तन्न्यायत्वाद् विधानस्य। विधीयतेऽनेनेति विधानं शब्दः। सोऽनुमीयते स्मृत्या। न च तस्याऽऽकृतिवचनता न्याय्या, न च व्यक्तिवचनता। न सर्वेषामनुष्ठातॄणां यदेकं सामान्यं, तस्य वाचकः कश्चिच्छब्दोऽस्ति, योऽनुमीयेत। तस्मात् सर्वधर्मता विधेर्न्याय्या। कुतः। पदार्थाः कर्त्तव्या इति प्रमाणमस्ति, व्यवस्थायां तु न किञ्चित् प्रमाणमस्ति॥ १६॥ ॥ सिद्धान्तः॥

अथ यदुक्तं, यथा शिखाकल्पो व्यवतिष्ठते इति ॥

दर्शनाद्विनियोगः स्यात् ॥ १.७ ॥

गोत्रव्यवस्थया शिखाकल्पव्यवस्थायां दर्शनं स्पष्टम् ॥१७॥ उ० ॥

लिङ्गाभावाच्च नित्यस्य ॥ १८ ॥

इदं पदेभ्यः केभ्यश्चिदुत्तरं सूत्रम् । कानि तानि पदानि । अथ किमर्थं न लिङ्गाद् व्यवस्था ? । यथा, शुक्लो होता इति । नास्ति तद् नित्यमेषां लिङ्गं, यद् यथादर्शनमनुवर्त्तते । येऽपि श्यामा बृहन्तो लोहिताक्षास्तेऽपि न सर्वे आह्नीनैवुकादीन् कुर्वते । अनेवँल्लिङ्गा अपि चानुतिष्ठन्ति । तस्मान्न व्यवस्था । शुक्लो होतेति प्रत्यक्षा श्रुतिः॥१८॥

आख्या हि देशसंयोगात् ॥ १९ ॥

अथ कस्मान्न समाख्यया नियमः । ये दाक्षिणात्या इति समाख्यातास्ते आह्नीनैवुकादीन् करिष्यन्ति, ये उदीच्या इति समाख्यातास्ते उद्गूषभयज्ञादीन्, ये प्राच्या इति ते होलाकादीन् । यथा, राजा राजसूयेनेति । नैतदेवम् । देशसंयोगादाख्या भवति । दक्षिणदेशान्निर्गतः प्राक्षु वा उदक्षु वाऽवस्थित आह्नीनैवुकादीन् करोत्येव । उदीच्याश्च देशान्तरे उद्गूषभयज्ञादीन्, प्राच्याश्च होलाकादीन् । अन्यदेशश्च देशान्तरगतो न नियोगतः परपदार्थान् करोति । तस्मान्न व्यवस्था । राजा राजसूयेनेति तु नियता जातिः ॥१९॥ सिद्धान्ते आशङ्कानिरासः॥

न स्याद्देशान्तरेष्विति चेत् ॥ २० ॥

इति चेत् पश्यसि- यदि देशसंयोगादाख्या भवेद्, देशान्तरस्थस्य न भवेत् । भवति च देशान्तरस्थस्य, माथुर इत्यसम्बद्धस्याऽपि मथुरया । तस्मान्न देशसंयोगादाख्या ॥२०॥ सिद्धान्ते आशङ्का ॥

स्याद्योगाख्या हि माथुरवत् ॥ २१ ॥

देशसंयोगनिमित्तायामप्याख्यायां देशान्निर्गतस्य तदाख्या न विरुद्धा । यत एषा योगाख्या योगमात्रापेक्षा, न भूतवर्त्तमानभविष्यत्सम्बन्धापेक्षा । यतो दृश्यते- मथुरामभिप्रस्थितो माथुर इति, मथुरायां वसन्, मथुराया निर्गतश्च । यस्य तु अतोऽन्यतमः सम्बन्धो नाऽस्ति, न स माथुरः । तस्मान्न समाख्यया व्यवस्था ॥ २१ ॥ आ० नि० ॥

कर्मधर्मो वा प्रवणवत् ॥ २२ ॥

अथ कस्मान्न कर्माङ्गं देशः । यः कृष्णमृत्तिकाप्रायः, स आह्निनैवुका-दीनाम् । यथा, प्राचीनप्रवणे वैश्वदेवेन यजेतेति ॥२२॥ ॥ आशङ्का ॥

तुल्यन्तु कर्तृधर्मेण ॥ २३ ॥

यथा कर्त्तर्यव्यवस्थितं लिङ्गं श्यामादि न पदार्थैः संवादमुपैति, तद्वद्देशलिङ्गमव्यवस्थितम् । कृष्णमृत्तिकाप्रायेऽप्यन्ये न कुर्वन्ति तथाऽन्यलिङ्गेऽपि कुर्वन्ति । तस्मान्न देशतो व्यवस्था । प्राचीनप्रवणन्तु श्रुत्या नियतं वैश्वदेवस्य ॥ २३ ॥ आशङ्कानिरासः ॥ होलाकाऽधिकरणम् ॥ सामान्यश्रुतिकल्पनाधिकरणम् ॥ ८ ॥

प्रयोगोत्पत्त्यशास्त्रत्वाच्छब्देषु न व्यवस्था स्यात् ॥२४॥

गौः गावी गोणी गोपोतलिका इत्येवमादयः शब्दा उदाहरणम् । गोशब्दो यथा सास्नादिमति प्रमाणं, किं तथा गाव्यादयोऽप्युत नेति सन्देहः । किमत्रैकः शब्दोऽविच्छिन्नपारम्पर्योऽर्थाभिधायी, इतरे अपभ्रंशाः, उत सर्वेऽनादयः । सर्वे इति ब्रूमः । कुतः । प्रत्ययात् प्रतीयते हि गाव्यादिभ्यः सास्नाऽऽदिमान् अर्थः । तस्मादितो वर्षशतेऽप्यस्यार्थस्य सम्बन्ध आसीदेव, ततः परेण, ततश्च परतरेणेति अनादिता । कर्त्ता चाऽस्य सम्बन्धस्य नास्तीति व्यवस्थितमेव । तस्मात् सर्वे साधवः, सर्वैर्भाषितव्यम् । सर्वे हि साधयन्त्यर्थम् । यथा, हस्तः करः पाणिरिति ॥ अर्थाय ह्येते उच्चार्यन्ते, नाऽदृष्टाय न ह्येषामुच्चारणे शास्त्रमस्ति । तस्मान्न व्यवतिष्ठेत, कश्चिदेक एव साधुरितरेऽसाधव इति ॥ ॥ २४ ॥ ॥ पूर्वपक्षः ॥

शब्दे प्रयत्ननिष्पत्तेरपराधस्य भागित्वम् ॥ २५ ॥

महता प्रयत्नेन शब्दमुच्चरन्ति–वायुर्नाभेरुत्थितः,उरसि विस्तीर्णः, कण्ठे विवर्त्तितः, मूर्द्धानमाहत्य परावृत्तः, वक्त्रे विचरन् विविधान् शब्दानभिव्यनक्ति । तत्रापराध्येताऽप्युच्चारयिता । यथा शुष्के पतिष्यामीति कर्दमे पतति, सकृदु उपस्प्रक्ष्यामीति द्विरुपस्पृशति । ततोऽपराधात् प्रवृत्ता गाव्यादयो भवेयुः, न नियोगतोऽविच्छिन्नपारम्पर्या एवेति ॥ २५ ॥ ॥ सिद्धान्तः ॥

अन्यायश्चानेकशब्दत्वम् ॥ २६ ॥

न चैष न्यायो, यत् सदृशाः शब्दा एकमर्थमभिनिविशमानाः, सर्वेऽविच्छिन्नपारम्पर्या एवेति । प्रत्ययमात्रदर्शनादभ्युपगम्यते । सार-

स्यात् साधुशब्देऽप्यवगते प्रत्ययोऽवकल्प्यते । तस्मादमीषामेकोऽनादिरन्येऽपभ्रंशाः । हस्तः करः पाणिरित्येवमादिषु त्वभियुक्तोपदेशादनादिरमीषामर्थेन सम्बन्ध इति ॥ २६ ॥ ॥ सिद्धान्ते युक्तिः ॥

तत्र तत्त्वमभियोगविशेषात् स्यात् ॥ २७ ॥

कथं पुनस्तत्र तत्त्वं शक्यं विज्ञातुम् । शक्यमित्याह । अर्थिनो हि अभियुक्ता भवन्ति । दृश्यते चाभियुक्तानां गुणयतामविस्मरणमुपपन्नम् । प्रत्यक्षश्चैतद् गुण्यमानं न भ्रश्यते इति । तस्माद् यमभियुक्ता उपदिशन्ति, एष एव साधुरिति, साधुरित्यवगन्तव्यः ॥ २७ ॥ ॥ आशङ्कानिरासः ॥

तदशक्तिश्चानुरूपत्वात् ॥ २८ ॥

अथ यदुक्तम्– अर्थोऽवगम्यते गाव्यादिभ्यः, अत एषामप्यनादिरर्थेन सम्बन्ध इति । तदशक्तिरेषां गम्यते । गोशब्दमुच्चारयितुकामेन केनचिदशक्त्या गावीत्युच्चारितम् । अपरेण ज्ञातं– सास्नादिमान् अस्य विवक्षितस्तदर्थं, गौः–इत्युच्चारयितुकामो, गावी–इत्युच्चारयति । ततः शिक्षित्वाऽपरेऽपि सास्नादिमति विवक्षिते, गावी–इत्युच्चारयन्ति । तेन गाव्यादिभ्यः सास्नादिमानवगम्यते । अनुरूपो हि गाव्यादिर्गोशब्दस्य ॥ २८ ॥ ॥ उत्तरम् ॥

एकदेशत्वाच्च विभक्तिव्यत्यये स्यात् ॥ २९ ॥

अत एव हि विभक्तिव्यत्ययेऽपि प्रत्ययो भवति । अश्मकैरागच्छामीति । अश्मकशब्दैकदेशे उपलब्धे, अश्मकेभ्य इत्येव शब्दः स्मर्यते । ततः, अश्मकेभ्य इत्येषोऽर्थ उपलभ्यते इति । एवं गाव्यादिदर्शनाद् गोशब्दस्मरणं, ततः सास्नादिमानवगम्यते ॥ २९ ॥ ॥ उत्तरे युक्तिः ॥ ॥ साधुपदप्रयुक्त्यधिकरणम् ॥ ९ ॥

अथाऽऽकृतिशक्त्यधिकरणम् ॥

प्रयोगचोदनाभावादर्थैकत्वमविभागात् ॥ ३० ॥

अथ, गौः–इत्येवमादयः शब्दाः किमाकृतेः प्रमाणम्, उत व्यक्तेरिति सन्देहः । उच्यते । इदं तावत् परीक्ष्यताम् । किं य एव लौकिकाः शब्दास्त एव वैदिकाः, उतान्ये इति । यदा त एव, तदाऽपि किं त एवैषामर्था ये लोके, उतान्ये इति संशयः । तत्रान्ये लौकिकाः शब्दा, अन्ये वैदिका, अन्ये चैषामर्था इति ब्रूमः । कुतः ।

व्यपदेशभेदाद् रूपभेदाच्च । इमे लौकिका, इमे वैदिका तीह व्यपदेशभेदः । अग्निर्वृत्राणि जङ्घनत्-इत्यन्यदिदं रूपं लौकिकादग्निशब्दात् । शब्दान्यत्वाच्च न ते एवार्थाः । अपि च समामनन्ति, उत्ताना वै देवगवा वहन्तीति । ये देवानां गावस्त उत्ताना वहन्तीत्युक्ते गम्यते एव, य उत्ताना वहन्ति, ते गोशब्देनोच्यन्त इति । तस्मादन्यो वैदिकगोशब्दस्यार्थः । तथा, देवेभ्यो वनस्पते हवींषि हिरण्यपर्णः प्रदिवस्ते अर्थमिति, हिरण्यपर्णो देवो वनस्पतिः वेदे । एतद् वै दैव्यं मधु यद् घृतमिति वेदे घृते मधुशब्दः । तस्मादमीषामन्येऽर्था इति प्राप्ते, ब्रूमः । य एव लौकिकाः शब्दास्त एव वैदिकाः, त एवैषामर्था इति । कुतः । प्रयोगचोदनाभावात् । एवं प्रयोगचोदना सम्भवति । यदि त एव शब्दास्त एवार्थाः, इतरथा शब्दाऽन्यत्वेऽर्थो न प्रतीयेत । तस्मादेकशब्दत्वमिति । उच्यते । प्रयोजनमिदम् । हेतुर्व्यपदिश्यताम् इति । ततो हेतुरुच्यते । अविभागादिति । न तेषामेषाञ्च विभागमुपलभामहे । अत एव एकशब्दत्वं, तांश्च तांश्चार्थानवगच्छामः । अतो नान्यत्वञ्च वदामः । यच्चोक्तं, ये उत्ताना वहन्ति ते देवगवाः,यद् घृतं तन्मधु, यो हिरण्यपर्णः स वनस्पतिरिति । नास्ति वचनं, यदुत्तानानां वहतां गोत्वं ब्रूयात् । ये गावः, ते उत्ताना वहन्तीत्येवं तत् । यदि चानेन वचनेन गोत्वं विधीयते, उत्ताना वहन्तीत्यनुवादः स्यात् । न च उत्ताना वहन्तः प्रसिद्धाः केचित् । ते नियोगतो विधातव्याः । तेषु विधीयमानेषु न शक्यं गोत्वं विधातुम् । भिद्यते हि तथा वाक्यम् । यदि चान्ये वैदिकाः, तत उत्तानादीनामर्थो न गम्येत, तत्र नतरां शक्येताऽविज्ञातलक्षणं गोत्वं विज्ञातुम् । न चोत्तानवहनवचनमप्यनर्थकं, स्तुत्यर्थेनार्थवद् भविष्यतीति । एवं घृतस्य मधुत्वं, हिरण्यपर्णता च वनस्पतेः । तस्मात् त एव शब्दा अर्थाश्च ॥ * ॥ ॥ लोकवेदयोः शब्दैक्याऽधिकरणम्, आकृतिशक्त्यधिकरणान्तर्गतम् ॥ १० ॥

यदि, लौकिकास्त एवार्थास्तदा सन्देहः– किमाकृतिः शब्दार्थोऽथ व्यक्तिरिति । का पुनराकृतिः, का व्यक्तिरिति । द्रव्यगुणकर्मणां सामान्यमात्रमाकृतिः, असाधारणविशेषा व्यक्तिः । कुतः संशयः । गौः–इत्युक्ते सामान्यप्रत्ययाद्, व्यक्तौ च क्रियासंबन्धात् । तदुच्यते व्यक्तिः शब्दार्थ इति । कुतः । प्रयोगचोदनाभावात् । आलम्भनप्रो-

क्षणविशसनादीनां प्रयोगचोदना आकृत्यर्थे न सम्भवेयुः । यत्रो-च्चारणानर्थक्यं, तत्र व्यक्त्यर्थः । अतोऽन्यत्राकृतिवचन इति चेत् । उक्तम्-अन्यायश्चानेकार्थत्वमिति । कथं सामान्यावगतिरिति चेत् । व्यक्तिपदार्थकस्याकृतिश्चिह्नभूता भविष्यति । य एवमाकृतिः, स गौरिति । यथा यस्य दण्डोऽस्ति, स दण्डीति न च दण्डवचनो दण्डिशब्दः । एवमिहाऽपि ॥ ३० ॥

अद्रव्यशब्दत्वात् ॥ ३१ ॥

द्रव्याश्रयस्य शब्दो द्रव्यशब्दः, न तत्र द्रव्याश्रयवचनः शब्दो भवेद् यद्याकृतिः शब्दार्थो भवेत् । षड् देया द्वादश देयाश्चतुर्विंशति-र्देया इति । न हि आकृतिः षडादिभिः संख्याभिर्युज्यते । तस्मान्ना-ऽऽकृतिवचनः ॥ ३१ ॥

अन्यदर्शनाच्च ॥ ३२ ॥

यदि पशुरुपाकृतः पलायेत, अन्यं तद्वर्णं तद्वयसमालभेत इति । यद्याकृतिवचनः शब्दो भवेद्, अन्यस्यालम्भो नोपपद्येत । अन्यस्यापि पशुद्रव्यस्य सैवाकृतिः । तस्माद् व्यक्तिवचन इति ॥३२॥ ॥ पूर्वपक्षः ॥

आकृतिस्तु क्रियार्थत्वात् ॥ ३३ ॥

तुशब्दः पक्षं व्यावर्त्तयति । आकृतिः शब्दार्थः । कुतः । क्रिया-ऽर्थत्वात् । श्येनचितं चिन्वीतेति वचनमाकृतौ संभवति यद्याकृत्यर्थः श्येनशब्दः । व्यक्तिवचने तु न चयनेन श्येनव्यक्तिरुत्पादयितुं शक्य-ते इत्यशक्यार्थवचनादनर्थकः । तस्माद् आकृतिवचनः ॥

ननु श्येनव्यक्तिभिश्चयनमनुष्ठास्यते । न साधकतमः श्येनशब्दार्थः ईप्सिततमो ह्यसौ श्येनशब्देन निर्दिश्यते । अतश्चयनेन श्येनो निर्व-र्त्तयितव्यः । स आकृतिवचनत्वेऽवकल्प्यते । ननु उभयत्र क्रियाया अ-सम्भव एव व्यपदिश्यते । नाकृतिः शब्दार्थः । कुतः । क्रिया न सम्भवे-दाकृतौ शब्दार्थे, व्रीहीन् प्रोक्षतीति । तथा न व्यक्तिः शब्दार्थः, क्रि-यैव न सम्भवेद् व्यक्तेः शब्दार्थत्वे, श्येनचितं चिन्वीतेति । यद-प्युच्येत, व्रीहीन् प्रोक्षतीति व्यक्तिलक्षणार्था आकृतिरिति शक्यम-न्यत्रापि, श्येनचितं चिन्वीतेति वदितुम् आकृतिलक्षणार्था व्यक्ति-रिति । किं पुनरत्र ज्यायः । आकृतिः शब्दार्थ इति । यदि व्यक्तिः श-ब्दार्थो भवेद्, व्यक्त्यन्तरे न प्रयुज्येत । अथ व्यक्त्यन्तरे प्रयुज्यते, न

तर्हि व्यक्तिः शब्दार्थः । सर्वसामान्यविशेषविनिर्मुक्ता हि व्यक्तिरिति । उच्यते । नैष दोषः । व्यक्त्यन्तरे सर्वसामान्यविशेषविनिर्मुक्ते एव प्रवर्त्तिष्यते । यदि व्यक्त्यन्तरे सर्वसामान्यविशेषवियुक्ते प्रवर्त्तिष्यते, सामान्यमेव तर्हि तत् । नेत्युच्यते । यो हि अर्थः सामान्यस्य विशेषाणाञ्चाश्रयः, सा व्यक्तिः। व्यक्तिवचनश्च शब्दो न सामान्ये, न विशेषे वर्त्तते, तेषां त्वाश्रयमेवाभिदधाति । तेन व्यक्त्यन्तरे वृत्तिरदोषः । न हि तत् सामान्यम् । यदि व्यक्त्यन्तरेष्वपि भवति, सर्वसामान्यविशेषवियुक्तायामश्वव्यक्तौ गोशब्दः किमिति न वर्त्तते । आह येष्वेव प्रयोगो दृष्टस्तेषु वर्त्तिष्यते, न सर्वत्र । न चाश्वव्यक्तौ गोशब्दस्य प्रयोगो दृष्टः । तस्मात्तत्र न वर्त्तिष्यते । यदि यत्र प्रयोगो दृष्टस्तत्र वृत्तिः, अद्य जातायां गवि प्रथमप्रयोगो न प्राप्नोति तत्रादृष्टत्वात् । सामान्यप्रत्ययश्च न प्राप्नोति— इयमपि गौरिति, इयमपि गौरिति इयं वा गौरिति, इयं वा गौरिति स्यात् । भवति तु सामान्यप्रत्ययोऽदृष्टपूर्वायामपि गोव्यक्तौ । तस्मान्न प्रयोगापेक्षो गोशब्दो व्यक्तिवचन इति शक्यते आश्रयितुम् । एवं तर्हि शक्तेः स्वभाव एषः, यत् कस्याञ्चित् व्यक्तौ वर्त्तते, कस्याञ्चिन्न । यथा, अग्निरुष्णः, उदकं शीतम्, एवमेतद् भविष्यतीति । नैवं सिद्ध्यति । न ह्येतद् गम्यते कस्याञ्चिद् व्यक्तौ वर्त्तते, कस्याञ्चिन्नेति ॥

सत्यमेतत् । गोत्वं लक्षणं भविष्यतीति । यत्र गोत्वं तस्यां व्यक्ताविति । एवं तर्हि विशिष्टा व्यक्तिः प्रतीयेत । यदि च विशिष्टा, पूर्वतरं विशेषणमवगम्येत । न हि, अप्रतीते विशेषणे विशिष्टं केचन प्रत्येतुमर्हन्तीति । अस्तु विशेषणत्वेनाकृतिं वक्ष्यति, विशेष्यत्वेन व्यक्तिम् । न ह्याकृतिपदार्थकस्य व्यक्तिर्न पदार्थो, व्यक्तिपदार्थकस्य वा नाकृतिः । उभयमुभयस्य पदार्थः । कस्यचित् किञ्चित् प्राधान्येन विवक्षितं भवति, तेन अत्राकृतिर्गुणभावेन, व्यक्तिः प्रधानभावेन विवक्ष्यते इति ॥

नैतदेवम् उभयोरुच्यमानयोर्गुणप्रधानभावः स्यात् । यदि चात्र आकृतिः प्रतीयते शब्देन, तदा व्यक्तिरपि पदार्थ इति न शक्यते वदितुम् । कुतः । आकृतिर्हि व्यक्त्या नित्यसम्बद्धा, सम्बन्धिन्याञ्च तस्यामवगतायां सम्बन्ध्यन्तरमवगम्यते । तदेतदात्मप्रत्यक्षं, यच्छब्दे उच्चरिते व्यक्तिः प्रतीयते इति । किं शब्दाद् उत कृतेरिति विभागो न

प्रत्यक्षः सोऽन्वयव्यतिरेकाभ्यामवगम्यते । अन्तरेणापि शब्दं य आकृतिमवबुध्येत, अवबुध्येतैवासौ व्यक्तिम् । यस्तूच्चरितेऽपि शब्दे मानसादपचारात् कदाचिदाकृतिं नोपलभेत, न जातुचिदसाविमां व्यक्तिमवगच्छेत । ननु व्यक्तिविशिष्टायामाकृतौ वर्त्तते । व्यक्तिविशिष्टायाश्चेद् वर्त्तते, व्यक्त्यन्तरविशिष्टा न प्रतीयेत । तस्माच्छब्द आकृतिप्रत्ययस्य निमित्तम् । आकृतिप्रत्ययो व्यक्तिप्रत्ययस्येति ॥

ननु गुणभूता प्रतीयते इत्युक्तम् । न गुणभावोऽस्मत्पक्षस्य बाधकः । सर्वथा तावत् प्रतीयते । अर्थाद् गुणभावः प्रधानभावो वा । स्वार्थे चेदुच्चार्यते, प्रधानभूता । अथ न स्वार्थे, परार्थमेव; ततो गुणभूता । न तत्र शब्दव्यापारोऽस्ति । ननु च दण्डीति, न तावद् दण्डिशब्देन दण्डोऽभिधीयते; अथ च दण्डविशिष्टोऽवगम्यते । एवमिहापि न तावदाकृतिरभिधीयेत, अथ चाकृतिविशिष्टा व्यक्तिर्गम्येतेति । नैतत् साधु । उच्यते । सत्यं दण्डिशब्देन दण्डो नाभिधीयते, न त्वप्रतीते दण्डे दण्डिप्रत्ययोऽस्ति । अस्ति तु दण्डिशब्दैकदेशभूतो दण्डशब्दो, येन दण्डः प्रत्यायितः । तस्मात् साध्वेतद् यत् प्रतीते विशेषणे विशिष्टः प्रतीयते इति ॥

ननु गोशब्दावयवः कश्चिदाकृतेः प्रत्यायकः, अन्यो व्यक्तेः । यत उच्येत, तत आकृतिरवगता, न गोशब्द आकृतिवचन इति । न च यथा दण्डिशब्दो न दण्डे प्रयुक्त, एवं गोशब्दो नाकृतौ । तदर्थमेव निदर्शितं, केवलाऽऽकृत्यभिधानः श्येनशब्द इति । तदेवमन्वयव्यतिरेकाभ्यामसति श्येनव्यक्तिसम्बन्धे श्येनशब्दोच्चारणादाकृतिवचन इति गम्यते । न तु व्रीह्याकृतिसम्बन्धमन्तरेण व्रीहिव्यक्तौ शब्दस्य प्रयोगो दृष्टः । तस्माद् आकृतिवचनः शब्द इत्येतज्ज्यायः ॥३३॥ सिद्धान्तः ॥

न क्रिया स्यादितिचेदर्थान्तरे विधानं न द्रव्यमिति चेत् ॥ ३४ ॥

अथ यदुक्तं, न क्रिया सम्भवेद्, व्रीहीन् प्रोक्षतीति । न द्रव्यशब्दः स्यात्, षड् देया इति । अन्यदर्शनवचनञ्च न स्याद् अन्यं तद्रूपमिति । तत् परिहर्त्तव्यम् ॥ ३४ ॥

तदर्थत्वात् प्रयोगस्याविभागः ॥ ३५ ॥

आकृत्यर्थत्वाच्छब्दस्य यस्या व्यक्तेराकृत्या सम्बन्धस्तत्र प्रयो-

शः । प्रोक्षणं हि द्रव्यस्य कर्त्तव्यतया श्रूयते । कतमस्य? । यद् यज्ञसाधनम् । अपूर्वप्रयुक्तत्वात्तस्य, नाकृतेः । अशक्यत्वात् । तत्र व्रीहिशब्द आकृतिवचनः प्रयुज्यते प्रोक्षणाश्रयविशेषणाय । स ह्याकृतिं प्रत्याययिष्यति, आकृतिः प्रतीता सती प्रोक्षणाश्रयं विशेक्ष्यतीति । तेनाकृतिवचनं न विरुध्यते इति । एवं, षड्संख्या गावो दक्षिणा इति दक्षिणाद्रव्ये संख्यायाः प्रयोक्तव्ये गाव इत्याकृतिवचनो विशेषकः । तथा अन्यमिति विनष्टस्य प्रतिनिधेरन्यत्वसम्बन्धः । तत्र पशुशब्द आकृतिवचनः, आकृत्या विशेक्ष्यतीति । तस्माद् गौरश्व इत्येवमादयः शब्दा आकृतेरभिधायका इति सिद्धम् ॥३५॥ ॥ उत्तरम् ॥ आकृतिशक्त्यधिकरणम् ॥ १० ॥ इति श्रीशबरस्वामिकृते मीमांसाभाष्ये प्रथमस्याध्यायस्य तृतीयः पादः ॥ १ ॥ ३ ॥ स्मृतिपादोऽयम् ॥

अथ प्रथमाध्याये चतुर्थः पादः ॥ १ ॥ ४ ॥

उक्तं समाम्नायैदमर्थ्यं तस्मात् सर्व्वं तदर्थं स्यात् ॥१॥

उद्भिदा यजेत, बलभिदा यजेत, अभिजिता यजेत, विश्वजिता यजेतेति समामनन्ति । तत्र सन्देहः । किमुद्भिदादयो गुणविधय, आहोस्वित् कर्मनामधेयानीति । कुतः संशयः । उभयथाऽपि प्रतिभातो वाक्यात् । उद्भिदेत्येष शब्दो यजेतेत्यनेन सम्बध्यते । स किं वैयधिकरण्येन सम्बन्धमुपैति उद्भिदा द्रव्येण यागमभिनिर्वर्त्तयेदिति, उत सामानाधिकरण्येन– उद्भिदा यागेन यजेतेति । द्वेधाऽप्येतस्मिन् प्रतिभाति वाक्ये, सम्भवति संशयः ॥

किं तावत् प्राप्तम् । उक्तमस्माभिः समाम्नायस्यैदमर्थ्यम् । कश्चिदस्य भागो विधिर्योऽविदितमर्थं वेदयति । यथा, सोमेन यजेतेति कश्चिदर्थवादो यः प्ररोचयन् विधिं स्तौति । यथा, वायुर्वै क्षेपिष्ठा देवतेति । कश्चिन्मन्त्रो यो विहितमर्थं प्रयोगकाले प्रकाशयति । यथा, बर्हिर्देवसदनं दामीत्येवमादि । तस्मादुद्भिदादयोऽमीषां प्रयोजनानामन्यस्मै प्रयोजनाय भवेयु । तत्र तावन्नार्थवादः । वाक्यशेषो हि स भवति विधातव्यस्य । न च मन्त्रः । एवञ्जातीयकस्य प्रकाशयितव्यस्याभावात् । पारिशेष्याद् गुणविधिः । उद्भिद्गुणता यागस्य विधीयते । कुतः । प्रसिद्धेरनुग्रहाद् गुणविधेरर्थवत्त्वात्, प्रवृत्तिवि-

ष्ठोपकरत्वाच्च । न चैषां यागार्थता लोकेऽवगम्यते । न च वेदेन परिभाष्यते । अतो गुणविधयः । यदि गुणविधिः, न तर्हि कर्म विधीयते । अविहिते च कर्मणि तत्र गुणविधानमनर्थकम् । नेति ब्रूमः। प्रकृतौ ज्योतिष्टोमे गुणविधानमर्थवद्भविष्यति । यदि नामधेयं स्याद्, यावदेव यजेतेति, तावदेव उद्भिदा यजेतेति न प्रवृत्तौ कश्चिद् गुणविशेषः स्यात् । गुणविधौ च गुणसंयोगादभ्यधिकमर्थं विदधत उद्भिदादयः शब्दा अर्थवन्तो भविष्यन्ति । तस्माद् गुणविधय इत्येवं प्राप्तम् ॥ १ ॥ ॥ पूर्वपक्षः ॥

एवं प्राप्ते ब्रूमः—

अपि वा नामधेयं स्याद् यदुत्पत्तावपूर्व-मविधायकत्वात् ॥ २ ॥

अपि वेति पक्षो विपरिवर्त्तते । नामधेयं स्यादिति प्रतिजानीमहे एवमविहितमर्थं विधास्यति ज्योतिष्टोमाद् यागान्तरं, श्रुतिश्चैवं यागमभिधास्यति । इतरथा श्रुतिरुद्भिदादीन् वक्ष्यन्ती उद्भिदादिमतो लक्षयेत् । उद्भिद्वता यागेन कुर्य्यादिति । यागेन कुर्य्यादिति, यजेतेत्यस्यार्थः । करणं हि यागः । उद्भिदाद्यपि तृतीयानिर्द्देशात् करणम् । तत्रोद्भिदा यागेनेति कर्मनामधेयत्वेन सामानाधिकरण्यसामञ्जस्यम् । द्रव्यवचनत्वे मत्वर्थलक्षणया सामानाधिकरण्यं स्यात् । श्रुतिलक्षणाविषये च श्रुतिर्ज्यायसी । तस्मात् कर्मनामधेयम् । ननु प्रसिद्धं द्रव्यवचनत्वमपह्नूयेत, अप्रसिद्धं कर्मवचनत्वं प्रतिज्ञायेत । उच्यते । तृतीयानिर्द्देशात् कर्मवचनता । कुतः । करणवाचिनो हि प्रातिपदिकात् तृतीया भवति करणं च यागः । तेन यागवचनमिममनुभास्यामहे ॥

नैतद्युक्तम् । यदि तृतीयानिर्देशे सति उद्भिदादिभ्यः शब्देभ्यो यागे बुद्धिरुत्पद्येत, स्यादेतदेवम् । न हि नो बुद्धिरुत्पद्यते तस्मादयुक्तम् । तृतीयावचनमन्यथा नोपपद्यते इति चेत्, कामं मोपपादि । न जातुचिदनवगम्यमानेऽपि यागवचनो भविष्यति । तस्माद् गुणविधयः । लक्षणेति चेद्, वरं लक्षणा कल्पिता, न यागाभिधानम् । लौकिकी हि लक्षणा, इतोऽप्रसिद्धकल्पनेति । अपि च, यदि नामधेयं विधीयते, न यागः । अथ यागो, न नामधेयम् । उभयविधाने वाक्यभेद इति । उच्यते । न नामधेयं विधायिष्यते । अनुवादो बुद्धि-

द्भादयः । कुतः प्राप्तिरिति चेत् । ततोऽभिधीयते, उच्छब्दसामर्थ्याद् भिच्छब्दसामर्थ्याच्चोद्भिच्छब्दः क्रियावचनः । उद्भेदनं प्रकाशनं पशूनामनेन क्रियते इत्युद्भिद् यागः । एवमाभिमुख्येन जयाद् अभिजित्, विश्वजयाद् विश्वजित् । एवं सर्वत्र । अतः कर्मनामधेयम् । यत्त्वप्रवृत्तिविशेषकरोऽनर्थक इति, नामधेयमपि गुणफलोपबन्धेनार्थवत् । तस्मात् कर्मनामधेयान्येवञ्जातीयकानीति सिद्धम् ॥ २ ॥ ॥ सिद्धान्तः ॥ ॥ उद्भिदादिशब्दानां यागनामधेयताऽधिकरणम् ॥ १ ॥

यस्मिन् गुणोपदेशः प्रधानतोऽभिसंबन्धः ॥ ३ ॥

चित्रया यजेत पशुकामः, त्रिवृद्बहिष्पवमानम् । पञ्चदशान्याज्यानि, सप्तदश पृष्ठानीत्युदाहरणम् । किं चित्राशब्दः, पवमानशब्दः, आज्यशब्द , पृष्ठशब्दश्च गुणविधयः ? उत कर्मनामधेयानीति संशयः । प्रसिद्धेः, अर्थवत्त्वात्, प्रवृत्तिविशेषकरत्वाच्च गुणविधयः । न चैते कर्मणि प्रसिद्धाः । न चामी यौगिकाः । जातिशब्दा ह्येते चित्रा इति च गुणशब्दः । चित्रया यजेतेति च यागानुवादः । विज्ञातत्वान्न यागविधिः । गुणे फलकल्पनायां यजतेर्न विवक्षा । तथा आज्यानि भवन्ति, पृष्ठानि भवन्तीति च । गुणविधिकल्पनायामपि न लक्षणा । तस्माद् गुणविधय इत्येवं प्राप्तम् ॥

एवं प्राप्ते, ब्रूमः । यस्मिन् गुणविधिर्नामधेयमिति सन्दिग्धे गुणोऽपर उपदिश्यते प्रधानेन कर्मणा तस्य सम्बन्धः, कर्मनामधेयमित्यर्थः । गुणविधौ हि सति वाक्यं भिद्येत । पुंपशौ प्राप्ते स्त्रीपशुः । पशवः फलं, चित्रो गुण इति न शक्यमेकेन वाक्येन विधातुम् । चित्रो गुणो विधीयमानः स्त्रियां विधीयेत । नासावग्नीषोमीये पशुकामे च विधीयेत । सोऽपि नाग्नीषोमीये । तथा पञ्चदशानि आज्यानि भवन्तीति आज्येषु पञ्चदशता । न चाविहितानि स्तोत्रेष्वाज्यानि भवन्ति न चान्यद्विधायकं वाक्यं, तच्चैतदाज्यानि विदध्याद् विहितेषु च पञ्चदशताम् । गम्यते च पञ्चदशताया आज्यानां च सम्बन्धः । स्तोत्रसम्बन्धश्चाज्यानामविज्ञातः पञ्चदशतासम्बन्धश्च । द्वावेतावर्थावेकवाक्यस्याशक्यौ विधातुम् । अथ नु कर्मनामधेयं, नैष विरोधो भवति । केवलं संख्यासम्बन्धस्तदानीं विधीयते । अपि चाज्यानि स्तोत्राणीत्यनेन शब्देन लक्षणयैव गुणो विधीयेत । अतः कर्मणां नामधेयानि । वाक्यान्तरैः, आज्यैः स्तुवते, पृष्ठैः स्तुवते इत्येवमादिभि-

विहितानाम्। यत्त्वप्रसिद्धं कर्मणां नामधेयमिति। अवयवप्रसिद्ध्या आजिगमनादाज्यानि। कथमाजिगमनमिति। अर्थवादवचनात्। यदाजिमीयुस्तदाज्यानामाज्यत्वमिति। रूपशेषवचनात् पृष्ठानि। पवमानार्थमन्त्रकत्वात् बहिःसम्बन्धाच्च बहिष्पवमानम्। दधि मधु पयो घृतं धानास्तण्डुला उदकं तत्संसृष्टं प्राजापत्यमिति नानाविधद्रव्यत्वाच्चित्रा। तस्मादेवञ्जातीयकानि कर्मनामधेयानीति। अथ कस्मान्न पञ्चदशसंख्याविशिष्टानि आज्यानि स्तोत्रकर्मसु विधीयन्ते?। विशिष्टानां वाचकस्य शब्दस्याभावात्॥

ननु पदद्वयमिदं वाचकं भविष्यति, पञ्चदशान्याज्यानीति। विशिष्टानां, तदेतेषु स्तोत्रेषु विधास्यति। नैतत्पदद्वयमपि विधायकम्। एकमत्र विधायकम्, एकमुद्देशकम्। उभयस्मिन् विधायके परस्परेण संबन्धो न स्यात्। अविधायके स्तोत्रसंबन्धो न विधीयते। न चाप्येकं पदं, विशेषणं प्रति उद्देशकं, स्तोत्रं प्रति विधायकं भवितुमर्हति। वचनव्यक्तिभेदादतोऽयमसमाधिः॥ ३॥ चित्रादिशब्दानां यागनामधेयताधिकरणम्॥ २॥

तत्प्रख्यञ्चान्यशास्त्रम्॥ ४॥

अग्निहोत्रं जुहोति स्वर्गकाम इति, आघारमाघारयतीति च समामनन्ति। तत्र संशयः, किमग्निहोत्रशब्द आघारशब्दश्च गुणविधी, उत कर्मनामधेये इति। गुणविधी इति ब्रूमः। कुतः?। गम्यते हि, अग्नये होत्रमस्मिन्निति। तथा क्षरणसमर्थं द्रव्यं घृतादि, आघारमाघारयतीति प्रसिद्धिरेवमनुग्रहीष्यते। गुणविधिश्च दर्विहोमे, आघारश्चोपांशुयाजे। तत्रैतयोरर्थवत्ता प्रसिद्धिविशेषकरत्वञ्च। न च गुणविधिपक्षे लक्षणा भवति, यथोद्भिदा यजेतेति। अग्निहोत्रे समासेनावगतं गुणविधानम्। आघारेऽपि, आघारं निर्वर्त्तयतीति श्रुत्यैव गुणो विधीयते। तस्माद् गुणविधी इत्येवं प्राप्ते, ब्रूमः। तत्प्रख्यञ्चान्यशास्त्रम्। यौ गुणावेताभ्यां विधीयेते इत्याशङ्क्यते, तावन्यत एवावगतौ। यदग्नये च प्रजापतये च सायं जुहोतीति देवताविधानं, चतुर्गृहीतं वा एतदभूत्तस्याघारमाघार्यो इत्याघारे च द्रव्यविधिः। अविदितवेदनञ्च विधिरित्युच्यते। विदितं चात्रान्यतो गुणविधानम्। तस्मान्न गुणविधी, कर्मनामधेये तु सम्भवतः। यस्मिन्नग्नये होत्रं होमो भवति, तदग्निहोत्रम्। दीर्घधारा

क्षरणक्रिया प्रसिद्ध एवाघारः । तस्मात् कर्मनामधेये । प्रसिद्ध्यादय-श्चोक्तोत्तराः । प्रजापतिनिवृत्त्यर्थमग्निविधानं भविष्यतीति चेन्नैतदे-वम् । अग्निं ह्येष विधातुं शक्नोति, न प्रजापतिं प्रतिषेद्धुम् । प्रतिषि-द्ध्यमानस्य च प्रजापतेर्विधानमनर्थकं स्यात् । प्रजापतिर्देवतेति गं-म्यते । गम्यमानं च न शक्यं मिथ्येति कल्पयितुम् । अतोऽयमसमा-धिः । उच्यते । आघारमाघारयतीति द्रव्यपरा चोदना । यैस्तु द्रव्यं चिकीर्ष्यते इति । द्रव्यं ह्यनया क्रियया क्षार्यते । क्षारितं च यागं सा-धयति । तत्कस्य प्रधानस्य कर्मणो नामधेयमिति । उच्यते । एतदे-वाघारणं प्रधानकर्म । नन्वस्य द्रव्यदेवतं नास्ति । अस्तीति ब्रूमः । त-स्याघारमाघार्या इत्याज्यं द्रव्यं, मान्त्रवर्णिकी देवता । इन्द्र ऊर्ध्वो-ऽध्वर इत्याघारमाघारयतीति मन्त्रो ह्यभिदधत् कर्म, तत्साधनं वा कर्मणि समवैति । एष च मन्त्र इन्द्रमभिधातुं शक्नोति । स यदीन्द्र-स्तत्साधनं भवेद्, एवमनेन मन्त्रेणाघारः शक्यते कर्तुम् । तस्मा-दिन्द्रो देवता । द्रव्यदेवतासंयुक्तमाघारणम् । तस्माद् यजतिः, तस्य यजतेर्नामधेयमिति ॥ ४ ॥ ॥ अग्निहोत्रादिशब्दानां यागनामधेयता-ऽधिकरणम् ॥ ३ ॥ ॥ तत्प्रख्यन्यायः ॥

तद्व्यपदेशं च ॥ ५ ॥

अथैष श्येनेन अभिचरन् यजेत, अथैष सन्दंशेन अभिचरन् यजेत, अथैष गवाऽभिचरन् यजेतेति समाम्नायन्ते । तत्र गुणविधिः, कर्म-नामधेयमिति सन्देहः । प्रसिद्ध्यादिभिः पूर्वपक्ष उद्भिदादीनामिव । ते तूद्भिदादयः क्रियानिमित्ताः शक्नुवन्ति यागं वदितुम् । इमे पुनर्जातिनिमित्ता न शक्नुवन्ति । तेन गुणविधय इत्येवं प्राप्त-म् । एवं प्राप्ते, ब्रूमः ॥ तद्व्यपदेशश्च ॥ तेन श्येनादिना प्रसिद्धेन यस्य व्यपदेशः, तस्य कर्मनामधेयम् श्रुतिर्हि नामधेयत्वे, लक्षणा गुण-विधौ । यत्तु जातिशब्दा इमे, न यागमभिवदन्तीति । सादृश्यव्यपदे-शादभिवदिष्यन्ति । एवं हि व्यपदेशो भवति । यथा वै श्येनो निपत्या-दत्ते एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्ते, यमभिचरन्ति श्येनेनेति । निपत्यादत्ते इत्यनेन सादृश्येन श्येनशब्दो यागे । यथा सिंहो देवदत्त इति । तस्मात् कर्मनामधेयम् ॥ सन्दंशे, सन्दंशेन यथा दुरादानमा-दत्ते इति, गवि यथा गावो गोपायन्तीति । तस्मात् सन्दंशशब्दोऽपि

कर्मनामधेयं, गोशब्दोऽपि ॥ ५ ॥ ॥ श्येनादिशब्दानां यागनामधेयता-ऽधिकरणम् ॥ ४ ॥ ॥ तद्व्यपदेशन्यायः ॥

नामधेये गुणश्रुतेः स्याद्विधानमिति चेत् ॥ ६ ॥

वाजपेयेन स्वाराज्यकामो यजेतेति श्रूयते । तत्र किं गुणविधिः, कर्मनामधेयमिति सन्देहः । एवं चेत् सन्देहो, दृश्यते गुणविधिः । न सन्देहः, श्रूयते हि गुणः । सोऽवगम्यमानो न शक्यो नास्तीति वदितुम् । तस्माद् गुणविधिः ॥ ६ ॥ ॥ पूर्वपक्षः ॥

तुल्यत्वात् क्रिययोर्न ॥ ७ ॥

नैतदेवं, तुल्ये हि इमे क्रिये स्याताम् । या च वाजपेयक्रिया, या च दर्शपूर्णमासक्रिया, उभयत्र दार्शपौर्णमासिको विध्यन्तः स्यात् । तथा च दीक्षाणामुपसदाञ्च दर्शनं नावकल्प्येत, सप्तदशदीक्षो वाजपेय इति, सप्तदशोपसत्को वाजपेय इति ॥

अथ वा, तुल्यत्वात् क्रिययोर्नेति ॥ यदि न गुणविधिः, ततस्तुल्यैव वाजपेयक्रिया ज्योतिष्टोमक्रियया । तत्र दीक्षाणामुपसदाञ्च दर्शनमुपपन्नम् । तस्मात् कर्मनामधेयमिति । लिङ्गं त्वेतत्प्राप्तिः पुनरुत्तरसूत्रेण ॥ ७ ॥ ॥ सिद्धान्तः ॥

ऐकशब्द्ये परार्थवत् ॥ ८ ॥

यदि गुणविधिः स्यात्, स्वार्थवत् परार्थवच्चाभिधानं विप्रतिषिध्यते यजेतेत्यस्य शब्दस्य । यदि स्वाराज्यकामो यजेतेति स्वाराज्यकामस्य यागं विधातुं स्वार्थमुच्यते, न तर्हि वाजपेयेन गुणेन सम्बद्धुं परार्थमनूद्येत यागेन वाजपेयगुणकेनेति । भिद्येत हि तथा वाक्यम् । ननु द्वे एवैते वाक्ये प्रत्यक्षमुपलभामहे, स्वाराज्यकामो यजेतेत्येतदेकं प्रत्यक्षं पदद्वयम् । यजेत वाजपेयेनेत्येतदपि प्रत्यक्षमेव । नैतदेवम् । एवं सति चत्वारि पदान्युपलभेमहि, त्रीणि चैतान्युपलभ्यन्ते । उच्यते । यजेतेत्येतदुभाभ्यां सम्भन्त्स्यते । कथं सकृदुच्चारितं सम्बन्धमुभाभ्यामेष्यतीति । रूपाभेदात् । ईदृशमेवास्य रूपं स्वाराज्यकामेन सम्बध्यमानस्य, ईदृशमेव वाजपेयेन । अतस्तन्त्रेणोभाभ्यां सम्भन्त्स्यते इति । नैतदस्ति, ईदृशेनैव रूपेणेति । यद्यज्ञातस्ततो विधिः, यदि ज्ञातस्ततोऽनुवादः । न च ज्ञातोऽज्ञातश्च युगपत् सम्भवतीति । आह । यदिदमुक्तं- गुणविधिपक्षेऽनुवादो यजेतेति । यद्ययमनुवादः, केनेदानीं गुणो विधीयते । वाजपेयशब्देनेति मा

दोषः । न ह्याख्यातमन्तरेण कृत्यं वा नाम शब्दार्थस्य व्यापारो विधीयते । यश्चात्राख्यातशब्दो यजेतेति सोऽनुवाद इत्युक्तम् । केनेदानीं तस्य व्यापारो विधीयते । अतः स्वाराज्यकामं गुणं च प्रति यजेतेति विधिः । तस्मादुभाभ्यां सम्बध्यते इति । यद्युभयत्र विधिः वाजपेयो न स्वाराज्यकामस्य यागेन सम्बध्येत । द्वे ह्येते तदा वाक्ये, न स्वाराज्यकामस्य यागेन सह गुणविधेरेकवाक्यता । प्रकरणात् सम्बन्धः स्वाराज्यकामस्य यागेनेति चेन्न । वाक्येन यागमात्रे विधानात् । अस्तु यागमात्रेण सम्बन्धः इति चेद्, न । स्वाराज्यकामस्य यागेन सह एकवाक्यताया गम्यमानत्वात् । तदेवं प्रकरणस्य वाक्यस्य च बाधो युज्यते यदि कर्मनामधेयम् । गुणविधिपक्षे हि सर्वे इमे वाक्यभेदादयो दोषाः प्रादुर्भवेयुः । तस्मात् कर्मनामधेयं वाजपेयशब्द इति सिद्धम् ॥ ८ ॥ ॥ सिद्धान्ते युक्तिः ॥ ॥ वाजपेयादिशब्दानां नामधेयताऽधिकरणम् ॥ ५ ॥

तद्गुणास्तु विधीयेरन्नविभागाद्विधानार्थे न चेदन्येन शिष्टाः ॥ ९ ॥

यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवतीत्येवमादयः श्रूयन्ते । तत्र सन्देहः । किमाग्नेयोऽग्नीषोमीय इत्येवमादयो गुणविधयः, कर्मनामधेयानीति । किं तावत् प्राप्तम् । गुणविधौ सत्यनेको गुणो विधीयेत । अग्निपुरोडाशाष्टाकपाला इति । तस्मान्न गुणविधय इत्येवं प्राप्ते, ब्रूमः । तच्च कर्म, गुणाश्चास्य विधीयेरन् । अविभक्ता हि ते कर्मणो विधानार्थे तद्धितान्ते शब्दे । तत्र हि अष्टाकपालस्याग्नेयता विधीयते । स एष एवमाग्नेयो भवति । यद्यग्नये संकल्प्य दीयते । तेनायमनेन प्रकारेण यागो विहितो भवति । स एवं विधीयमानो न शक्योऽग्निमष्टाकपालं चाविधाय विधातुम् । संबन्धो हि विधीयमानो न शक्यते सम्बन्धिनावविधाय विहित इति वक्तुम् । तस्माद् गुणविधयः । अष्टसु कपालेषु संस्क्रियमाणो व्रीहिमयो यवमयो वा पुरोडाश एव भवति । सोऽनुवादः । सिद्धश्चात्राष्टाकपाल उच्यते । कपालेषु श्रपयतीति वचनाद् नान्येन श्रपितं गृह्णन्ति । तेनाऽस्मिन् पक्षे न वाक्यभेदो भवति, न चेदन्येन शिष्टः । यत्र पुनरन्येन वचनेन शिष्टा गुणा भवन्ति, भवति तत्र नामधेयम् । यथा, अग्निहोत्रं

जुहोतीति ॥ ९ ॥ ॥ आग्नेयादीनामनामताधिकरणम् ॥ ६ ॥

बर्हिराज्ययोरसंस्कारे शब्दलाभादतच्छब्दः ॥ १० ॥

बर्हिराज्ययो पुरोडाशे च सन्देहः। किमेते संस्कारशब्दा, उत जातिशब्दा इति। संस्कारशब्दा इति ब्रूमः। संस्कृतेषु तृणेषु बर्हिःशब्दमुपचरन्ति सर्वत्र, नासंस्कृतेषु। संस्कृते च घृते आज्यशब्दम्। तथा संस्कृते पिष्टे पुरोडाशशब्दम्। नन्वसंस्कृतेऽपि कस्मिंश्चिद्देशे उपचर्यते। यथा बर्हिरादाय गावो गता इति भवन्ति वक्तारः, तथा आज्यं क्रय्यमिति, पुरोडाशेन मे माता प्रहेलकं ददातीति। सादृश्यात्तेषु प्रयोगः। यथोपशये यूपशब्दः। कुत एतत्। यत एकदेशे हि शब्दप्रयोगः। तस्मात् संस्कारशब्दा इत्येवं प्राप्तम् ॥

एवं प्राप्ते ब्रूमः। बर्हिरादिष्वसंस्कृतेष्वपि शब्दलाभान्न संस्कारशब्दाः। ननूक्तं सादृश्यादेकदेशे भविष्यन्ति। तन्न। प्रसिद्धे हि संस्कारशब्दत्वे, सादृश्यादिति शक्यते वक्तुम्। तच्चाप्रसिद्धम्। कथम्। बर्हिरादिशब्दैरुद्दिश्य संस्कारा विधीयन्ते तेन सत्सु शब्देषु संस्कारैर्भवितव्यम्। सति च संस्कारे शब्दलाभ इतीतरेतराश्रयं भवति। न चाविहिताः संस्कारा भवन्ति, यानालोच्य लोकः प्रयुञ्जीत। तस्मान्न लोकाः संस्कृतेषु बर्हिरादीन् प्रयुञ्जते। तत एकदेशेऽपि जातिनिमित्ता दृष्टाः सर्वत्र जातिनिमित्ता भवितुमर्हन्ति। न चाऽलौकिकानां सतां वेदादेव पूर्वोत्तरपदसम्बन्धमनपेक्ष्य शक्यतेऽर्थोऽध्यवसातुम्। पूर्वोत्तरपदे अनर्थके मा भूतामित्येवं स परिकल्प्येत। अशक्यस्त्वनवगम्यमानः परिकल्पयितुम्। अर्थवती च ते पदे पूर्वोत्तरे लौकिकेनासंस्कृतप्रयोगेण भविष्यतः। तस्माज्जातिशब्दा एवञ्जातीयकाः। प्रयोजनं, बर्हिषा यूपावटमवस्तृणातीति संस्कृतैरेव स्तरितव्यम्। यदि पूर्व पक्षः, विपरीतं सिद्धान्ते ॥ १० ॥

॥ बर्हिरादिशब्दानां जातिवाचित्वाधिकरणम् ॥ ७ ॥

प्रोक्षणीष्वर्थसंयोगात् ॥ ११ ॥

प्रोक्षणीरासादयेति श्रूयते। तत्र प्रोक्षणीशब्दं प्रति सन्देहः। किं संस्कारनिमित्तः, उत जातिनिमित्तः, उत यौगिक? इति। तत्र संस्कारेषु सत्सु दर्शनात् संस्कारशब्दतायामवगम्यमानायामसंस्कृते शब्दलाभाज्जातशब्दः, असंस्कृतास्वेवाऽप्सु प्रोक्षणीभिरुद्धेजिताः

त्म इति कस्मिंश्चिद्देशे भवन्ति वक्तारः तेन जातिशब्द इति प्राप्ते यौगिक इत्युच्यते । कुतः । अर्थसंयोगात् । प्रोक्षण्य इत्युपसर्गधातुप्रत्ययसमुदायस्य जातिनिमित्तता प्रयोगादनुमीयते । सेचनसंयोगात्तूपसर्गधातुकरणप्रत्ययसहितोऽप्सु प्रवर्त्तते इति प्रसिद्धिरनुगृहीता भविष्यति । यदाऽन्यदपि सेचनं प्रोक्षणशब्देनोच्यते, तदा तत्संयोगादेवाप्सु भविष्यतीति न समुदायार्थः कल्पयितुं शक्यते । तस्माद् यौगिकः । प्रयोजनं, घृतं प्रोक्षणं भवतीति । यदि संस्कारशब्दः, प्रोक्षणीरासादयेति प्रैषः । यदि जातिशब्दः, घृतमासादयेति । यदि यौगिकः, प्रोक्षणमिति ॥ ११ ॥ ॥ प्रोक्षण्यादिपदानां यौगिकत्वाऽधिकरणम् ॥ ८ ॥

तथा निर्मन्थ्ये ॥ १२ ॥

निर्मन्थ्येनेष्टकाः पचन्तीति संस्कृते दर्शनात् संस्कारशब्दो निर्मन्थ्य इति । असंस्कारेऽपि दृश्यते । निर्मन्थ्यमानय, ओदनं पक्ष्याम इति । निर्मन्थनयोगात् पूर्ववद् यौगिक इति संस्थितम् । प्रयोजनं, संस्कारनिमित्ते संस्कृतेन इष्टकाः पक्तव्याः जातिशब्दे यथोपपन्नेन, यौगिके अचिरनिर्मथितेन । यथा नावनीतेन भुङ्क्ते इत्यचिरनिर्दग्धेनेति गम्यते ॥ १२ ॥ ॥ निर्मन्थ्यशब्दस्य यौगिकत्वाधिकरणम् ॥ ९ ॥

वैश्वदेवे विकल्प इति चेत् ॥ १३ ॥

चातुर्मास्येषु प्रथमे पर्वणि वैश्वदेवे सन्देह । वैश्वदेवेन यजेतेति किं वैश्वदेवशब्दो गुणविधिः, उत कर्मनामधेयमिति । इति यदि सन्देहो, न सन्देहः । वैश्वदेवे विकल्पः । गुणविधिर्वैश्वदेवशब्दः । गम्यते हि गुणविधानम् विश्वेदेवा विधीयन्ते आग्नेयादिषु यागेषु तत्राग्न्यादीनां विश्वैर्देवैर्विकल्पः । एवं प्रसिद्धिरर्थवती भविष्यति ॥ १३ ॥ ॥ पूर्वपक्षः ॥

न वा प्रकरणात् प्रत्यक्षविधानाच्च न हि प्रकरणं द्रव्यस्य ॥ १४ ॥

नैतदेवम् । प्रत्यक्षश्रुतिविहिता अग्न्यादयः । तेषां यागानां विश्वेदेवा वाक्येन, प्रकरणात्तेनैव, नान्येनेति गम्यते । न च इयं विषमशिष्टो विकल्पो भवितुमर्हति । न हि प्रकरणं श्रुतस्य द्रव्यस्य बाधने समर्थम् । तस्मात् कर्मनामधेयम् ॥ १४ ॥ ॥ सिद्धान्तः ॥

मिथश्चानर्थसम्बन्धः ॥ १५ ॥

अथोच्येत, वैश्वदेव इत्यनेन शब्देन प्रत्यक्षमग्न्यादिगुणविशिष्टो यागगणो लक्ष्यते । वैश्वदेवी हि तत्राऽऽमिक्षा समवैति । यदि वैश्वदेवशब्देन यागगणो लक्ष्यते, न तर्हि विश्वदेवा विधीयन्ते । कथं सकृदुच्चरितो वैश्वदेवशब्दो यागगणं लक्षयिष्यति, विश्वांश्च देवान् विधास्यतीति मायं वैश्वदेवशब्दस्य विश्वैर्देवैर्मिथः संबन्धो घटते। तस्मात् कर्मनामधेयमेव, न गुणविधिरिति॥१५॥ ॥आ० नि०॥

परार्थत्वाद् गुणानाम् ॥ १६ ॥

परार्थाश्च गुणाः। ते न शक्नुवन्ति प्रधानमावर्त्तयितुम् । तेन सकृद्यागः कर्त्तव्य ,न गुणानुरोधेनावर्त्तितुमर्हति। सम्प्रतिपन्नदेवतत्वाच्च न विरोधः। तत्रैकस्याम्प्रधानाहुतौ त्रिंशदाहुतयो हूयन्ते इति त्रिंशत्संख्यासम्पत्तिराहवनीयाहुतीनां नावकल्पते। तस्मात् कर्मनामधेयमिति सिद्धम् ॥१६॥ वैश्वदेवादिशब्दानां नामधेयताधिकरणम् ॥१०॥

पूर्ववन्तोऽविधानार्थास्तत्सामर्थ्यं समाम्नाये ॥ १७ ॥

वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते इति श्रूयते । तत्र यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनातीत्येवमादयः कपालविकल्पाः श्रूयन्ते । तेषु सन्देहः। किमष्टत्वादयो गुणविधयः, उतार्ऽथवादा इति। तत्र गुणविधय इत्येव ब्रूमः । कथम् ? ये हि पूर्ववन्तो विदितपूर्वमर्थमभिवदन्ति ते अविधानार्थाः । तत्तेतदस्य वाक्यस्य समाम्नाये सामर्थ्यं, यदविहितपूर्वकाभिधानम् । किं तत् ? विधानसामर्थ्यम् । एवमविहितमर्थं विधास्यति । इतरथा अर्थवादाः सन्तोऽनर्थकाः स्युः। न च द्वादशकपालस्य शेषभावमुपगन्तुमर्हति। प्रत्यक्षा ह्यष्टानां कपालानां स्तुतिः, परोक्षा द्वादशानाम्। प्रत्यक्षाभावे च परोक्षा स्यात्। तस्माद् गुणविधयः ॥१७॥ ॥ पूर्व० ॥

गुणस्य तु विधानार्थे तद्गुणाः प्रयोगे स्युरनर्थका न हि तं प्रत्यर्थवत्ताऽस्ति ॥ १८ ॥

नैतदस्ति गुणविधय इति । गुणस्य विधानार्था एते सन्तः पुरोडाशस्य कपालेषु संख्यां विदध्युः । न शक्नुवन्ति यागप्रयोगस्य विधातुम् । द्वादशकपालता हि यागस्य वाक्येन, अष्टाकपालादयः प्रकरणेन। तेन ते यागे न भविष्यन्ति। अपिचाष्टत्वादयः पुरोडाशेन

एकवाक्यभूताः प्रकरणं बाधित्वा न यागस्य भविष्यन्ति । यागासम्बन्धे च अनर्थकाः, पुरोडाशसम्बन्धे फलाभावात् । अर्थवादत्वेन तु वैश्वानरयागस्य स्तुतिरुपपद्यते । तस्मादर्थवादा इति ॥ १८ ॥ सि० ॥

तच्छेषो नोपपद्यते ॥ १९ ॥

इति यदुक्तं, तत्परिहर्त्तव्यमित्याभासान्तं सूत्रम् ॥ १९ ॥ ॥ उत्तराभासः ॥

अविभागाद्विधानार्थे स्तुत्यर्थेनोपपद्येरन् ॥ २० ॥

यदा त्वष्टाकपालादिप्ररोचनार्था अनर्थका इत्यवगतं, तदा लक्षणया द्वादशकपालस्य स्तुतिर्वैश्वानरयागप्ररोचनार्था भविष्यति । सन्ति हि द्वादशसंख्यायामष्टत्वादयः संख्याविशेषा अविभक्ताः । अतो द्वादशकपालस्य स्तुत्यर्थत्वेनावयवस्तुतिरुपपद्यते । यथा शोभनमस्य चक्रस्य नेमितुम्बारं, शोभनमस्याः सेनाया हस्त्यश्वरथपादातमिति । तस्मादुपपन्ना स्तुतिरिति ॥ २० ॥ ॥ उत्तरम् ॥

कारणं स्यादिति चेत् ॥ २१ ॥

इति चेद् भवान् पश्यति, अर्थवादा इति, कारणमष्टत्वादीनां ब्रह्मवर्चसादि कस्मान्न भवति ?। ब्रह्मवर्चसकामस्याष्टाकपालः । एवमुत्तरेषु यथाकामम् । किमेवं भविष्यति । पुरोडाशस्य गुणविधानेऽप्यानर्थक्यं न भविष्यति । न च लक्षणया द्वादशकपालस्य स्तुतिः कल्पिता भविष्यति तस्मात् कामेभ्यो विधयो भविष्यन्ति ॥ २१ ॥ आ० ॥

आनर्थक्यादकारणं कर्त्तुर्हि कारणानि गुणार्थो हि विधीयते ॥ २२ ॥

यदि कामाय विधयः, भिन्नानि वाक्यानि भवेयुः । एकं चेदं वाक्यं, वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते इत्येवमुपक्रान्तम् । यद् द्वादशकपालो भवति जगत्यैवास्मिन् पशून् दधाति, यस्मिन् जाते एतामिष्टिं निर्वपति, पूत एव स तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवतीत्येवमन्तम् । तस्य मध्येऽष्टत्वादयः श्रूयमाणा यदि न संबध्येरँस्ततो वाक्यान्तराणि भवेयुः । कर्त्तुर्हि कारणानि पूतत्वादीनि भवेयुः । स एष गुणार्थोऽत्र विधीयते वैश्वानरयागे पूत एव इत्येवमादिः । तेन चैतेऽष्टत्वादयः साक्षाद्धेतुत्वेन संबन्ध्यन्ते । यस्माद् गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति तेन पूत एव सः, यस्मात्त्रिवृतैवाऽस्मिँस्तेजो दधाति तेन तेजस्वी । यस्माद् विराजैवास्मिन्नन्नाद्यं दधाति

तेनाम्नादः । यस्मात्त्रिष्टुभैवाऽस्मिन्निन्द्रियं दधाति, तेन इन्द्रियावी । यस्माज्जगत्यैवाऽस्मिन् पशून् दधाति तेन पशुमानिति । ततः कामाय विधयोऽसम्भवन्तो यद्यर्थवादा अपि न भवेयुः, आनर्थक्यमेवैषां स्यात् । तस्मादकारणं ब्रह्मवर्चसत्वादयोऽष्टत्वादीनाम् । तस्मादष्टत्वादयोऽर्थवादा इति ॥ २२ ॥ अ० नि० ॥ ॥ वैश्वानरेऽष्टत्वाद्यर्थवादताधिकरणम् ॥ ११ ॥

तत्सिद्धिः ॥ २३ ॥

यजमानः प्रस्तरः, यजमान एककपाल इत्यादि समाम्नायते । तत्र सन्देहः । किं, यजमानः प्रस्तर इत्येष गुणविधिः, किमर्थवाद इति । तथा यजमान एककपाल इति । किं तावत् प्राप्तम् । गुणविधिरिति । किमेवं भविष्यति ? एवम् । अपूर्वमर्थं विधास्यति । इतरथाऽर्थवादोऽनर्थकः स्यात् । अर्थवत्त्वञ्च न्याय्यम् । तस्माद् विधिः । नैतदेवम् । यदि विधिः स्यात्, प्रस्तरकार्ये यजमानो नियम्येत । यजमानकार्ये वा प्रस्तरः । प्रस्तरे जुहूमासादयति, सर्वां वा स्रुच इति यजमाने जुहूरासाद्येत । सर्वा वा स्रुच इति । तथा सति न याजमानं शक्यते कर्तुम्, दक्षिणतो ब्रह्मयजमानावासाते कर्म्मणः क्रियमाणस्येति । न च प्रस्तरो याजमानं शक्नोति कर्तुम् । तथा यदि यजमान एककपालकार्य्ये विनियुज्येत, सर्वहुतः क्रियेत । तत्र सर्वतन्त्रपरिलोपः स्यात् । न चैककपालो याजमानं शक्नोति कर्तुम् । तस्मान्न विधिः । विध्यन्तरं चास्ति, प्रस्तरमुत्तरं बर्हिषः सादयति, एककपालं सर्वहुतं करोतीति । तस्मादपि न विधिः । किं तर्हि । अर्थवादः । यजमानो ज्ञायत एव प्रस्तरः, एककपाल इति च ॥

कथं पुनरनयोः सामानाधिकरण्यं ज्ञायते ? । न हि प्रस्तर एककपालो वा यजमानः । न च यजमान एकस्मिन् कपाले संस्कृतः पुरोडाशः, प्रथमो वा कुशमुष्टिर्लूनः । कथं परशब्दः परत्र वर्त्तते, किमर्थं वा ज्ञायमानस्य सङ्कीर्त्तनम् ? इति । उच्यते । ज्ञायमानः सङ्कीर्त्यते स्तोतुम् । प्रस्तर उत्तरो बर्हिषः सादयितव्यो यजमानत्वात् । तथा यजमान एककपालः सर्वहुतः कर्त्तव्यः, स्वर्ग आहवनीयस्तत्र प्रतिष्ठापितो भवति इति ॥

कथं परत्र वर्त्तते परशब्द ? इति । गुणवादस्तु, गुणादेष वादः । कथमगुणवचनो गुणं ब्रूयात् । स्वार्थाभिधानेनेति ब्रूमः । सर्व एवैते

गौणाः शब्दा, न स्वार्थं हित्वा गुणेषु वर्त्तन्ते । प्रसिद्धहानिर्हि तथा स्यात्, अप्रसिद्धकल्पना च । न च सर्वे गुणसमुदायवचनाः । गुणहीनेऽपि तथा दर्शनात् । अप्रसह्यकार्य्यपि हि कदाचिद्रोगेणोपहतः सिंह्याः पुत्रः सिंह एव । समुदायवाची च नावयवे प्रवर्त्तितुमर्हति । सर्वसिंहव्यक्तिषु यत् सामान्यं तद्वचनः शब्द इति स्थितो न्यायः प्रत्युद्ध्रियेत । न चासति सिंहे परिकल्पनया प्रवर्त्तेत । कल्पनाया अशक्यत्वात् । कथं नु स्वार्थाभिधानेन प्रत्ययव्यवस्था इति चेत् । अर्थसम्बन्धात् । सिंह इति निर्ज्ञाते प्रसह्यकारिता तत्र प्रायेणेति प्रसह्यकारीति गम्यते । अर्थप्रत्ययसामर्थ्यात् । यो हि मन्यते, प्रसह्यकारिणं प्रत्याययेयमिति, स यदि सिंहशब्दमुच्चारयति सिद्ध्यत्यस्याभिप्रेतम् । सिंहार्थः प्रतीतः प्रसह्यकारीति सम्बन्धादितरमर्थं प्रत्याययति । एवं स्वार्थाभिधानेन तद् गुणसम्बन्धः प्रतीयते ॥

इह तु यजमानः प्रस्तरः, यजमान एककपाल इति कीदृशो गुणसम्बन्धः प्रतीयते ? तत्सिद्धिकर इति । सर्वो ह्यात्मनः कार्य्यसिद्धिं करोति । अन्योऽपि यस्तस्य कार्य्यसिद्धिं करोति, स तस्मिन्नुच्चरिते हृदयमागच्छति । यथा, राजा पत्तिगणक इति । पत्तिगणको राज्ञः कार्यं साधयति । स राजशब्दे उच्चरिते प्रतीयते । एवमिहापि यजमानकार्यं प्रस्तरैककपालौ साधयतः, तौ यजमाने प्रतीते प्रतीयेते । तस्मात्तौ यजमानशब्देन प्रत्याय्येते । कथम् ? स्तुतौ स्यातां बर्हिष उपरिसादने सर्वहोमे चेति । तस्मादेवञ्जातीयका अर्थवादा न विधय, इति ॥ २३ ॥ ॥ यजमानशब्दस्य प्रस्तरादिस्तुत्यर्थताधिकरणम् ॥ १२ ॥

जातिः ॥ २४ ॥

आग्नेयो वै ब्राह्मणः, ऐन्द्रो राजन्यः, वैश्यो वैश्वदेव इत्येवमादयः श्रूयन्ते । तत्र किं गुणविधयः, अर्थवादाः ? इति सन्देहः । गुणविधय इति ब्रूमः । एवमपूर्वमर्थं विधास्यन्ति, इतरथा अर्थवादाः सन्तोऽनर्थकाः स्युः । न विधिः विध्यन्तरस्य भावात् । तस्मात् संवादः । तस्य संकीर्त्तनं विधिस्तुत्यर्थम् । अनाग्नेयादिष्वाग्नेयादिशब्दाः केन प्रकारेण ? गुणवादेन । को गुणवादः ? अग्निसम्बन्धः । कथम् । एकजातीयकत्वात् । किमेकजातीयकत्वम् ? प्रजापतिरकामयत, प्रजाः सृजेयमिति । स मुखतस्त्रिवृतं निरमिमीत, तमग्निर्देवता

अन्वसृज्यत, गायत्रीच्छन्दः, रथन्तरं साम, ब्राह्मणो मनुष्याणाम, अजः पशूनाम। तस्मात्ते मुख्याः, मुखतो ह्यसृज्यन्त। उरसो बाहुभ्यां पञ्चदशं निरमिमीत, तमिन्द्रो देवताऽन्वसृज्यत, त्रिष्टुप् छन्दः, बृहत् साम, राजन्यो मनुष्याणाम् अविः पशूनाम। तस्मात्ते वीर्य्यवन्तः, वीर्याद्धि असृज्यन्त। ऊरुभ्यां मध्यतः सप्तदशं निरमिमीत, तं विश्वे-देवा देवता अन्वसृज्यन्त, जगतीच्छन्दः, वैरूपं साम, वैश्यो मनुष्याणाम, गावः पशूनाम। एवमुक्ते सत्येकस्मिन्नेवञ्जातीयके विज्ञाते अन्योऽपि तज्जातीयको हृदयमागच्छति। तस्मादर्थवादशब्दाः॥ २४॥ आग्नेयादिशब्दानां ब्राह्मणादिस्तुत्यर्थताधिकरणम्॥ १३॥

सारूप्यात्॥ २५॥

यजमानो यूपः, आदित्यो यूप इत्यादि श्रूयते। तत्र गुणविधिः, अर्थवादः? इति सन्देहः। अर्थवत्त्वाद् गुणविधिः। अशक्यत्वाद् यूपकार्य्यसाधनं यजमानस्य, यजमानकार्यसाधने वा यूपस्य। विध्यन्तरभावाच्च न विधिः। विधिस्तुत्यर्थं संवादः। गुणवादात् सामानाधिकरण्यम्। को गुणः? सारूप्यम्। किं सारूप्यम्? ऊर्ध्वता, तेजस्विता च। तस्मादेवञ्जातीयका अर्थवादाः॥ २५॥॥ यूपादिशब्दानां यजमानस्तुत्यर्थताधिकरणम्॥ १४॥

प्रशंसा॥ २६॥

अपशवो वा अन्ये गोऽश्वेभ्यः पशवो गोअश्वाः, अयज्ञो वा एष योऽसामा, असत्रं वा एतद् यदच्छन्दोममिति श्रूयते। तत्र विध्यर्थवादसन्देहे अर्थवत्त्वाद्विधय इति प्राप्ते। अभिधीयते। यदि विधयो भवेयुः, गोअश्वा एव पशवः स्युः, सामवानेव यज्ञः, छन्दोमवदेव सत्रम्। अन्येषां पशूनां, यज्ञानां, सत्राणां चोत्पत्तिरनर्थिका स्यात्। विध्यन्तरञ्च नावकल्पेत। अतः स्तुत्यर्थं संवादः। गोऽश्वान् प्रशंसितुमन्येषां पशूनां निन्दा। सामवतः प्रशंसितुम् असाम्नां निन्दा। छन्दोमवन्ति प्रशंसितुमच्छन्दोमकानि निन्द्यन्ते। यथा, यदघृतमभोजनं तत्। यन्मलिनमवासस्तदिति॥ २६॥॥ अपश्वादिशब्दानां गवादिप्रशंसार्थताधिकरणम्॥ १५॥

भूमा॥ २७॥

सृष्टीरुपदधाति इति श्रूयते। तत्र गुणविधिः, अर्थवादः? इति सन्देहे, अपूर्वत्वाद् विधिरिति प्राप्ते। उच्यते। यदि विधिः, सृष्टि-

मन्त्रका उपदधातीष्टका इत्यर्थः । तत्र न इष्टकानां विशेषः कश्चिदुपादीयते, एवंरूपाः सृष्टिमन्त्रकाः, नैवंरूपा इति । तत्र सर्वासां सृष्टिलिङ्गा मन्त्राः प्राप्नुयुः । अन्येषाम् असंयुक्तानां मन्त्राणामानर्थक्यं स्यात् । तस्मादनुवादो मन्त्रसमाम्नानात् प्राप्तानामुपधाने मन्त्राणाम् । सृष्टीनां सङ्कीर्त्तनं सर्जनार्थवादार्थम् । अपि च विधित्वे लक्षणा, एकया स्तुवते इत्यत्र या असृष्टयस्ता लक्षयेत् । नन्वनुवादेऽपि लक्षणा । नानुवादपक्षे लक्षणायां दोषः । कथं त्वसृष्टिषु च सृष्टिशब्द इति । भूम्ना । बहवस्तत्र सृष्टिलिङ्गा मन्त्राः, अल्पशो विलिङ्गा, इति ॥ २७ ॥ बाहुल्येन सृष्टिव्यपदेशाधिकरणम् ॥ भूमाधिकरणम् ॥ १६ ॥

लिङ्गसमवायात् ॥ २८ ॥

प्राणभृत उपदधाति, आज्यानीरुपदधातीति । विधित्वे प्राणभृन्मन्त्रकासूपधीयमानासु विलिङ्गानां मन्त्राणामानर्थक्यम् । तस्मादनुवादः । लिङ्गसमवायात् परशब्दः परत्र वर्त्तते । यथा, छत्रिणो गच्छन्तीत्येकेन छत्रिणा सर्वे लक्ष्यन्ते । न चायं प्राणभृच्छब्दः सृष्टिशब्दश्च जहत्स्वार्थं मन्त्रगणं लक्षयेत् । यद्गणे च सृष्टिप्राणभृच्छब्दौ समवेतौ, तावपि परिगृह्येते । यथा, छत्रिशब्देन स्वार्थलक्षणार्थेन सोऽपि छत्री गृह्यते इति ॥ २८ ॥ प्राणभृदादिशब्दानां स्तुत्यर्थताऽधिकरणम् ॥ १७ ॥

सन्दिग्धेषु वाक्यशेषात् ॥ २९ ॥

अक्ताः शर्करा उपदधाति, तेजो वै घृतमिति श्रूयते । तत्र सन्देहः किं घृततैलवसानामन्यतमेन द्रव्येणाञ्जनीयाः शर्कराः, उत घृतेनैवेति । कथं सन्देहः । अञ्जनसामान्येन वाक्यस्योपक्रमः । घृतेन विशेषेण निगमनं, यथोपक्रमं निगमयितव्यमेकस्मिन् वाक्ये । तत्र यद्वा सामान्यमादौ विशेषोपलक्षणार्थं ? विवक्ष्यते । यद्वा निगमने विशेषः सामान्यलक्षणार्थः । तदारम्भनिगमनयोः किं समञ्जसमिति संशयः । एवं सन्दिग्धेषु उपक्रमे सामान्यवचने विरोधाभावान्न विशेषः परिकल्प्यः । निगमने तूपजातः सामान्यप्रत्यय इति विरोधाल्लक्षणार्थं घृतवचनम् । यथा सृष्टिष्वसृष्टिषु च सृष्टिशब्दः, एवं घृतमघृतं च घृतमित्युच्यते । सन्दिग्धेष्वेवं प्राप्ते, ब्रूमः—

सामान्यवचनेन विशेषापेक्षिणोपक्रमो वाक्यस्य, विशेषे निगमनवशेन । कुतः । न हि सामान्यं विहितम् । येन विरोधो निगमनस्य । कथम-

ऽविहितम्। सन्दिग्धेषु विधानशब्दाभावात्। न हि विधानशब्दोऽस्ति। अक्ताः शर्करा उपदधातीति वर्त्तमानकालनिर्देशात्। नाऽपि सामान्यस्य साक्षात् स्तुतिः, प्रत्यक्षन्तु घृतस्य स्तवनम्। श्रुत्या घृतस्य स्तुतिः, लक्षणया सामान्यस्य। श्रुतिश्च लक्षणाया ज्यायसी। तस्माद् घृतविधानम्। एवं वासः परिधत्ते, एतद्वै सर्वदेवत्यं वासो यत् क्षौममिति। तथा इमां स्पृष्ट्वोद्गायेत्, इमां हि औदुम्बरीं विश्वाभूतान्युपजीवन्तीति ॥ २९ ॥ वाक्यशेषेण संदिग्धार्थनिरूपणाधिकरणम् ॥ १८ ॥

अर्थाद्वा कल्पनैकदेशत्वात् ॥ ३० ॥

स्रुवेणाऽवद्यति, स्वधितिनाऽवद्यति, हस्तेनाऽवद्यतीति श्रूयते। तत्र सन्देहः। किं स्रुवेणावदातव्यं सर्वस्य द्रवस्य संहतस्य मांसस्य च। तथा स्वधितिना, हस्तेन च, उत सर्वेषामर्थतो व्यवस्था। द्रवाणां स्रुवेण, मांसानां स्वधितिना, संहतानां हस्तेनेति। अविशेषाऽभिधानादव्यवस्था इति। एवं प्राप्ते ब्रूमः। अर्थाद्वा कल्पना, सामर्थ्यात् कल्पना इति। स्रुवेणावद्येद् यथा शक्नुयात्। तथा यस्य शक्नुयात् तस्य चेति। आख्यातशब्दानामर्थं ब्रुवतां शक्तिः सहकारिणी। एवञ्चेद् यथाशक्ति व्यवस्था भवितुमर्हति। तथा, अञ्जलिना सक्तून् प्रदाव्ये जुहोतीति। द्विहस्तसंयोगोऽञ्जलिः, स व्याकोशोऽर्थात् कर्त्तव्यः। तथा हि शक्यते होमो निर्वर्त्तयितुम्। तद् यथा, कटे भुङ्क्ते इत्यर्थात् कल्प्यते– कटे समासीनः कांस्यपात्र्यामोदनं निधाय भुङ्क्ते इति ॥३०॥ सामर्थ्याऽनुसारेणाव्यवस्थितानां व्यवस्थाऽधिकरणम् ॥ १९ ॥ इति श्रीशबरस्वामिकृतौ मीमांसाभाष्ये प्रथमाऽध्यायस्य चतुर्थः पादः ॥ १ ॥ ४ ॥ समाप्तोऽयं प्रथमोऽध्यायः ॥ १ ॥

अथ द्वितीयोऽध्यायः ॥ २ ॥

भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते ॥ १ ॥

प्रथमेऽध्याये प्रमाणलक्षणं वृत्तम्। तत्र विध्यर्थवादमन्त्रस्मृतयस्तत्त्वतो निर्णीताः। गुणविधिर्नामधेयञ्च परीक्षितम्। सन्दिग्धाना-

मर्थानां वाक्यशेषादर्थाध्यवसानमुक्तम्। तच्च प्रसमर्त्तव्यम्। अनन्तरं प्रधानाप्रधानानि परीक्षिष्यन्ते, भिन्नान्यभिन्नानि च इति एष एवाऽर्थो वर्णनीयो नान्यः। एष एव चाध्यायसम्बन्धः। तदिह षड्विधिः कर्म्मभेदो वक्ष्यते– शब्दान्तरम्, अभ्यासः, संख्या, गुणः, प्रक्रिया, नामधेयमिति वक्ष्यमाणमनुसङ्कीर्त्यते। प्रदर्शितमुच्यमानं सुखं ग्राहयिष्यते इति श्रोतुश्च बुद्धिः समाधीयते। तदेतन्नानाकर्म्मलक्षणमित्यध्यायमाचक्षते, एतत्तात्पर्य्येणातोऽन्यदुपोद्घातप्रसक्तानुप्रसक्तं चेति॥

तत्र प्रथमं तावदिदश्चिन्त्यते। प्रथमेऽध्याये इदमुक्तं– चोदनालक्षणोऽर्थो धर्म्म इति। चोदना च क्रियाया अभिधायकं वाक्यं च पदानामर्थाः। तत्र किं पदेन पदेन धर्म्म उत सर्वैरेक एवेति। किं तावत् प्राप्तम्। प्रतिपदं धर्म्म इत्येवं प्राप्ते, उच्यते। यदा एकस्मादऽपूर्वं, तदाऽन्यत् तदर्थं भविष्यति। एवमल्पीयसी अदृष्टानुमानप्रसङ्गकल्पना भविष्यति। तस्मादेकमपूर्वम्॥

यदा एकं, तदा सन्देहः। किं भावशब्देभ्य, उत द्रव्यगुणशब्देभ्य इति। कः पुनर्भावः, के ते पुनर्भावशब्दाः? इति। यजतिददातिजुहोतीत्येवमादयः। ननु यागदानहोमशब्दा एते, न भावशब्दाः। नैतदेवम्। यागादिशब्दाश्चैते भावशब्दाश्च। यज्याद्यर्थश्चातोऽवगम्यते, भावयेदिति च। तथा यजेत यथा किञ्चिद् भवतीति। तेनैते भावशब्दाः। द्रव्यगुणशब्देभ्यो द्रव्यगुणप्रत्ययो न भावनायाः अतस्ते न भावशब्दा इति। किं तावत् प्राप्तम्? अविशेषेणेति। तत उच्यते। भावार्थाः कर्म्मशब्दास्तेभ्यः क्रिया प्रतीयेत, यजेतेत्येवमादिभ्यः। कुतः। भावार्थत्वादेव। य आहुः–किमपि भावयेदिति, ते स्वर्गकामपदसम्बन्धात् स्वर्गं भावयेदिति ब्रूयुः। तस्मात् तेभ्यः क्रिया प्रतीयेत, फलस्य क्रिया करणं निष्पत्तिरिति। ते च यागदानहोमसम्बद्धाः स्वर्गस्योत्पत्तिं वदन्ति। कुतः? एष ह्यर्थो विधीयते। यथा, यागादिना, स्वर्गकामः केन भावयेत् स्वर्गम्? यागादिनेइति। यस्य च शब्दस्यार्थेन फलं साध्यते, तेनाऽपूर्वं कृत्वा, नान्यथेति ततोऽपूर्वं गम्यते। अतो यस्तस्य वाचकः शब्दस्ततोऽपूर्वं प्रतीयते इति। तेन भावशब्दा अपूर्वस्य चोदका इति ब्रूमः। न तु कश्चिच्छब्दः साक्षादपूर्वस्य वाचकोऽस्ति। भावार्थैः किमपि भावयितव्यं, स्वर्गकामस्य च केनापि भाव्यतेति। तयोर्नष्टाश्वदग्धरथ-

वत् सम्प्रयोगः, यजेत इत्येवमादयः साकाङ्क्षाः । यजेत किं केन कथमिति, स्वर्गकाम इत्यनेन प्रयोजनेन निराकाङ्क्षाः । नैव द्रव्यगुणशब्दाः । तस्माद् भावार्था कर्म्मशब्दा अपूर्वं चोदयन्तीति । अथ कस्मादुभयं सूत्रितं- भावार्थाः कर्म्मशब्दा इति । उच्यते । भवन्ति केचित् कर्म्मशब्दाः, न भावार्थाः । यथा श्येनेकात्रिकादयः । केचिद् भावार्थाः, न कर्म्मशब्दाः । यथा भवनं भावो भूतिरिति । किं पुनरिहोदाहरणम् । श्येनेनाभिचरन् यजेत, चित्रया यजेत पशुकाम इति । किं श्येनेनाभिचरन्नुत यजेताभिचरन्निति । तथा चित्रया पशुकामः, उत पशुकामो यजेतेति । स्थिते एतस्मिन्नधिकरणे गुणविधिः, नामधेयमिति विचारो भविष्यति । तथा दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत इति दर्शः कालः, पूर्णमास इति च किं ताभ्यां स्वर्गकामः, उत स्वर्गकामो यजेतेति । दर्शपूर्णमासाभ्यामिति च, श्येनेनेति च, चित्रयेति च । नैते भाववचनाः । न चैषामर्थिना कश्चित् सम्बन्धोऽस्ति, विभक्तिकत्वात् । तस्मान्न द्रव्यगुणशब्दा अपूर्वस्य विधायका इति ॥ १ ॥

सर्वेषां भावोऽर्थ इति चेत् ॥ २ ॥

एवं चेद् भवान् पश्यति, अभावशब्दत्वान्न द्रव्यगुणशब्दा अपूर्वस्य विधायका इति, सर्वेषां भावोऽर्थः । स्वर्गकामो दर्शपूर्णमासाभ्यामित्येतयोः सम्बन्धं यजेतेति वक्ष्यति, श्येनेन अभिचरन्नित्येतयोश्च । तथा, चित्रया पशुकाम इति । तस्मादेतेऽपि साकाङ्क्षत्वाद् भाववचनाः । सर्वेषु भाववचनेषु नास्ति विनिगमनायां हेतुः, कर्म्मशब्दा एवापूर्वस्य विधायका, न द्रव्यगुणशब्दा इति ॥ २ ॥ आ० ॥

येषामुत्पत्तौ स्वे प्रयोगे रूपोपलब्धिस्तानि नामानि, तस्मात्तेभ्यः पराकाङ्क्षा भूतत्वात् स्वे प्रयोगे ॥ ३ ॥

येषां शब्दानामुच्चारणोत्पत्तौ स्वे अर्थे प्रयुज्यमानानां रूपमुपलभ्यते, यत् सकृदुत्पन्नं कालान्तरं तिष्ठति, न क्रियेवोत्पन्नमात्रं विनश्यतीत्यर्थः । तानि नामानि । ते द्रव्यगुणशब्दाः । ईदृशो द्रव्यगुणशब्दानामर्थः । ते द्रव्यगुणशब्दा इति वक्तव्ये तानि नामानीति सूत्रितम् । अतो नामानीत्येषां पर्यायशब्दः । कथं गम्यते, यत एषां विभक्तयो नामिक्य उच्यन्ते । कतमास्ताः । वृक्षः वृक्षौ वृक्षाः, शुक्लः शुक्लौ

शुक्ला इत्येवमादयः । तस्मात् सम्यक् सूत्रितम् । यत एषां न क्षणिकोऽर्थस्ततस्तेभ्यः पराकाङ्क्षा प्रधानाकाङ्क्षा न विद्यते इति । नैषामुत्पत्तिः कर्त्तव्या । भूतत्वात् स्वे प्रयोगे स्वप्रयोगकाले विद्यमानत्वादित्यर्थः ॥ ३ ॥

येषां तूत्पत्तावर्थे स्वे प्रयोगो न विद्यते तान्याख्यातानि तस्मात्तेभ्यः प्रतीयेताश्रितत्वात् प्रयोगस्य ॥ ४ ॥

येषां तु शब्दानामुच्चारणोत्पत्तौ स्वे अर्थे प्रयोगो न विद्यते । प्रयोगकाले येषामर्थो नोपलभ्यते इत्यर्थः, तान्याख्यातानीति भावशब्दान् पर्य्यायशब्देनोपदिशति । कथं पर्य्यायशब्दता भावशब्दानाम् । यत एषां विभक्तय आख्यातिक्य इत्युच्यन्ते । कतमास्ताः ? पचति पचतः पचन्ति इत्येवमादयः । तस्मात्तेभ्योऽपूर्वं प्रतीयेत । भव्यार्थास्ते भूतार्थैः समुच्चरिताः । भूतस्य भव्यार्थतायां दृष्टार्थता, भव्यार्थस्य प्रयोजनवत उत्पत्तिरर्थवती । सा च भूतेन क्रियते इति दृष्टोऽर्थः । भव्यस्य पुनर्भूतार्थतायां न किञ्चिद् दृश्यते, कल्प्यते चादृष्टम् । तस्माच्च यागो द्रव्यार्थः ॥

किञ्च, आश्रितत्वात् प्रयोगस्य ॥ एतेषां प्रयोगः पुरुषेणाश्रितो भवति, पुरुषसम्बद्धा भावना उच्यते । पुरुषं हि वदति भावयेदिति । तेन स्वर्गकामो यजेतेति पुरुषोऽपि प्रतीयते, यागोऽपि, सम्बन्धोऽपि । स्वर्गकामो द्रव्येणेति द्रव्यं प्रतीयते पुरुषश्च, न तु सम्बन्धः । नन्वेतदुक्तं भवति । अर्थिनश्च द्रव्यस्य च सम्बन्धं यजेतेति वक्ष्यति, द्रव्येण भावयेदिति । अतो द्रव्येण अर्थस्य भावना गम्येत, आकाङ्क्षा चेति । सत्यं गम्यते । द्रव्येण भावयेदिति तु वाक्येन, यागेन भावयेदिति तु श्रुत्या । यदा तु, यागेन भावयेदिति यागसम्बन्धो विधीयते, न तदा, द्रव्येण भावयेदिति द्रव्यसम्बन्धः । न च द्रव्यसम्बन्धे विधीयमाने यजेतेत्यनेन सम्बन्धः । अनूद्यमाने तु सम्भवति । न च यौगपद्येन विध्यनुवादौ सम्भवतः । तस्माच्छ्रुतिवाक्ययोर्विरोधः । विरोधे च श्रुतिर्बलीयसी । तेनार्थिना न द्रव्यसम्बन्धः । तत्र द्रव्यमऽसति स्वर्गकामसम्बन्धे स्वर्गार्थं भविष्यतीत्यनुपपन्नम् । एष विनिगमनायां हेतुर्येन भावशब्दा एवापूर्वस्य चोदकाः, न द्रव्यगुणशब्दा इति । यदा यागेन कुर्य्यादिति यागवचनमेव भवति । दर्शपूर्णमासा-

ष्यामिति लक्षणया, दर्शे च पूर्णमासे च यागो विहित इति ॥ ४ ॥ ॥ आशङ्कानिरासः ॥ अपूर्वस्याऽऽख्यातपदप्रतिपाद्यताऽधिकरणम् ॥ १ ॥

कथं पुनरिदमवगम्यते, अस्ति तदपूर्वमिति । उच्यते ।

चोदना पुनरारम्भः ॥ ५ ॥

चोदनेत्यपूर्वं ब्रूमः । अपूर्वं पुनरस्ति, यत आरम्भः शिष्यते, स्वर्गकामो यजेतेति । इतरथा हि विधानमनर्थकं स्यात् । भङ्गित्वाद् यागस्य । यद्यन्यदनुत्पाद्यं यागो विनश्येत्, फलमसति निमित्ते न स्यात् । तस्मादुत्पादयतीति । यदि पुनः फलवचनसामर्थ्यात्तदेव न विनश्यतीति कल्प्यते । नैवं शक्यम् । न हि कर्म्मणोऽन्यद् रूपमुपलभामहे । यदाश्रयं देशान्तरं प्रापयति, तत् कर्मेत्युच्यते । न तदात्मनि समवेतम् । सर्वगतत्वादात्मनः । सर्वत्र कार्य्योपलम्भः सर्वत्र भावे लिङ्गम् । न तु तदेव देशान्तरादागमनस्य । न ह्यसति आगमने किञ्चिद्विरुद्धं दृश्यते । यत्र समवेतमासीत्, तद्विनष्टं द्रव्यम् । तस्य विनाशात्तदपि विनष्टमित्यवगम्यते । आश्रयोऽप्यविनष्ट इति चेन्न । भस्मोपलम्भनात् । सत्यपि भस्मन्यस्तीतिचेन्न । विद्यमानोपलम्भनेऽप्यदर्शनात् । फलक्रिया लिङ्गमिति चेत् । एवं सत्यदर्शने समाधिर्वक्तव्यः । सौक्ष्म्यादीनामन्यतमद्भविष्यतीति यदि चिन्त्यते, कल्पितमेवं सति किञ्चिद् भवतीति ।

तत्रापूर्वं वा कल्प्येत, तद्वा? इति । अविशेषकल्पनायामस्ति हेतुः, न विशिष्टकल्पनायाम् । अनाश्रितं कर्म्म भविष्यतीति चेत् । तदपि तादृशमेव । स्वभावान्तरकल्पनेन देशान्तरं न प्रापयिष्यतीति तादृशमेव । तस्माद् भङ्गी यजिः, तस्य भङ्गित्वादपूर्वमस्तीति । किं चिन्तायाः प्रयोजनम् । यदि द्रव्यगुणशब्दा अप्यपूर्वं चोदयन्ति, द्रव्यगुणापचारे न प्रतिनिधिरुपादातव्यः । यथा तर्हि पूर्वः पक्षो, यथा तर्हि सिद्धान्तः । द्रव्यं गुणं वा प्रतिनिधाय प्रयोगोऽनुष्ठातव्य इति ॥ ५ ॥ अपूर्वस्यास्तिताधिकरणम् ॥ २ ॥

तानि द्वैधं गुणप्रधानभूतानि ॥ ६ ॥

अवगतमेतद् भावशब्दाः कर्म्मणो वाचका इति । बहुप्रकाराश्च भावशब्दाः । यजति, जुहोति, ददातीत्येवम्प्रकाराः । दोग्धि, पिनष्टि, विलापयतीत्येवमादयश्च । तेषु सन्देहः । किं सर्वे प्रधानकर्म्मणो

विधायका, उत केचित् संस्कारकर्म्मण इति । भावार्थत्वाविशेषात् सर्वे प्रधानकर्म्मणो वाचका इति प्राप्तम् । ततो ब्रूमः । तानि द्वैधं भवितुमर्हन्तीति द्विप्रकाराणि, कानिचित् प्रधानकर्म्मणो वाचकानि, कानिचित् संस्कारकर्म्मणः । एवमपि सर्वाण्यर्थवन्ति अर्थवत्त्वे सति सर्वेभ्यो न शक्यमपूर्वं कल्पयितुम् । अतो न सर्वाणि प्रधानकर्म्मणो वाचकानि ॥ ६ ॥

यैर्द्रव्यं न चिकीर्ष्यते तानि प्रधानभूतानि द्रव्यस्य गुणभूतत्वात् ॥ ७ ॥

एवं सति अल्पीयसी अदृष्टकल्पना न्याय्या, न तु विनिगमनायां हेतुरवगच्छामः । कुतोऽपूर्वं, कुतो नेति । तदुच्यते । यैर्भावकर्मभिर्न द्रव्यं संस्कर्तुमिष्यते, उत्पादयितुं वा, तानि प्रधानभूतानि प्रधानकर्मणो वाचकानि । द्रव्यस्य गुणभूतत्वात् । द्रव्यं हि गुणभूतं, कर्म्मनिर्वृत्तेरीप्सिततमत्वात् ॥ ७ ॥ प्रधानकर्मलक्षणम् ॥

यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयेत तस्य द्रव्यप्रधानत्वात् ॥ ८ ॥

यैस्तु द्रव्यं चिकीर्ष्यते, गुणस्तत्र प्रतीयेत कर्म्म । कुतः । तस्य द्रव्यप्रधानत्वात् । प्रत्यक्षं यजेतेत्येवमादिभिर्द्रव्यं न चिकीर्ष्यते । तस्मात्तानि प्रधानकर्म्मणो वाचकानि द्रव्यस्य गुणभूतत्वात् । पिनष्टीत्येवमादिभिर्द्रव्यं संस्क्रियते । तस्मात्तानि गुणकर्मवचनानि । एष एव विनिगमनायां हेतुः । प्रयोजनन्तु पूर्वस्मिन् पक्षे प्रैयङ्गवेऽपि चरौ व्रीहय उत्पाद्या अवघातार्थत्वेन सिद्धान्ते नोत्पाद्याः ॥ ८ ॥ गुणकर्मलक्षणम् ॥ ॥ कर्मणां गुणप्रधानभावविभागाऽधिकरणम् ॥ ३ ॥

धर्ममात्रे तु कर्म स्यादनिर्वृत्तेः प्रयाजवत् ॥ ९ ॥

स्रुचः संमार्ष्टि, अग्निं समार्ष्टि, परिधिं समार्ष्टि, पुरोडाशं पर्य्यग्निकरोतीति श्रूयते । तत्र सन्देहः । किं पर्य्यग्निकरणं, सम्मार्जनञ्च प्रधानकर्म्म, उत गुणकर्म्मेति । किं तावत् प्राप्तम् । तदुच्यते । कर्म्ममात्रम् एवं जातीयकमपर्य्याप्तं यत् प्रयोजनस्य दृष्टस्य, तद्धर्म्ममात्रमिति ब्रूम । तत्र प्रधानकर्म्मत्वं स्यात् । कस्मात् । अनिर्वृत्तेरुपकारस्य । न ह्येवञ्जातीयकं द्रव्यस्योपकारकम् । द्रव्यं त्वेवञ्जातीयकमभिनिर्वर्त्तयद् गुणभूतम् । तस्य गुणभूतत्वादिदं प्रधानभूतम् ॥९॥ पूर्व० ॥

तुल्यश्रुतित्वाद्वा इतरैः सधर्मः स्यात् ॥ १० ॥

वा-शब्दः पक्षं व्यावर्त्तयति । इतरैर्गुणकर्म्मभिः सधर्म्मः स्यात्तद्वज्जातीयकः । यथा व्रीहीनवहन्ति, तथा । कुतः । तुल्यश्रुतित्वात् तुल्या हि द्वितीयाश्रुतिरेषां द्रव्येषु । यथा व्रीहीनवहन्तीति । एवम्, अग्निं संमार्ष्टि, पुरोडाशं पर्य्यग्निकरोतीति । किं गुणकर्म्मणि द्रव्ये द्वितीया दृष्टेति । यतो द्वितीयादर्शनादिहापि सामान्यतो दृष्टेन गुणकर्म्मता । नेति ब्रूम । द्वितीया विभक्तिः कर्त्तुरीप्सिततमे स्मर्यते । सा चेह द्वितीया विभक्तिः । तत एव तदीप्सिततममिति गम्यते । तच्चेदीप्सिततमं, कर्म्म गुणभूतम् । यद्यपि प्रत्यक्षादिभिर्गुणभावो न गम्यते, प्रमाणान्तरेण शब्देन गम्यते । तस्माद् गुणभूतमेवज्जातीयकमिति ॥ १० ॥ ॥ सिद्धान्तः ॥

द्रव्योपदेश इति चेत् ॥ ११ ॥

इति चेत् पश्यसि, द्वितीयादर्शनात् प्रधानभूतमत्र द्रव्यमिति । नैतदेवम् गुणभूतेऽपि द्वितीया भवति । तथाहि दृश्यते । सक्तूञ्जुहोति, मारुतं जुहोति, एककपालं जुहोतीति ॥ ११ ॥ ॥ आशङ्का ॥

न तदर्थत्वाल्लोकवत्तस्य च शेषभूतत्वात् ॥ १२ ॥

न गुणभूतेऽपि द्वितीया । एवं ह्यभियुक्ता उपदिशन्ति- कर्म्मणि द्वितीया, कर्त्तुरीप्सिततमं कर्म्मेति । न च लोके गुणभूते कचिद् द्वितीयां पश्यामः । यदपि च तण्डुलानोदनं पचेति, ओदनार्थं तण्डुलान् संस्कुर्विति । ईप्सिता एव तण्डुलाः । बल्वजान् शिखण्डकान् कुर्विति । बल्वजा एव तेनाकारेण सम्बद्धा ईप्सिता इति तत्राभिप्रायः। लौकिकश्च प्रयोगः शब्दार्थपरिच्छेदे हेतुर्न वैदिकः । यत्तु लौकिके जुहोतीति प्रयोगे द्वितीया, शक्यते तत्र वक्तुमीप्सिततमे एव स प्रयोग इति । तण्डुलानद्य जुहुधि, तण्डुलानद्य होमेन संबन्धयेति लोके भवति हि बहुप्रकारा विवक्षा । अन्यायश्चाऽनेकार्थत्वम् । तेन प्रधानभावेन सिद्धा सती द्वितीया गुणभावेन कल्प्येत । वेदे तु कथं द्वितीयानिर्दिष्टे गुणभाव इति । द्वितीयानिर्देशात् प्राधान्यमेवावगच्छामः । एवमवगते प्राधान्ये बलीयसा हेतुना नास्ति प्राधान्यमित्यवगम्यते । कुतः । न होमस्य केनचित् प्रकारेण सक्तर्थताऽवकल्प्यते । कुतः । सक्तूनां निष्प्रयोजनत्वात् । न सक्तूनामन्यत् प्रयो-

जनं दृश्यते श्रूयते वा। यदि वा होमस्तदर्थो होमोऽपि निष्प्रयोजनः। अथाऽऽरादुपकारको होमस्ततः प्रयोजनवान्। ज्योतिष्टोमप्रकरणे पाठाद् गम्यते प्रयोजनवत्ता,नाप्रयोजन इति शक्यते वक्तुम्। प्रयोगवचनेन हि स आकाङ्क्षते॥ ननु सक्तूनामपि प्रकरणपाठात् प्रयोजनवत्त्वं भविष्यति। को वा ब्रूते- नेति। प्रयोजनवत्त्वैव। प्रयोजनवत्त्वन्तु होममभिनिर्वर्त्तयतां नान्येन प्रकारेण। ननु तेऽपि प्रयोगवचनेनाकाङ्क्षन्ते। तदुच्यते। न द्रव्यं तेनाकाङ्क्षते। इतिकर्त्तव्यतां हि स आकाङ्क्षति। होमश्चेतिकर्तव्यता, न द्रव्यम्। ननु होमे कृते सक्तुभ्योऽदृष्टं निष्पत्स्यते। नास्त्यत्र प्रमाणम्। ननु द्वितीयाविभक्तिः प्रमाणम्। न हि द्वितीया विभक्तिर्होमस्य सक्त्वर्थतां ज्ञापयति। न सक्तवः प्रयोजनवन्त इति भवेद्धोमः सक्त्वर्थः। होमसम्बद्धाः सक्तवः स्युरिति। भवन्ति होमे कृते सक्तवो होमसम्बद्धाः। न होमस्य सक्त्वर्थता निष्प्रयोजनेषु सक्तुषु घटते। सक्त्वर्थतावचनन्तु न पुरुषस्योपकारकं न क्रतोः। तदनर्थकमेव स्यात्। यतो न तद्वचनाच्छक्यमन्यतरत् कल्पयितुम्। स एष द्वितीयान्तः सक्तूनां होमस्य च सम्बन्धं करोति। सम्बन्धे च सति द्रव्याणां कर्म्मसंयोगे गुणत्वेनाभिसम्बन्ध इति भूतत्वाद्, गुणभावे च तृतीया। तेनोच्यते तृतीयायाः स्थाने द्वितीयेति। तेन तदर्थत्वाद्धोमार्थत्वात् सक्तूनां न प्राधान्यं द्वितीयासंयोगेऽपि। एवं सत्यर्थवद्वचनम्। न चार्थवत्त्वे सति आनर्थक्यमित्युच्यते। तस्य च पुरोडाशादेर्यागादिषु शेषभावः, तेन प्रयोजनवन्तः। तत्र संस्कारो नानर्थकः। न स दृष्टोपकारायेति चेत्। अदृष्टार्थो भविष्यति। अदृष्टोऽपि संस्कारोऽस्तीति अवगम्यते लोके, यथा ग्रामान्तरादागतानां पुरुषाणां पर्य्यग्निकरणेनादृष्ट उपकारः क्रियते इत्युच्यते। लोके च नानुपपत्तिः॥

प्रयोजनं च वरुणप्रघासेषु श्रूयते। शमीमय्यः स्रुचो भवन्ति हिरण्मय्यो वेति प्रकृतौ नानावृक्षस्रुक्सम्मार्गसाध्यमपूर्वमिति। नानावृक्षस्रुच उत्पादयितव्याः सम्मार्गार्थत्वेन यथा पूर्वपक्षः। यथा तर्हि सिद्धान्तः, शमीमय्य एव हि हिरण्मय्यो वा सम्मार्ष्टव्याः। तथा यत्र बाणवन्तः परिधयस्तत्रापि पालाशा उत्पादयितव्याः पूर्वपक्षे सिद्धान्ते बाणवन्त एव सम्मार्ष्टव्याः। अवभृथे च पूर्वपक्षे उत्पादयितव्योऽग्निः सम्मार्गाय, सिद्धान्ते चापः सम्मार्जनीयाः।

तथा षट्त्रिंशत्संवत्सरेतरसमयाः पुरोडाशाः सवनीया इति श्रूयते। तत्रापि पिष्टमयः पुरोडाश उत्पादयितव्यः पर्य्यग्निकरणार्थत्वेन पूर्वपक्षे। सिद्धान्ते मांसमया एव पर्य्यग्निकर्त्तव्या इति ॥ १२ ॥ ॥ आशङ्कानिरासः ॥ सम्मार्जनादीनामप्रधानताधिकरणम् ॥ ४ ॥

स्तुतशस्त्रयोस्तु संस्कारो याज्यावद्देवता-ऽभिधानत्वात् ॥ १३ ॥

प्रउगं शसन्ति, निष्केवल्यं शंसति, आज्यैः स्तुवते, पृष्ठैः स्तुवते इति गुणवचनं स्तवनं शंसनञ्च। यथा इन्द्रस्य तु वीर्य्याणि प्रवोचमिति। यदेतद् गुणवचनं श्रूयते, किमेतद् गुणभूतं देवतां प्रति, उत प्रधानमिति। तत्रोच्यते। स्तुतशस्त्रे संस्कारकर्म्मणी इति। कुतः। देवताभिधानत्वात्। गुणवचने निर्वर्त्यमाने गुणिनो देवता संकीर्त्यते, नान्यथा तद्गुणवचनं भवति। तत्र प्रत्यक्षं देवताभिधानं गम्यते, देवताप्रकाशेन च प्रत्यक्ष उपकारो यागसिद्धिः। तस्मात् संस्कारकर्म्मणी याज्यावत्। यथा याज्यामन्वाह, पुरोऽनुवाक्यामन्वाहेति स्तुतिवचनं देवताप्रकाशनेनार्थवत् तद्वदेतदपीति ॥१३॥ पूर्वं० ॥

अर्थेन त्वपकृष्येत देवतानामचोदनार्थस्य गुण-भूतत्वात् ॥ १४ ॥

यदि संस्कारकर्म्मणी एव स्तोत्रशस्त्रे, अर्थेनापकृष्येत देवतानामचोदनार्थस्य गुणभूतत्वाद् देवतार्थस्य गुणभूतो मन्त्र इति तत्प्रधानभावे यत्र प्रधानं तत्र नीयेत। तत्र क्रमसन्निधी उपरुध्येयाताम्। तस्मादेष दुष्टः पक्ष इति पर्य्युदसितव्यः। कतमः पुनरसौ मन्त्रः, अभि त्वा शूरेत्यैन्द्रः प्रगाथो माहेन्द्रस्य ग्रहयजेः सन्निधावाम्नातो, यत्रेन्द्रस्तत्रापकृष्येत ॥ १४ ॥ ॥ सिद्धान्तः ॥

वशावद्वा गुणार्थं स्यात् ॥ १५ ॥

न पर्युदसिष्याम इमं पक्षं, संस्कारकर्म्मणी एव स्तोत्रशस्त्रे, देवताभिधानत्वादेव। यत्तूक्तं, प्रगाथस्योत्कर्ष इति तन्न। इन्द्रशब्देन महेन्द्रोऽभिधायिष्यते, स एवेन्द्रो महत्त्वेन गुणेन महेन्द्र इत्युच्यते। प्रत्यक्षं हीन्द्रशब्दं देवतावचनमुपलभामहे, महत्त्ववचनं स महच्छब्दम्। यथा, राजा महाराजः, ब्राह्मणो महाब्राह्मण इति ॥ वशावत् ॥ यथा, सा वा एषा सर्वदेवत्या यदजा वशा, वायव्यामालभेतेत्यजा-

चशाशब्देन चोदिते कर्म्मणि छागशब्देन निगमा भवन्ति तद्वत् सगुणे चोदिते निर्गुणेनाभिधानं भविष्यति । तेन न भविष्यत्युत्कर्ष इति ॥ १५ ॥ ॥ आशङ्का ॥

न श्रुतिसमवायित्वात् ॥ १६ ॥

नैतदेवम् । इन्द्रोऽस्य ग्रहस्य देवतेति तद्धितसंयोगेन विज्ञायेत । न चास्य महत्त्वमपेक्षमाणस्य तद्धितसंयोग उपपद्यते । तद्धितसंयोगाऽपेक्षस्य वा महत्त्वसम्बन्धात् समासकल्पना । न च तद्धितार्थे वृत्तस्य महत्त्वसम्बन्धः । न च समासार्थे वृत्तस्य तद्धितसंबन्धः । न चाऽस्मिन्नेव प्रयोगे समासार्थे वृत्तिरिष्यते एतस्मिन्नेव तद्धितार्थे । न चायमिन्द्रशब्दोऽविहितवत् स्वार्थे तद्धितार्थेन सम्बद्ध्येत विहितवच्च परार्थे महत्त्वेन सम्बद्धमनूद्येत । विस्पष्टश्चायमन्योऽर्थो महेन्द्रो भवति । महानिन्द्रो भवतीति महेन्द्रः । अन्यश्चेन्द्रो हविषो देवता भवतीति सकृदुच्चारणे च नोभयं शक्येत । तस्मान्नेन्द्रो देवता महत्त्वविशिष्टः । महेन्द्रशब्दात्तु तद्धित उत्पन्नः । तस्मात्तत्प्रातिपदिकमर्थवदिति गम्यते, न त्ववयवसम्बन्धेन । तस्माद्देवतान्तरमिन्द्रान्महेन्द्रः । तेनैन्द्रस्य प्रगाथस्योत्कर्षः प्राप्नोति । अतः पर्य्युदसितव्य एष पक्षः । यदप्युच्यते, इन्द्रस्य वृत्रवधोत्तरकालं महेन्द्रत्वं दर्शयति, महान् वाऽयमभूद् यो वृत्रमवधीदिति । तथा वेदस्यादिमत्तादोषः प्रसज्ज्येत । अतोऽन्य इन्द्रो महेन्द्रात् ॥ १६ ॥ ॥ आशङ्कानिरासः ॥

व्यपदेशभेदाच्च ॥ १७ ॥

व्यपदेशभेदश्च भवति । बहु दुग्धीन्द्राय देवेभ्यो हविरिति, बहु दुग्धि महेन्द्राय देवेभ्यो हविरिति । अतोऽपि देवतान्तरम्, एकदेवतात्वे मन्त्रविकल्पः स्यात् ॥ १७ ॥

गुणश्चानर्थकः स्यात् ॥ १८ ॥

यदा विधिशब्दादवगतमेतद्भवति, इन्द्रो देवतेति, तदाऽस्य गुणान्वाख्याने किं प्रयोजनम् । महत्त्वं नामेन्द्रस्य गुणो भवतीति देवताभिधानम् । कथं तस्यै देवतायै दीयते ? इति । गुणेऽपि हि विहिते सति तस्यै एव देवतायै दीयतेऽविहितेऽपि । तस्माद् गुणविधानमनर्थकम् । अथोच्येत, योऽस्मिन् ग्रहे इन्द्रः स महानिति । नैवम् । ग्रहसम्बन्धस्याप्रसिद्धत्वाद् विशेषणं नात्र कल्प्यते, गुणसम्ब-

न्धस्य चाप्रसिद्धत्वाद् गुणेन विशेषणमनवक्लृप्तम् । तस्मादपि देवतान्तरम् ॥ १८ ॥

तथा याज्यापुरोरुचोः ॥ १९ ॥

एवं सति याज्यापुरोऽनुवाक्ययोर्भेदेन दर्शनमुपपद्यते । ऐन्द्र सानसिं रयिमित्यैन्द्रयाज्यापुरोऽनुवाक्याद्वयं, महान् इन्द्रो य ओजसेति भेदेन माहेन्द्रं दर्शयति । तदेकत्वे विकल्प्येत । तत्र, पक्षे बाध स्यात् ॥ १९ ॥ ॥ युक्तिः ॥

वशायामर्थसमवायात् ॥ २० ॥

यदुक्तम्, अजावशाशब्देन चोदिते कर्म्मणि छागशब्देन निगमा भवन्तीति । तद् युक्तम् । वशायामर्थसमवायित्वं वयं प्रत्यक्षमवगच्छामः । छागस्य वपाया मेदसोऽनुब्रूहीति । यैव वशा यैव छागेति । तस्मात् प्रगाथस्योत्कर्षः सँस्कारपक्षे । अतः प्रधानकर्म्मणी इति ॥ २० ॥ ॥ उपसंहारः ॥

यच्चेति वाऽर्थवत्त्वात् स्यात् ॥ २१ ॥

वाशब्दः पक्षं व्यावर्त्तयति सँस्कारकर्म्मणी एव स्तोत्रशस्त्रे । यच्चैतत्– प्रगाथस्योत्कर्ष इति, उत्कृष्यताम् । यत्रेन्द्रस्तत्र प्रगाथः । लिङ्गेन हि क्रमसन्निधी बाधितव्यावेव ॥ २१ ॥ ॥ आशङ्का ॥

न त्वाम्नातेषु ॥ २२ ॥

अपरेषां मन्त्राणामुत्कृष्टानामन्यत्रार्थवत्ता नास्ति तेषामानर्थक्यं स्यात् । यथा, याम्याः शंसन्ति शिपिविष्टवतीं पितृदेवत्यामाग्निमारुते, कुषुम्भकसूक्तम्, अक्षसूक्तं, मूषिकासूक्तमित्येवमादीनाम् ॥ ॥ २२ ॥ ॥ आशङ्कानिरासः ॥

दृश्यते ॥ २३ ॥

तदुच्यते । सर्वेषामर्थवत्ताऽस्ति । मण्डूकसूक्तस्याग्नौ, अक्षसूक्तस्य राजसूये, मूषिकासूक्तस्यैकादशिन्यां, सर्वेषां वाचस्तोमे, सर्वा ऋचः सर्वाणि यजूँषि सर्वाणि सामानि वाचस्तोमे पारिप्लवमश्वमेधे शंसतीति । यथा, यस्याश्विने शस्यमाने सूर्यो नोदियादपि सर्वा दाशतयीरनुब्रूयादिति । तस्मादस्त्यर्थवत्ता उत्कृष्टानाम् । अतः संस्कारकर्म्मणी स्तोत्रशस्त्रे इति ॥ २३ ॥ ॥ आशङ्का ॥

अपि वा श्रुतिसंयोगात् प्रकरणे स्तौतिशंसती

क्रियोत्पत्तिं विदध्याताम् ॥ २४ ॥

अपि वा प्रधानकर्म्मणी स्तोत्रशस्त्रे स्याताम् । कुतः ? । श्रुतिसंयोगात् । सप्तमीश्रुतिसंयोगो हि भवति । कवतीषु स्तुवते, शिपिविष्टवतीषु स्तुवते इति । यदि स्तुतिस्ततः कवत्यक्षरेष्वाहिता । यदि प्रकाशनं, ततो देवतायाम् । तत्र करणं कवत्यस्तृतीयया अभ्रोष्यं, न सप्तम्या ॥ अपि च, श्रुतिसंयोगो भवति । प्रउगं शंसति, निष्केवल्यं शंसतीति । अतः स्तुतिरभिनिर्वर्त्तयितव्या तेन मन्त्रेण । गुणवचनः शब्दः स्तुतिनिर्वर्त्तनार्थोऽदृष्टमर्थं करिष्यति । तस्मात् प्रधानकर्म्मणी ॥ अपि च श्रुतिसंयोगो भवति षष्ठीविभक्तिसंयोगः । यथा इन्द्रस्य तु वीर्य्याणि प्रवोचमिति । तेन देवताशब्दः स्तुतिसम्बन्धार्थ इत्युच्यते । देवताभिधानार्थे प्रातिपदिकार्थत्वात् प्रथमा स्यात् । अथ यत् प्रथमान्तं, तद्देवतार्थं भवितुमर्हति । यथा, इन्द्रो यातो वसितस्य राजेति । नेत्युच्यते । तदपि वाक्यसंयोगात् स्तुत्यर्थमेव । ननु वाक्याल्लिङ्गं बलीयः । सत्यम् । एतदपि लिङ्गम्, यत् स्तुतिवाक्यस्य साकाङ्क्षस्य निराकाङ्क्षीकरणसामर्थ्यम् । तथाप्युभयथा लिङ्गेऽनुगृह्यमाणे कुतो निर्णयः ? वाक्यशेषादेव, न देवताभिधानार्थे इति । देवताभिधानार्थे इत्येतस्मिन् पक्षे स्तुत्यर्थं साकाङ्क्षवचनमनर्थकमेव स्यात् । तस्माददृष्टार्थत्वात् स्तुतिवचनस्य प्रधानकर्म्मणी स्तोत्रशस्त्रे । अपिच, स्तौतिशंसतीति साक्षाद्गुणवचनौ लक्षणया अभिधानार्थौ स्याताम् । तस्मात् क्रियोत्पत्तिमपूर्वोत्पत्तिं विदध्यातामिति ॥ ॥ २४ ॥ ॥ आशङ्कानिरासः ॥

शब्दपृथक्त्वाच्च ॥ २५ ॥

शब्देन पृथक्त्वमेव गम्यते । द्वादशस्तोत्रशस्त्रोऽग्निष्टोमः । इतरथा हि द्वादशत्वं न स्यात् । स्तोत्राणां शस्त्राणाञ्च एकमेव शंसनं स्तवनञ्च । अथ भेद आश्रीयते, ततो न द्वादशत्वेऽवतिष्ठते ॥ २५ ॥

अनर्थकञ्च तद्वचनम् ॥ २६ ॥

अग्निष्टुति श्रूयते, आग्नेया ग्रहा भवन्ति इति । तत्र पुनरुच्यते, आग्नेयीषु स्तुवन्ति, आग्नेयीषु शंसन्तीति । तत्र विधातव्यमेव, यदि संस्कारकर्म्म । तस्मादपि प्रधानकर्मणी इति ॥ २६ ॥

अन्यश्चार्थः प्रतीयते ॥ २७ ॥

संबद्धे वै स्तोत्रशस्त्रे वा इति । यद्यन्यत् स्तोत्रमन्यच्छस्त्रं, ततस्तयोः सम्बन्धः । यदि वा अपूर्ववचनेन ततोऽन्यत् स्तोत्रमन्यच्छस्त्रम् । इतरथा यदेव स्तोत्रं तदेव शस्त्रं स्यात् ॥ २७ ॥

अभिधानं च कर्मवत् ॥ २८ ॥

प्रधानकर्मण इव चाभिधानं भवति द्वितीयासंयोगेन । प्रउगं शंसतीति, निष्केवल्यं शंसतीति ॥ २८ ॥

फलनिर्वृत्तिश्च ॥ २९ ॥

फलनिर्वृत्तिदर्शनं च भवति । स्तुतस्य स्तुतमसीत्येवमादि । इन्द्रवन्तो मनेमहि भक्षीमहि प्रजामिषं सा मे सत्याशीर्यज्ञस्य भूयादिति स्तोत्रफलमनूद्यते, न देवतायाः । तस्मात् प्रधानकर्मणी स्तोत्रशस्त्रे । अन्यत्र सूत्रबद्धं प्रयोजनम् । दशमेऽध्याये ग्रहाणां देवताऽन्यत्वे स्तुतशस्त्रयोः प्रधानकर्मत्वादधिकारः स्यात् ॥२९॥ ॥ युक्तिः ॥ स्तोत्रादिप्राधान्याऽधिकरणम् ॥ ५ ॥

विधिमन्त्रयोरैकार्थ्यमैकशब्द्यात् ॥ ३० ॥

इदं समाम्नायते । न ता नशन्ति, न दभाति, तस्करो नासाम् । आ मित्रोऽव्यथिरा दधर्षति । देवांश्च याभिर्यजते, ददाति च ज्योग् इत्ताभिः स च ते गोपतिः सह इति । यजते ददातीत्युदाहरणम् । किं यद्वद् ब्राह्मणे भावशब्दो विधायकस्तद्वन्मन्त्रेऽपि, उत मन्त्रेऽभिधायकः ? इति । किं तावत् प्राप्तम् । विधौ मन्त्रे चाम्नायमानस्य भावशब्दस्य एक एवार्थः स्यात् । ऐकशब्द्यात् । स एवायमेकः शब्दो ब्राह्मणगतो विधास्यति, मन्त्रगतो न. शक्नोति विधातुमित्यनुपपन्नम् । तस्माद् विधायकः ॥ ३० ॥ ॥ पूर्वपक्षः ॥

अपि वा प्रयोगसामर्थ्यान्मन्त्रोऽभिधानवाची स्यात् ॥ ३१ ॥

अपि वेति पक्षो व्यावर्त्त्यते । एवञ्जातीयको मन्त्रोऽभिधानवचनः स्यात् । प्रयोगसामर्थ्यात् । प्रयोगे क्रियमाणे अस्य सामर्थ्यं विद्यते, गोदानं गोयागञ्च प्रत्याययितुं, न विधातुम् । कुतः ? विहितत्वाद् गोदानस्य दक्षिणाविधाने, गोयागस्य त्वनुबन्ध्यायाम् । कर्मान्तरं भविष्यतीति चेन्न । असकृदप्युच्यमाने तत्प्रत्ययादेव । स्तुत्यर्थकल्पनायामप्यानर्थक्यं, परिसमाप्तेन सार्थवादकेन वाक्येन विहित-

त्वात् यागस्य । तस्मान्न मन्त्रगतो भावशब्द एवञ्जातीयको विधायकः इति ॥ ३१ ॥ ॥ सिद्धान्तः ॥ मन्त्राविधायकत्वाधिकरणम् ॥ ६ ॥

तच्चोदकेषु मन्त्राख्या ॥ ३२ ॥

मन्त्रगतो भावशब्दो विधायको नेति परीक्षितम् । कोऽयं मन्त्रो नामेति । उच्यते । अज्ञाते मन्त्रे तद्गतो भावशब्दः कथं विचारित इति, इदमर्थतोऽधिकरणं पूर्वं द्रष्टव्यम् । कथँलक्षणो मन्त्र इति ॥ तच्चोदकेषु मन्त्राख्या ॥ अभिधानस्य चोदकेष्वेवञ्जातीयकेष्वभियुक्ता उपदिशन्ति– मन्त्रानधीमहे, मन्त्रानध्यापयामः, मन्त्रा वर्त्तन्ते इति । प्रायिकमिदं लक्षणम् । अनभिधायका अपि केचिन्मन्त्रा इत्युच्यन्ते । यथा वसन्ताय कपिञ्जलानालभते इति, न शक्यं पृष्ठाकोटेन तत्र तत्रोपदेष्टुमिति लक्षणमुक्तम् ॥

ऋषयोऽपि पदार्थानां नान्तं यान्ति पृथक्त्वशः ।
लक्षणेन तु सिद्धानामन्तं यान्ति विपश्चितः ॥

उदाहरणं, मेधोऽसीत्येवमादयोऽस्यन्ताः, इषे त्वेत्येवमादयस्त्वान्ताः, आयुर्दा असि इत्याशीः, अग्निर्मूर्द्धा इति स्तुतिः, सङ्ख्या एको मम इति, प्रलपितम् अक्षी ते इन्द्र पिङ्गले कुलेरिवेति, परिवेदनम् अम्बे अम्बिके इति, प्रैषः अग्नीदग्नीन् इति, अन्वेषणं कोऽसि कतमोऽसीति, पृष्टं पृच्छामि त्वा इति, आख्यानम् इयं वेदिरिति, अनुषङ्गः अच्छिद्रेण पवित्रेणेति, प्रयोगः त्रैस्वर्यं चातुस्वर्यञ्च, सामर्थ्यमभिधानम् । तच्चैतद्वृत्तिकारेणोदाहरणोपदेशेनाख्यातम् । एतदपि प्रायिकमेव । असिमध्या अपि च मन्त्रा भवन्ति, ईड्यश्चासि वन्द्यश्च वाजिन्निति, त्वामध्याश्च– तत्त्वा यामि इति । आशीर्ब्राह्मणमपि, सोऽकामयत प्रजाः सृजेय इति, स्तुतिरपि वायुर्वै क्षेपिष्ठा देवता इति, प्रलापो न चैतद्विद्मो यदि ब्राह्मणा वा स्मोऽब्राह्मणाः स्मो वा इति, परिवेदनं ये मामधुक्षन्त ते मां प्रत्यमुञ्चन्त इति, प्रैषः अमुतः सोममाहर इति, अन्वेषणम् इह वा स इह वेति, प्रश्नः वेद कर्णवर्तीं सूर्मिमिति । प्रतिवचनं विद्मो वा इति, अनुषङ्गः हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षस इति । प्रयोगः त्रैस्वर्य्यञ्चातुस्वर्य्यञ्चेति, सामर्थ्यं स्रुवेण अवद्यति द्रवेष्विति । लक्षणकर्म्मणि प्रयोजनं प्रसिद्धत्वान्न वक्तव्यं, लघीयसी प्रतिपत्तिर्लक्षणेन ॥

आक्षेपेष्वपवादेषु प्राप्त्या लक्षणकर्म्मणि ।

प्रयोजनं न वक्तव्यं यच्च कृत्वा प्रवर्त्तते ॥

आक्षेपेषु पूर्वाधिकरणस्य प्रयोजनम्, अपवादेषूत्सर्गस्य, प्राप्त्यामुत्तरविवक्षा, कृत्वाचिन्तायां पूर्वाधिकरणस्य प्रयोजनम् । अस्ति वेदे मन्त्रशब्दो यस्यायमर्थः परीक्षितः । अहे बुध्निय मन्त्रं मे गोपाय यमृषयस्त्रयीविदा विदुः, ऋचः सामानि यजूंषि इति ॥ ३२ ॥ ॥ मन्त्रनिर्वचनाऽधिकरणम् ॥ ७ ॥

शेषे ब्राह्मणशब्दः ॥ ३३ ॥

अथ किंलक्षणं ब्राह्मणम् ? मन्त्राश्च ब्राह्मणश्च वेदः । तत्र मन्त्रलक्षणे उक्ते परिशेषसिद्धत्वाद् ब्राह्मणलक्षणमवचनीयम् । मन्त्रलक्षणवचनेनैव सिद्धम् । यस्यैतल्लक्षणं न भवति, तद् ब्राह्मणमिति परिशेषसिद्धं ब्राह्मणम् । वृत्तिकारस्तु शिष्यहितार्थं प्रपञ्चितवान्- इतिकरणबहुलम्, इत्याहोपनिबद्धमाख्यायिकास्वरूपम् । हेतुः, शूर्पेण जुहोति तेन ह्यन्नं क्रियते इति निर्वचनं, तद् दध्नो दधित्वम् । निन्दा, उपवीता वा एतस्याग्नयः । प्रशंसा, वायुर्वै क्षेपिष्ठा देवतेति । संशयः, होतव्यं गार्हपत्ये न होतव्यमिति । विधिः, यजमानसम्मिता उदुम्बरी भवति। परकृतिः, माषानेव मह्यं पचतीति । पुराकल्पः, उल्मुकैर्ह स्म पूर्वे समाजग्मुरिति । व्यवधारणकल्पना, यावतोऽश्वान् प्रतिगृह्णीयादिति ॥

हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः ।
परक्रिया पुराकल्पो व्यवधारणकल्पना ॥
उपमानं दशैते तु विधयो ब्राह्मणस्य तु ।
एतद्वै सर्ववेदेषु नियतं विधिलक्षणम् ॥

एतदपि प्रायिकम् । इतिकरणबहुलो मन्त्रोऽपि कश्चिद्, इति वा इति मे मनः । इत्याहोपनिबद्धश्च, भगं भक्षीत्याह । आख्यायिकास्वरूपश्च, उग्रो ह भुज्यमिति। हेतुः, इदं वो वामुशन्ति हि । निर्वचनं, तस्मादापोनुस्थना इति । निन्दा, मोघमन्नं विन्दते अप्रचेता इति। प्रशंसा, अग्निर्मूर्द्धा इति । संशयः, अधः स्विदासीदुपरि स्विदासीदिति। विधिः, पृणीयादिन्नाधमानायेति । परकृतिः, सहस्रमयुताददत् । पुराकल्पः, यज्ञेन यज्ञमयजन्त देवा इति ॥३३॥ ॥ ब्राह्मणनिर्वचनाधिकरणम् ॥८॥

अनाम्नातेष्वमन्त्रत्वमाम्नातेषु हि विभागः ॥ ३४ ॥

ऊहप्रवरनामधेयेषु संशयः– मन्त्राः, उत नेति । अभिधायकत्वान्मन्त्रा इति प्राप्ते ब्रूमः । अनाम्नातेषु मन्त्रत्वं न स्यादभिधायकेष्वपि । नाभिधायकत्वं मन्त्रत्वे हेतुः । किं तर्हि, अभियुक्तप्रयोगः । ये अभियुक्तैर्मन्त्रा नोच्यन्ते, न ते मन्त्राः । नचैवमादयो मन्त्रसमाम्नाये सन्ति । तस्माद् अमन्त्राः । प्रयोजनं, मन्त्रे दुष्टे यत् प्रायश्चित्तममन्त्रेषु तन्न ॥ ३४ ॥ ॥ ऊहाद्यमन्त्रताधिकरणम् ॥ ९ ॥

तेषामृग्यत्रार्थवशेन पादव्यवस्था ॥ ३५ ॥

ऋच इत्यस्ति वेदे, अहे बुध्निय मन्त्रं मे गोपाय यमृषयस्त्रयीविदा विदुः ऋचो यजूँषि सामानीति । कथँलक्षणिका ऋचः ? ॥ तेषामृग्यत्रार्थवशेन पादव्यवस्था ॥ यत्र पादकृता व्यवस्था स मन्त्र ऋग्नामा । यथा अग्निमीळे इति । एवञ्जातीयकेषु मन्त्रेषु अभियुक्ता उपदिशन्ति, ऋचोऽधीमहे, ऋचोऽध्यापयामः, ऋचो वर्त्तन्ते इति । यद्यर्थवशेनेत्युच्यते, यत्र वृत्तवशेन तत्र न प्राप्नोति । अग्निः पूर्वेभिर्ऋषिभिरिति । यतो न अर्थवशेनेति वृत्तादिवशव्यावृत्त्यर्थं, किं तर्हि । अनुवाद एष प्रदर्शनार्थः । अवश्यञ्चैतदेवं विज्ञेयम् । वृत्तादिनिवृत्त्यर्थे सति वाक्यं भिद्येत । तस्माद् यत्र पादकृता व्यवस्था, सा ऋगिति ॥ ३५ ॥ ॥ ऋग्लक्षणाधिकरणम् ॥ १० ॥

गीतिषु सामाख्या ॥ ३६ ॥

अथ साम्नः किं लक्षणम् । विशिष्टा काचिद्गीतिः सामेत्युच्यते । प्रगीते हि मन्त्रवाक्ये सामशब्दमभियुक्ता उपदिशन्ति । सामान्यधीमहि, सामान्यध्यापयामः, सामानि वर्त्तन्ते इति । अभियुक्तोपदेशश्च नः प्रमाणम् । यथा अम्लं दधि, मधुरो गुड इति । गीतिविशिष्टे तावन्मन्त्रे गीतिशब्दः । गीतिसम्बन्धान्मन्त्रे सम्प्रत्यय इत्यवगन्तव्यम् ॥ ॥ ३६ ॥ ॥ सामलक्षणाधिकरणम् ॥ ११ ॥

शेषे यजुःशब्दः ॥ ३७ ॥

अथ यजुषः किं लक्षणमिति । यजुषो लक्षणं न वक्तव्यम् । ऋग्लक्षणसामलक्षणाभ्यामेव यजुर्विज्ञास्यते वैपरीत्येनाया न गीतिर्न च पादबद्धं, तत् प्रश्लिष्टपठितं यजुरिति ॥ ३७ ॥ ॥ यजुर्लक्षणाऽधिकरणम् ॥ १२ ॥

अथ निगदो नाम किं यजूँषि, उत यजुषोऽन्य इति ।

निगदो वा चतुर्थः स्याद्धर्मविशेषात् ॥ ३८ ॥

निगदा न यजूंषि। कुतः। धर्म्मविशेषात्। उच्चैः ऋचा क्रियते, उच्चैः साम्ना, उपांशु यजुषा, उच्चैर्निगदेनेत्येष धर्म्मविशेषः। उच्चै-र्निगदेनेत्यनूद्यते यदि यजुषो निगदत्वं स्याद्, न च तस्योच्चैस्त्वं धर्मो दृश्यते। दृश्यते तु। तस्माच्चतुर्थं मन्त्रजातं निगदो नाम ॥ ३८॥ पूर्व०

व्यपदेशाच्च ॥ ३९ ॥

व्यपदेशोऽपि भवति, यजूंषि वर्त्तन्ते, न निगदाः। निगदा वर्त्त-न्ते, न यजूंषीति। तस्मादपि मन्त्रान्तरम् ॥ ३९ ॥ ॥ युक्तिः ॥

यजूंषि वा तद्रूपत्वात् ॥ ४० ॥

यजूंष्येव वा निगदाः। कुतः। तद्रूपत्वात्। तदेवैषां रूपं, यद् यजुषां प्रश्लिष्टपाठ, ऋक्सामलक्षणविलक्षणता च ॥४०॥ सिद्धान्तः ॥

वचनाद्धर्मविशेषः ॥ ४१ ॥

वचनात् प्रत्यायनसामर्थ्यात्। अस्ति हि पुरुषान्तरप्रत्यायनसा-मर्थ्यं केषाञ्चिद् यजुषाम् ॥ ४१ ॥ ॥ उपसंहारः ॥

अर्थाच्च ॥ ४२ ॥

अस्ति च तै पुरुषान्तरैः प्रत्यायितैः प्रयोजनं, नोपांशूच्चार्य्यमा-णाः पुरुषान्तरं प्रत्याययेयुः। तस्माद् धर्म्मविशेषोऽर्थवान्। यानि च यजूंषि उच्चैरुच्चार्य्यन्ते ते निगदाः। कुतः। निशब्दः प्रकर्षस्य वक्ता। यथा प्रकर्षेण रक्तं नितरां रक्तमित्युच्यते। गदतिर्गदनार्थः पाठवचनः। एष एव हि प्रकर्षो यदुच्चैस्त्वावच्छिन्नत्वम्। ननु वाच-निको गुणो यजुषामुपांशुत्वम्। नेति ब्रूमः। गुणो नाम स भवति, यः स्वकार्य्यं कुर्वतामुपकारे वर्त्तते। न च परसम्बोधनार्थानां यजुषा-मुपांशुत्वं साहाय्ये वर्त्तते। तद्धि स्वकर्म्मक्रियाविघातं करोति। तेन पुरुषान्तरसम्बोधनार्थमुच्चैस्त्वं गुणः। इतरार्थं तु वचनं भविष्यति। इतराणि यानि यजूंषि न परसम्बोधनार्थानि, तदुपांशुत्वं निषेत्स्यते ॥ ॥ ४२ ॥ ॥ युक्तिः।

गुणार्थो व्यपदेशः ॥ ४३ ॥

अथ यदुक्तं व्यपदेशः इति स चैकत्वेऽपि गुणतो भवति। य-था, इतो ब्राह्मणा भोज्यन्ताम्, इतः परिव्राजका इति। एवमुच्चैस्त्वेन

गुणेन तान्येव यजूंषि व्यपदिश्यन्ते, निगदा इति ॥ ४३ ॥ आ० ॥

सर्वेषामिति चेत् ॥ ४४ ॥

यदि य उच्चैर्गद्यते स निगदः, ऋगपि निगदः प्राप्नोति ॥ ४४ ॥ आ० ॥

न ऋग्व्यपदेशात् ॥ ४५ ॥

न ऋचो निगदा व्यपदिश्यन्ते । अयाज्या वै निगदा ऋचैव यजन्तीति पृथक्त्वनिमित्ता हि व्यपदेशा भवन्ति । उच्यते । व्यपदेशो लिङ्गं, प्राप्तिरुच्यतामिति । अपादबद्धे गदतिर्वर्तते, अपादबद्धो हि गद्य इत्युच्यते ॥ ४५ ॥ आ० नि० ॥ निगदानां यजुष्ट्वाधिकरणम् ॥ १३ ॥

अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात् ॥ ४६ ॥

अथ प्रश्लिष्टपठितेषु यजुःषु कथमवगम्येत, इयदेकं यजुरिति यावता पदसमूहेनेज्यते तावान् पदसमूह एकं यजुः। कियता चेज्यते । यावता क्रियाया उपकारः प्रकाश्यते तावद् वक्तव्यत्वाद् वाक्यमित्युच्यते तेनाभिधीयते– अर्थैकत्वादेकं वाक्यमिति ॥ एतस्माच्चेत् कारणादेकवाक्यता भवति तस्मादेकार्थः पदसमूहो वाक्यम् । यदि च विभज्यमानं साकाङ्क्षं पदं भवति । किमुदाहरणम् ? देवस्य त्वा सवितुः प्रसवे इति । ननु पदं पदमत्रैकार्थम् । सत्यं, न तु तद्विभागे साकाङ्क्षम् । न तर्ह्यर्थैकत्वमुपपद्यते । बहुत्वात् पदार्थानाम् । पदसमुदायस्य च पृथगर्थो नास्तीत्युक्तम् । भेदः संसर्गो वा वाक्यार्थ इति यद्युच्यते, तथाप्येकार्थता न स्यात् । बहुपदे भेदानां संसर्गाणां च बहुत्वात् । एकप्रयोजनत्वादुपपन्नम् । यथा तावद् देवस्य त्वेति निर्वापप्रकाशनम् । तस्य विशिष्टस्य वाचक एतावान् पदसमूहः तद् वाक्यम् ।

नन्वत्र देवस्य त्वा सवितुः प्रसवे निर्वपामीत्येकं वाक्यम्, अश्विनोर्बाहुभ्यां निर्वपामीत्यपरम् । एवं बहूनि वाक्यानि । यदि निर्वपामीत्यनुषङ्गस्ततो बहूनि वाक्यानि । न त्वेवमनुषङ्गो भवति । यदि गुणभूतो निर्वपामीति, तदा प्रतिप्रधानं भिद्येत । न च निर्वापो देवस्य त्वेत्येवमादीनामर्थेनोच्यते । साधनप्राधान्ये हि अदृष्टार्थता वचनस्य स्यात् । निर्वापे पुनः प्रधाने दृष्टं कार्य्यं निर्वापप्रकाशनम् । तत् सर्वैर्विशेषणैर्विशिष्टमुच्यते । तस्मादविरोधः । यथा च पदं पदेन विशेष्यते । यथोक्तं, तद्भूतानामिति । तस्मादेकं वाक्यम् ॥

अथ किमर्थमुभयं सूत्रितम्–अर्थैकत्वादिति च, विभागे साकाङ्क्ष-

त्वादिति च । उच्यते । भवति किञ्चिदेकार्थे, न तु विभागे साकाङ्क्षम् । यथा भगो वां विभजतु, अर्य्यमा वां विभजत्विति । एकार्थाः सर्वे विभागमभिदधति । ननु भगविशिष्टाद् विभागादर्य्यमविशिष्टोऽन्यो विभागः । नेत्युच्यते । विभागसामान्येनास्य प्रयोजनं, न विशेषेण । सामान्ये हि दृष्टोऽर्थो भवति, न विशेषे । विभागे तु न साकाङ्क्षम् । तस्माद्भिन्नमिदं वाक्यं विभागे विकल्प्यते । तथा, स्योनं ते सदनं कृणोमि घृतस्य धारया सुषेवं कल्पयामि । तस्मिन् सीदाऽमृते प्रतितिष्ठ व्रीहीणां मेधः सुमनस्यमान इति विभागे साकाङ्क्षम् । द्वे तु प्रयोजने क्रियेते, सदनकरणं पुरोडाशप्रतिष्ठापनञ्च । तस्माद् भिन्ने वाक्ये, पूर्वं सदनकरणे विनियुज्यते, उत्तरं पुरोडाशप्रतिष्ठापने । तस्मात् सम्यक् सूत्रितं, न सूत्रोपालम्भो भवति ॥ ४६ ॥ ॥ एकवाक्यत्वलक्षणाधिकरणम् ॥ १४ ॥

समेषु वाक्यभेदः स्यात् ॥ ४७ ॥

इषे त्वा, ऊर्जे त्वेति । तथा आयुर्यज्ञेन कल्पतां, प्राणो यज्ञेन कल्पतामिति । अत्र सन्देहः । किमेवमादिषु भिन्नं वाक्यमुतैकमिति । एकमिति ब्रूमः । इषे त्वेत्येवमुक्ते, न किञ्चिद् दृष्टं प्रयोजनं, तथा ऊर्जे त्वेत्यपि च वचनसामर्थ्याददृष्टम् । तदुभाभ्यामेकं कल्पयितुं न्याय्यम् । एवमल्पीयसी अदृष्टानुमानकल्पना भविष्यति । तस्मादेकं वाक्यम् ॥ एवं प्राप्ते ब्रूमः ॥ समेषु वाक्यभेदः स्यात् ॥ समेषु परस्परानाकाङ्क्षेषु वाक्यं भिद्यते । इषे त्वेत्येनेन एकोऽर्थः क्रियते, ऊर्जे त्वेत्यनेनापरः । नन्विदानीमेवोक्तं नात्र दृष्टोऽर्थ इति । यद्यपि प्रत्यक्षादिना प्रमाणेन नोपलभ्यते, श्रुत्या तु गम्यते- इषे त्वेति छिनत्ति, ऊर्जे त्वेत्यनुमार्ष्टीति । तथा आयुर्यज्ञेन कल्पतां, प्राणो यज्ञेन कल्पतामित्यायुःक्लृप्तेरन्या प्राणक्लृप्तिः । ननु सामान्यमात्रमिष्टं तद् न विशेषणभेदाद् भेदमर्हतीति । यथा, अग्नये जुष्टं निर्वपामीति निर्वाप एकः तस्य विशेषाः सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामिति, न तेषां भेदान्निर्वापस्य भेद इष्यते । एवमिहापि क्लृप्तिर्नामैकोऽर्थः, नासावायुरादिभिर्विशेषैर्भिन्नो भविष्यतीति । उच्यते । इह क्लृप्तीर्वाचयतीति बह्वयः क्लृप्तयः श्रूयन्ते । ताश्च वक्तव्याः तत्रैकामायुःक्लृप्तिम्, आयुर्यज्ञेन कल्पतामित्येष मन्त्रः शक्नोति वदितुम् । प्राणो यज्ञेन कल्पतामित्ययमपि प्राण-

क्लृप्तिमपराम् । एवन्तु सर्वे क्लृप्तिविशेषवचनाः । तच्च दृष्टं प्रयोजनम् । तस्मादनेकार्थत्वात्तत्रापि वाक्यभेद इति । ननु सामान्यवचनादेकत्वं यथा विभागे । नैतदेवम् । विभागे ह्यष्टार्थे सामान्यमिह न । अपिच क्लृप्तीर्वाचयतीति विहितम्, आयुर्यज्ञेन कल्पतामिति चायुःक्लृप्त्यभिधानम् । अभिनिवर्त्यते प्रत्यक्षं, प्राणो यज्ञेन कल्पतामिति च प्राणक्लृप्तेः । तस्माद्वाक्यभेदः ॥४७॥ वाक्यभेदाधिकरणम् ॥१५॥

अनुषङ्गो वाक्यसमाप्तिः सर्वेषु तुल्ययोगित्वात् ॥४८॥

या ते अग्नेऽयाशया तनूर्वर्षिष्ठा गह्वरेष्ठा, उग्रं वचो अपावधीत्वेषं वचो अपावधीत् स्वाहा, या ते अग्ने रजाशया, या ते अग्ने हराशया इति । अत्र सन्देहः । तनूर्वर्षिष्ठेति किं सर्वेष्वनुषक्तव्यम् । आहोस्विल्लौकिको वाक्यशेषः कर्त्तव्य इति । किं प्राप्तम् । या ते अग्ने रजाशयेत्येतस्य तनूर्वर्षिष्ठेति न वाक्यशेषः । न ह्ययमस्मात् परः प्रयुज्यते । एवं प्राप्ते ब्रूमः । अनुषङ्गो वाक्यसमाप्तिः स्यात्तनूर्वर्षिष्ठेति । यथैव ह्ययं, या ते अग्नेऽयाशयेत्येतस्यानन्तरमेवं, या ते अग्ने रजाशया, या ते अग्ने हराशयेत्येतयोरपि । हराशयेत्येतस्य व्यवहित इति चेत् । तन्न । समुदायस्याव्यवधानात् । अव्यवहितो रजाशयेति समुदायः । समुदायेन च वाक्यशेषस्य सम्बन्धाभावात् समुदायिभ्यां सम्बन्धः । समुदायिसम्बन्धे च न गम्यते विशेषः । तस्मात् सर्वत्रानुषङ्गः ॥

अपि च साकाङ्क्षस्य सन्निधौ परस्तात् पुरस्ताद्वा परिपूरणसमर्थः श्रूयमाणो वाक्यशेषो भवति । कियाँस्तु कालः सन्निधिरिति । उच्यते । यावति शक्नोत्युभावप्यपेक्षितुम् । कश्चासौ । आनन्तर्यं सम्बन्धिपदव्यवायो वा । तावति हि शक्नोत्युभावप्यपेक्षितुम् । सम्बन्धिपदव्यवाये हि सम्बन्धादेव पूर्वसंस्कारो नापैति । यत्राप्यपरेण साकाङ्क्षेण व्यवायस्तत्राप्यस्ति सम्बन्धः । द्वयोरपि हि कार्यं वक्तव्यमिति । परः पूर्वमपेक्षते, अनपेक्षमाणेऽन्यतरः प्रमादपाठः स्यात् । शक्यते चासावपेक्षितुम् । तस्माद् यथैवायमेकस्य सन्निधावेवमपरस्य द्वयोरप्यसम्बद्धैः पदैरव्यवहितत्वाद्, द्वयोरप्याकाङ्क्षतोरेतावच्च वाक्यशेषसम्बन्धे कारणं, नानन्तर्यम् । अव्यवधाने विच्छेदेऽपि भवति सम्बन्धः । तस्मादनुषङ्गः ॥

अथेह कथं भवितव्यं, यत्र निराकाङ्क्षाणां सन्निधौ परिपूरणासमर्थः श्रूयते। यथा, चित्पतिस्त्वा पुनातु, वाक्पतिस्त्वा पुनातु, देवस्य त्वा सविता पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्य्यस्य रश्मिभिरिति। अत्र हि पुनात्वन्तानि परिपूर्णानि न किञ्चिदाकाङ्क्षन्ति। नन्वच्छिद्रेणत्येतदाकाङ्क्षिष्यति। सत्यमाकाङ्क्षति। आकाङ्क्षदप्येतदेकमाकाङ्क्षेत। एकेनैव तन्निराकाङ्क्षं सम्पद्यते इति। एकेन हि निराकाङ्क्षीकृतो नेतरावाकाङ्क्षिष्यति। अनर्थकत्वादाकाङ्क्षति। एकेन च सम्बद्धो नानर्थको भवति। तस्मान्नेतरावाकाङ्क्षतीति। इतरावपि परिपूर्णत्वान्न तमाकाङ्क्षतः। नन्वेतस्य वाक्यशेषस्य एकमप्याकाङ्क्षतो न गम्यते विशेषः, केन निराकाङ्क्षीक्रियते, केन वा नेति, तेनानवगम्यमाने विशेषे सर्वैः सह सम्भन्त्स्यते। आह। नैतदेवम्। येनास्य प्रत्यक्षमानन्तर्य्यमुपलभामहे तेन सह सम्भन्त्स्यते इति गम्यते विशेषः। तस्मात्तेनानन्तरेण सह सम्भन्त्स्यते इति नास्ति सर्वत्रानुषङ्ग इति। आह। नैतदेवम्। पुनातुशब्देनास्य प्रत्यक्षमानन्तर्य्यमुपलभामहे। पुनातुशब्दस्यापि चित्पतिस्त्वेत्येवमादिभिः। एकश्चासौ पुनातुशब्दः पुनः पुनरुच्चरितः। तेनावगच्छामः। यत्र पुनातुशब्दः प्रयुक्तस्तत्र तेनैकवाक्यत्वाद् अच्छिद्रेणेत्ययमपि प्रयोक्तव्यः। तथा च सति, चित्पतिस्त्वेत्येवमादयो विना पुनातुशब्देन साकाङ्क्षाः। ते च पुनातुशब्दमाकाङ्क्षन्ति, स च पुनातुशब्दोऽच्छिद्रेणेत्यनेन विशिष्टः। तेन पुनातुशब्देन सानुषङ्गेण नियोगतः सर्वे निराकाङ्क्षीकर्त्तव्याः। तस्मात् सर्वेषु तुल्यप्रयोगा इति वाक्यपरिसमाप्तिरनुषज्यते ॥ ४८ ॥ ॥ अनुषङ्गाधिकरणम् ॥ १६ ॥

व्यवायान्नानुषज्येत ॥ ४९ ॥

सं ते वायुर्वातेन गच्छतां, सं यजत्रैरङ्गानि, सं यज्ञपतिराशिषा इति। वायुर्वातेन गच्छतामित्येष सं यजत्रैरङ्गानीति बहुवचनान्तेन व्यवहितत्वात्, सं यज्ञपतिराशिषेत्यत्र नानुषज्यते। एकेन साकाङ्क्षेण व्यवेतो गच्छतामिति शेषः। ततो बहुवचनान्तेन सं यजत्रैरङ्गानीत्येतेन सम्बन्धमनुपेत्य व्यवेतत्वात् परेण न सम्बध्यते, गम्यते हि तदा विशेषः, एकेन व्यवेत इति। गम्यमाने विशेषे न तत्र भावो वाक्यशेषस्योपपद्यते। तस्माद् बहुवचनान्तस्य परस्य च तद्-

व्यपेतस्य लौकिको वाक्यशेषः कर्त्तव्य इति ॥ ४९ ॥ ॥ व्यवेताननुषङ्गाधिकरणम् ॥ १७ ॥ इति श्रीशबरस्वामिकृतौ मीमांसाभाष्ये द्वितीयस्याऽध्यायस्य प्रथमः पादः ॥ २ ॥ १ ॥ उपोद्घातपादोऽयम् ॥

अथ द्वितीयः पादः ।

शब्दान्तरे कर्मभेदः कृतानुबन्धत्वात् ॥ १ ॥

अस्ति ज्योतिष्टोमस्तत्र श्रूयते ' सोमेन यजेत, दाक्षिणानि जुहोति, हिरण्यमात्रेयाय ददातीति । यजति ददाति जुहोतयस्ते किं संहत्य कार्य्यं कुर्वन्ति, उत वियुत्येति संशयः । साधकाः संहत्यापि साधयन्तो दृश्यन्ते, वियुत्यापि । संहत्य तावत्, त्रयो ग्रावाण एकां मुखां धारयन्तो दृश्यन्ते, नागदन्तकास्तु वियुत्यापि । एकैकस्मिन् हि शक्यते शिक्यमवलम्बयितुम् । अतो, यजति–ददाति–जुहोतयः संहत्य साधयेयुर्वियुत्य वेति जायते संशयः ॥

किं तावत् प्राप्तं, संहत्येति । कुतः । अदृष्टार्थानामुपकारकल्पनाऽल्पीयसी न्याय्येति । कथम् । अदृष्टो योऽश्रुतो वार्थः, स नास्तीत्यघगम्यते * तस्मिन्नसति दृष्टश्चेच्छ्रुतो वा न विरुद्ध्यते ॥ विरुद्ध्यमाने कल्प्यः स्याज्ज्ञायते तेन सोऽर्थवान् * विशेषश्चेन्न गम्येत, ततो नैकोऽपि कल्प्यते ॥ गम्यते च विशेषः, बहुभ्य एकमपूर्वमिति । तस्मात् समुदायश्चिकीर्षितः । ततो ह्यदृष्टे कल्प्यमाने, अवयवानां समुदायं प्रति अर्थवत्त्वादेकमपूर्वं समुदायात् कल्पितं भविष्यति । न च अशब्दः समुदायः । अवयवशब्दैरेव समुदायस्योक्तत्वात् । तस्मात् समुदायश्चिकीर्षितः । अथ वा यजेतेत्यस्य पूर्वो भागो यजत्यर्थं ब्रवीति । उत्तरो भावयेत्, तथा ददातीति पूर्वो भागो ददात्यर्थम्, उत्तरस्तमेव भावयेदिति अनुवदति । एवं जुहोतीति पूर्वो भागो जुहोत्यर्थम्, उत्तरस्तमेवानुवदति । तेनैकस्यां भावनायां त्रयो यजत्यादय उपाया विधीयन्ते श्रुत्या । तस्मादेतैर्यागदानहोमैर्विशिष्टाऽपूर्वस्य भावना प्रतीयते । अत उच्यते । संहत्यैकमपूर्वं साधयन्ति इति । यद्वा यजतिशब्देन विहितं दानं दानहोमशब्देनानूद्यते गुणसम्बन्धार्थम् । तस्मादेकमपूर्वमिति प्राप्तम् ॥ एवं प्राप्ते ब्रूमः ॥ प्रतिशब्दमपूर्वभेद इति । शब्दान्तरे कर्मभेदः कृतानुबन्धत्वात् । यजेतेत्यनेन केवलस्य यागस्य कर्त्तव्यतोच्यते, न तु जुहोतिशब्दाभिहितस्य,

ददातिशब्दाऽभिहितस्य वा । शब्दान्तरत्वात् । प्रयोगवाक्यशेषभावेन हि समुदायस्य सत्तासम्बन्धो गम्यते, श्रुत्या अवयवस्य । यजेतेति सन्निहितयोरपि वाक्येन दानहोमयोः श्रुत्या यागस्यैव सत्तासम्बन्धो गम्यते, न दानहोमयोः । श्रुतिश्च वाक्याद् बलीयसी । तस्मान्न समुदायः शब्दः । कल्प्यमानो हि प्रयोगवचनेन एकवाक्यतां नीत्वा कल्प्येत । शब्दान्तरश्च यजतेर्ददातिः । तत्र यद्यपि परो भागो भावनावचनः सर्वेषु समानस्तथाप्येकैकस्य पूर्वोऽवयवोऽन्यः, अन्यश्च तेन समुदाय शब्दान्तरमन्यस्मात् समुदायात् तत्रार्थान्तरं व्यक्तं, दद्यादिति दानेन साधयेदिति । केवलमेव दानं करणं भावनायाः प्रतीयते, न यागहोमौ सहायावपेक्षते । तथा जुहोतीति होमसाधनां भावनामाह, न दानयागावपेक्षते तत्रैतावच्छब्देनावगतं, दानेन केवलेन सिद्ध्यतीति । जुहोतीत्यपि होमेन केवलेन सिद्ध्यतीति, न तु दानेन केवलेन सिद्ध्यतीति विज्ञानं निवर्त्तते । ददातिर्हि स्वेन कारकग्रामेण कृतानुबन्धो न यागं होमं वाऽनुबन्धमपेक्षते । तस्माद्भिन्नानि वाक्यानि, प्रतिशब्दमपूर्वभेद इति । न च दानस्य यजतिर्जुहोतिर्वाऽनुवादो, यागहोमयोरविवक्षाप्रसङ्गात् । न च दानमितरयोरनुवादः । परस्वत्वार्थत्वाद् ददातेः, इतरयोश्च त्यागार्थत्वात् प्रयोजनं– पूर्वपक्षे समुदायादपूर्वं, सिद्धान्ते तु यागस्य फलवत्त्वादितरयोर्गुणभावः ॥ १ ॥ ॥ अङ्गापूर्वभेदाधिकरणम् ॥ १ ॥

एकस्यैवं पुनः श्रुतिरविशेषादनर्थकं हि स्यात् ॥ २ ॥

समिधो यजति, तनूनपातं यजतीत्येवमादिः पञ्चकृत्वोऽभ्यस्तो यजतिशब्दः किमेकमपूर्वञ्चोदयति, किं प्रत्यभ्यासमपूर्वभेद इति । शब्दान्तरे कर्मभेद उक्तः । इह स एव शब्दः पुनः पुनरुच्चार्य्यते । तस्मादेकमेवात्राऽपूर्वम् । नन्वऽपूर्वान्तरमविदधदनर्थको भवति । सत्यमेवाप्रयोजनो भवति । बहुकृत्वोऽपि चोच्चार्य्यमाणो नान्यार्थो भवति । यत् प्रथमे उच्चारणे गम्यते, शततमेऽपि तदेव गम्यते । तस्मात् पञ्चकृत्वोऽभ्यस्तो यजति शब्द एकमपूर्वं चोदयति । न चाभ्यासोऽनर्थको भविष्यति । तनूनपादादीर्देवता विधास्यति, तस्मादेकमपूर्वम् ॥ एवं प्राप्ते, ब्रूमः ॥ एकस्यैवं पुनः श्रुतिः स्यात् । कर्म्मभेदं कुर्य्यादित्यर्थः । तावत्येव विधीयमाने असति कस्मिंश्चि-

द्विशेषे पुनःश्रुतिरनर्थिका भवेत् । ननूक्तं न शक्नोत्यर्थान्तरं विधातुमिति । उच्यते । समिधो यजति इत्यपि प्रथमोऽनुवाद एव, दर्शपूर्णमासाभ्यां यजेतेति यागः प्राप्त एव । तत्र देवता न शक्या विधातुम् । श्रुतिप्राप्ता हि तत्र देवता । इयं वाक्यात् प्रकरणाद्वा । तयोर्विकल्पो न न्याय्यः । स एष देवतायागसम्बन्धो विधीयमानः, अक्रियमाणे यागे न शक्यः कर्तुमित्यनर्थकः स्यात् । क्रियमाणे तु शक्यते । तस्मादभ्यसितव्यो यागः । प्रत्यभ्यासञ्चादृष्टभेद इति । न च यत् समित्सम्बन्धेन क्रियते, तत् तनूनपात्सम्बन्धेन । भिन्नत्वात् तयोः । अतो न विकल्पः । प्रयोजनं– पूर्वपक्षे सकृत् प्रयोग इति, सिद्धान्ते पुनः पुनः प्रयोग इति ॥२॥ समिदाद्यपूर्वभेदाधिकरणम् ॥ २ ॥

प्रकरणं तु पौर्णमास्यां रूपावचनात् ॥ ३ ॥

एवं हि समामनन्ति, यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्याञ्चाच्युतो भवति, तावब्रूतामग्नीषोमावास्यज्यैव तौ उपांशु पौर्णमास्यां यजन्निति, ताभ्यामेतमग्नीषोमीयमेकादशकपालं पौर्णमासे प्रायच्छत्, ऐन्द्रं दध्यमावास्यायाम्, ऐन्द्रं पयोऽमावास्यायामिति । तथा आघारमाघारयति, आज्यभागौ यजति, स्विष्टकृते समवद्यति, पत्नीसंयाजान् यजति । समिष्टयजुर्जुहोति । तथा, य एवं विद्वान् पौर्णमासीं यजते, य एवं विद्वानमावास्यां यजते इति । तत्र सन्देहः । सर्वाण्येतानि समप्रधानानि, उत आग्नेयादीनि पयोऽन्तानि प्रधानानि, आघारादीनि आरादुपकारकाण्यङ्गानि ? । तथा, य एवं विद्वानित्येवं संयुक्तौ प्रकृतानां कर्म्मणामनुवदितारौ । अथ वा य एवं विद्वान् पौर्णमासीं यजते, य एवं विद्वानमावास्यां यजते इत्यपूर्वयोः कर्म्मणोर्विधातारौ । तत्र इतरे गुणविधयः ? इति । किं प्राप्तम् । शब्दान्तरत्वादभ्यासाच्च समप्रधानानीति प्राप्ते, ब्रूमः ॥ प्रकरणं तु पौर्णमास्यां, प्रकृतानामाग्नेयादीनामनुवदितारौ पौर्णमास्यमावास्यासंयुक्तौ । कुतः ? रूपावचनात् । य एवं विद्वान् पौर्णमासीसंज्ञकं यागं यजत इति न सर्वे यागा उच्यन्ते । यः पौर्णमासीसंज्ञकः स विधीयते । न चैतदेवमवगच्छामः, कीदृशमेवंसंज्ञकस्य यागस्य रूपमिति । तेन किञ्चित् प्रतिपद्येमहि । अतो ब्रूमः । यद्यपूर्वस्य विधातारौ, अनर्थकाविति । अथ तु प्रकृतानामनुवदितारौ,

ततः सन्निहिताः पौर्णमास्यमावास्यासंयुक्ता यागा इति गम्यते रूपम्। तत्रार्थवत्ता वचनस्य। कथं पुनरेकवचनान्तो बहूनां वाचको भविष्यतीति यदुच्यते। समुदायशब्दतयाऽवकल्पिष्यते। रूपवन्तो हि पूर्वप्रकृता यागाः। तेषां च प्रचयशिष्टः समुदायोऽप्यस्ति। तदपेक्षोऽयमरूपशब्दः। तस्मादेकवचनान्तता न दोषः। भवति हि बहूनामेकवचनान्तः शब्दः समुदायापेक्षः। यथा, यूथं वनं कुलं परिषदिति। यदा आग्नेयादीनां समुदायवचनावेतौ, तदा दर्शपौर्णमासशब्देन त एवाभिधीयन्ते। तत एषां फलसम्बन्धः, फलवत्सन्निधेस्तु आघारादीन्याराादुपकारकाणीति ॥ ३ ॥

विशेषदर्शनाच्च सर्वेषां समेषु ह्यप्रवृत्तिः स्यात् ॥४॥

यदि च सर्वाणि समप्रधानान्यभविष्यन्, न विकृतौ प्रयाजा दृश्यन्ताम्। दृश्यन्ते तु, प्रयाजे प्रयाजे कृष्णलं जुहोतीति। असत्याग्नेयगुणत्वे प्रयाजस्य तन्नोपपद्यते। अतो न सर्वाणि समप्रधानानि॥४॥ युक्तिः ॥

गुणस्तु श्रुतिसंयोगात् ॥ ५ ॥

नैतदस्ति, पौर्णमास्यमावास्यासंयुक्तौ समुदायशब्दाविति। किन्त्वपूर्वयोः कर्मणोर्विधातारौ। तथा न लक्षणशब्दो भविष्यति। ननु रूपं नास्ति। वाक्यान्तरेण रूपमवगमिष्यामः। पौर्णमास्यामाग्नेयोऽष्टाकपालो भवतीति। यदेतत् पौर्णमासीनाम कर्म्म, तस्यैतद् रूपम्। अग्निर्देवता, पुरोडाशो द्रव्यमिति। अत आग्नेयादिभिर्गुणो विधीयते इति ॥ ५ ॥ पूर्वपक्षः ॥

चोदना वा गुणानां युगपच्छास्त्राच्चोदिते हि तदर्थत्वात्तस्य तस्योपदिश्येत ॥ ६ ॥

कर्म्मचोदना वा आग्नेयादयः स्युः। कुतः ?। गुणानां युगपच्छासनात्। एकेनैव वाक्येनात्रानेको गुणो विधातुमिष्यते भवता। न च शब्दान्तरेण चोदिते कर्म्मण्यनेको गुणः परस्परसम्बन्धे चाऽसति शक्यते विधातुम्। कथम्। यदि तावत् पौर्णमास्यामष्टाकपालो भवतीति सम्बन्धो विवक्षितः, न तदाऽयमर्थोऽष्टाकपालः सत्तयाऽभिसम्बध्यते। इति कस्तर्ह्यष्टाकपालः। पौर्णमास्याऽभिसम्बध्यत इति तत्र तदा भवतिर्वर्त्तते, तदानीमाग्नेय इत्ययमस्यान्तिकादप्युपनिपति-

तो भवति सम्बन्धाभावान्नानेन सम्बन्धुमर्हति, अष्टाकपाल आग्नेयो भवतीति। अथाग्नेयः पौर्णमास्यां भवतीति विवक्ष्यते। तदाग्नेयपुरोडाशयोरसम्बन्ध एव स्यात् । अथ पौर्णमास्यामष्टाकपालस्याग्नेयता विधीयते । वक्तव्यं, केन तस्यामष्टाकपालो विहित इति । अथ तस्यामाग्नेयस्याष्टाकपालता तथाप्येष दोषः । अथ पौर्णमासीत्युभाभ्यां सम्बद्धयेत । परस्परेण द्रव्यदेवतयोरसम्बन्ध एव स्यात् । अथ द्रव्यदेवते परस्परेण विशिष्टे सत्यौ पौर्णमास्या सम्बद्ध्येयातामित्युच्यते । आग्नेयोऽष्टाकपालो यः स पौर्णमास्यां भवतीति । तस्याऽप्रसिद्धत्वादेतदप्ययुक्तम् । अथ केनचिदग्नये सङ्कल्पितः पौर्णमास्यां विधीयते । तथापि देवताया अविधानाद्रूपाभाव एव । अथाऽग्निर्देवता भविष्यतीति कश्चिद् ब्रूयात् स वक्तव्यः, मिथश्चानर्थसम्बन्ध इति न हि आग्नेयशब्दोऽनुवादो विधिश्च भवतीति। कल्पयिष्यामो देवतामिति चेन्न। असति विधाने देवताया अभावात्। सम्बन्धिशब्दोऽयं देवतेति। स एवाग्निरष्टाकपालस्य देवता, नान्यस्य। तस्मादवश्यमाग्नेयाष्टाकपालसम्बन्धो विधातव्यः । स एष यागो भवतीति तेन पौर्णमासीयागस्याऽपरो यागः सम्बन्धी विधीयते, न द्रव्यं, देवता वा । न च यागस्य यागाऽन्तरं रूपं भवति । अतो रूपावचनात् पौर्णमास्यमावास्यासंयुक्तौ नापूर्वयोः कर्मणोर्विधातारौ । यत्तूक्तं, पौर्णमास्यमावास्याशब्दौ लक्षणया प्रकृतान् यागाननुवदितुं शक्नुतो, नाञ्जस्येनेति । नैष दोषः यदा आञ्जस्येन शब्दार्थो नावकल्पते, तदा लक्षणयाऽपि कल्प्यमानः साधुर्भवति । यथा, अग्नौ तिष्ठति, अवटे तिष्ठति, अग्निसमीपे अवटसमीपे तिष्ठतीति भवति संव्यवहारः । लक्षणापि हि लौकिक्येवेति ॥ ६ ॥ ॥ उत्तरम् ॥

व्यपदेशश्च तद्वत् ॥ ७ ॥

उग्राणि ह वा एतानि हवींषि अमावास्यायां सम्भ्रियन्ते, आग्नेयं प्रथममैन्द्रे उत्तरे इति समुच्चयं दर्शयति आग्नेयादीनां गुणत्वं विकल्पः स्यात् । तत्राग्नेयं प्रथमम्, ऐन्द्रे उत्तरे द्वे इति व्यपदेशो नावकल्पेत । विकल्पे सम्भारपौर्वापर्य्यानुपपत्तिरिति ॥ ७ ॥

लिङ्गदर्शनाच्च ॥ ८ ॥

लिङ्गं च दृश्यते, चतुर्दश पौर्णमास्यामाहुतयो हूयन्ते, त्रयोदशामावा-

स्यायामिति॥८॥ यु०॥ आघाराद्याग्नेयादीनामङ्गाङ्गिभावाधिकरणम्॥३॥

पौर्णमासीवदुपांशुयाजः स्यात् ॥ ९ ॥

जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशौ उपांशुयाजमन्तरा यजतीति, विष्णुरुपांशु यष्टव्योऽजामित्वाय, प्रजापतिरुपांशु यष्टव्योऽजामित्वाय, अग्नीषोमावुपांशु यष्टव्यावजामित्वायेति। तत्र सन्देहः। उपांशुयाजमन्तरा यजतीति किं विष्ण्वादिगुणकानां प्रकृतानां यागानां समुदायस्य वाचकः, अथ वा अपूर्वस्य यागस्येति । तत उच्यते। पौर्णमासीवदुपांशुयाजो भवितुमर्हति। कुतः। नामसम्बन्धात्। नामसम्बद्धो हि विशिष्टो यागः श्रूयते, उपांशुयाजसंज्ञकः। न च द्रव्यदेवते रूपं, प्रकृताश्चोपांशुगुणका यागा विद्यन्ते । तस्मात् समुदायशब्द इति॥ ननूपांशुगुणकं यागान्तरम् उपांशुत्वेन रूपेण रूपवद् विधीयते। न एवञ्जातीयकः शब्द उपांशुविशिष्टं यागं शक्नोति वक्तुम्। उपांशुयाग इति हि तस्य वक्ता। चजोः कुघिण्ण्यतोरिति कुत्वेन भवितव्यम्। अव्युत्पन्नः पुनरुपांशुयाजशब्दः। तस्मान्न रूपवद् यागान्तरम्। अथापि नामसंयुक्तं यजतिसामान्यमेव, तथाप्यनुपदिष्टदेवताद्रव्यरूपं न यागान्तरं प्रतिपद्येमहि। नन्वेवं सति प्रकृतानामप्यवाचकः प्राप्नोति । मा भूदुपांशुयाजशब्दः, यजतिशब्दो भविष्यति। तथा सति उपांशुयाजशब्देऽप्यनुवादत्वादनाज्ञस्येऽपि न दोषः॥ ९॥ ॥ पूर्वपक्षः ॥

चोदना वाऽप्रकृतत्वात् ॥ १० ॥

कर्मान्तरस्य वाचकः स्यात्, उपांशुयाजं यजतीति । कुतः। प्रकृतानां यागानामभावात्। न चेत् प्रकृता विद्यन्ते, कस्य समुदायं वक्ष्यति। ननु इदानीमेवोक्तं विष्ण्वादिगुणकाः प्रकृता यागा विद्यन्ते इति। न विद्यन्ते। न हि ते विधयो, विष्णुरुपांशु यष्टव्य इत्येवमादयः। अर्थवादा हि ते। कथम्। अस्मिन् वाक्ये विध्यन्तरस्य भावात्। उपांशुयाजमन्तरा यजतीत्येतदेतस्मिन् वाक्ये विधीयते। यदीमेऽपि विधीयेरन्, भिद्यते तर्हि वाक्यम्। अपि च यागस्य विष्ण्वादीनाञ्च सम्बन्धोऽत्र गम्यते वाक्ये, न च यागस्य विधानम्। ननु चोपांशुयाजमन्तरा यजतीत्यत्राप्यन्तरालसम्बन्धोऽवगम्यते। बाढम्। स तु विधीयते उपांशुत्वादिसम्बन्धः। एकं हीदं वाक्यम-

नेकं विधातुमर्हति । कथम् । जामि वा एतद् यज्ञस्य क्रियते इत्येवमुपक्रम्य तद्वाक्यम्, अजामित्वायेत्येवमन्तम् । तस्य मध्ये समाम्नातं विष्ण्वादिवाक्यम् । तेन सम्बध्यमानं न वाक्यान्तरं भवितुमर्हति । तस्माद्, विष्णुरुपांशु यष्टव्य इत्येवमादयो न विधयः, किं तर्ह्यर्थवादाः । कः पुनरर्थवादः । आग्नेयाग्नीषोमीययोर्निरन्तरं क्रियमाणयोर्जामितादोष उक्तः । तं भिषजितुम्, उपांशुयाजमन्तरा यजतीति विहितम् । कथं तेन भिषजिष्यते । तस्मिन् क्रियमाणे ज्ञायत एव, यथा विष्णुर्यष्टव्यः प्रजापतिरग्नीषोमौ चेति । ततश्च व्यवधानादजामिताऽवगम्यत एव । तेनाजामितार्थवादं वक्ष्यामीति विष्ण्वादिसम्बन्धोऽनूद्यते, न त्वन्तरालसम्बन्धस्यान्यत् प्रयोजनमस्त्यतो विधानात् । कथं विष्ण्वादयो यष्टव्या इत्येतदवगम्यते । यष्टव्यान् अयष्टव्यान् वा विष्ण्वादीनुपांशुयाजाभिष्टवाय सङ्कीर्त्तयतीति गम्यते ॥

तत्र केचित्तावदाहुः, प्राप्ता एवेति । कुतः । शाखान्तरे विधानादिति । यद्यप्यप्राप्तिस्तथाप्युपांशुत्वासामान्यात् प्रजापतिर्देवता विष्णुश्चेत्यनुवादावेव । उपांशुधर्माणौ हि विष्णुप्रजापती । तस्माद् यत्किञ्चित् प्राजापत्यं यज्ञे क्रियते, तद् उपांश्वेव क्रियते इत्येवमादिसङ्कीर्त्तनान्मन्त्रसमाम्नानाच्च विष्णुमप्राप्तमपि प्राप्तमिव वदेत् । अग्नीषोमयोस्तु विधायकमुदाह्रियते, एतावब्रूयातामग्नीषोमावाज्यस्यैव तावुपांशु पौर्णमास्यां यजन्निति । तस्माद्यागान्तरम् ॥१०॥ सि०॥

गुणोपबन्धात् ॥ ११ ॥

यदुच्यते, न ज्ञायते, कतमोऽसावुपांशुयाजसंज्ञको याग इति । यस्यायं गुण उपबद्धः । उपांशु पौर्णमास्यां यजन्निति । तस्मान्न दोषः ॥ ११ ॥ ॥ आशङ्कानिरासः ॥

प्राये वचनाच्च ॥ १२ ॥

प्रधानकर्मप्राये वचनं, प्रधानकर्मतामुपोद्बलयति । यथा, अग्र्यप्राये लिखितं दृष्ट्वा भवेदयमग्र्य इति मतिः । तस्मान्न समुदायशब्दः इति ॥ १२ ॥ ॥ युक्तिः ॥ उपांशुयाजापूर्वताधिकरणम् ॥ ४ ॥

आघाराग्निहोत्रमरूपत्वात् ॥ १३ ॥

आघारमाघारयीति श्रूयते । तथा इमान्यपराणि, ऊर्ध्वमाघारयति, सन्ततमाघारयति, ऋजुमाघारयतीत्येवमादि । इदञ्च, अग्नि-

होत्रं जुहोति, तथा, दध्ना जुहोति, पयसा जुहोतीत्येवमादि । तत्र सन्देहः । किम् ऊर्ध्वमाघारयति, दध्ना जुहोतीत्येवमादिभिराघारा होमाश्च विहिताः। तेषाम् आघारमाघारयति, अग्निहोत्रं जुहोतीत्येतौ समुदायानुवादौ, उतैतावेवापूर्वयोराघारहोमयोर्विधातारावीति । किं तावत् प्राप्तम् । नापूर्वयोर्विधी इति । कुतः । अरूपत्वात् । न ह्येतयोः पूर्वेभ्यो होमाघारेभ्यो विशिष्टं रूपमस्ति । यतः कर्मान्तरमध्यवसेयम् । अतः प्रकृतत्वात् प्रकृतानुवादौ ॥ १३ ॥ ॥ पूर्वपक्षः ॥

संज्ञोपबन्धात् ॥ १४ ॥

संज्ञोपबन्धश्च भवति । अग्निहोत्रं नाम होमं जुहोतीति, आघारसंज्ञकं कर्म करोतीति संज्ञाविशिष्टावाघारहोमौ विधीयेते । न च विज्ञायेते, कोऽसावाघारो नाम कर्मविशेषः, कश्चाग्निहोत्रसंज्ञक इति। ननु विज्ञायते, आघारणमाघारः, हवनं होमः । यद्याघारणसामान्यं होमसामान्यञ्च विधीयते, विज्ञातपूर्वौ तर्ह्याघारहोमौ । तेनानुवादौ । अथाव्युत्पन्ना उभयोरपि संज्ञा, तथापि नाघाराग्निहोत्रसामान्यमुच्येत । विशेषाश्रयत्वात् संज्ञायाः । न च स विशेषो गम्यते इत्यपूर्वावाघारहोमविधीनामवकल्प्येते । अपिच कथं क्रिया साधनशब्देनोच्येत । ईप्सिततमं हि यत् साधनं तद् द्वितीयान्तेनोच्यते। क्रिया तिङन्तेन । अनुवादपक्षे क्रियाणां समुदायोऽर्थान्तरं तदीप्सिततमं साधनं भविष्यति ॥ १४ ॥

अप्रकृतत्वाच्च ॥ १५ ॥

न च प्रकृतमपि द्रव्यदेवतमाघारे विद्यते । येन रूपवान् स्यात् । तस्मादेतावपि समुदायशब्दाविति ॥ १५ ॥ ॥ युक्तिः ॥

चोदना वा शब्दार्थस्य प्रयोगभूतत्वात्, तत्सन्निधेर्गुणार्थेन पुनःश्रुतिः ॥ १६ ॥

नचैतदस्ति, समुदायशब्दाविति । कर्मान्तरचोदने स्याताम् । कुतः । शब्दार्थस्य प्रयोगभूतत्वात् । आघारयति, जुहोतीति । होमाघारौ प्रयोक्तव्याविति शब्दार्थः । तेन कर्मान्तरे विधीयेते इत्यवगच्छामः । आघाराग्निहोत्रशब्दौ च हवनाघारणसामान्यवाचिनौ प्रज्ञातौ । अतो नाविज्ञातार्थौ । तेन रूपवन्तौ सन्तौ विधीयेते ॥

यदुक्तम् । ऊर्ध्वमाघारयति, दध्ना जुहोति इत्येवमादिभिर्विहि-

त्वादनुवादाविति । नैतदेवम् । न ह्येते होमाघारौ विधातुं शक्नुवन्ति । ऊर्ध्वमाघारयति, दध्ना जुहोतीति च । नैतदुक्तं भवति– आघारः कर्त्तव्यः, होमः कर्त्तव्य इति, किं तर्हि ऊर्ध्वमाघारसम्बन्धः कर्त्तव्यः, दधिहोमसम्बन्धः कर्त्तव्य इति । तस्मादप्राप्तत्वान्नानुवादौ । ननु सम्बन्धे विहिते अर्थाद्धोमाघारौ भविष्यतः । नैतदेवम् । अस्मिन् हि सति विधानेन सम्बन्धः । तस्मान्नार्थादापद्येते होमाघारौ, अतोऽपूर्वौ विधीयेते इति ब्रूमः ॥

नन्वाघारयति, जुहोतीति होमाघारगतो व्यापारः श्रूयते, न दध्यूर्ध्वतादिसम्बन्धः । सत्यं न श्रूयते । तत्सन्निधेर्गुणार्थेन व्यापारश्रवणमवकल्पिष्यते । ननु पदार्थान्तरगतं व्यापारं श्रुतिर्न शक्नोति वदितुम् । सत्यमेवमेतत्, स्वपदार्थगतं वक्ष्यति, तं तु स्वपदार्थं गुणशब्दो विशेक्ष्यति, स एव विशिष्टः प्रत्येष्यते इति भवेदेतद् विशिष्यात् स्वपदार्थं गुणशब्दो, न त्वेष गुणतो व्यापारः प्रतीयेत । तत्र किं भविष्यति । अव्याप्रियमाणेऽपि गुणे शब्दार्थोऽवक्लृप्तो भविष्यति । गुणवचनसान्निधिरिदानीं किमर्थः । अनर्थकस्तु । कथं पुनरनर्थको नाम वेदो भवितुमर्हति । सत्यर्थे नानर्थकः, असति त्वर्थे किमन्यदुच्येत । एवं तर्हि वाक्याद्भविष्यति, श्रुत्यर्थे सति न वाक्यार्थोऽवकल्प्यते । सत्यमेवमेतत् । अविवक्षिते त्ववकल्पिष्यते । कथमविवक्षा । गुणवचनस्य अप्रमादपाठात् । स्वपदार्थस्य च शब्दान्तरेण विहितत्वात् । तस्मात् सिद्धं, गुणार्थेन दध्ना जुहोतीत्येवमादीनां पुनःश्रुतिः । जुहोतेरुच्चारणं चानुवादो गुणसम्बन्धार्थः । यदि जुहोतीत्यनुवादः, केनेदानीं गुणो विधीयते । दधिशब्देनेति मा वोचत । नन्विदानीमेव वाक्याद् गुणव्यापारो गम्यते इत्युक्तम् । सत्यमेवमेतत् । अविधीयमानस्तु कुतो गम्यते इति । प्रमाणमस्य नावगम्येत । असति प्रमाणे व्यामोहः स्यात् । एवं तर्हि विधायकौ जुहोत्याघारयतिशब्दौ । कस्य तर्ह्यनुवादः । धात्वर्थस्येति ब्रूमः । यदि विधायकौ, पूर्वमेव विहिते स्वार्थे, किमर्थं पुनरुच्चार्येते । वाक्यार्थो यस्तं विधातुमित्यदोषः । तस्मात् कर्मान्तरचोदने । यदुक्तं, नास्त्याघारे प्रकृतं द्रव्यदेवतमिति । किमेवं सति द्रव्यदेवतेन, यदा प्रसिद्धार्थाभिधानान्निर्ज्ञातमेवास्य रूपम् । अपि च, चतुर्गृहीतं वा एतदभूत्तस्याघारमाघार्येत्याज्यमस्य द्रव्यं, मान्त्रवर्णिको देवताविधिः । इन्द्र ऊर्ध्वोऽध्वरो दिवि स्पृशतु

महतो यक्षो यक्षपते इन्द्रवान् स्वाहेत्याघारमाघारयतीति । एवमसाविन्द्रवान् यद्यस्य इन्द्रो देवता। तद् यदि देवताभिधानमेतदाघारस्य, ततोऽनेनाघारः कृतो भवति । तस्मात् कर्म्मान्तरे, न समुदायशब्दान्निति सिद्धम् ॥ १६ ॥ ॥ आ० नि० ॥ आघाराद्यपूर्वताधिकरणम् ॥५॥

द्रव्यसंयोगाच्चोदना पशुसोमयोः प्रकरणे ह्यनर्थको द्रव्यसंयोगो न हि तस्य गुणार्थेन ॥ १७ ॥

ज्योतिष्टोमे श्रूयते, यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति । तत्रेदमामनन्ति । हृदयस्याग्रेऽवद्यत्यथ जिह्वायाः, अथ वक्षस इति । यथा सोमेन यजेतेति । तत्राप्यैन्द्रवायवं गृह्णाति, मैत्रावरुणं गृह्णाति, आश्विनं गृह्णातीत्येवमादि । तत्र संशयः, किमवद्यति-गृह्णाति-चोदितानां कर्म्मणामेवालभतियजती समुदायस्यानुवदितारौ, अथापूर्वयोः कर्म्मणोर्विधाताराविति । किं तावत् प्राप्तम् । समुदायस्येति । कुतः । ये इमे आलभतियजतिभ्यां कर्म्मणी विधीयेयातामिति चिन्त्यते, पूर्वमेव ते अवद्यति-गृह्णातिभ्यामवगमिते । न चावगमितोऽर्थो विधीयते । हृदयादींस्तु पशुशब्देनानुवदति, सोमशब्देन च रसम् । तस्मात् सोमेन यजेतेत्यनुवादो यजतिः । यजेत स्वर्गकाम इति फलसम्बन्धार्थः । पशुमालभेतेति चालभतिरग्नीषोमसम्बन्धार्थः । अपि च, दर्शितानध्वर्युः प्रातःसवने ग्रहान् गृह्णातीति समुच्चयो दृश्यते । तथा आश्विनो दशमो गृह्यते, तृतीयो हूयते इति च क्रमः । यदि चापूर्वौ यागौ विधीयेते, तत्र ऐन्द्रवायवादिभिर्देवता विधीयेरन् । यथा, खादिरे बध्नाति पालाशे बध्नाति रोहितके बध्नातीति । तत्र क्रमसमुच्चयदर्शनेनोपपद्येयाताम् । अथ पुनरस्मिन् समुदायवचने, यजतौ सम्यगेतदवक्लृप्तं भवति । तस्मात् समुदायानुवादौ ॥ एवं प्राप्ते ब्रूमः ॥ अपूर्वयोः कर्म्मणोर्विधानचोदने पशुसोमयोः । कुतः । सोमशब्दः क्षीरिण्यां लतायां प्रसिद्धो, न रसे, आकृतिवचनो हि सोमशब्दो न व्यक्तिवचनः । तथा शृङ्गिणि पुच्छवति लोमशे चतुष्पदि द्रव्यविशेषे पशुशब्दमाकृतिवचनमुपचरन्ति । न चैवमाकृतिकद्रव्याः प्रकृता यागा विद्यन्ते । येषामिमौ समुदायस्यानुवदितारौ भवेयाताम् । ननु पशुविकारो हृदयादिः पशुशब्देनाग्नीषोमसम्बन्धार्थमनूद्यते । नैतदेवम् । पशुरग्नीषोमीयो

भवतीत्येतावदुच्यते, नायं प्रकृतो हृदयादिः पशुरिति । तत्र यदि, लौकिकस्य पशोर्ग्रहणं ततो मुख्यः पशुशब्दः । यदि हृदयादेः, ततो जघन्यो विकारसम्बन्धेन । तथा, सोमशब्दोऽपि विकारसम्बन्धेनानुवादः स्यात् । तस्मादपूर्वे कर्म्मणी विधीयेयातां, नानुवादौ । अथ इन्द्रवायवादिषु प्रकृतेषु यागेषु लता विधीयेतेति । उच्यते । न सा शक्या वाक्येन ऐन्द्रवायवी ज्ञातुम् । श्रुत्या हि रस ऐन्द्रवायवः । तस्माद् द्रव्यसंयोगवचनः प्रकृतेषु यागेष्वपि सत्सु विधातुमनुवदितुं वा न शक्नुवन्ननर्थकः स्यात् । तस्मादपूर्वकर्म्मणी विधीयेयातां, न प्रकृतानामनुवादाविति ॥ १७ ॥ ॥ सिद्धान्तः ॥

अचोदकाश्च संस्काराः ॥ १८ ॥

एवं तावत् प्रकृतेषु सत्स्वपि नानुवादावित्युक्तम् । अथेदानीं, प्रकृता एव यागा न सन्तीत्युच्यते । कुतः । अचोदकाः संस्काराः । न चैन्द्रवायवादिभिर्यागा विधीयन्ते । तेन ग्रहणमुपकल्पनमात्रं दृष्टार्थम्, उपकल्प्यमाने तु देवतासङ्कीर्त्तनमदृष्टाय । अत ऐन्द्रवायवं गृह्णातीतीन्द्रवायुभ्यां सङ्कल्पयतीत्येतावदुक्तं भवति । तत्र यागमन्तरेण सङ्कल्पयतीत्येतन्न युज्यते इति यागः कल्प्येत । स एवाऽऽम्नातो यागो यस्मिन् सति सङ्कल्पोऽवकल्प्येत । तस्मान्न, ऐन्द्रवायवं गृह्णातीत्येवमादिभिर्यागा विधीयेरन्, प्रकृतानां यागानामभावान्न समुदायशब्दो यजतिः । तथालभतिशब्द इति ॥ १८ ॥ ॥ आ० नि०

तद्भेदात् कर्मणोऽभ्यासो द्रव्यपृथक्त्वादनर्थकं हि स्याद्भेदो द्रव्यगुणीभावात् ॥ १९ ॥

पशौ वृत्ता कथा दशमे पुनरुद्भविष्यति । सोम इदानीं वर्त्तते । कथं क्रमसमुच्चयाविति । इन्द्रवाय्वाद्या देवता नैवं श्रूयन्ते । इन्द्रवायुभ्यां यागो निर्वर्त्तयितव्यः, मित्रावरुणाभ्यां यागो निर्वर्त्तयितव्य इति । यद्येवमश्रोष्यन्त, यागं प्रति देवता व्यकल्पिष्यन्त । केवलया हि देवतया तदा यागो निर्वर्त्यते इति विहितमभविष्यत् । अथ पुनरिमा अदृष्टार्थं गृह्णातिसंस्कारं प्रति देवता विधीयन्ते । तत्रेन्द्रवायुसङ्कल्पादन्यो मित्रावरुणसङ्कल्पः । तेन गृह्णाती तत्कृतादृष्टादृष्टान्तरमुत्पादयति । एवमपरेष्वपि ग्रहणेषु । तस्मात् समुच्चयः । ग्रहणन्तु नियतपरिमाणपूर्ध्वपात्रेषु प्रादेशमात्रेषु नियतपरिमाणेषू-

दृकक्लशेषु संस्कृतस्य दशमुष्टिपरिमितस्य कृत्स्नस्य सोमस्य नावकल्पते । यद्यपि चावकल्पेत तथापि नित्यवद्विहितानां देवतानां विकल्पपक्षे तावत्प्रयोगवचनो मा बाधीति अवयवग्रहणमेव न्याय्यम् । कृत्स्नग्रहणं हि तदेवेन्द्रवायुभ्यां सङ्कल्पितं, तदेव मित्रावरुणाभ्यामिति नावकल्पेत । तस्मात् कल्पनभेदात् पृथगवस्थितः सोमो नानादेवतत्वादेव नैकयेन शक्यः कर्तुम् । न चासति देवतायागे देवताभ्यः शक्यते सङ्कल्पयितुम् । तस्मादवश्यं यथा सङ्कल्पिता देवता यष्टव्याः । तासु चेज्यमानासु ज्योतिष्टोमेन यजेतेति श्रुतो यागो निर्वृत्त एव भवति । न देवतान्तरमाकाङ्क्षति । कृत्स्नेन च दशमुष्टिना सोमेन यागः श्रुतः, सोऽसति अभ्यासे नावकल्पत इति अर्थात् स गुणो भविष्यतीत्यभ्यासतव्यो यागः । न ह्यनभ्यस्तः सर्वाभिर्देवताभिः सर्वेण च सोमेन सम्पन्नो भविष्यति।तस्मिँश्चाभ्यस्यमाने क्रमसमुच्चयौ युक्तावेव भवतः । तस्मात्तयोर्दर्शनं युज्यते एवेति ॥ १९ ॥ ॥ उपसंहारः॥

संस्कारस्तु न भिद्येत, परार्थत्वाद् द्रव्यस्य गुणभूतत्वात् ॥ २० ॥

यदप्युच्यते– यथा खादिरे बध्नाति, पालाशे बध्नातीति खादिरादयः संस्कारं विकल्पन्ते तद्वद्देवता विकल्पयिष्यन्ते इति । तच्च नैवं युक्तम् । तत्र संस्कारमभिनिर्वर्त्तयितुं खादिरादयः श्रूयन्ते । यदि च इन्द्रवाय्वाद्या अपि ग्रहदेवता यागमभिनिर्वर्त्तयितुं श्रूयेरँस्ततोऽत्रापि विकल्पः स्यात् । न त्वेता यागे श्रुताः । तस्मात् समुच्चीयेरन् ॥ ॥ २० ॥ आशङ्कानिरासः ॥ पशुसोमापूर्वताधिकरणम् ॥ ६ ॥

पृथक्त्वनिवेशात् संख्यया कर्मभेदः स्यात् ॥ २१ ॥

अस्ति वाजपेयः, वाजपेयेन स्वाराज्यकामो यजेतेति । तत्र प्राजापत्याः पशवः । सप्तदश प्राजापत्यान् पशूनालभते सप्तदशो वै प्रजापतिः प्रजापतेराप्त्यै श्यामास्तूपरा एकरूपा भवन्ति, एवमेव हि प्रजापतिः समृद्ध्यै । तत्र संदिह्यते । किं सप्तदशैतानि कर्माणि, अथ सप्तदशपशुगुणकमेकं कर्मेति । किं तावत् प्राप्तम् । एकं कर्मेति । कुतः । प्रजापतये सप्तदश पशवः सङ्कल्प्यन्ते, किमेकं यागमभिनिर्वर्त्तयितुम् उत बहूनिति संशये, एकमिति न्याय्यम् । यो हि बहून् यागान् कल्पयति, कल्पयत्यसावेकम् । तत्रैकस्मिन्नेव परिक्लृप्ते सप्तदशानामेव पशूनां परिकल्पनमुपपन्नं भवति । केन च द्वितीयादी-

षु यागानवकल्पयेम। एवमल्पीयस्यदृष्टानुमानप्रसङ्गकल्पना भवति। तस्मादेको यागः सप्तदशभिः पशुभिर्निर्वर्त्त्यते॥

एवं प्राप्ते ब्रूमः॥ संख्यया कर्म्मभेदो भवेत्। पृथक्त्वे पशूनां सति सप्तदशसंख्या निविशेत। तच्च पशूनां पृथक्त्वं बहुषु यागेष्ववकल्पते। नैकस्मिन्। कथम्। एकादशभिरवदानैरसौ यागो निर्वर्त्तयितव्य इत्येवं चोदकः प्रतिदिशति। तानि चैकस्मादेव पशोरवाप्यन्ते। तत्र द्वितीयादेरालम्भो नावदानसम्पादनाय भवितुमर्हति। एकमालभ्यमानमन्वालभ्येरन्नदृष्टार्थायापरे। तथा सत्यतदर्थत्वान्न ते प्राजापत्या भवेयुः। तत्र प्राजापत्यानिति श्रवणमुपरुध्येत। तेनैकस्मिन् पशौ पृथक्त्वे निवेशिनी सप्तदशसंख्या नावकल्प्येत। बहुषु यागेषु बहुभिरेवावदानगणैः प्रयोजनम्। तेन सप्तदशभ्यो यागेभ्यः सप्तदश पशूनुपाददीरन् तत्र संख्यासामञ्जस्यं भविष्यति। तस्मात् सप्तदश यागाः॥ नन्वेकस्मिन्नपि यागे सप्तदशभिरवदानगणैर्यक्ष्यते वचनात्। नैतदेवम्। पशुषु हिंसासंख्या श्रूयते, नावदानगणेषु। अवदानानि हवींषि यागसाधनानि, न पश्वाकृतिः। सा ह्यवदानप्रकृतिद्रव्यं विशिंषन्ती प्रकृतौ प्रधानस्योपकृतवतीति विकृतावप्यवदानप्रकृतिद्रव्यं विशिंषन्ती प्रधानस्योपकरिष्यति तत्र च पशोः सप्तदशसंख्या विकारिका, नावदानगणस्य। तस्मादेकस्मै अवदानगणायैकः पशुरालब्धव्यः प्राप्नोति। तत्र सप्तदशसंख्या नोपपद्यते एवमेवावकल्पिष्यते। यदि शृङ्गाभिप्राया वर्णाभिप्राया रूपाभिप्राया वा अभविष्यन् सप्तदशपशवः श्वेत कृष्णो रोहित इत्येवमादयः तेषामन्यतमो गृह्यते इति। अथवा तूपराः शृङ्गिण एकशृङ्गा इत्येवमादयस्तेषामन्यतम इति। ते हि श्यामास्तूपरा एकरूपाः श्रूयन्ते। तदेषु बहुषु यागेषु उपपद्यते, नैकस्मिन्। तस्मात् सप्तदश यागा इति। प्रयोजनमेकस्मिन्निष्टे दुष्टे कृत्स्नः पशुगण आवर्त्तेत, एकमालभ्यमानमन्वालभेरन् पूर्वपक्षे अदृष्टार्थम्। सिद्धान्ते एक एव पशुरावर्त्तते। न हि कर्म्मभेदे पशु पश्वन्तरमाकाङ्क्षतीति॥ २१॥

संख्याकृतकर्मभेदाधिकरणम्॥ ७॥

संज्ञा चोत्पत्तिसंयोगात्॥ २२॥

अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरिति। अत्र संदेहः। किमेभिर्नामधेयैः प्रकृतं ज्योतिष्टोमं सङ्कीर्त्य तत्र सहस्र-

दक्षिणादिर्गुणो विधीयते, अथ वा वक्ष्यमाणविशेषाणि कर्मान्तराण्युपदिश्यन्ते इति । किं प्राप्तम् । प्रकरणानुग्रहात् प्रकृतस्य गुणविधानमिति । ननु वाक्यसामर्थ्याज्ज्योतिरादीनामेते गुणा विधायिष्यन्ते । नैष दोषः । ज्योतिष्टोमस्यैवैतानि वाचकानि । ज्योतिरिति ज्योतिष्टोमस्य प्रतीकमुपादीयते, विश्वज्योतिरिति । त्रिवृदादीन्यस्य ज्योतींषि वाक्यशेषसङ्कीर्त्तितानि । तानि सर्वाण्यस्य । तेनाऽसौ विश्वज्योतिः सर्वज्योतिश्च ज्योतिष्टोम इत्येवं प्राप्तम् ॥ एवं प्राप्ते ब्रूमः ॥ संज्ञा हि निस्रो भेदिकाः तेषां ज्योतिराद्याः । उत्पत्तिवाक्ये ह्येताः श्रूयन्ते । तासामिमाः पुनः श्रुतयः । तस्मादथैष ज्योतिरित्यपूर्वस्य कर्म्मणो विधायकं वाक्यम् । अनुवादे हि सति अप्रवृत्तिविशेषकरमनर्थकं स्यात् । प्रकृतस्य च गुणविधाने विकल्पो भवेत् । तत्र पक्षे बाधः । न च ज्योतिरादयो ज्योतिष्टोमस्य वदितारः । समुदायान्तराणि ह्येतानि । न चावयवेन समानेन समुदायान्तरं तदर्थमेव भवति । यथा शालाशब्दो गृहवचनः । तत्र न शालाशब्दसामान्यान्मालाशब्दादयोऽपि गृहवचना भवन्ति । यत्तु ज्योतिष्टोमस्य ज्योतिरिति प्रतीकमुपादीयते इति । प्रकरणसामर्थ्याद्धि तत्र ज्योतिष्टोमशब्देन परोक्षेणैकवाक्यता भवेत् । सा प्रत्यक्षं ज्योतिःशब्देन सहैकवाक्यतां बाधेत । न चैतन्न्याय्यम् । वाक्यं हि प्रकरणाद् बलीयः । अथ पुनरयं द्योतनार्थत्वाद्वा ज्योतिष्मत्वाद्वा कर्मान्तरं वक्ष्यति । यश्च त्रिवृदादीनि ज्योतींषि तेषां साकल्यवचनो, विश्वज्योतिः सर्वज्योतिरिति चेत्रेति ब्रूमः ॥ न हि त्रिवृदादिषु ज्योतिःशब्दः प्रसिद्धः । एवं ब्रुवन् प्रसिद्धिं बाधेत । यत्तु वाक्यशेषाज्ज्योतिःशब्दस्त्रिवृदादिवचन इति । तस्मिन्नेव वाक्ये स तत्र प्रयुक्त इति गम्यते प्रमाणान्तरेण, न शब्देन । यत्र तु तत्प्रमाणान्तरं नास्ति, न तत्र वर्त्तितुमर्हति । यथा सिंहो देवदत्त इति सिंहशब्दो देवदत्तवचनः प्रमाणान्तरेण, न तु सिंहमालभेतेति यत्र, तत्र तु तत् प्रमाणान्तरं नास्ति । तस्मान्न विश्वज्योतिः सर्वज्योतिरिति च ज्योतिष्टोमस्य वदितारौ । न चेज्ज्योतिष्टोम उच्यते, सर्वाणि कर्मान्तराणि ॥ २२ ॥ ॥ संज्ञाकृतकर्मभेदाधिकरणम् ॥ ८ ॥

गुणश्चापूर्वसंयोगे वाक्ययोः समत्वात् ॥ २३ ॥

चातुर्मास्येषु वैश्वदेवे समामनन्ति । तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति । तत्र सन्दिह्यते, किमामिक्षागुणके कर्म्मणि वाजिनं गुणविधिरुत तस्माद् वाजिनगुणकं कर्मान्तरम् । किं प्राप्तम् । गुणविधिरिति । कुतः ? । वाजेनान्नेन आमिक्षया वाजिनो विश्वेदेवास्ताननूद्य वाजिनं विधीयते तेनोभयं वैश्वदेवम्, आमिक्षा वाजिनं च । तस्मिन्नेव च कर्म्मणि वाजिनगुणविधिः । यथा अग्निहोत्रं जुहोतीत्युक्ते, दध्ना जुहोति, पयसा जुहोतीति ॥ एवं प्राप्ते ब्रूमः ॥ गुणश्चाप्रकृतेन देवताभिधानेन सम्बध्यमानः कर्मान्तरं विदध्यात् । समे हि तदैते वाक्ये भवतः । उभे अपि अपूर्वयोर्यागयोर्विधातृणी । कथं पुनरपूर्वदेवताभिधानं, यदेदानीमेवोक्तं, विश्वेषां देवानामनुवादो वाजिनामिति । तदुच्यते । इह विश्वेषां देवानां देवतात्वं क्वचिच्छ्रुत्या, क्वचिद् वाक्येन । तद्धितनिर्देशे श्रुत्या, चतुर्थीनिर्देशे वाक्येन । यत्र श्रुत्या देवतात्वं, तत्रामिक्षया सहैकवाक्यत्वम् । यत्र चतुर्थी, तत्र वाजिनेन । तत्रैषामेकत्र श्रुत्या देवतात्वम् । वाक्येन द्रव्यविशेषसम्बन्धः । एकत्रोभयमपि वाक्येन । तदिह देवतात्वं प्रति श्रुतिवाक्ययोर्विरोधः । विरोधे च श्रुतिर्बलीयसी इत्यामिक्षावाक्ये देवतात्वं विश्वेषां देवानां, न वाजिनवाक्ये इत्यध्यवसीयते । तेनावगम्यते । अप्रकृतेन देवतापदेनास्य सम्बन्ध इति । तस्मात् कर्म्मान्तरमिति ॥ २३ ॥ ॥ देवताभेदकृतकर्मभेदाधिकरणम् ॥ ९ ॥

अथ यदुपवर्णितं, यथाऽग्निहोत्रं जुहोतीत्युक्ते दध्ना जुहोति इत्येवमादयो गुणविधय इति । तत्रोच्यते ।

अगुणे तु कर्मशब्दे गुणस्तत्र प्रतीयेत ॥ २४ ॥

युक्तं यत् तत्र गुणविधानं, न तत्राप्रकृतेन केनचिद् गुणेन सम्बन्धः । प्रकृतेन त्वस्ति यागेन । तस्मादनुपवर्णनमेतत् ॥

अथ वा अधिकरणान्तरम् । दध्ना जुहोतीत्येवमादीनि कर्म्मान्तराणि, विकल्पपरिजिहीर्षयाऽवकल्प्यन्ते । तदेव तु कर्म्म जुहोतीति शब्दादवगम्यते, न कर्मान्तरम् । तस्मात् तत्रैव गुणविधिः, वचनाद्विकल्पश्चेति सिद्धम् ॥ २४ ॥ ॥ पूर्वाधिकरणशङ्कानिरासः ॥ यद्वा द्रव्यविशेषानुक्तिकृतकर्मैक्याधिकरणम् ॥ १० ॥

फलश्रुतेस्तु कर्म स्यात् फलस्य कर्मयोगित्वात् ॥२८॥

अग्निहोत्रं प्रकृत्य समामनन्ति, दध्नेन्द्रियकामस्य जुहुयादित्येवमादि । तत्र संशयः । किमग्निहोत्रहोमाद्धोमान्तरं दध्यादिहोम उत दध्यादेर्गुणात् फलमिति । किं प्राप्तम् । होमान्तरमिति । कुतः । फलमिह श्रूयते । तच्च कर्मणो न्याय्यम् ॥ किं दृष्टं हि कर्मणः फलम् । कृष्यादितो व्रीह्यादि । नेति ब्रूमः । न ह्येतद् दृष्टेनानेन सिद्ध्यति । यदि दर्शनं हेतुः फलज्ञाने, कृष्यादौ पदार्थे तद्दर्शनं, न होमे । अथ कृषौ दृष्टमन्यत्रापि भवति । द्रव्यादपि प्रसज्ज्यते । अथ कृषिसदृशाद् भवतीत्युच्यते कृषिसदृशो होमः, क्रियात्वाद्, न द्रव्यम्, असदृशं हि तदिति । होमोऽप्यसदृशः । मन्त्रदेवतादिसाधनत्वाद्धोमस्य लाङ्गलादिसाधनत्वाच्च कृषेः । त्यागात्मकत्वाद्धोमस्य । पाटनात्मकत्वाच्च कृषेः । अथ किञ्चित् सादृश्यं गृह्यते । द्रव्यस्यापि सदनित्यमित्येवमादि किञ्चित् सादृश्यमस्ति । अथ द्रव्यादन्यत् सदृशतरमस्तीति कृत्वा न द्रव्यं सदृशमित्युच्यते । होमादप्यन्यत् कृषेः सदृशतरमस्ति दृष्टार्थमिति कृत्वा होमोऽप्यसदृशः स्यात् । नचैतत्सिद्धं, यत् क्वचिद् दृश्यते, तदन्यस्मिन् सदृशमात्रे अदृष्टमपि भवितुमर्हतीति । यद्धि यस्य कारणभूतं दृष्टं सिद्धं, तच्चेत् साध्येऽपि, कारणभूतमित्यवगम्यते । भवति तत्तस्य साधकम् । यन्न ज्ञायते कारणभूतमिति न तत् सदृशमपि साधकम् । तस्मात् सदृशमपि साधकमसाधकं चेति परीक्षितव्यमिति । अथ यत् कर्म तत् फलवद् दृष्टम् । होमोऽपि कर्म्म । तेनापि फलवता भवितव्यमिति । उपरते कर्म्मणि द्रव्याणां तत्संयोगानाञ्च द्रव्यान्तरं फलं दृष्टमिति द्रव्यमपि फलवत् स्यात् । अपिच कृषेर्नादृष्टमिति तत्सादृश्याद्धोमादपि नादृष्टं भवेत् । कृषिसादृश्याद्वा व्रीहिरेव भवेद्, नेन्द्रियम् । तस्मान्नैवञ्जातीयकेष्वेतद् भवति दृष्टाददृष्टसिद्धिरिति । कथं तर्हि होमान्न्याय्यं फलमिति । उच्यते । शब्देनावगम्यते तत्फलं, यतः फलमिति शब्द आह । ततो न्याय्यं होमाच्च फलमिति श्रुत्या शब्देन गम्यते, दध्नः फलमिति वाक्येन । श्रुतिश्च वाक्याद् बलीयसी । तस्माद् होमात् फलमिति न्याय्यम् । दध्नः फलमिति चान्याय्यम् ॥ अपि च दधि उभयमसमर्थं कर्त्तुं, फलं साधयितुं होमञ्च । ननु कम्बलनिर्णेजनवदेतद्-

षिष्यति । निर्णेजनं ह्युभयं करोति– कम्बलशुद्धिं, पादयोश्च निर्मलताम् । न ब्रूम एकस्योभयं प्रयोजनमभिनिष्पादयितुं सामर्थ्यं नास्तीति । किं तर्हि फले गुणभूतं दधि होमे चेत्येकं वाक्यं वदितुमसमर्थमिति । यदि फलं दध्ना कुर्य्यादिति ब्रूयाद्, न दध्ना होममिति । अथ दध्ना होमं साधयेदिति ब्रूयान्न फलमिति । उभयवचने भिद्येत वाक्यम् । अभिन्नश्चेदमुपलभ्यते । तस्मान्न गुणात् फलमित्यग्निहोत्रहोमाद्दधिहोमः कर्मान्तरमिति ॥ २५ ॥ ॥ पूर्वपक्षः ॥

अतुल्यत्वात्तु वाक्ययोर्गुणे तस्य प्रतीयेत ॥ २६ ॥

तुशब्दात् पक्षो विपरिवर्त्तते । न कर्मान्तरं, किन्तु गुणात् फलमिति । कथम् । अतुल्ये ह्येते वाक्ये । अग्निहोत्रं जुहुयात् स्वर्गकाम इत्यत्र कर्म्मसमभिव्याहृतं फलं स्वर्गकामो होमेन कुर्य्यादिति । दध्नेन्द्रियकामस्य जुहुयादिति गुणसमभिव्याहृतम् । न ह्यत्र होम इन्द्रियाय कर्त्तव्य इति प्रतीयते, किं तर्हि– दध्ना होम इन्द्रियकामस्येति । होमस्य दधिसम्बन्ध इन्द्रियाय, न होमस्योत्पत्तिः । य इन्द्रियकामः स्यात् स दध्ना होमं कुर्य्यादिति । कतमोऽत्र शब्दः पुरुषप्रयत्नस्य वक्तेति । जुहुयादिति ब्रूमः ॥

ननु श्रुत्या होमसम्बद्धमेव पुरुषप्रयत्नं वदति, वाक्येन दधिसम्बन्धम् । न च, वाक्यं श्रुतिमपबाधितुमर्हति । न च युगपदुभयसम्बन्धो न विरुद्ध्यते । वाक्यं हि तथा भिद्येतेति । अत्रोच्यते । ये भवदीयं पक्षमाश्रयेरँस्ते श्रुतिमपबाधेरँस्तराम् । अस्मदीये तु पुनः पक्षे जुहुयादितिधात्वर्थः केवलोऽपबाधितो भवति । युष्मदीये तु कृत्स्न एव दध्नेति शब्दः । तं चाप्रमाद्यन्तः समामनन्तीति गम्यते । नचैतत्प्रमत्तगीतमित्युक्तं– तुल्यं हि साम्प्रदायिकमिति । तस्मान्न कर्म्मसमभिव्याहृतं फलम् । गुणसमभिव्याहृते तु न कश्चित् प्रमादपाठः । अवश्यं हि, जुहुयादिति दध्नेन्द्रियकामयोः सम्बन्धविधानार्थे वक्तव्यं भवति । ननूच्यमानेऽपि न केवलः करोत्यर्थोऽवगम्यते । केवले न वचःप्रयोजनम् । स च होमसम्बद्धः । तस्मादसमञ्जसमिति । नेति ब्रूमः । होमसम्बद्धोऽप्यसौ करोत्यर्थ एव, केवलं त्वस्य होमसम्बन्धे विशेषः, न तु करोत्यर्थतां बाधते, इन्द्रियकामस्य होमसम्बद्धं प्रयत्नं दधिसम्बद्धं कुर्यादिति । नन्वेवं सति स एव दोषः, होमसमभिव्याहृतं फलमिति । उच्यते । जुहुयादितिशब्दस्यै-

तत्सामर्थ्ये, यद्धोमविशिष्टं प्रयत्नमाह, न त्वत्र होमः साधनत्वेन विधीयते । साध्यत्वेन विशिष्टस्तु प्रयत्नो वाक्येन दध्याश्रितोऽवगम्यते, अत एव च वृत्तिकारेणोक्तं, होममाश्रितो गुणः फलं साधयिष्यतीति । यथा राजपुरुषो राजानमाश्रितो राजकर्म्म करोतीति । तस्माद्दध्नः फलं, य इन्द्रियकामः, स दध्ना कुर्यादिन्द्रियमिति । कथमिति । अनयाऽग्निहोत्रेतिकर्त्तव्यतयेति । कुत एतत् । फलसाधनस्य दध्न इतिकर्त्तव्यताऽऽकाङ्क्षत्वात् । अस्याश्च इतिकर्त्तव्यतायाः सन्निधानाच्चोदनालिङ्गस्य च जुहोत्यर्थस्य दर्शनात् । यस्मादेव चायं जुहोत्यर्थोऽनुवादस्तस्मादविधायकः । न चान्यद्धोमस्य विधायकं नास्तीति तस्मान्न कर्मान्तरम् । तस्माद्दध्नः फलमिति । अथवा दधिशब्दस्य विवक्षितार्थत्वाद्दधिहोमसम्बन्धोऽयं वाक्येन विधीयते । तेन दध्नो होमेन सम्बध्यमानात् फलं भविष्यतीति ॥ २६ ॥ सिद्धान्तः ॥ दध्यादिद्रव्यसफलत्वाधिकरणम् ॥ ११ ॥

समेषु कर्मयुक्तं स्यात् ॥ २७ ॥

त्रिवृदग्निष्टुदग्निष्टोमस्तस्य वायव्यास्वेकविंशम् अग्निष्टोमसाम कृत्वा ब्रह्मवर्चसकामो यजेतेति । एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेतेति । अत्रायमर्थः सांशयिकः । किं तस्यैवाग्निष्टुतोऽग्निष्टोमस्य गुणाद् वारवन्तीयात् पशवः फलम्, एतेन यजेतेत्यनुवादः । अथ किम्, एतेन यजेतेति कर्मान्तरमिति । किं प्राप्तम् । न कर्मान्तरं गुणात् फलमिति । कुतः । एतेन यजेतेति विदितस्यैतद्वचनं, नाऽविदितस्य । अतो न विध्यन्तरम् । पशुकाम एवं यजेतेत्युच्यते, न यजेतेति । कथं कृत्वा ? वारवन्तीयं कृत्वेति । अपिचैतस्यैवेति विस्पष्टम अकर्मान्तरवचनम् । तस्माद् गुणात् फलमित्येवं प्राप्तम् ॥ एवं प्राप्ते ब्रूमः । समेष्वेवञ्जातीयकेषु भिन्नवाक्येषु कर्मयुक्तं फलं भवेत् । एतस्यैव रेवतीषु वारवन्तीयं कृत्वेति । न ह्येतस्य रेवत्यः सन्ति, यास्वऽस्य वारवन्तीयं भवेत् । तत्र रेवत्यो भवन्ति, तासु च वारवन्तीयं विधीयेतेति वाक्यं भिद्येत । अथोच्येत– अस्य पूर्वा रेवतीरुपादाय तासु च वारवन्तीयं कृत्वा, एतेन यजेतेत्यनुवदतीति । तथाऽग्निष्टोमसामेति नावकल्प्येत । अथाग्निष्टोमसामकार्ये भवतीत्युच्यते । एतस्यैवेत्येतदविवक्षितं स्या-

त्। उभयस्मिन् विवक्ष्यमाणे भिद्येत वाक्यम्। तस्मात् कर्मान्तरम्॥

अथ कर्मान्तरे कथमवाक्यभेदः । रेवतीषु ऋक्षु वारवन्तीयं साम कृत्वा पशुकामो यजेतत्यपूर्वो यागः सर्वैर्विशेषणैर्विशिष्टो विधीयते। तेनैकार्थत्वं विभागे च साकाङ्क्षत्वमित्येकवाक्यत्वमुपपद्यते। नन्वर्थभेदो यागश्चैवं ह्यपूर्वः कर्त्तव्यः । रेवतीषु वारवन्तीयम् अपूर्वमिति। नेति ब्रूमः । निर्वृत्तवारवन्तीयरेवतीगुणको यागो विधीयते, न वारवन्तीयनिर्वृत्तिः । अर्थाद् रेवतीषु वारवन्तीयमभिनिर्वर्त्स्यति। शक्यते च तन्निर्वर्त्तयितुम् । उच्यते । रेवतीनां वारवन्तीयस्य च सम्बन्धो न विहितः स्यात्। तत्र च रेवतीष्वन्यान्यपि सामानि भवेयुः। वारवन्तीयं चान्यास्वपि ऋक्षु। नैष दोषः । कृत्वेत्यभिनिर्वृत्तः सम्बन्धो यागायोच्यते। तेन सम्बन्धो गम्यते । द्वावप्येतावर्थौ कृत्वेत्येष शब्दः शक्नोति वदितुमभिनिर्वृत्तिं पूर्वकालतां च । यथा शोणमानयेति रक्तगुणसम्बद्धोऽश्वः शब्देनैवानयतो विधीयते इति, न वाक्यभेदो भवति। एवमत्रापि द्रष्टव्यम्॥ नन्वेवमपि बहवोऽर्थाः, रेवत्यः, वारवन्तीयं, तत्सम्बन्धः, यागः, पशुकामश्चेति। नैष दोषः। बहवः श्रूयन्ते, एकोऽत्र विधीयते यागो विशिष्टः। ननु रेवत्योऽपि विधीयन्ते, वारवन्तीयमपि। यदि न विधीयेरन्नैव तद्विशिष्टो यागः प्रतीयेत । न ह्यविधाय विशेषणं, शक्यते विशिष्टो विधातुम्। तस्माद् बहुषु विधीयमानेषु नैकार्थ्यम्। अत्रोच्यते। अर्थ इति प्रयोजनमभिधीयते । यावन्ति पदान्येकं प्रयोजनमभिनिर्वर्त्तयन्ति, तावन्त्येकं वाक्यम्। न चात्र बहूनि प्रयोजनानि। न ह्यत्रानेकस्याभिप्रेतस्यानेकं पदं विधायकमस्ति । रेवतीष्विति नैतत्केवलं रेवतीनां विधायकं, रेवतीषु वारवन्तीयमिति। अत्रापि पदद्वये वारवन्तीयशब्दो द्वितीयान्तः। नास्मात् सम्बन्धोऽभिप्रेतो गम्यते । प्रातिपदिकार्थस्याव्यतिरेकात् । कृत्वेत्यपि करोतिने सम्बन्धमात्रे पर्य्यवसितः परप्रयोजनसम्बन्धमाह। एवं विशिष्टस्तु यजतिर्न परार्थः। तदेकमेषां पदार्थानां प्रयोजनम्। तस्मादेकवाक्यत्वम् गुणे पुनः फले प्रकल्प्यमाने अग्निष्टोमसाम्नः कार्ये वारवन्तीयम् । एतस्य च यदग्निष्टोमसाम इति वाक्यभेदः स्यात्॥ अथोच्यते, रेवत्यादिसर्वविशेषण विशिष्टो याग एतस्याग्निष्टुतो विधीयेत। तथापि पशुकामसम्बन्धाद् भिद्येत वाक्यम्। अथैव-

शुण्येन, रेवतीषु कृतेन वारवन्तीयेन पशुकामो यजेतेति । नैवं शक्यम् । ऋगन्तरप्रगानाद्विशेषहानाद्वैगुण्यं स्यात् । नन्विदानीमेवोक्तं, शक्यते हि रेवतीषु वारवन्तीयं कर्त्तुमिति । सति वचने शक्यम् । असति वचने न वारवन्तीयग्रहणेन गृह्यन्ते । वचनं तर्हि भविष्यति, पशुकामो रेवतीषु वारवन्तीयमभिनिर्वर्त्तयेत् । ततो यजेतेति यजतिरनुवादः । यदि वचनं रेवतीषु वारवन्तीयसम्बन्धस्य, सिद्धं कर्मान्तरं, नाग्निष्टुतो गुणविधिः । ननु ततो यजेतेति यागानुवादाद् यागेनास्याङ्गप्रयोजनसम्बन्धो भविष्यति । नैवं शक्यम् । यागं प्रत्यङ्गभावे विधीयमाने पशुकामं प्रत्यसम्बन्धः । उभयसम्बन्धे वाक्यं भिद्येत । अथ यागसम्बन्धोऽनुवादः, प्रकरणेन चाङ्गता । नैतदुपपन्नम् । प्रकरणाद्धि वाक्यं बलवत्तरम् । तस्मात् कर्मान्तरं, यागगुणकं वा रेवतीषु वारवन्तीयं, तद्गुणको वा यागः । तत्र यागपशुकामयोः सम्बन्धस्य विधात्रीं यजतेरुपरितनीं विभक्तिमुपलभामहे लिङ्गं, न तु रेवतीवारवन्तीयसम्बन्धस्य विधायकं साक्षात्किञ्चिदुपलभ्यते । तस्मात् सर्वविशेषणविशिष्टो यागः पशुकामस्य विधीयते इति सिद्धम् ॥ अथ पुनर्विशिष्टे यागे विधीयमाने, तद् रेवतीषु वारवन्तीयं कथमग्निष्टोमसाम भवतीति । उच्यते । वचनादग्निष्टोमसाम्नः कार्ये भविष्यतीति । किमिव हि वचनं न कुर्यात् । नास्ति वचनस्यातिभारः । अथ यदुक्तमेतस्यैवेति । अनन्तरापेक्षं वचनमिति तत्राप्यविरोधादेतद्धर्मकस्येति लक्षणाशब्दो भविष्यति । तस्माच्च गुणात् फलं कर्मान्तरमेवंधर्मकमिति, सिद्धं समेष्वेवञ्जातीयकेषु कर्मयुक्तं फलमिति ॥ २७ ॥ ॥ वारवन्तीयादीनां कर्मान्तरताधिकरणम् ॥ १२ ॥

सौभरे पुरुषश्रुतेर्निधनं कामसंयोगः ॥ २८ ॥

यो वृष्टिकामो योऽन्नाद्यकामो यः स्वर्गकामः, स सौभरेण स्तुवीत, सर्वे वै कामाः सौभरे इति समाम्नाय ततः समामनन्ति । हीषिति वृष्टिकामाय निधनं कुर्यात्, ऊर्गित्यन्नाद्यकामाय, ऊ इति स्वर्गकामायेति । तत्र विचार्यते । किं सौभरं वृष्टेर्निमित्तं, हीषित्येतदपरं वृष्टेर्निमित्तम्, अथ सौभरमेव वृष्टेर्निमित्तम् । यदा तद् वृष्टेर्निमित्तं, तदा हीषिति सौभरस्य निधनं कर्त्तव्यमिति । एवम्, ऊर्गित्यन्नाद्यकामस्य, ऊ इति स्वर्गकामस्य च तुल्यो विचारः । कथं निधनादपरं

फलं? कथं वा निधनव्यवस्थार्थं श्रवणमिति । यद्येवमभिसम्बन्धः क्रियते हीषिति वृष्टिकामाय कुर्य्यादिति, ततो निधनादपरं फलम् । अथैवमभिसम्बन्धः- हीषिति निधनं कुर्यादिति, तदा निधनव्यवस्थार्थं श्रवणम् । तदा वृष्टिकामायेति सौभरविशेषणं क्रियते, न हीषा सम्बन्धः ॥ किं तावत् प्राप्तम् ॥ सौभरे निधने अपरः कामो विधीयते इति । कुतः । पुरुषश्रुतेः । पुरुषप्रयत्नस्यात्र श्रवणं भवति, कुर्यादिति । तद् वृष्टिकामस्य हीषश्च सम्बन्धे कर्त्तव्ये वक्तव्यं भवति, न तु सौभरनिधनसम्बन्धे । तत्र हि साङ्गं सौभरं कुर्यादिति प्रयोगवचनसामर्थ्यादेव सिद्धम् । तस्मात् कुर्यादिति पुरुषप्रयत्नवचनादवगच्छामः । यतरस्मिन् पक्षे पुरुषप्रयत्नवचनमर्थवत् ततरोऽयं पक्ष इति तत्राऽस्मिन् पक्षे अर्थवद्, निधनादपरं फलमिति । तस्मात् सौभरे एकः कामः, भेदेन निधनादपि द्वितीयः काम इति ॥

अथवा वृष्टिकामायेति पुरुषश्रुतिः । वृष्टिं यः कामयते स पुरुषो वृष्टिकामशब्देनोच्यते । तदस्मिन् पक्षे श्रुतिर्विनियोक्त्री । इतरस्मिन् पक्षे पुनर्वृष्टिकामशब्देन पुरुषवचनेन सता सौभरं लक्ष्येत । तथा लक्षणाशब्दः स्यात् । श्रुतिलक्षणाविषये च श्रुतिर्न्याय्या, न लक्षणा । तस्मात् पश्यामो निधने द्वितीयः काम इति । एवञ्च फलभूयस्त्वं भविष्यति । तस्मान्निधने अपरः कामः ॥ २८ ॥ ॥ पूर्वपक्ष ॥

सर्वस्योक्तकामत्वात् तस्मिन् कामश्रुतिः स्यान्निधनार्था पुनःश्रुतिः ॥ २९ ॥

वाशब्दः पक्षं व्यावर्त्तयति । न चैतदस्ति, यदुक्तं- निधने अपरः काम इति । नैवं सम्बन्धः क्रियते- वृष्टिकामाय हीषिति कुर्य्यादिति । कथं तर्हि । हीषिति निधनं सौभरस्येति । कथम्? । हीषो वृष्टिकामसम्बन्धे क्रियमाणे, निधनं कुर्य्यादिति सम्बन्धो न कृतः स्यात् । तत्र हीषिति निधनमिति नावकल्प्येत । तत्रोभयसम्बन्धे वाक्यभेदः । तत्र निधनशब्दः प्रमादसमाम्नात इति गम्यते । नचैवञ्जातीयकः प्रमादसमाम्नात इत्युक्तम् । तस्मान्न हीषो वृष्टिकामेन सम्बन्धः । तेन न निधनादपरं फलम् ॥

अथ हीषो निधनसम्बन्धे कथम् अवाक्यभेदः? इति । उच्यते । वृष्टिकामाय सौभरमस्त्येव । सौभरस्य निधनं सौभरप्राप्तिरस्त्येव ।

तत्र हीषिति कुर्य्यादित्येष पदार्थो विधीयते । तस्माद् वाक्यभेद इति । अतो निधनव्यवस्थेति गम्यते । एवमेव ऊर्गिति, ऊ इति च वदितव्यम् । सर्वस्य सौभरस्य ऊर्ग्वृष्टिस्वर्गकामत्वाच्छक्यते कामवचनैः सौभरं लक्षयितुम् । किमर्थं लक्ष्यते ? इति निधनार्था पुनः श्रुतिर्निधनव्यवस्थां करिष्यतीत्यर्थः ॥ २९ ॥ ॥ सिद्धान्तः ॥ सौभरनिधनयोः कामैक्याधिकरणम् ॥ १३ ॥ इति श्रीभट्टशबरस्वामिनः कृतौ मीमांसाभाष्ये द्वितीयाध्यायस्य द्वितीयः पादः ॥ २ ॥ २ ॥

अथ द्वितीयाध्यायस्य तृतीयः पादः ॥ २ ॥ ३ ॥

गुणस्तु क्रतुसंयोगात् कर्मान्तरं प्रयोजयेत् संयोगस्याशेषभूत्वात् ॥ १ ॥

अस्ति ज्योतिष्टोमः, ज्योतिष्टोमेन स्वर्गकामो यजेतेति । तं प्रकृत्य श्रूयते । यदि रथन्तरसामा सोमः स्याद् ऐन्द्रवायवाग्रान् ग्रहान् गृह्णीयात्, यदि बृहत्सामा शुक्राग्रान्, यदि जगत्सामा आग्रयणाग्रानिति । तत्र सन्दिह्यते । किं ग्रहाग्रताविशेषो ज्योतिष्टोमस्य विधीयते, उत कर्मान्तरस्य रथन्तरसाम्नो बृहत्साम्नश्चेति ? । यदि रथन्तरसामग्रहणेन बृहत्सामग्रहणेन च ज्योतिष्टोमोऽभिधीयते, ततस्तस्य ग्रहाग्रताविशेषः । अथ नाऽभिधीयते, ततः कर्मान्तरस्येति ॥ किं तावत् प्राप्तम् ॥ प्रकरणाज्ज्योतिष्टोमस्येति प्राप्ते, उच्यते ॥ गुणस्तु क्रतुसंयोगादिति ॥ तुशब्दः पक्षं व्यावर्त्तयति । नैतदस्ति, ज्योतिष्टोमस्येति । कुतः । क्रतुसंयोगात् । कथं तर्हि ? कर्मान्तरस्येति । ननु ज्योतिष्टोमक्रतोरेवैष एवञ्जातीयको वादः, रथन्तरसामा बृहत्सामेति । नेति ब्रूमः । यदि न कृत्स्नक्रतुसंयोगो भवेज्ज्योतिष्टोमस्य वादः । कृत्स्नक्रतुसंयोगस्त्वेषः । कथं कृत्स्नक्रतुसंयोगो भवति । कथं वा न कृत्स्नक्रतुसंयोग इति । यदि रथन्तरसत्ता वा, बृहत्सत्ता वा निमित्तं ग्रहाग्रताविशेषस्य, ततो न कृत्स्नक्रतुसंयोगः । रथन्तरं बृहद्वा यदि सामास्ति, तत ऐन्द्रवायवाग्रता शुक्राग्रता चेति, ततो ज्योतिष्टोमस्य गुणविधिः । अथ रथन्तरसामसत्ता बृहत्सामसत्ता वा न निमित्तं, ततः कृत्स्नक्रतुसंयोगः । यदि रथन्तरसामेति कोऽर्थः । अयमर्थः—

यदि रथन्तरसाम अस्य विशेषणं क्रतोरिति । कुतः एतत् ।

समासपदसामर्थ्यात् । समर्थानां हि पदानां समासो भवति– सामर्थ्यश्च भवति विशेषणविशेष्यभावे । असाधारणं च भवति विशेषणम् । तत्रायमर्थो– यदि रथन्तरमेव साम, बृहदेव वा नान्यदिति । ज्योतिष्टोमस्य च बहूनि सामानि गायत्रादीनि । तस्मान्न ज्योतिष्टोमस्य वाचकावेतौ शब्दाविति । तेन यद्यपि प्रकरणाज्ज्योतिष्टोमस्य गुणविधिरिति गम्यते, तथापि तद् बाधित्वा वाक्येन रथन्तरसाम्नो बृहत्साम्नश्च भवितुमर्हति ॥ ननु यथा ज्योतिष्टोमो न रथन्तरसामा, एवमन्योऽपि न रथन्तरसामा कश्चिदस्ति । उच्यते । कर्मान्तरं रथन्तरसामकं कल्पयिष्यत्येतद्वाक्यम् । यदि रथन्तरसामा सोमः स्यादिति । ननु नास्त्यत्र विधायकः शब्दः । उच्यते, अस्ति य एषः स्यादिति । आह । नैष विधातुं शक्नोति यदि शब्दसम्बन्धादविधमानस्य निमित्तार्थेनैवञ्जातीयकः शब्दो भवति, न विधानार्थेनेति । अत्र ब्रूमः । यदेतत् सयदिकं वाक्यम् । यदि रथन्तरसामा सोमः स्यादिति । अत्रावान्तरवाक्यमस्ति, रथन्तरसामा सोमः स्यादिति । यदवान्तरवाक्यं तस्यान्योऽर्थोऽन्यश्च सयदिकस्य । सयदिको न शक्नोति विधातुम् । यद् अवान्तरवाक्यं तद्विधास्यति । न च रथन्तरसाम्नो बृहत्साम्नो वा भावो निमित्तत्वेन श्रूयमाणोऽप्यर्थवान् भवति । तस्मादविवक्षितो यदिसम्बन्धः । तस्मिँश्चाविवक्षिते पदद्वयमिदं रथन्तरसामा सोमः स्यादिति शक्नोति रथन्तरसामानं क्रतुं विधातुं, यदीत्यनर्थकम् ॥ अथ वा, यदि रोचेतेत्यध्याहारः । अथ वा, यथैतद्भवति– पयसा षाष्टिकं भुञ्जीत, यदि शालिं भुञ्जीत, तत्र दध्युपासिञ्चेदिति । एवञ्जातीयकेन वाक्येन शालिभोजनं विहितं भवति । एवमत्रापि विहितं द्रष्टव्यम् । यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहान् गृह्णीयादिति । कथं पुनः शालिभोजनं तेन वाक्येन विहितं भवतीति । उच्यते । व्यत्यासेन सम्बन्धः कल्प्येत, यदि दध्युपसेचनमिच्छेच्छालिं भुञ्जीतेति ॥

ननु न खल्विच्छतेः परां लिङ्विभक्तिमुपलभामहे, सिञ्चतेर्हि तां परां समामनन्तीति । सिञ्चतेः खलु सा परा समुच्चरन्ती कमेरर्थं गमयति । कामप्रवेदने हि तां मन्यामहे इति एवमिहापि यद्यैन्द्रवायवाग्रान् ग्रहान् गृह्णीयादिति ग्रहीतुमिच्छेदित्यर्थः, ततो रथन्तरसामानं क्रतुं कुर्यादिति । नन्वेवं सतीच्छामात्रं भवेन्न ग्रहाग्रताविशेष-

विधानम्। उच्यते। यथास्मिँल्लौकिके वाक्ये- यदि दध्युपसेचनमिच्छेच्छालिं भुञ्जीतेति दध्युपसेचनसङ्कीर्त्तनाद्दध्युपसिक्तं शालिं भुञ्जीतेति तेनैकवाक्यत्वाद् गम्यते, एवमत्रापि ग्रहाग्रताविशेषसङ्कीर्त्तनात्तेनैकवाक्यत्वाद् ग्रहाग्रताविशिष्टा रथन्तरसामा गम्यते। अथवाऽत्र हेतुहेतुमतोर्लिङ् रथन्तरसामा सोम ऐन्द्रवायवाग्राणां ग्रहाणां हेतुः कर्त्तव्य इति। तस्मात् कृत्स्नक्रतुसंयोगाद् गुणः कर्मान्तरं प्रयोजयेत्। एवं कृत्स्नक्रतुसंयोगोऽर्थवान् भविष्यति ॥ अपि च पूर्वेण निमित्तेन भवितव्यं, परेण नैमित्तिकेन। कथम्?। सति हि निमित्ते नैमित्तिकं भवितुमर्हति, न असति। यच्च भविष्यत् तद् न सत्, भविष्यच्च रथन्तरसाम, तत् कथं पूर्वकालस्य ग्रहाग्रताविशेषस्य निमित्तं भविष्यतीति। अपि च निःसन्दिग्धं जगत्सामा कर्मान्तरं, तत्सामान्यादितरदपि कर्मान्तरमिति गम्यते। तस्मान्न ज्योतिष्टोमस्य गुणविधानमिति ॥ १ ॥ पूर्वपक्षः ॥

एकस्य तु लिङ्गभेदात् प्रयोजनार्थमुच्येतैकत्वं गुणवाक्यत्वात् ॥ २ ॥

तुशब्दात् पक्षोऽन्यथा भवति। नैतदस्ति, यदुक्तं- क्रत्वन्तरमिति। कथं तर्हि। ज्योतिष्टोमस्यैव ग्रहाग्रताविशेष इति। कुतः। प्रकरणसामर्थ्यात्। नन्वेतदुक्तं- वाक्यसामर्थ्यात् क्रत्वन्तरस्य रथन्तरसाम्नो बृहत्साम्नश्चेति। परिहृतमेतज्ज्योतिष्टोम एव रथन्तरसामा बृहत्सामा चेति। पुनर्दूषितमनेकसामत्वाज्ज्योतिष्टोमस्य, विशेषणं रथन्तरेण बृहता वा न प्रकल्पते इति। तदुच्यते। प्रकल्पते विशेषणं, बृहद्रथन्तरयोर्वैकल्पिकत्वात्। भवति स प्रयोगः, यत्र रथन्तरं नास्ति। भवति च स प्रयोगो विद्यमानरथन्तरसामकः। तदेतद् रथन्तरं सत्तयैवासाधारणत्वाद् विशेषकम्। तस्माज्ज्योतिष्टोम एव रथन्तरसामा बृहत्सामा चेति॥ अथ यदुक्तं- पूर्वेण निमित्तेन भवितव्यमुत्तरेण नैमित्तिकेनेति नैतत्। नियोगतो भवति हि भविष्यदपि निमित्तम्। यथा वर्षिष्यतीति कृषिगृहकर्मानुष्ठानम्। अपि च तद् दृष्टम्, इदञ्च वाचनिकं निमित्तम्। तद् यथावचनं भवितुमर्हति। स्यादिति चेयं लिङ् त्रिष्वपि कालेषु भवति। तस्माद् भविष्यदपि निमित्तम् यत्तु जगत्सामेति कर्मान्तरं, तत्सामान्याद्

रथन्तरसामापि कर्मान्तरमिति । जगत्साम असम्भवात् कर्मान्तरं सम्भवति । रथन्तरसाम्नो बृहत्साम्नश्च ज्योतिष्टोमस्याभिधानम् । तस्मान्न कर्मान्तरमिति ॥ २ ॥ ॥ सि० ॥ प्रह्याग्रताया ज्योतिष्टोमाऽङ्गताधिकरणम् ॥ १ ॥

अवेष्टौ यज्ञसंयोगात् क्रतुप्रधानमुच्यते ॥ ३ ॥

अस्ति राजसूयः, राजा राजसूयेन स्वराज्यकामो यजेतेति । तं प्रकृत्यामनन्ति– अवेष्टिं नामेष्टिम् । आग्नेयोऽष्टाकपालो हिरण्यं दक्षिणा इत्येवमादि । तां प्रकृत्य विधीयते । यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाहुतिमाहुतिं हुत्वाऽभिघारयेत्, यदि राजन्य ऐन्द्रं, यदि वैश्यो वैश्वदेवमिति ।

तत्र सन्दिह्यते । किं ब्राह्मणादीनां प्राप्तानां निमित्तार्थेन श्रवणम्, उत ब्राह्मणादीनामयं यागो विधीयते इति । कथं निमित्तार्थता भवेत्, कथं वा यागविधानमिति । यदि राजशब्दो ब्राह्मणादिष्वपि केनचित् प्रकारेण ततो निमित्तार्थता । अथ क्षत्रिय एव, ततः प्रापकाण्येवञ्जातीयकानि श्रवणानि ॥ किं तावत् प्राप्तम् ॥ निमित्तार्थतेति । तत एवं तावदुपवर्ण्यते– यौगिको राजशब्द इति । राज्यं यस्य कर्म स राजा । किं पुना राजकर्म ॥ जनपदपुरपरिरक्षणे, ततश्चोद्धरणे । राज्यशब्दमार्य्यावर्त्तनिवासिनः प्रयुञ्जन्ते । राज्ञः कर्म्म राज्यमिति चाभियुक्ता उपदिशन्ति । तेन मन्यामहे, यस्यैतत् कर्म्म स राजेति । यथा ये उदमेघं नाम कश्चित् पुरुषं नावेदिषुः, तस्य तु पुत्रम् औदमेघिरित्येवं विदुः, शक्नुयुस्ते यस्तस्य पिता स उदमेघ इति कल्पयितुम् । उदमेघपुत्रस्यैवं समभिव्याहारो भवतीति । एवं राज्ययोगाद् राजशब्द इति विज्ञायते ॥ ननु जनपदपुरपरिक्षणवृत्तिमनुपजीवत्यपि क्षत्रिये राजशब्दमान्ध्राः प्रयुञ्जते प्रयोक्तारः । न ब्रूमः– न प्रयुञ्जते इति । किं तर्हि– कर्म्मविशेषनिमित्तत्वाद् राजशब्दस्य, तद्योगादपि राजशब्दो भवतीत्येतदुपपादयामः । प्रयुञ्जते च तद्युक्ते राजशब्दमक्षत्रियेऽपि तदस्मिन्नुपपन्ने प्रकरणवशाद् यदिशब्दसमभिव्याहाराच्च राजसूयस्यैव गुणविधानं भविष्यति, न ब्राह्मणस्य वैश्यस्य च कर्म्मान्तरं विधायिष्यतीति ॥ अथवा, असार्वलौकिकस्य प्रयोगस्य सार्वलौकिकेन प्रयोगेण विरुद्ध्यमानस्य अप्रामाण्यं स्यात् । अभ्युपगच्छन्ति हि ते जनपदिनः सार्वभौमं प्रयोगम् ।

अपिचाविप्रगीता लौकिका अर्था विप्रगीतेभ्यः प्रत्ययिततरा भवन्ति तथा आर्य्यावर्त्तनिवासिनां शब्दार्थोपायेष्वभियुक्तानामभिव्याहरतां कर्माणि चानुतिष्ठताम् अन्त्यजनपदवासिभ्यो म्लेच्छेभ्यः समीचीनतर आचारो भवति । तस्माद् यौगिको राजशब्दः, निमित्तार्थानि श्रवणानि, राजसूयस्य गुणविधिर्न कर्म्मान्तरमिति ॥

एवं प्राप्ते ब्रूमः ॥ अवेष्टौ तु खलु क्रतुप्रधानं ब्राह्मणादिश्रवणं ब्राह्मणादीनामवेष्टियागं विधातुं. न निमित्तार्थम् । कुतः । अप्राप्तत्वाद् ब्राह्मणवैश्ययोः । कथमप्राप्तिः । क्षत्रियस्य राजसूयविधानात् । राजा राजसूयेन यजेतेति । ननूक्तं– यौगिको राजशब्द इति । एतदप्ययुक्तम् । यतो जातिवचन इति । ननूभयाभिधाने यदिशब्दसम्बन्धात्, प्रकरणाच्च न कर्म्मान्तरविधानं न्याय्यमित्युक्तम् । अत्रोच्यते । नोभयाभिधानमवकल्पते । कुतः । यदि तावज्जातिशब्दो राजेति, ततस्तत्कर्मत्वाज्जनपदपरिपालने राज्यशब्दो भविष्यति । तेनार्य्यावर्त्तनिवासिनां प्रयोगो न विरोत्स्यते । अथ यदि राज्यशब्दः परिपालने नित्यसम्बद्धो भविष्यति, ततस्तस्य कर्त्तेति राजशब्दः क्षत्रियजातौ तन्निमित्तो भविष्यति । तत्रान्ध्राणां प्रयोगो न विरोत्स्यते । तस्मान्न प्रयोगदर्शनादुभावपि राजराज्यशब्दौ जातिपरिपालनाभ्यां नित्यसम्बद्धावित्यभ्युपगन्तव्यम् । को नु खलु निर्णयः । राजजातीयस्य कर्म्म इत्यतः परिपालनं राज्यशब्देनोच्यते । एवं हि स्मरन्तोऽभियुक्ताः, तस्य कर्म इति ष्यञ्प्रत्ययं विदधति, न तु तस्य कर्त्तेति प्रत्ययलोपं वा, प्रातिपदिकप्रत्यापत्तिं वा समामनन्ति ॥ तस्माद् राज्ञः कर्म्म राज्यं, न राज्यस्य कर्त्ता राजा ॥ ननु यो यो जनपदपुरपरिरक्षणं करोति, तं तु लोको राजशब्देन अभिवदति । उच्यते । योगाल्लोकः प्रयुङ्क्ते । परिपालने राज्यशब्दः प्रसिद्ध इति । स तु परिपालने राज्यशब्दो राजयोगादित्यस्माभिरुक्तम् । तस्माद् राजशब्दः प्रसिद्धेर्मूलम् । तद्योगाद् राज्यशब्दः । तद्योगादपि ब्राह्मणवैश्ययो राजशब्दः प्रयुज्यते । न त्वेवं स्मरन्ति, राज्ययोगाद् राजेति ॥ यत्तूक्तम्– अनुमानाद् राज्यस्य कर्त्ता यः स राजा, यथा औदमेघिः पिता उदमेघ इति । उच्यते । अनुमानात् प्रयोगो बलवान् । राज्यस्य कर्त्तारं राजा इत्यनुमिमीमहे । क्षत्रिये तु प्रत्यक्षं प्रयुञ्जानान् उपलभामहे । तथा योगमप्यनुमिमीमहे, राज्यस्य कर्त्ता राजेति ।

राज्ञः कर्म्म राज्यमिति तु स्मरन्ति । अनुमिमानाश्च स्मृतिमनुमिमते स्म । स्मरन्तस्तु प्रत्यक्षमुपलभन्ते । तेन तत्र स्मृतिर्बलीयसीति । आह । यो यो राज्यं करोति, तत्र राजशब्दं प्रयुञ्जते । न यद् राज्ञः कर्म्म तद्राज्यमिति । तेन मन्यामहे, राज्ययोगो राजशब्दप्रवृत्तौ निमित्तं, न तु राजयोगो राज्यशब्दप्रवृत्ताविति । न ब्रूमः– प्रयोगाद् वयं राजयोगं राज्यशब्दप्रवृत्तौ निमित्तमवगच्छाम इति । कथं तर्हि । स्मरणात् । प्रयोगाच्च स्मृतिर्बलीयसी । प्रयोगाद्धि स्मृतिरनुमीयेत ॥ अपिच राज्ययोगस्य निमित्तता व्यभिचरति । जनपदपरिपालनमकुर्वत्यपि राजेत्यान्ध्रा वदन्तीत्युक्तम् । ननु राजयोगाद् राज्यमित्येतदपि व्यभिचरति । न हि राज्ञः स्पन्दितं निमिषितञ्च सर्वं राज्यमित्युच्यते । यदि वयं प्रयोगान्निमित्तभावं ब्रूयाम, तत एवमुपालभ्येमहि । स्मृत्या तु वयं निमित्तभावं ब्रूमः । तेन यद् यद् राजजातीयस्य कर्म्म जात्या विशेष्यते, तद् राज्यमित्यभ्युपगच्छामः । यत्तूक्तम्– आन्ध्रा अपि राज्ययोगाद् राजानमभ्युपगच्छन्तीति । परिहृतमेतत् । प्रयोगो दुर्बलः स्मृतेरिति । यदुक्तम्, आर्य्यावर्त्तनिवासिनः प्रमाणमितरेभ्य आचारेभ्य इति । तुल्यः शब्दप्रयोग आचारेष्वित्युक्तम् । तस्माज्जातिनिमित्तो राजशब्दः । एवञ्चेद् यज्ञसंयोगात् क्षत्रियस्य राजसूयेन, यागविधिरवेष्टेरिति ॥३॥ अवेष्टेः क्रत्वन्तरताऽधिकरणम् ॥ २ ॥

आधाने सर्वशेषत्वात् ॥ ४ ॥

इदं समामनन्ति– वसन्ते ब्राह्मणोऽग्नीनादधीत, ग्रीष्मे राजन्यः, शरदि वैश्य इति । तत्र सन्दिह्यते । किं ब्राह्मणादिश्रवणं निमित्तार्थं– ब्राह्मणादय आदधाना वसन्तादिष्वादधीरन्निति, उत ब्राह्मणादीनामाधानं विधीयते इति । कथं निमित्तार्थता स्यात् ? कथञ्चाऽऽधानविधानमिति । यदि ब्राह्मणो वसन्ते इति पदद्वयं परस्परसम्बद्धं, ततो निमित्तार्थं श्रवणम् । अथ ब्राह्मण आदधीत इति, आधानविधानं ब्राह्मणस्य । एवं राजन्यादिष्वपि । किं तावत् प्राप्तम् । निमित्तार्थं श्रवणमिति । कुतः । निमित्तसरूपा एते शब्दाः । किं निमित्तसारूप्यम् । ब्राह्मणादीनां वसन्तादिभिः समुच्चारणम् । तच्चाविदितं वेद्यते इति । ननु ब्राह्मणादीनामादधतिनाप्यस्ति समुच्चारणम् । बाढमस्ति समुच्चारणं, न त्वमीषाम् ।

आधानसम्बन्धो न विदितः । केन प्राप्तो विदित इति । कामश्रुतिभिः । काः कामश्रुतयः । अग्निहोत्रं जुहुयात् स्वर्गकामः, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्येवमादयः । कथमाभिः श्रुतिभिराधानं प्राप्तमिति । उच्यते । सामर्थ्यात् । यथाऽग्निहोत्रमभिनिर्वर्त्त्येत, तथा कुर्यात् । यथा दर्शपूर्णमासावभिनिर्वर्त्त्येते, तथा कुर्यात् । न च गार्हपत्याहवनीयान्वाहार्य्यपचनादिभ्यो विनैतानि कर्माणि सिद्ध्यन्ति । समामनन्ति हि– यदाहवनीये जुहोति, तेन सोऽस्याभीष्टः प्रीतो भवतीत्येवमादि । तेन सामर्थ्यादेतदुक्तं भवति, आहवनीयादि कर्त्तव्यमिति । तच्चाधानेन विना न सिद्ध्यतीत्याधानमपि कर्त्तव्यमित्यवगम्यते । तत् केन कर्त्तव्यम् । यस्य कामश्रुतयः । ताश्चाविशेषेण ब्राह्मणादीनाम् । तस्मादमीषामाधानसम्बन्धो विदित इति । अपि-चोभाभ्यां ब्राह्मणादीनां सम्बन्धे विधीयमाने वाक्यं भिद्येत । न हि, तदानीमेकोऽर्थो विधीयते । अतो निमित्तार्थाः श्रुतय इत्येवं प्राप्तम् ॥ एवं प्राप्ते ब्रूमः ॥ आधाने सर्वशेषत्वात् प्रापकाण्याधानस्यैतानि श्रवणानि । कुतः । सर्वकर्मणां शेषभूतमाधानमिति न श्रुतिलिङ्गादिनान्यतमेन उच्यते । किं तर्हि । अग्नीनां सर्वशेषत्वात्, तच्छेषत्वाच्च आधानस्य । किमतः । यद्येवम्, अग्नयः कामश्रुतिभिः प्राप्नुवन्ति, नाधानमिति । नन्वग्नीनामभ्युपाय आधानमिति । उच्यते । नैतेषामर्जने आधानमेवैकोऽभ्युपायः । किं तर्हि यथान्येषां द्रव्याणामुत्पादने क्रयणादयश्चाभ्युपाया, एवमग्नीनामपीति न नियोगत उत्पादनमेव । तेन पक्षे आधानं प्राप्नोति, पक्षे न । यतरस्मिन् पक्षे अप्राप्तिस्ततरः पक्ष उत्पत्तिं प्रयोजयिष्यति ब्राह्मणादीनामाधानस्य । ब्राह्मण आत्मार्थमादधीतेति । यदा एतद्वचनं तदा आत्मार्थमेवाहिता आहवनीयादयो भवन्ति, नान्यथा । एवञ्च सति, न कृत्रिमेण याचितेन वा कर्म्माण्यग्निहोत्रादीन्यनुष्ठातव्यानीति गम्यते । तेन अकृत्रिम एव केवलोऽग्निस्तेषां साधक इति निश्चीयते । कथञ्चात्मार्थता आधानस्य गम्यते इति । कर्त्रभिप्राये हि क्रियाफले आदधीतेत्येतदात्मनेपदं सम्भवति । असत्यस्मिन् वचने कामश्रुतिपरिग्रहे नाधानस्यात्मार्थता भवेत् ॥ अपि च सतीषु एतास्वाधानश्रुतिषु न कामश्रुतयः शक्नुवन्त्यपरामाधानश्रुतिं कल्पयितुम् । यथा प्राप्तस्याधानस्य पुनःश्रुतय एता भवेयुः । असतीष्वेतास्वाधानश्रुतिमपरिगृह्णन्तः

कामश्रुतयोऽशक्यानग्निहोत्रादीन् वदन्तीति परिगृह्णीयुराधानश्रुतिम्। सतीष्वेतासु येषामाधानमुक्तं, तान् अधिकृत्य उत्तरकालाः कामश्रुतयो भवन्तीति गम्यते ॥

अत्राह। अस्ति केवलस्याधानस्य विधायिका श्रुतिः। एवं सपत्नं भ्रातृव्यमवर्त्ति सहते, य एवं विद्वानग्निमाधत्त इति। तया प्राप्तस्य निमित्तार्थानि ब्राह्मणादीनां श्रवणानि भविष्यन्ति। उच्यते। सम्भारविधानार्था पुनः श्रुतिरेषा। नेति ब्रूमः। भिन्नं हीदं वाक्यं सम्भारविधानवाक्यात्। अन्यो ह्यर्थ आधत्त इति, अन्यः अप उपसृजतीति। एकार्थविधाने ह्येकं वाक्यं भवति, भिन्नौ चेमावर्थौ। तस्मादत्र वाक्यभेद इति ॥ उच्यते ॥ वसन्ते ब्राह्मणोऽग्नीनादधीतेत्यस्यां श्रुतौ सत्यां पुनः श्रुतिः केवलस्याधानस्याविधायिका। अपामुपसर्जनं तु विधीयते। तदेकस्मिन्नर्थे विधीयमाने नानेकार्थं भवति। नन्वाधानस्यैतद्विधानम्। गुणार्था सा पुनःश्रुतिः। नेति ब्रूमः। सा ब्राह्मणादिसम्बद्धा प्रथमा श्रुतिः इयं केवला पुनःश्रुतिः। कुतः। सा हि शब्देन विदधाति। तत्र लिङमुच्चरन्तीं पश्यामः। इयं प्रशस्तमाधानमित्याह। ततः प्रशस्ततामाधानस्यानुमन्यामहे। एवञ्च, वसन्ते ब्राह्मणोऽग्नीनादधीतेत्येषा विधायिका श्रुतिरिति ब्रूमहे। नैतत् प्रशंसावचनमस्मत्पक्षं बाधते। शक्यते ह्यन्येन विहितमन्येन प्रशस्तमिति वदितुम्। यदि त्वेतद् विधायकमित्युच्येत ततोऽस्मत्पक्षं विरुद्ध्येत। कथम्। अज्ञातस्य ज्ञापनं विधानमेतत्। यदि प्रशंसावचनेन अपूर्वं विज्ञाप्येत, तदा लिङा नापूर्वं ज्ञापितं भवेत्। तत्रापूर्वज्ञापनवचनः शब्द उपरुद्ध्येत। न तु लिङा विहिते प्रशंसावचनमुपरुद्ध्यते। विहितेऽपि हि वाक्यान्तरेण प्रशंसावचनमवकल्पते अपि च यल्लिङा विधानं तच्छ्रुत्या, वाक्येन तु प्रशंसा गम्यते। श्रुतिश्च वाक्याद् बलीयसी ॥

नन्विदमपि वाक्यं, ब्राह्मणोऽग्नीनादधीतेति। उच्यते। स्वपदार्थमत्र श्रुतिर्विदधात्याधानं ब्राह्मणादिसम्बन्धेन परपदार्थं प्रशंसति, य एवं सपत्नं भ्रातृव्यम् अवर्त्ति सहते इति। नन्वनेकगुणविधानं त्वया वाक्येनाध्यवसितं भवति। नैष दोषः। अगुणविधिपरं हि वाक्ये भवत्यनेकगुणविधानमित्युक्तं, तद्गुणास्तु विधीयेरन्नविभागाद् विधार्थे न चेदन्येन शिष्टा इति। तस्माद् ब्राह्मणादिसंयुक्ता वि-

धायिका श्रुतिः । इयमपि केवलस्याधानस्य पुनः श्रुतिः सम्भारविधानमुपक्रमितुमिति सिद्धम् ॥

यदुक्तम्–अनेकगुणविधाने वाक्यं भिद्येतेति । यदीमौ गुणविधानविशिष्टौ विधीयेयातां, भवेद् वाक्यभेदः । ताभ्यान्तु विशेषणाभ्यां विशिष्टमेकमाधानं विधायिष्यते । तेन न भविष्यति वाक्यभेदः । तस्माद् ब्राह्मणादीनामाधानस्य प्रापकानि श्रवणानीतिसिद्धम् ॥ ॥ ४ ॥ आधानस्य विधेयत्वाधिकरणम् ॥ ३ ॥

अयनेषु चोदनान्तरं संज्ञोपबन्धात् ॥ ५ ॥

दर्शपूर्णमासौ प्रकृत्यामनन्ति– दाक्षायणयज्ञेन यजेत प्रजाकामः, साकम्प्रस्थायीयेन यजेत पशुकामः, संक्रमयज्ञेन यजेतान्नाद्यकाम इति । तत्र सन्देहः । किं दर्शपूर्णमासयोरेव गुणात् फलम्, उत कर्मान्तरमेवञ्जातीयकमिति । किं प्राप्तम् । कर्मान्तरमिति । कुतः । संज्ञोपबन्धात् । यद्यपि प्रकरणाद् यजतिशब्दाच्च स एव पूर्वप्रकृतो याग इति गम्यते, तथापि नाऽसावेवंसंज्ञक इति यागान्तरं विधेयं गम्यते ॥ ५ ॥

अगुणाच्च कर्मचोदना ॥ ६ ॥

न चात्र गुण उपलभ्यते कश्चिद् यद्विधानार्था चोदना भवेत् । यदि च न यागान्तरम्, आनर्थक्यमेव । अपिच, यदि गुण उपलभ्येत ततो यागगुणसम्बन्धो गम्यते इति तदनुष्ठानं विधीयेतेति । अनुपलभ्यमाने यागमात्रं गम्यते इति तदनुष्ठानं विहितं गम्यते ॥ ६ ॥

समाप्तं च फले वाक्यम् ॥ ७ ॥

इतश्च कर्मान्तरम् । कथम् । फले समाप्तं वाक्यम् । प्रजाकामो यजेतेति । प्रजाकामस्य याग उपायो विधीयते । विधीयते चेत् । कर्मान्तरम् ॥ ७ ॥ ॥ पूर्वपक्षः ॥

विकारो वा प्रकरणात् ॥ ८ ॥

दर्शपूर्णमासयोरेवाधिकार एवञ्जातीयकः स्याद् दाक्षायणयज्ञादिः । एवं प्रकरणमनुगृहीतं भवति ॥ ८ ॥ ॥ सिद्धान्तः ॥

लिङ्गदर्शनाच्च ॥ ९ ॥

लिङ्गमप्येतमर्थं दर्शयति । त्रिंशतं वर्षाणि दर्शपूर्णमासाभ्यां यजेत यदि दाक्षायणयाजी स्यात् । अथो अपि पञ्चदशैव वर्षाणि

यजेत । अत्र हि एव सा सम्पद्यते । द्वे हि पौर्णमास्यौ यजेत द्वे अमावस्ये । अत्र हि एव खलु सा सम्पद् भवतीति । यदि दाक्षायणयज्ञो दर्शपूर्णमासावेव, एवं तर्हि त्रिंशत्सम्पदा प्रयोजनम् । ततस्तस्य त्रिंशत्सम्पदनुग्रहो युज्यते । तस्मादपि न कर्मान्तरम् ॥ ९ ॥ सिद्धान्ते हेतुः ॥

गुणात् संज्ञोपबन्धः ॥ १० ॥

यदुक्तं संज्ञोपबन्धात् कर्मान्तरमिति । यदि दाक्षायणशब्दो न केनचिदपि प्रकारेण दर्शपूर्णमासवचनः शक्यते कल्पयितुं, तत उच्येत कर्मान्तरमिति । शक्नोति त्वावृत्तिगुणसम्बन्धाद्वदितुम् । अयमित्यावृत्तिरुच्यते । दक्षस्य इमे दाक्षाः, तेषामयनं दाक्षायणम् । कः पुनर्दक्षः । उत्साही । तथा साकम्प्रस्थाय्येऽपि, सहप्रस्थानं गुणसम्बन्धः । एवं सर्वत्र । शक्यते चेद्दर्शपूर्णमासयोर्गुणसम्बन्धो वदितुं, किमिति स एव यागः प्रतीयमानोऽन्य इत्युच्यते ? किमिति वा प्रकरणं बाध्यते ॥ १० ॥

समाप्तिरविशिष्टा ॥ ११ ॥

यदुक्तं फले वाक्यं समाप्तम् । प्रजाकामादेर्यागानुष्ठानं विधीयते इति । नैवम् । अविशिष्टा फले समाप्तिः । यान्यन्यानि गुणसंशयानि गुणे फलस्य विधायकानि वाक्यानि गुणस्य फलवचनानि पर्यवसितानि । यथा दध्नेन्द्रियकामस्य जुहुयादित्येवमादीनि तैरेतदविशिष्टम् । अत्रापि हि गुणात् फलमुच्यते । कथं नैतदेवं सम्बध्यते, प्रजाकामस्य यज्ञमनुतिष्ठेदिति । कथं तर्हि प्रजाकामस्य आवृत्तियज्ञमनुतिष्ठेदित्यावृत्तियज्ञ इति यज्ञावृत्तिसम्बन्धोऽनुष्ठातव्यो निर्दिश्यते, न यज्ञः । तस्मात् प्रकृतयोर्दर्शपूर्णमासयोर्गुणात् फलमुच्यते, न यागान्तरं विधीयते इति । एवं साकम्प्रस्थाय्ये संक्रमयज्ञे च द्रष्टव्यमिति ॥ ११ ॥ ॥ आ० नि० ॥ दाक्षायणादीनां गुणताधिकरणम् ॥ ४ ॥

संस्कारश्चाप्रकरणेऽकर्मशब्दत्वात् ॥ १२ ॥

अनारभ्याधीयते किञ्चित्– वायव्यं श्वेतमालभेत भूतिकामः, सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः । दर्शपूर्णमासयोरप्यामनन्ति— ईषामालभेत, चतुरो मुष्टीन्निर्वपतीति । तत्रायमर्थः सांशयिकः । किं दर्शपूर्णमासिके आलम्भे आलम्भो गुणविधिर्दर्शपूर्णमासिके च निर्वापे निर्वापो गुणविधिरुत न प्रकृतिमपेक्षते, इतरश्चेतरश्चेति । यदा न

प्रकृतिमपेक्षते, तदापि किं यावदुक्ते उत यजिमती एते कर्म्मणी इति ॥ किं तावत् प्राप्तम् । प्रकृतयोरालम्भनिर्वापयोर्गुणविधी इति । कुतः ? अकर्म्मशब्दत्वात् ॥ नात्र कर्म्मणो विधायकः शब्दोऽस्ति । ननु आलभेत निर्वपेदिति च । नैतौ विधातारौ । अविदितस्यार्थस्य वक्ता विधायको भवति । न चैतयोरविदितोऽर्थः । आलम्भः कर्त्तव्यः, निर्वापः कर्त्तव्य इति । तस्मादनुवदितारौ । किमर्थमनुवदतः । आलम्भने श्वेतं विधातुं, निर्वापे च चरुम् । तस्मान्नालम्भान्तरं निर्वापान्तरं च । प्रकृतयोरेव गुणविधी इति ॥ १२ ॥ ॥ पूर्वपक्षः ॥

यावदुक्तं वा, कर्मणः श्रुतिमूलत्वात् ॥ १३ ॥

न चैतदस्ति– प्राकृतयोर्गुणविधी इति । किं तर्हि, आलम्भान्तरं विधीयते इति निर्वापान्तरञ्च । यदि आलम्भनिर्वापौ विधीयेते ततो न प्राकृतौ तौ विहितौ । यदि न विधीयेते ततः प्राकृतौ लक्ष्येते । यावालम्भनिर्वापौ कर्त्तव्याविति । ततस्तौ लक्षयित्वा श्वेतो विधातव्यो भवति, चरुश्च । तौ च भूतिकामस्य ब्रह्मवर्चसकामस्य चेति द्वावप्यर्थौ विधेयौ स्यातां, तत्र वाक्यं भिद्येत ।
अथवा योऽसौ विधायकः शब्दः स लक्षयितव्योपयुक्त इति विधायकाभावादेकोऽप्यर्थो न शक्यते विधातुम् । अथ स एव लक्षयिष्यति, तेनैव च विधायिष्यते गुण इति । न मिथो विधानलक्षणसम्बन्धोऽवकल्पते । अथ धात्वर्थोऽनुवादः, प्रत्ययो विधातुमिष्यते इत्युच्यते, य आलम्भः स एतद्गुणः कर्त्तव्य इति । तथापि न प्राकृतो लक्ष्येत । लौकिकोऽपि ह्यालम्भोऽस्ति । प्रत्ययार्थेऽनूद्यमाने प्राकृतोऽनूद्येतेति । स हि कर्त्तव्यो निर्ज्ञातो, न लौकिकः । अतो न प्राकृतानुवादो घटते इति यावदुक्तमालम्भमात्रं निर्वापमात्रं चाऽपूर्वं कर्त्तव्यम् । कर्म्मणः श्रुतिमूलत्वात् । श्रुतिमूलं हि कर्मेत्युक्तं, चोदनालक्षणोऽर्थो धर्म्म इति । तस्मात् कर्मान्तरे ॥ १३ ॥ पूर्वपक्षः ॥

यजतिस्तु द्रव्यफलभोक्तृसंयोगादेतेषां कर्मसम्बन्धात् ॥ १४ ॥

यदुक्तं– न प्राकृतयोर्गुणविधी इति । एतद् गृह्णीमः । यत्तूक्तम्– आलम्भमात्रं विधीयते, निर्वापमात्रमिति । एतदपजानीमहे । यजिमती एते कर्म्मणी इति । कुतः । द्रव्यफलभोक्तृसंयोगात् । द्रव्यदे-

वतासंयोगात् । द्रव्यदेवतासंयोगोऽत्र विधीयते, भूतिकामस्य ब्रह्मवर्चसकामस्य च । कथम् । न हीदमेव उच्यते । श्वेतमालभेतेति । यदि ह्येतावदेवोच्येत, ततः श्वेतालम्भसम्बन्धोऽनगम्यते । इह हि श्वेतं वायव्यमालभेतेत्युच्यते । तेन श्वेतवायव्यसम्बन्धो विधीयते । यथा पटं वयेति पटवयनसम्बन्धो विधेयोऽवगम्यते । पटं दीर्घं वयेति पटस्य दीर्घता विधीयते । दीर्घशब्दप्रयोगात् । एवमिहापि सौर्यवायव्यशब्दप्रयोगाद् द्रव्यदेवताभिसम्बन्धो विधेय इति गम्यते । इतरथा देवताशब्दः प्रमादसमाम्नात इति गम्येत ॥ नन्वत्रापि श्वेतं वायव्यं कुर्यात्, तं चालभेत इत्यर्थद्वयविधानाद् भिद्येतैव वाक्यम् । नेति ब्रूमः । न ह्यालभेतेत्यस्यायमतिभारो, यद् द्रव्यदेवतासम्बन्धेन पुरुषप्रयत्नं ब्रूयात्, तं चालभेतेत्यर्थविशिष्टम् । श्रुत्यैव हि पुरुषप्रयत्नो विशिष्टो गम्यते । वाक्येन च द्रव्यदेवताश्रय इति । नात्र द्वाभ्यां वाक्याभ्यां प्रयोजनम् । यथा रक्तमश्वं योजयेति । यदा गुणविधिपरं भवति वाक्यं तदा द्वाभ्यां वाक्याभ्यां प्रयोजनं, गुणद्वयविधाने । अथ शोणमानयेत्युच्येत तत्र गुणविधिपरेऽपि वाक्ये पर्यवसिते एव गुणद्वयविधानम् । श्रुत्यैव विशिष्टगुणद्रव्यस्य प्रतीतत्वाद्, न भवत्येकस्य वाक्यस्यातिभारः । एवमिहापीति । सम्बन्धश्च बहुभिः पदैर्विशिष्ट एक एवोच्यते इत्येकार्थत्वम् । विभज्यमानानि चाऽत्र पदानि साकाङ्क्षाणीत्युपपन्नम् एकवाक्यत्वम् । न च यागमन्तरेण देवतायै द्रव्यं सङ्कल्पितव्यमित्येव सम्बन्धोऽवकल्पते । तस्माद् यजिमती एते कर्मणी इति ॥ १४ ॥ सिद्धान्तः ॥

लिङ्गदर्शनाच्च ॥ १५ ॥

लिङ्गं खल्वप्येतमर्थं दर्शयति । सोमारौद्रं चरुं निर्वपेदिति प्रकृत्य, परिश्रिते याजयेदिति परिश्रयणविधिः । एतस्य वाक्ये यजतिशब्देन सङ्कीर्त्तनमवकल्पते । यदि यजिमती एते कर्म्मणी, अथ प्रकृतौ गुणविधानं यावदुक्तं वा, यजतिशब्देनानुवादो नावकल्पेत । तस्माद् अवगच्छामो यजिमती इति ॥ १५ ॥ ॥ सिद्धान्ते हेतुः ॥ द्रव्यदेवतायुक्तानां यागान्तरताधिकरणम् ॥ ५ ॥

विशये प्रायदर्शनात् ॥ १६ ॥

किमिहोदाहरणम् । न तावत् सूत्रेणैव परिगृहीतम् । यथा अवेष्टौ

यज्ञसंयोगात् क्रतुप्रधानमुच्यते इति । नापि च साध्यं प्रतिज्ञातम् । यथा, अयनेषु चोदनान्तरम् । केवलं विशये संशये प्रायदर्शनं हेतुरिति निर्दिश्यते । कस्यायं हेतुरिति न विजानीमः । प्रकृतं यजिमदेतत् कर्म्मेति । तदपि न सम्बध्यमानमिव पश्यामः । तदेतदगमकं सूत्रमेव तावदनर्थकम् ॥

अथ का अत्र प्रतिज्ञा, कश्च सन्देह इति वक्तव्यम् । वृत्तिकारवचनात् प्रतिज्ञां संशयं चावगच्छामः । अत्र भगवानाचार्य इदमुदाहृत्य वत्समालभेत, वत्सनिकान्ता हि पशव इतीमं संशयमुपन्यस्यति स्म । किं यजिमदभिधान एव आलभतिरुतालम्भमात्रवचन इति । उपपद्यते चैतदुदाहरणं, संशयश्च । तत्र च पूर्वपक्षं प्रतिजानीते स्म, यजिमदभिधान इति । इदन्तु प्रत्युदाहरणसूत्रं पूर्वस्याधिकरणस्य, नात्र पूर्वपक्षेणातीव प्रयोजनम् । तथापि पुरुषाणामुच्चावचबुद्धिविशेषान् आलोच्य भवति मन्दानां सामान्यतोदृष्टेनाप्याशङ्का । सापि निवर्त्तनीया । न हि मन्दविषेण वृश्चिकेनापि दष्टो म्रियेत न जातुचित् कदापि तत्र चिकित्सा नादरेण कर्त्तव्या भवेत् । अतस्तां निवर्त्तयितुं पूर्वपक्षमुपन्यस्यति स्म । आलभतिरस्माभिः प्राणिसंयुक्तो यजिमदभिधानो दृष्टः । अयमप्यालभतिः प्राणिसंयुक्त एव । तेनायमपि यजिमद्वचन एवेति भवति कस्यचिदाशङ्का । अथ वा यजिमदभिधानो दृष्ट आलभतिः प्राणिसंयुक्तः । तस्यायमनुवादो वत्सविधानार्थः । तथाच फलं न कल्पयितव्यं भविष्यतीति ॥ एवं प्राप्ते ब्रूमः ॥ अस्मिन् संशये आलम्भमात्रं संस्कारः । कुतः । प्रायदर्शनात् । यत्रान्यान्यपि संस्कारकर्म्माणि प्रायभूतानीत्युच्यन्ते । तत्रैतदपि श्रूयते । प्रायादपि चार्थनिश्चयो भवति । यथा, अग्न्यप्राये लिखितोऽग्न्य इति गम्यते । ननु लिङ्गं प्रायदर्शनम् । कथमनेन सिद्धिरिति । उच्यते । यथा प्रायदर्शनेन सिद्ध्यति, तथा वर्णयितव्यम् । कथञ्च प्रायदर्शनं हेतुः । न्यायतः प्राप्तौ सत्याम् । क पुनर्न्यायः । देवतासम्बन्धाभावाच्च यागवचनोऽदृष्टार्थत्वाच्च वत्स आलभ्यमानो गां प्रस्नावयिष्यतीति । तस्मादेवं न्यायप्राप्ते प्रायदर्शनं द्योतकं भवति । तस्मादालम्भमात्रं संस्कारः ॥ १६ ॥

अर्थवादोपपत्तेश्च ॥ १७ ॥

अर्थवादश्च भवति । वत्सनिकान्ता हि पशव इति । यस्माद् वत्सप्रियाः पशवस्तस्माद् वत्स आलब्धव्य इति । यदि गां प्रस्तावयितुमालभ्यते, तत्रैतद्वचनमवक्लपते । अथ संज्ञपयितुं, तत्रैवजातीयकं वचनं नोपपद्येत । तस्मादप्यालम्भमात्रं संस्कार इति सिद्धम् ॥ १७ ॥ ॥ वत्सालम्भादीनां संस्कारताधिकरणम् ॥ ६ ॥

संयुक्तस्त्वर्थशब्देन तदर्थः श्रुतिसंयोगात् ॥ १८ ॥

अस्ति अग्निः । तत्र नैवारश्चरुर्भवतीत्युक्त्वा, यदेनश्चरुमुपदधातीति समामनन्ति । तत्र संदिह्यते । किं चरुर्यागार्थो यागं कृत्वा अवशिष्ट उपधातव्य, उत उपधानार्थ एवेति । यागार्थ इति ब्रूमः । चरोर्हि प्रसिद्धं कार्य्यं यागो, नोपधानम् । उच्यते । यद्यपि यागार्थता चरोः प्रसिद्धा, तथापि देवतावचनसम्बन्धाभावाद् यजतिशब्दासंबन्धाच्च न यागार्थतेति गम्यते । तदुच्यते तस्यैव वाक्यशेषे श्रूयते, बृहस्पतेर्वा एतदन्नं यन्नीवारा इति । तेन देवतावचनेन सन्निहितेनैकवाक्यता भविष्यतीति बृहस्पतिदेवताक उपधातव्य इति । तस्माद् यागार्थश्चरुरित्येवं प्राप्तम् ॥ एवं प्राप्ते ब्रूमः ॥

संयुक्तस्त्वर्थशब्देन कार्य्यशब्देनोपदधातीति तदर्थ एव स्यादुपधानार्थः । उपदधातिनाचास्य प्रत्यक्षमेकवाक्यत्वम् । परोक्षं देवतावचनेनानुमेयम् । चरुमुपदधातीति हि प्रत्यक्षं वाक्यम् । बार्हस्पत्यमुपदधातीत्यानुमानिकम् । तस्मात् कृत्स्नश्चरुरुपधातव्यः । ततश्च किञ्चिदिज्यायां विनियुज्येत । तदन्यत्र श्रुतमन्यत्र कृतं भवेत् । यत्तु बार्हस्पत्या नीवारा इति । अर्थवादः स इति । यत्तूक्तं, प्रसिद्धा चरोर्यागार्थतेति । प्रसिद्धिर्वाक्येन बाध्यते । तस्मादुपधानार्थ इति सिद्धम् ॥ १८ ॥ ॥ नैवारचरोराधानार्थताऽधिकरणम् ॥ ७ ॥

पात्नीवते तु पूर्वत्वादवच्छेदः ॥ १९ ॥

त्वाष्ट्रं पात्नीवतं विधायेदमुच्यते, यत् पर्य्यग्निकृतं पात्नीवतमुत्सृजन्तीति । तत्र सन्देहः । किं त्वाष्ट्रस्य पर्य्यग्निकृतस्यैष उत्सर्गो विधीयते, उत तस्माद् यागान्तरमिति । यदि पर्य्यग्निकृतमुत्सृजन्तीतिपदद्वयं परस्परेण सम्बद्धं ततस्त्वाष्ट्रस्योत्सर्गः । अथ पात्नीवतशब्द उत्सृजतिना सम्बद्ध्येत, ततो यागान्तरम् । किं तावत् प्राप्तम् । यागान्तरमिति । कुतः । पूर्वस्त्वाष्ट्रः पात्नीवतश्च । उभयोविशेषेणविशिष्टः कथ

पात्नीवतशब्देनानूद्येत। अपिच त्वाष्ट्रस्योत्सर्गे विधीयमाने पर्य्यग्निकृतमिति विशेषणं नावकल्पेत। अतो ब्रूमः। पर्य्यग्निकृतस्य पात्नीवतता विधीयते। स एव याग इति॥ एवं प्राप्ते ब्रूमः॥ न कर्मान्तरं, पूर्वस्यैवोत्सृजतिशब्देनावच्छेदो विधीयते। किमेवं भविष्यति। यजिमत्ता तावत् कल्पयितव्या न भविष्यति। उत्सृजतिशब्दश्च श्रुत्या उत्सर्गं विदधद् वाक्येन न बाधितो भविष्यति। कर्मान्तरपक्षे वाक्येन पात्नीवततायां विधीयमानायामर्थात् प्राप्त उत्सर्गो धातुनाऽनूद्येत। अपिच पर्य्यग्निकृतस्य पात्नीवतता पूर्वस्य विदितैव। सा विधातुं न शक्यते। तस्मात् पूर्वस्य कर्मणोऽवच्छेदः। यत्तूक्तं-त्वाष्ट्रस्योत्सर्गे विधीयमाने पर्य्यग्निकृतमिति विशेषणं तावन्नावकल्पेतेति। नैष दोषः। अतन्त्रमेवात्र पात्नीवतशब्दो, नाऽसौ विशेष्यते। अत एव त्वाष्ट्रः पात्नीवत उभयविशेषणविशिष्टः केवलेन पात्नीवतशब्देन लक्षणयाऽनूद्यतेति न दोषः। तस्माद् अवच्छेद इति सिद्धम्॥ १९॥ त्वाष्ट्रपात्नीवतस्य पर्यग्निकरणगुणकत्वाधिकरणम्॥ ८॥

अद्रव्यत्वात् केवले कर्मशेषः स्यात्॥ २०॥

न कस्याचिदपि प्रकरणे श्रूयते- एष वै हविषा हविर्यजते योऽदाभ्यं गृहीत्वा सोमाय यजते इति। तथा, परा वा एतस्यायुः प्राण इति योंऽशुं गृह्णातीति। तत्र सन्देहः। किं यागान्तरमेतद्ग्रहणकम्, उत ज्योतिष्टोमयागे ग्रहविधिरिति। किं प्राप्तम्। यागान्तरमिति। कुतः। अपूर्वनामधेयसंयोगात्। न प्रकृतावेतन्नामधेयको यागोऽस्ति, न ग्रहः कश्चिद् योऽभ्यस्येत। तस्माद् यागान्तरम्। ननु द्रव्यदेवतं न श्रूयते। मा भूद् द्रव्यदेवतं, साक्षादेव यजतिशब्दो विद्यते। तस्मात् कर्मान्तरमदाभ्यसंज्ञकम्, अंशुसंज्ञकं च यागं करोतीत्येवं प्राप्तम्॥

एवं प्राप्ते ब्रूमः॥ अद्रव्यदेवताके केवले नामधेये श्रूयमाणे ब्रूमः। ज्योतिष्टोमे एव ग्रहाभ्यासविशेषविधानमिति। कुतः। एतत् तावद् ग्रहस्य नामधेयं, न यागस्य। ग्रहणेन साक्षात्सम्बन्धात्। व्यवहितत्वाद् यागस्य। अंशुरिति च मुक्तसंशयमेव ग्रहनामधेयम्। न च ग्रहभेदे यागभेदो भवति। न च द्रव्यदेवतं श्रूयते। यतो गृह्णातिर्यजिमद्वचनो भवेत्। यदप्युक्तं- साक्षादत्र यजतिशब्दो विधायक इति। नैवं शक्यं कर्मान्तरं विधातुम्। विहितयागवचनो हि सः।

विशेषाभावात् । तस्माद् यजतिना ज्योतिष्टोम एवोच्यत, अंश्वदाभ्यशब्दाभ्यामन्यपरौ ग्रहाभ्यासौ विधीयेते इति सिद्धम् ॥२०॥ अदाभ्यादीनां ग्रहनामताधिकरणम् ॥ ९ ॥

अग्निस्तु लिङ्गदर्शनात् क्रतुशब्दः प्रतीयेत ॥ २१ ॥

अस्त्यग्निः । य एवं विद्वानग्निञ्चिनुते इत्येवं विधाय श्रूयते-अथातोऽग्निमग्निष्टोमेनैवानुयजति, तमुक्थेन, तमतिरात्रेण, तं षोड्शिनेत्येवमादि । तत्र सन्देहः । किमयमग्निशब्दो यागवचनो ज्योतिष्टोमादिभ्य कर्मान्तरं, चिनुते इत्याख्यातेन विधीयते ? उत द्रव्यवचनो ज्योतिष्टोमादिषु गुणविधानमिति । किं प्राप्तम् । यागवचन इति । कुतः । लिङ्गदर्शनात् । लिङ्गं हि दृश्यते । अग्नेः स्तोत्रमग्नेः शस्त्रमिति । तथा, षडुपसदोऽग्नेः चित्यस्य भवन्तीति । यस्य स्तोत्रशस्त्रमुपसदश्च तस्याग्निशब्दो वाचक इति गम्यते यागस्यैतत् सर्वम् । तस्माद् यागवचन इति । ननु लिङ्गमसाधकं, प्राप्तिरुच्यतामिति । अत्रोच्यते । अथातोऽग्निष्टोमेनैवानुयजतीति यागमभिनिर्वर्त्तयतीत्युच्यते । तम् अग्निमिति विशिनष्टि । तस्मादग्निसंज्ञक इति गम्यते । अनुशब्दोऽप्युपसर्गो यजतेर्विशेषक एवमुपपद्यते । यद्यग्नियागः । तस्मात् क्रतुशब्दः प्रतीयेत ॥ २१ ॥ पूर्वपक्षः ॥

द्रव्यं वा स्याच्चोदनायास्तदर्थत्वात् ॥ २२ ॥

द्रव्यं वा अग्निशब्देनोच्येत । कतमद् द्रव्यम् । यदेतज्ज्वलनः अत्र ह्येष प्रसिद्धः । चिनुते इत्येषा हि चोदना चयनार्था, न यजत्यर्थे शक्नोति वदितुम् । चयनेनैनं संस्कुरुते चितौ स्थापयतीति । अनुशब्दश्च पश्चादर्थो भविष्यति । चयने निर्वृत्ते पश्चादग्निष्टोमेन यागेन यजतीति ॥ २२ ॥

तत्संयोगात् क्रतुस्तदाख्यः स्यात्तेन धर्मविधानानि ॥ २३ ॥

यत्तु लिङ्गदर्शनमुक्तं यागवचनोऽग्निशब्द इति । तत् तेष्वेव लिङ्गसंयुक्तेषु वचनेषु, न सर्वत्र । तेषु चित्याग्निसंयोगात् । यागे लक्षणशब्दः । तेन क्रतुवचनानि तद्धर्म्मविधानानीत्यदोषः ॥ २३ ॥ ॥ सिद्धान्तः ॥ अग्निचयनस्य संस्कारताधिकरणम् ॥ १० ॥

प्रकरणान्तरे प्रयोजनान्यत्वम् ॥ २४ ॥

कुण्डपायिनामयने श्रूयते– मासमग्निहोत्रं जुहोति, मासं दर्शपूर्णमासाभ्यां यजते इत्येवमादि। तत्र संदिह्यते। किं नियते अग्निहोत्रे नियतयोश्च दर्शपूर्णमासयोर्मासो विधीयते कालः? अथ किं नियताग्निहोत्रान्नियताभ्याश्च दर्शपूर्णमासाभ्यां कर्मान्तरविधानमिति। किं तावत् प्राप्तम्। नियतेषु कालविधिरिति। कुतः। कालविधिसरूप एष शब्दो मासमिति। कथं कालविधिसरूपता। यदग्निहोत्रं जुहोतीति विदितं, मासमित्यविदितम्। एवञ्चाग्निहोत्रशब्दो दर्शपूर्णमासशब्दश्च न अर्थान्तरवृत्तौ भविष्यतः। तस्मात् कालविधिः। ननु कुण्डपायिनामयनप्रकरणं बाध्येतैवम्। कामं बाध्यताम्। वाक्यं हि बलवत्तरम्॥ एवं प्राप्ते ब्रूमः॥ प्रकरणान्तरे श्रूयमाणं वाक्यं यस्य प्रकरणे, तस्य वाचकं भवितुमर्हति। ननु प्रत्यक्षोऽग्निहोत्रस्य दर्शपूर्णमासयोश्च गुणविधिः। नेत्युच्यते। कथम्। उपसद्भिश्चरित्वेति ह्युक्तेदमभिधीयते– न चोपसदोऽग्निहोत्रस्य दर्शपूर्णमासयोश्च सन्ति। तस्मादशक्यस्तत्र मासविधिः। अथोच्येत– उपसदोऽपि विधीयन्ते इति। तथा गुणविधानार्थेऽस्मिन् वाक्ये अनेकगुणविधानाद् वाक्यं भिद्येत। अस्मिन् पक्षे पुनरतन्त्रम्। अग्निहोत्रशब्दो न कर्म विशेक्ष्यति, तेन वाक्यभेदो न भविष्यति। तस्मात् कर्मान्तरमिति सिद्धम्॥ २४॥ मासाग्निहोत्रादीनां कर्मान्तरताधिकरणम्॥ ११॥

फलं चाकर्मसन्निधौ॥ २५॥

अनारभ्य किञ्चिच्छ्रूयते– आग्नेयमष्टाकपालं निर्वपेद् रुक्कामः, अग्नीषोमीयमेकादशकपालं निर्वपेद् ब्रह्मवर्चसकामः, ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकाम इति। अत्र सन्दिह्यते। किं प्राकृतेष्वाग्नेयादिषु फलं विधीयते, उत प्राकृतेभ्यः कर्मान्तराण्येतानि। किं प्राप्तम्। प्राकृतेषु फलविधिरिति। कुतः। विदिता आग्नेयादयः प्रत्यभिज्ञायन्ते। तस्मात् तेषामनुवादः फलसम्बन्धार्थ इति॥ एवं प्राप्ते ब्रूमः॥ फलं च भेदकमकर्मसन्निधौ श्रूयमाणम्। कथम्। अनुवादे सति न शक्येत फलं विधातुम्। विधायकस्याभावात्। न हि अविधीयमानो ह्युपायो रुचो भवतीति गम्यते। अपिच रुक्कामे अत्र विधीयमाने। कामस्यानित्यत्वादाग्नेयादीनां नित्यत्वात् सम्बन्धो

भावकल्पेत । एवं सर्वत्र । तस्मात् कर्मान्तराणि ॥ २५ ॥ ॥ आग्नेयादिकाम्येष्ट्यधिकरणम् ॥ १२ ॥

सन्निधौ त्वविभागात् फलार्थेन पुनः श्रुतिः ॥२६॥

अस्त्यवेष्टिः– आग्नेयोऽष्टाकपालः पुरोडाशो भवतीत्येवमादिः। तां प्रकृत्योच्यते, एतयाऽन्नाद्यकामं याजयेदिति । तत्र सन्देहः । किं कर्मान्तरमवेष्टेः, उतावेष्टिरेवेति । किं प्राप्तम् । कर्मान्तरमिति । उक्तेन न्यायेन । एवं प्राप्ते ब्रूमः । सन्निधौ फलार्थेन पुनः श्रुतिरवेष्टेरेव, न कर्मान्तरमिति । कुतः । अविभागात् । एतयेत्येष शब्दो न शक्नोत्यवेष्ट्या विभक्तं यागमन्यं वक्तुम् । सन्निहितस्य प्रतिनिर्देशक एष शब्दः। तस्मादवेष्टेरेवान्नाद्यकामस्य विधीयते इति । किं प्रयोजनम् । यद्यवेष्टिराग्नेयादीनि हवींषि।अथ कर्मान्तरम्, अन्यहविष्को याग इति ॥ ॥ २६ ॥ ॥ अवेष्टेरन्नाद्यफलकत्वाधिकरणम् ॥ १३ ॥

आग्नेयसूक्तहेतुत्वादभ्यासेन प्रतीयेत ॥ २७ ॥

दर्शपूर्णमासयोः, आग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवतीति विधाय पुनरुच्यते– आग्नेयोऽष्टाकपालोऽमावास्यायां भवतीति । तत्र सन्देहः । किममावास्यायां द्विराग्नेयेन यष्टव्य, उत सकृदिति । किं प्राप्तम् । आग्नेयसूक्तहेतुत्वादभ्यासेन प्रतीयते, एकस्यैवं पुनःश्रुतिरविशेषादनर्थकं हि स्यादिति ॥२७॥ पूर्व०॥

अविभागात्तु कर्मणा द्विरुक्तेर्न विधीयते ॥ २८ ॥

नैतदस्ति, पुनरभ्यसितव्य आग्नेय इति । कुतः । नाभ्यासस्य वाचकः शब्दोऽस्तीति । नन्वाग्नेयः पुनरुच्चरितः परं कर्म्म विधास्यति । नेति ब्रूमः । शब्दः पुनरुच्चरितो न पुनरर्थः कर्त्तव्य इति शक्नोति वदितुम् । योऽस्य प्रथममुच्चारितस्यार्थः शतकृत्वोऽप्युच्चारितस्य स एवार्थो भविष्यति, नान्यः । ननु विहितमेव पुनरविशिष्टं विदधदनर्थको भवति । भवतु काममनर्थकत्वं, न त्वन्यं शक्नोति वदितुम् । भवेदुपपन्नमनर्थकत्वं, न त्वर्थान्तरवचनता । तस्मान्न द्विरभ्यस्येतेति ॥ २८ ॥

अन्यार्था वा पुनःश्रुतिः ॥ २९ ॥

अथ वा, नानार्थिका पुनःश्रुतिः । अर्थवादार्था भविष्यतीत्युच्यते । किमर्थवादेन प्रयोजनम् । यदा पूर्वेणैव वाक्येन सार्थवादकेन

विहित आग्नेयः कमन्यमर्थं विधातुं श्रुतिः प्रयुज्येत श्रुतिमात्रं यत्र कस्यचिद्विधानार्थं तदनर्थकमित्युक्तम् । आम्नायस्य क्रियार्थत्वादार्थक्यमतदर्थानामिति । श्रुतश्चाश्रुतश्च तावानेव सोऽर्थः । यथा श्रुता च अश्रुता च देवता अङ्गभावं साधयति, एवमेतदिति । तदुच्यते— अन्यार्था वा पुनःश्रुतिः ॥ न आग्नेयं विधातुम् । ऐन्द्राग्नविधानार्था । आग्नेयोऽष्टाकपालोऽमावास्यायां भवत्येव । न केवलेनाग्निना स साधुर्भवतीन्द्रसहितोऽग्निः समीचीनतरः । तस्मादैन्द्राग्नः कर्त्तव्य इति ॥ २९ ॥ ॥ सिद्धान्तः ॥ आग्नेयद्विरुक्तेः स्तुत्यर्थताधिकरणम् ॥ १४ ॥ इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये द्वितीयस्य अध्यायस्य तृतीयः पादः ॥ २ ॥ ३ ॥

अथ द्वितीयाध्यायस्य चतुर्थः पादः ॥ २ ॥ ४ ॥

यावज्जीविकोऽभ्यासः कर्मधर्मः प्रकरणात् ॥ १ ॥

बह्वृचब्राह्मणे श्रूयते— यावज्जीवमग्निहोत्रं जुहोतीति, यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति । अत्र संदेहः । किं कर्म्मधर्मोऽभ्यासो यावज्जीविकता, उत कर्त्तृधर्मो नियमश्चोद्यते यावज्जीविकतेति । कथं कर्म्मधर्मोऽभ्यासः, कथं वा कर्त्तृधर्मो नियम इति । यदि जुहोतिरनुवादः, यावज्जीवमिति विधिस्ततः कर्म्मधर्मोऽभ्यासः । यदि विपरीतं, ततः कर्तृधर्मो नियम इति । किं तावत् प्राप्तम् । कर्म्मधर्मोऽभ्यासः । कुतः । प्रकरणात् । यदीयं वचनव्यक्तिः । जुहोतियजतिशब्दावनुवादौ, यावज्जीवमिति च विधिस्ततः प्रकरणमनुगृह्यते । तस्मादभ्यासः । एवं कृत्वा सत्रसंस्तवो युक्तो भविष्यति । जरामर्यं वा एतत् सत्रं यदग्निहोत्रं, दर्शपूर्णमासौ चेति दीर्घकालसामान्यात् । तस्मादभ्यासः ॥ १ ॥ ॥ पूर्वपक्षः ॥

कर्तुर्वा श्रुतिसंयोगात् ॥ २ ॥

अत्र ब्रूमो, यावज्जीविकोऽभ्यासो न स्यात्, कर्तुर्धर्मो नियमश्चोद्यते इति । कुतः । श्रुतिसंयोगात् । एवं श्रुतिपरिच्छिन्नोऽर्थो भविष्यति । इतरथा लक्षणा स्यात् । कथम् । यावज्जीवनं, तावता कालेन कुर्यादिति । तदेतत् प्रदोषपरिसमाप्तमग्निहोत्रमनभ्यस्य, न शक्यते यावज्जीवनकालेन कर्तुम् । पौर्णमास्यमावास्यापरिसमाप्तौ च दर्शपूर्णमासौ यद्युच्येत, जीवनकालस्यैकदेशेऽपि कृतं तेन कालेन कृतं भव-

तीति । नैतदेवम् । अर्थप्राप्तं हि तद् न विधातव्यं शब्देन । जीवनपरिमितः कालो यस्तेन परिसमापयितव्यमित्यर्थादभ्यासः । स हि कर्त्तव्यतया श्रूयते । न चासौ जुहोति–यजतिभ्यामुच्यते । लक्षणया तु गम्यते । यावज्जीवं जुहुयात्, यावज्जीवमभ्यस्येदिति । श्रुतिश्च प्रकरणाद् बलीयसी । यदि इयं वचनव्यक्तिरस्य वाक्यस्य, यावज्जीवमित्यनुवादो, जुहोति यजतीति च विधानमित्येवं यजतिजुहोतिशब्दौ स्वार्थावेव भविष्यतः, यावज्जीवशब्दोऽपि जीवनवचन एव, नाभ्यासलक्षणो भविष्यतीति जीवनं निमित्ते कर्म्म विधीयते । जीवँश्चेद् होतव्यमिति । जीवनं निमित्तं, न कालः । नियतनिमित्तत्वान्नियतं कर्म्म तेनोच्यते । कर्त्तुर्धर्मो नियमश्चोद्यते इति ॥ २ ॥ ॥ सि० ॥

लिङ्गदर्शनाच्च कर्म्मधर्म्मे हि प्रक्रमेण नियम्येत तत्रानर्थकमन्यत् स्यात् ॥ ३ ॥

लिङ्गञ्च भवति । अपि ह वा एष स्वर्गाल्लोकाच्छिद्यते यो दर्शपूर्णमासयाजी पौर्णमासीममावास्यां वा अतिपातयेदिति । कथं लिङ्गम् । कर्म्मधर्म्मे हि प्रक्रान्तं सत्रं यावज्जीवनकालेन परिसमाप्येत, न तत्र कालातिपातः स्यात् । तत्र चानर्थकमन्यत् स्यात् प्रायश्चित्तादि विधीयमानम् ॥ ३ ॥

व्यपवर्गश्च दर्शयति कालश्चेत् कर्मभेदः स्यात् ॥ ४ ॥

व्यपवर्गस्य समापनस्य दर्शनं भवति, दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति । यदि दर्शपूर्णमासाभ्यामिष्ट्वा सोमस्य कालोऽस्ति, व्यक्तं न यावज्जीवनकालेन तौ परिसमाप्येते । अथ जीवनं निमित्तम्, उपपद्यते कर्म्मभेदः । दर्शपूर्णमासौ परिसमाप्य सोमं कर्मान्तरं कुर्य्यादिति ॥ अपि च, आहिताग्निर्वा एष योऽग्निहोत्रं जुहोति न दर्शपूर्णमासौ यजेत, या आहुतिभाजो देवतास्ता अनुध्यायिनीः करोतीत्यनुध्यायिनीवचनं भवति । नियतो य आहुतिभागस्तस्मिन् अदीयमाने अनुध्यायिनीवचनं भवति । यस्त्वनियत आहुतिभागस्तमनुध्यायन्ति, इदं नो भविष्यतीति । नियतश्च भागो नियमपक्षे भवति, न काम्यपक्षे । कर्म्मधर्म्मे च काम्यमग्निहोत्रञ्च दर्शपूर्णमासौ च । तस्मान्नियमपक्षः । अपि च श्रूयते—

जरामर्यं वा एतत् सत्रं यदग्निहोत्रं दर्शपूर्णमासौ च, जरया ह वा

एताभ्यां निर्मुच्यते मृत्युना चेति जरामरणनिर्मोचनावधारणवचनं च नियमपक्षे उपपद्यते । काम्यपक्षे ह्यप्रयोगादपि मुच्येत ॥ ४ ॥

अनित्यत्वात्तु नैवं स्यात् ॥ ५ ॥

तु-शब्दोऽन्वाचये इतश्च पश्यामः, कर्तुर्धर्मो नियमश्चोद्यते इति । यदि पूर्वस्य होमस्य गुणविधिर्भवेत्, स एवैकः पूर्वोऽग्निहोत्रहोमोऽनित्यः स्यात्, कामसंयोगेन श्रुतो, नान्यः कश्चिन्नित्यः । तत्र लिङ्गं विरुद्ध्येत । जरामर्यं वा एतत् सत्रं यदग्निहोत्रं दर्शपूर्णमासौ, जरया वा एताभ्यां निर्मुच्यते मृत्युना चेति । कथं विरुद्ध्यते । जरामरणनिर्मोचनावधारणवचनं नियमपक्षे उपपद्यते । काम्यपक्षे अप्रयोगादपि मुच्येत ॥ ५ ॥

विरोधश्चापि पूर्ववत् ॥ ६ ॥

इतश्च पश्यामो, न पूर्वाभ्यासो गुणश्चोद्यते इति । कुतः । विरोधात् । विरोधो भवति । दर्शपूर्णमासविकाराः सौर्यादयोऽपि यावज्जीवमभ्यसितव्या भवेयुः । सोऽनारभ्यार्थः प्रतिज्ञातः स्यात् । अतोऽपि पश्यामो नियम इति । सत्रसंस्तवश्च सन्ततभावमुपपत्स्यते ॥ ६ ॥ ॥ हेतुः ॥

कर्तुस्तु धर्मनियमात् कालशास्त्रं निमित्तं स्यात् ॥ ७ ॥

यदि कर्त्तुर्धर्मो नियमश्चोद्येत, ततो जीवनं निमित्तम् । जीवने निमित्ते कर्म्म विधीयते । तत्र प्रयोगे परिसमाप्तं कर्म्म । तथा व्यपवर्गस्य दर्शनमवक्लृप्तम्भवति । तस्मात् कर्तृधर्मो नियमश्चोद्यते इति सिद्धं भवति ॥ ७ ॥ युक्तिः ॥ यावज्जीविकाग्निहोत्राधिकरणम् ॥ १ ॥

नामरूपधर्मविशेषपुनरुक्तिनिन्दाऽशक्तिसमाप्तिवचनप्रायश्चित्तान्यार्थदर्शनाच्छाखान्तरेषु कर्मभेदः स्यात् ॥ ८ ॥

इह शाखान्तराण्युदाहरणम् । काठकं, कालापकं, पैप्पलादकम् । इत्येवमादीनि । तत्र सन्देहः । किमेकस्यां शाखायां यत् कर्म्म अग्निहोत्रादि श्रूयते, तच्छाखान्तरे पुनः श्रूयमाणम्भिद्येत तस्माद्, उत न भिद्येत । भिद्येतेति पश्यामः । कुतः । नामभेदात् । एकं काठकं नाम, अन्यत् कालापकं नाम । एवं नामभेदाद्भेदः । ननु ग्रन्थनामैतत् । सत्यम् ।

कर्मणामदीति ब्रूमः । कर्मभिरप्येवमादीनां सामानाधिकरण्यमेकाविभक्तित्वञ्चेति ॥ रूपभेदाच्च ॥ एकस्यां शाखायामग्नीषोमीयमेकादशकपालमामनन्ति, एकस्यां द्वादशकपालम् । एवं भिन्नरूपं, कथमिव न कर्मान्तरं भविष्यति ॥ धर्मविशेषाच्च ॥ कारीरीवाक्यान्यधीयानास्तैत्तिरीया भूमौ भोजनमाचरन्ति अपरे शाखिनो नाचरन्ति । तथा अग्निमधीयानाः केचिदुपाध्यायस्योदकुम्भानाहरन्ति, अपरे न। अश्वमेधमधीयानाः केचिदश्वस्य घासमाहरन्ति, अपरे न । परेऽन्यं धर्ममाचरन्ति । अश्वघासादेरेकेषामुपकारम् आकाङ्क्षति अश्वमेधादिः, एकेषां नाकाङ्क्षति । स एवैकः कथं नाकाङ्क्षेत, कथं वाऽन्यदाकाङ्क्षितुम् अर्हति । अतो गम्यते-अन्यदिति ॥ पुनरुक्तिप्रसङ्गाच्च ॥ यदि सर्वशाखाप्रत्ययमेकं कर्म, एकस्यां शाखाया विहितस्य कर्मणः शाखान्तरे वचनं पुनरुक्तमनर्थकं स्यात् । न तु भेदपक्षे एष दोषोऽस्ति । तस्मादपि कर्मभेदः ॥ निन्दावचनाच्च ॥ प्रातः प्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति ये अग्निहोत्रं दिवाकीर्त्यम् अदिवा कीर्त्तयन्तः सूर्यो ज्योतिर्न तदा ज्योतिरेषामिति केचिच्छाखिनोऽनुदितहोमं निन्दन्ति। अपरे पुनरुदितहोमं निन्दन्ति । यथाऽतिथये प्रद्रुतायान्नमाहरेयुस्तादृक् तद् यदि उदिते जुह्वतीति सर्वशाखाप्रत्यये विरुद्धं, न तु कर्म्मभेदे, तस्मादपि भेद इति ॥ अशक्तेश्च ॥ न शक्नुयुः खल्वपि सर्वशाखाप्रत्ययमुपसंहर्त्तुम् । तत्रानारभ्योऽर्थो विधीयते इति प्रतिज्ञातं भवेत् । शक्यन्तु कर्म्मभेदे । अतः कर्म्मभेद इति ॥ समाप्तिवचनाच्च ॥ असमाप्तेऽपि समाप्तेर्वचनं भवति । केचिदाहुः, अत्रास्माकमाग्नः परिसमाप्यते इति । अपरेऽन्यपरिसमाप्तिं व्यपदिशन्ति । तदेककर्म्मत्वे नोपपद्यते न हि तत्र च परिसमाप्येत, अन्यत्र न । भेदे तु युक्तम् । तस्माद् भेद इति ॥ प्रायश्चित्तविधानाच्च ॥ केचिदनुदितहोमव्यतिक्रमे प्रायश्चित्तमामनन्ति, केचिदुदितहोमव्यतिक्रमे, वृद्धे च प्रायश्चित्तम् । नच कर्मैकत्वे उभयथा वृद्धिः सम्भवति। कर्मभेदे तु यदनुदिते होमकर्म, तदुदिते वृद्धमितरदप्युदिते । तस्मादपि भेदः ॥ अन्यार्थदर्शनाच्च ॥ इदं श्रूयते- यदि पुरा दिदीक्षाणाः स्युः यदि वैषां गृहपतिः गृहपतेर्वानुसत्रिण इति, त एनमत्र बृहत्सामानं क्रतुमुपेयुरुपेतं ह्येषां रथन्तरम् । अथ यदि अदिदीक्षाणा इति इष्टवतामनिष्टपूर्वाणां च द्वादशाहे दर्शनमुपपद्यते यदि कर्म-

भेदः । एककर्म्मत्वेनावकल्पते । कथम् । ताण्ड्यके श्रूयते । एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमो, य एतेनानिष्ट्वाऽथान्येन यजेत गर्त्तपत्यमेव तज्जायेत प्रवामीयते इति । तत् सर्वत्र स्यात् । तत्रादिदीक्षाणां द्वादशाहे दर्शनं नोपपद्यते । तस्मादपि कर्म्मभेदः ॥ अथापरं लिङ्गदर्शनम् ॥ यत्पक्षसम्मितां मिनुयात् कनीयांसं यज्ञक्रतुमुपेयात् कनीयसीं प्रजां कनीयसः पशून् कनीयोऽन्नाद्यं पापीयान् स्यात्, अथ यदि वेदिसम्मित्या मिनोतीति पक्षसम्माने प्रतिषिद्धे वेदिसम्मानस्य दर्शनं भवति । तत्तु कर्म्मभेदे उपपद्यते । पाक्षिकस्य वेदिसम्मानस्य दर्शनम् एककर्म्मत्वे नोपपद्यते । कथम् । एके हि समामनन्ति । रथाक्षमात्राणि यूपान्तरालानि भवन्तीति । तत् सर्वत्र स्यात् तत्र च नो पक्षसम्मानं, नो वेदिसम्मानं स्यात् । वेदिसम्मानदर्शनं नोपपद्यते । तस्मादपि कर्म्मभेदः ॥ अपरश्च लिङ्गदर्शनम् ॥ केषाञ्चिज्ज्योतिष्टोमे श्रूयते । द्वे संस्तुतानां विराजमतिरिच्येते इति । परेषां तिस्रः संस्तुतानां विराजमतिरिच्यन्ते इति । एककर्म्मत्वे विरोधः । नानाकर्म्मत्वे कस्मिँश्चिज्ज्योतिष्टोमे द्वे, कस्मिँश्चित् तिस्रः । तस्मात् कर्म्मभेद इति ॥ अपि च सारस्वते श्रूयते । ये पुरोडाशिनस्ते उपविशन्ति ये सान्नायिनस्ते वत्सान् वारयन्ति । सान्नायिन इष्टप्रथमयज्ञाः । पुरोडाशिनो विपरीताः । उभयेषां सारस्वतं दर्शनमवकल्पते कर्म्मभेदे । एककर्म्मत्वे सर्वेषां ज्योतिष्टोमपूर्वत्वं स्यात् । तत्र दर्शनं नोपपद्यते ॥ अपि च श्रूयते । उपहव्यो निरुक्तः, अग्निष्टोमो यज्ञः, रथन्तरसामा, अश्वः श्यावो दक्षिणा । परेषां श्रूयते । उपहव्योऽनिरुक्तः, उक्थो यज्ञो बृहत्सामा, अश्वः श्वेतो रुक्मललाटो दक्षिणेति । कर्म्मैकत्वं रथन्तरवचनं बृहद्वचनं चानर्थकम् । शाखाद्वयप्रत्ययत्वात् । बृहत्सामा रथन्तरसामा वा स्यात् । स चायं प्रकृतित एवँल्लक्षणकः प्राप्तः । नानाकर्म्मत्वे त्वन्यो बृहत्सामाऽन्यो रथन्तरसामेति युक्तं भवति । तस्माच्छाखान्तरे कर्म्मभेदो भवितुम् अर्हति ॥ ८ ॥ ॥ पूर्वपक्षः ॥

एकं वा संयोगरूपचोदनाख्याविशेषात् ॥ ९ ॥

नचैतदस्ति, यदुक्तं शाखान्तरेषु कर्म्मभेद इति । सर्वशाखाप्रत्ययं सर्वब्राह्मणप्रत्ययश्चैकं कर्म्म । अर्थसंयोगस्याविशेषात् । तदेव

प्रयोजनमुद्दिश्य तदेव विधीयमानं प्रत्यभिजानीमः। रूपमप्यस्य तदेव द्रव्यदेवतम्। पुरुषप्रयत्नश्च तादृश एव चोद्यते। नामधेयञ्चाविशिष्टम्। तेन तदेव कर्म्म सर्वशाखादिष्विति प्रत्ययः ॥ ९ ॥ सिद्धान्तः ॥

न नाम्ना स्यादचोदनाभिधानत्वात् ॥ १० ॥

यदुक्तं नामभेद इति। परिहृतं तद् ग्रन्थनामन इति। अथ यदुक्तं, कर्मणोऽपि नामसामानाधिकरण्यदर्शनादिति। नैष दोषः। ग्रन्थसंयोगात् कर्म्म काठकादि, न कर्म्मसंयोगाद् ग्रन्थः काठकः। कथं गम्यते। यत् कर्म काठकादिसंयुक्तं तत् काठकादिशब्देनोच्यते। किमतोऽपि यद् ग्रन्थसंयोगात् काठकं कालापकं कर्मोच्यते। एकत्वेऽपि काठकग्रन्थसंयोगात् काठकं कालापकग्रन्थसंयोगात् तु कालापकं भविष्यति ॥ १० ॥ ॥ पूर्वपक्षनिरासः ॥

सर्वेषाञ्चैककर्म्यं स्यात् ॥ ११ ॥

यदि शब्दभेदाद्भेदो भवेत्, शब्दैक्यात्तर्हि कर्मैक्यं भवेत्। तत्र काठकशब्दाभिधानादैक्यं भवेत्। अग्निहोत्रस्य दर्शपूर्णमासयोर्ज्योतिष्टोमस्य च तच्छब्दत्वात्। न चैतदेवम्। तस्मादपि अभेदः ॥११॥

कृतकं चाभिधानम् ॥ १२ ॥

इदानीन्तनञ्चैतदभिधानं भवेत्। अस्य न पूर्वमासीद्। यतः प्रभृति कठस्य प्रकृष्टं वचनं, ततः प्रभृति प्रवृत्तम्। पूर्वं नासीद्भेदः, इदानीं भेद इति विरुद्धम् ॥ १२ ॥ ॥ युक्तिः ॥

एकत्वेऽपि परम् ॥ १३ ॥

एककर्मत्वेऽपि रूपभेदो भवति वचनात्। न च वाचनिके रूपभेदे, असत्यामपि भेदबुद्धौ कर्मणां भेदोऽध्यवसीयेत ॥ १३ ॥

विद्यायां धर्म्मशास्त्रम् ॥ १४ ॥

अथ यो धर्मविशेष उक्तो विद्याग्रहणार्थः, स न कर्मण उपकारकः। कथं गम्यते। श्रुत्यादीनामभावाद् विद्यासंयोगाच्च न कर्मप्रयुक्त इति ॥ १४ ॥ ॥ पूर्वपक्षनिरासः ॥

आग्नेयवत् पुनर्वचनम् ॥ १५ ॥

अथ यदुक्तं–यथाऽमावास्यायामाग्नेयस्य पुनरुक्तदोषान्मध्यमः पक्षो निरस्त एवमयमपि तस्मादेव दोषात् कर्मैकत्वपक्षो निरसितव्य

इति । एतत परिहर्त्तव्यमित्याभापान्तं सूत्रम् ॥ १५ ॥ ॥ आशङ्का ॥

अद्विर्वचनं वा श्रुतिसंयोगाविशेषात् ॥ १६ ॥

नैव खल्वेतद् द्विर्वचनम् । स एवायमर्थः पुनः श्रावितोऽग्निहोत्रादिर्बहुकृत्वो बहुभिस्तु पुरुषैः । न चैकोऽर्थो बहुभिरुच्यमानः पुनरुक्तो भवति । यदि भवेद्, एकस्मिन्नेव वेदे बहुभिरुच्यमाने भवेत् । तस्मान्न बहुकर्मसमवायोऽयम्, एकमेवेदं कर्मेति ॥ १६ ॥ आ० नि० ॥

अर्थासन्निधेश्च ॥ १७ ॥

अर्थासन्निधेश्च शाखाशब्द उपपन्नो भविष्यति । शाखा इव ह्येमाः शाखाः । तद् यथा वृक्षस्य शाखाः, एवमिहापि वृक्षस्थानीयस्य वेदस्य शाखाः । किं शाखासारूप्यम् । यथा नानावस्थानम् । नचैकैकस्यां कृत्स्नं पुष्पं फलं सन्निहितम् । एवमिहापि, नैकैकस्यां कृत्स्नं गुणकाण्डं सन्निहितमित्यर्थासन्निधेः शाखाशब्दोपपत्तिः । तस्मादप्येकं कर्मेति ॥ १७ ॥

न चैकं प्रति शिष्यते ॥ १८ ॥

न च यत् काठकेऽग्निहोत्रं तत् काठकमेवैकं पुरुषं प्रति विधीयते । तैत्तिरीयस्यापि तद्विहितमेव । पुरुषविशेषवचनाभावात् यच्चाग्निहोत्रस्य किञ्चिदङ्गं विधीयते, सर्वावस्थस्य तदग्निहोत्रस्य । यच्च काठकस्याग्निहोत्रं तच्च तैत्तिरीयकस्येति । विशेषवचनाभावात् । तस्मात् सर्वशाखाभिरेकं समाप्तं कर्मोच्यते इति ॥ १८ ॥

समाप्तिवच्च सम्प्रेक्षा ॥ १९ ॥

अत्रास्माकमग्निः परिसमाप्यते इत्युत्प्रेक्षितारो भवन्ति । अन्वारोहेषु मैत्रायणीयानामग्निः परिसमाप्यते, अस्माकं तेषु न परिसमाप्यते इति । यदि अन्यदेव मैत्रायणीयानामन्यच्च तेषां, कथं ते ब्रूयुरेष्वस्माकं न परिसमाप्यते इति । एकत्वमुपपन्नं, तेषामपि हि ते सन्ति ॥ १९ ॥ ॥ युक्तिः ॥

एकत्वेऽपि पराणि निन्दाशक्तिसमाप्तिवचनानि ॥२०॥

न हि निन्दा निन्द्यं निन्दितुं प्रयुज्यते । किं तर्हि निन्दितादितरत् प्रशंसितुम् । तत्र न निन्दितस्य प्रतिषेधो गम्यते, किन्त्वितरस्य विधिः । तत्र एकस्मिन्नग्निहोत्रे द्वौ कालौ विहितौ विकल्प्येते । अतो न कश्चिद्विरोध ॥

तथा असमर्थानामेकस्मिन्नपि वेदे विहितकृत्स्नमङ्गजातमुपसंहर्तुमशक्तिः । समर्थानान्तु सर्वशाखाभ्योऽप्यागमितमधिकं विधिमुपसंहर्तुं शक्तिरस्तीति तेनैककर्मत्वेऽपि न विरुद्धमिति ॥ तथैकस्मिन्नपि कर्मणि किञ्चिद् वस्तु समाप्तमिति कृत्वा समाप्तिशब्दः प्रयुज्यते । यथा आध्वर्यवे समाप्ते ज्योतिष्टोमस्य, समाप्तो ज्योतिष्टोम इति भवति ॥ २० ॥ ॥ पूर्वपक्षनिरासः ॥

प्रायश्चित्तं निमित्तेन ॥ २१

यदुक्तम्- उदितहोमस्यापि प्रायश्चित्तान्ता नावृद्धता गम्यते, अनुदितहोमस्यापि । तदेकत्वे विरुद्ध्यते । अविरुद्धं नानात्वे इति । तत् परिहर्त्तव्यम् ॥ आभाषान्तं सूत्रम् ॥ २१ ॥ ॥ आशङ्का ॥

प्रक्रमाद्वा नियोगेन ॥ २२ ॥

वाशब्दः पक्षं व्यावर्त्तयति । नैष दोषः । उदिते होष्यामीति प्रक्रान्ते अन्यथा क्रियमाणे भवति दोषः । तत्र प्रायश्चित्तस्य विषयो भविष्यतीति कर्म्मैकत्वेऽपि न दोषः ॥ २२ ॥ ॥ आशङ्कानिरासः ॥

समाप्तिः पूर्ववत्त्वाद् यथाज्ञाते प्रतीयेत ॥ २३ ॥

पूर्ववति समाप्तिवचनं भवति । यत् प्रारब्धं तत् परिसमाप्यते । तत्रास्माकं परिसमाप्तोऽग्निरिति योऽस्माभिर्ज्ञायते, परिसमाप्यते । प्रारब्धश्चेत्यभिप्रायः ॥ २३ ॥

लिङ्गमविशिष्टं सर्वशेषत्वान्न हि तत्र कर्मचोदना तस्माद् द्वादशाहस्याहारव्यपदेशः स्यात् ॥ २४ ॥

यदुक्तं- यदि पुरा दिदीक्षाणा इति द्वादशाहे इष्टप्रथमयज्ञानामनिष्टप्रथमयज्ञानां च दर्शनं कर्मभेदे उपपद्यते, न सर्वशाखाप्रत्ययैककर्म्मणीति । नैष दोषः । यदि दिदीक्षाणा द्वादशाहेन, अदिदीक्षाणा द्वादशाहेनेत्येवं तत् । न हि सामवेदे ज्योतिष्टोमस्य विधानम् । किमतोऽपि । यत्र विहितस्तत्रानूद्यते, तेन कर्म्मभेदेऽपि सर्वज्योतिष्टोमानामेष धर्म्मः प्राथम्यं नाम । अतो नानाकर्म्मपक्षेऽपि अवश्यं द्वादशाहस्याहारव्यपदेशः कल्पनीयस्तस्माददोषः ॥ २४ ॥

द्रव्ये चाचोदितत्वाद्विधीनामव्यवस्था स्यान्निर्देशाद् व्यवतिष्ठेत तस्मान्नित्यानुवादः स्यात् ॥ २५ ॥

द्रव्ये चाग्नावचोदितत्वादेकादशिन्याः सम्मानपरिमाणं प्रति नैषा व्यवस्था स्यात् । नैवाग्नावेकादशिनी चोद्यते । कुतः । पक्षसम्मानं वेदिसम्मानं वा स्यात् । द्वयमप्येतत् परार्थं कीर्त्यते, पश्वेकादशिनीविधानार्थम् । यदि पक्षसम्मिता स्यादयं दोषः स्यात् । वेदिसम्माने न दोषो भवेत् । क एतत् सङ्कटमध्यवमानमर्हति । एकस्मिन् यूपे एकादश पशवो नियोक्तव्या इति । वाचस्तोमादिषु तु यूपैकादशिन्यामस्य नित्यानुवादत्वाद्रथाक्षमात्राण्येव यूपान्तरालानि भविष्यन्ति । नित्यानुवादत्वाच्चासत्यपि पक्षसम्माने वेदिसम्माने वैकादशिनीविधानार्थं वचनमुपपद्यत एवेति न दोषः ॥ २५॥

विहितप्रतिषेधात् पक्षेऽतिरेकः स्यात् ॥ २६ ॥

अतिरात्रे गृह्णाति षोड़शिनमिति विहितः षोड़शी, नातिरात्रे गृह्णाति षोड़शिनमिति प्रतिषिद्धः । तेन पक्षे द्वयोः स्तोत्रीययोरतिरेकः, पक्षे तिसृणाम् । तस्माददोषः । कथं पुनरयं द्वयोस्तिसृणां वा अतिरेकः । त्रिवृद्बहिष्पवमानं, तत्तावन्नवकम् । पञ्चदशान्याज्यानि, तानि तावच्चत्वारि, तेन सा षष्टिः, पञ्चदशो माध्यन्दिनः पवमानः । तया पञ्चदशसंख्यया सह पूर्वया च नवसंख्यया चतुरशीतिः । सप्तदशानि पृष्ठानि चत्वारि, सप्तदश आर्भवः पवमानः, पञ्च सप्तदशकानि तानीति पञ्चाशीतिः । पूर्वया चतुरशीत्या सहैकोनसप्ततिशतम् । एकविंशं यज्ञायज्ञियं, तयैकविंशत्या सह तस्य नवतिशतं स्तोत्रिया इति ब्राह्मणवादः । अग्निष्टोममात्रमभिप्रेत्योच्यते, सा विराट् सम्पूर्णा विराडिति दर्शकाख्याः । त्रय एकविंशका उक्थपर्य्यायाः, सा त्रिषष्टिः । एकविंशः षोड़शी । तयैकविंशत्या सह चतुरशीतिः । पञ्चदशका रात्रिपर्य्यायास्त्रयः । तत्रैकैकपर्यायश्चतुःस्तोत्रः । तदशीतिशतं सम्पूर्णा विराट् । त्रिवृद्रथन्तरं पञ्चसाम, तन्नवकम् । ततश्चतुरशीतेरेकं नवकमागच्छति । तथा तिस्रः संस्तुतानां विराजमतिरिच्यन्ते । यदा षोड़शी न गृह्यते, तदा एकविंशत्या विना द्वे संस्तुतानां विराजमतिरिच्येते । एवमेककर्मत्वेऽपि लिङ्गमुपपद्यते ॥ २६ ॥

सारस्वते विप्रतिषेधाद् यदेति स्यात् ॥ २७ ॥

यदुक्तं, पुरोडाशिनां सान्नाय्यिनां च सारस्वते दर्शनं भवतीति ।

ज्योतिष्टोमपूर्वकत्वात् सर्वकर्म्मणां विप्रतिषिद्धमेतदिति । तेन यदा सान्नायिन इति कल्प्यते ॥ २७ ॥ ॥ पूर्वपक्षनिरासः ॥

उपहव्येऽप्रतिप्रसवः ॥ २८ ॥

अथ यदुक्तं, उपहव्ये बृहद्रथन्तरविधानं प्रकृतिप्राप्तमेव । एककर्म्मत्वे प्रतिप्रसवतयाप्यसम्भवाद्विधीयमानमनर्थकं स्यादिति । तत् परिहर्तव्यम् । आभाषान्तं सूत्रम् ॥ २८ ॥ ॥ आशङ्का ॥

गुणार्था वा पुनः श्रुतिः ॥ २९ ॥

यदा रथन्तरसामा, तदा अश्वः श्वेतो दक्षिणा, यदा बृहत्सामा तदा रुक्मललाट इति ॥ २९ ॥ ॥ आशङ्कानिरासः ॥

प्रत्ययश्चापि दर्शयति ॥ ३० ॥

यदा न सर्वशाखाप्रत्ययमेकं कर्मेति, कथमेकस्यां शाखायां समाम्नायतेऽन्यस्यां गुणो विधीयते । यथा मैत्रायणीयानां समिदादयः प्रयाजा न समाम्नायन्ते, अथ च गुणाः श्रूयन्ते– ऋतवो वै प्रयाजाः समानीय होतव्या इति । तथा येषां शाखिनां, कुटरुरसीत्यश्मादानमन्त्रो नाम्नातस्तेषामपि हि दृश्यते– कुक्कुटोऽसीत्यश्मानमुपादत्ते, कुटरुरसीति वेति । तस्मादेकं कर्म्मेति प्रतीमः ॥ ३० ॥युक्तिः

अपि वा क्रमसंयोगाद्विधिपृथक्त्वमेकस्यां व्यवतिष्ठेत ॥ ३१ ॥

यो ह्यन्यशाखावस्थितान् विधीनुपसंहरति, स स्वशाखाहितं क्रममुपरुणद्धीति । तेन शाखान्तरेषु कर्म्मभेद इति ॥ ३१ ॥ आ० ॥

विरोधिना त्वसंयोगादैककर्म्ये तत्संयोगाद्विधीनां सर्वकर्मप्रत्ययः स्यात् ॥ ३२ ॥

उच्यते । नैष शाखान्तरविहितानामैककर्म्ये सति विरोधिना संयोगः । न हि क्रमो वाक्येन विरुध्यते । दुर्बलो हि क्रमः । बलवद्वाक्यम् वाक्येन च शाखान्तरीयाणामुपसंहारः । तस्मात् सर्वशाखाप्रत्ययं सर्वब्राह्मणप्रत्ययञ्चैकं कर्म्म चोद्यत इति सिद्धं भवति ॥ ॥ ३२ ॥ आ० नि० ॥ सर्वशाखाप्रत्ययैककर्मताधिकरणम् ॥ २ ॥ इति श्रीभट्टशबरस्वामिनः कृतौ मीमांसाभाष्ये द्वितीयाध्यायस्य चतुर्थः पादः ॥ २ ॥ ४ ॥ समाप्तोऽयं द्वितीयोऽध्यायः ॥ २ ॥

अथ तृतीयेऽध्याये प्रथमः पादः ॥ ३ ॥ १ ॥

अथातः शेषलक्षणम् ॥ १ ॥

नानाकर्मलक्षणं वृत्तम् । अनन्तरं शेषलक्षणं वर्त्तयिष्यामः । कः शेषः, केन हेतुना शेषः, कथञ्च विनियुज्यते ? इति । श्रुत्यादीनि च विनियोगे कारणानीति वक्ष्यते । तेषां च बलवदबलवत्ता । एतत्तात्पर्य्येणान्यदप्युपोद्धातादिना ॥ १ ॥ प्रतिज्ञाधिकरणम् ॥ १ ॥

शेषः परार्थत्वात् ॥ २ ॥

इह सूत्रे शेषस्य लक्षणं, येन च हेतुना शेष इत्युच्यते, तदुभयमाख्यायते । यः परस्योपकारे वर्त्तते, स शेष इत्युच्यते । तद् यथा । ये परार्थास्ते वक्तारो भवन्ति, शेषभूता वयमिहेति । ननु योऽपि प्रधानभूतः सोऽपि कदाचित् परार्थे वर्त्तते । यथा उपाध्यायः प्रधानभूतः शिष्याणां विद्याविनयाधाने वर्त्तते । सत्यं वर्त्तते । यस्तु अत्यन्तं परार्थस्तं वयं शेष इति ब्रूमः । यथा, गर्भदासः कर्मार्थ एव स्वामिनोऽनड्वाँश्च क्रीयते, वक्ष्यतीत्येव । ननु गर्भदासस्यापि स्वामी संविदधानो गुणभावमायात् । नेति ब्रूमः । आत्मन एवासौ संविदधानो गुणभावं गच्छति । नान्तरीयकत्वाद् गर्भदासस्योपकरोति, अनडुहो वा । यस्त्वत्यन्तं परार्थस्तं वयं शेष इति ब्रूमः ॥ अथ तत्र किं वृत्तम् । यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयेतेति । तत्र अपूर्वार्थता व्यावर्तिता, दृष्टप्रयोजनानामाख्यातानाम् । इह तु सर्वेषामेव शेषाणां लक्षणमुच्यते ॥ २ ॥ ॥ शेषत्वकारणसहित–शेषलक्षणाधिकरणम् ॥ २ ॥

द्रव्यगुणसंस्कारेषु बादरिः ॥ ३ ॥

बादरिराचार्योऽत्र द्रव्यगुणसंस्कारेष्वेव शेषशब्द इति मेने, न यागफलपुरुषेषु । द्रव्यं क्रियार्थम् यदि प्रयोजनवती क्रिया, व्यक्तं सा द्रव्येण निर्वर्त्तयितव्या । तस्या निर्वृत्तिर्द्रव्यादृते न भवतीति तन्निर्वृत्तये द्रव्यमेषितव्यं भवति । तस्मात् क्रियार्थं द्रव्यम् । गुणः शक्नोति विशिष्टं द्रव्यं चोदितं लक्षयितुम् । लक्षितेन च तेन प्रयोजनम् । विशिष्टस्य क्रियासाधनत्वात्, तस्मात् सोऽपि द्रव्यद्वारेण क्रियाया उपकरोतीति क्रियार्थ एव । संस्कारो नाम स भवति यस्मिञ्जाते पदार्थो भवति योग्यः कस्यचिदर्थस्य तेनापि क्रियायां कर्त्तव्यायां

प्रयोजनमिति सोऽपि परार्थः । तस्माद् द्रव्यगुणसंस्काराः परार्थत्वाच्छेषभूता, न तु यागफलपुरुषाः । यागस्तावत् कर्त्तव्यः पुरुषस्य । न हि तस्मिन्निर्वर्त्तिते किञ्चिद् अपरमस्ति कर्त्तव्यम् । स हि पुरुषार्थः । यदन्यद् द्रव्यादि तत् तदर्थं तस्य शेषभूतम् । स तु न किञ्चिदभिनिर्वर्त्तयितुं क्रियते । फलमपि न तेन क्रियते । तस्मिँस्तु कृते स्वयमेव तद् भवति । तस्मिन् कृते फलमस्य भवतीत्येतावद् गम्यते । नास्ति शब्दो, यागेन क्रियते फलमिति । तस्माद् यागो न शेषभूतः कस्यचिदर्थस्य । फलमपि न पुरुषं प्रत्युपदिश्यते । य स्वर्गं कामयते स यागं कुर्य्यादित्येतावच्छब्देनोपदिश्यते, नात्मनः, परस्य वेति । स्वर्गं प्रतीच्छामात्रेण स्वर्गकाम इति भवति । तस्मात् पुरुषं प्रति गुणभावेन न श्रूयते स्वर्गः । तस्मात् सोऽपि न शेषभूतः । न चेत् फलयागौ गुणभावेन चोद्येते, कस्य पुरुषः प्रधानभूतो भवति प्रत्यक्षश्चास्य द्रव्यत्वात् कर्म्म प्रति गुणभावः । तस्माद् द्रव्यगुणसंस्कारेष्वेवशेषभावं बादरिर्मेने इति ॥ ३ ॥

कर्माण्यपि जैमिनिः फलार्थत्वात् ॥ ४ ॥

जैमिनिस्तु खल्वाचार्यः कर्माण्यपि शेषभूतानि मन्यते स्म, न बादरिरिवावधारणामनुमेने । स हि ददर्श, न यागः कर्त्तव्यतया चोद्यते । फलकामस्य तु तत्साधनोपायत्वेनेति । एवं श्रुतोऽर्थः परिगृहीतो भविष्यति । अर्थवाँश्चोपदेशः । एनमेवार्थं षष्ठेऽध्याये सूत्रैरेव साधयिष्यति । इह तु तत्सिद्धेनैव फलार्थत्वेन शेषभावं यागस्यापादयति स्म । तस्मादनवधारणा द्रव्यगुणसंस्काराः शेषभूताः । यागोऽपि शेषभूतः फलं प्रतीति ॥ ४ ॥

फलं च पुरुषार्थत्वात् ॥ ५ ॥

फलमपि पुरुषं प्रत्युपदिश्यते । यः स्वर्गो मे भवेदित्येवं कामयते तस्य यागः । न यः स्वर्गः स आत्मानं लभेतेति । कुतः । आत्मनेपदप्रयोगात् । कर्त्रभिप्राये एतद् भवति । क्रियाफलमनुभवेत् कथं पुरुष इति यागः प्रयुज्यते । तस्मात् फलं पुरुषार्थं यागाच्छ्रूयते, नात्मनिर्वृत्त्यर्थम् । तस्माच्छेषभूतमिति ॥ ५ ॥

पुरुषश्च कर्मार्थत्वात् ॥ ६ ॥

पुरुषोऽप्यौदुम्बरीसम्मानादिषु गुणभूतः श्रूयते । तस्मादनव-

धारणा एषा । द्रव्यगुणसंस्कारेषु शेषत्वं बादरिर्मेने इति ॥ अथ इदानीमत्र शेषान् वृत्तिकारः परिनिश्चिकाय । द्रव्यगुणसंस्कारेष्वेव नियतो यजिं प्रति शेषभावः। आपेक्षिक इतरेषाम् । यागस्य द्रव्यं प्रति प्रधानभावः, फलं प्रति गुणभावः । फलस्य यागं प्रति प्राधान्यं, पुरुषं प्रति गुणता । पुरुषस्य फलं प्रति प्रधानता, औदुम्बरीसम्मानादि प्रति गुणत्वम् । तस्मात् संमता अवधारणा । द्रव्यगुणसंस्कारा यागम्प्रति नियोगतो गुणभूता एवेति ॥ ६ ॥ ॥ शेषलक्षणाऽधिकरणम् ॥ ३ ॥

तेषामर्थेन सम्बन्धः ॥ ७ ॥

स्तो दर्शपूर्णमासौ । दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति । तत्र श्रूयन्ते धर्माः । निर्वपणं, प्रोक्षणम्, अवहननमित्येवमादय औषधधर्माः । तथोत्पवनविलापनग्रहणासादनादय आज्यधर्माः । तथा शाखाहरणं गवां प्रस्थापनं, गवां प्रस्तावनमित्येवमादयोऽपि सान्नाय्यस्य । तेषु सन्देहः । किं सर्वे, औषधे आज्ये सान्नाय्ये च कर्त्तव्याः, उत ये यत्र क्रियमाणा अर्थवन्तस्ते तत्र कर्त्तव्या इति ॥ ननु संयुक्ता एवं श्रूयन्ते । यथा, व्रीहीनवहन्ति, तण्डुलान् पिनष्टीति । बाढं संयुक्ताः । अवघातादयस्तु पदार्था विधीयन्ते श्रुत्या । वाक्येन एषां व्रीह्यादिसंयोगः । अतोऽस्ति संशयः । किं तावत् प्राप्तम् ॥ तेषामर्थेन सम्बन्धः ॥ अर्थेन प्रयोजनेन । ये यत्र क्रियमाणाः प्रयोजनवन्तस्ते तत्र कर्त्तव्याः । प्रथनादय आज्यसान्नाय्ययोरनुपकारका इति न तत्र करणीयाः । एवमुत्पवनादय औषधसान्नाय्ययोः । शाखाहरणादय आज्यौषधयोः । ननु श्रूयन्ते सर्वे सर्वत्र । एतदेव न जानीमः । श्रूयन्ते न श्रूयन्ते इति । तद्विचारयितव्यम् । यद्यपि श्रूयेरंस्तथाप्यनुपकारकत्वान्नैव कर्त्तव्या भवेयुः ॥ ७ ॥

विहितस्तु सर्वधर्मः स्यात् संयोगतोऽविशेषात् प्रकरणाविशेषाच्च ॥ ८ ॥

उच्यते । योऽर्थात् प्राप्तः स्यात् स यत्र प्रयोजनं तत्रैव क्रियेत । शब्देन तु सर्वेऽमी पदार्था विहिताः । तेन न यत्र केवलं प्रयोजनं प्रत्यक्षं दृश्यते, तत्रैव कर्त्तव्याः । क्व तर्हि । यत्र यत्र विहिताः । ते चामी सर्वत्र विहिता गम्यन्ते । कुतः । संयोगतोऽविशेषात् प्रकरणा

ऽविशेषाच्च । सर्वेषां तावदाज्यौषधसान्नाय्यानामपूर्वेण साध्यसाधनसंयोगोऽविशिष्टः । यत्र क्रियमाणा अपूर्वस्य कृता भवन्तीति विज्ञायते । तथा प्रकरणमविशिष्टम् । यस्मिन् विहिताः सर्वेषां विहिता भवन्तीति गम्यते । अतः सर्वे सर्वत्र कर्त्तव्याः । यत्त्वमी न सर्वत्रोपकुर्वन्तीति विधानसामर्थ्यात् सर्वत्रोपकारका इति गम्यते । स चायमदृष्ट उपकारो भविष्यति ॥ ८ ॥ ॥ पूर्वपक्षः ॥

अर्थलोपादकर्म स्यात् ॥ ९ ॥

नैतत्, सर्वे सर्वत्र करणीया इति । ये यत्र नोपकुर्वन्ति, न ते तत्र क्रियामर्हन्तीत्युक्तमेव । ननु विधानसामर्थ्यात् सर्वे सर्वत्रोपकरिष्यन्ति । नेति ब्रूमः ॥ ९ ॥ ॥ सिद्धान्तः ॥

फलन्तु सहचेष्टया शब्दार्थोऽभावाद्विप्रयोगे स्यात् ॥ १० ॥

नास्ति विधानं, येन सर्वे सर्वत्रोपकुर्वन्ति । न च प्रत्यक्षादिभिरुपकारमवगच्छामः । अर्थापत्तिरपि नियोगतस्तत्रैव भवेत् । यत्रैव शब्देन चोदना भवति, नान्यथा । यदि च प्रथनादीनामाज्यसान्नाय्ययोरनुपकुर्वतामपि तत्प्रकरणे समाम्नायोऽनुपपन्नो भवेत्, ततोऽर्थादृष्ट उपकारः कल्प्येत । ते त्ववश्यं समाम्नानीया औषधार्थम् । फलं हि सहचेष्टयाऽवहननादिक्रयावगम्यते तुषविमोचनादि । प्रयोजनं च तेन । न तस्मादृते पुरोडाशः सिद्ध्यति । सति चास्मिन् अर्थवान् प्रकरणे समाम्नायः । अर्थवति च तस्मिन्नादृष्टकल्पनायां प्रमाणमस्तीत्यतो न शक्यं कल्पयितुम् । यदि च तत्र तण्डुलादिनिष्पादनं दृष्टं नाभविष्यत् ततो विप्रयोगे तण्डुलादीनामभावादुपकारस्य शब्दार्थमात्रं दृष्टोपकारानपेक्षं कर्त्तव्यमित्याज्यसान्नाय्ययोरपि क्रियमाणानामदृष्टमभविष्यत् । तस्माद् न प्रथनादयः सर्वत्र । एवम् उत्पवनादयः शाखाहरणादयश्च । तस्मान्न सर्वे सर्वत्र कर्त्तव्याः । प्रथनादयो नाज्यसान्नाय्ययोः । औषधे एव ते । उत्पवनादय आज्यस्य नौषधसान्नाय्ययोः । शाखाहरणादयश्च सान्नाय्यस्य नाज्यौषधयोरिति सिद्धम् ॥ १० ॥ ॥ युक्तिः ॥ निर्वपणादीनामर्थानुसारेण व्यवस्थितविषयताधिकरणम् ॥ ४ ॥

द्रव्यं चोत्पत्तिसंयोगात्तदर्थमेव चोद्येत ॥ ११ ॥

स्तौ दर्शपूर्णमासौ । तत्र समामनन्ति । स्फ्यश्च कपालानि च अग्निहोत्रहवणी च शूर्पं च कृष्णाजिनं च शम्या च उलूखलश्च मुसलश्च दृषच्चोपला च । एतानि वै दश यज्ञायुधानीति । तत्र सन्दिह्यते । किं यो य इह शक्यते एभिः कर्तुं तस्मै तस्मै पदार्थायैतानि समाम्नातानि, उत यद्येन संयुक्तं तस्मा एवेति ।

किं तावत् प्राप्तम् । यद्येन शक्यमिति । कुतः । एवं विधयो भविष्यन्ति तथार्थवन्तः । इतरथा ते अनुवादा निष्प्रयोजनाः । प्रकरणाविशेषश्च सर्वपदार्थान् प्रति । यज्ञायुधानीति च यज्ञसंयोगोऽविशिष्टः । तस्मात् सर्वे सर्वत्र इत्येवं प्राप्तम् ॥ एवं प्राप्ते ब्रूमः ॥ द्रव्यश्चोत्पत्तिसंयोगात् तदर्थमेव चोद्येत ॥ यो येन पदार्थेन सहोत्पत्तिवाक्येन संयुक्तः स पदार्थस्तेनैव कर्त्तव्यः । यथा स्फ्येनोद्धन्तीत्युद्धननार्थता स्फ्यस्य वाक्येन । तदुद्धननं न स्फ्यादन्येन कर्त्तव्यम् । यदा चैवं तदा प्राप्त एव स्फ्यः । तस्यायमनुवादो भवितुमर्हति । एतानि वै दश यज्ञायुधानीति । एवमेकैकस्यानुवादः । तेन तेन वचनेन प्राप्तस्य । यथा, कपालेषु श्रपयति, अग्निहोत्रहवण्या हवींषि निर्वपति, शूर्पेण विविनक्ति, कृष्णाजिनमधस्तादुलूखलस्यावस्तृणाति, शम्यां दृषद्युपदधाति, उलूखलमुसलाभ्यामवहन्ति, दृषदुपलाभ्यां पिनष्टीति । प्रकरणात् सर्वाणि सर्वत्र प्राप्नुयुः, वचनात्तु यथावचनम् । यज्ञायुधशब्दोऽपि सामान्येन प्रयोजनं विदधत् तद् बाध्येतैव । परोक्षं हि सामान्यवचनेन विशेषविधानं भवति, प्रत्यक्षन्तु विशेषवचनेन विशेषविधानम् । तस्माद् यद् येनोत्पत्त्या संयुक्तं, तत् तत्रैव विनियुज्यते इति सिद्धम् ॥ ११ ॥ स्फ्यादीनां संयोगानुसारेण व्यवस्थितत्वाधिकरणम् ॥ ५ ॥

अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यात् ॥ १२ ॥

ज्योतिष्टोमे क्रयं प्रकृत्य श्रूयते, अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणातीति । तत्र सन्देहः । किम् अरुणिमा कृत्स्नप्रकरणे निविशेत, उत क्रय एवैकहायन्यामिति । कथं पुनररुणया क्रीणातीत्येवं विस्पष्टे क्रयसम्बन्धे गम्यमाने संशय इति । उच्यते । इह हि गुणम् अरुणिमानममूर्त्तं सन्तं क्रियायाः करणमिति शब्द उपदिशति । यत् करणाभिधायिन्या तृतीयाविभक्त्या संयुज्य निर्दिशति,

अरुणयेति । न चामूर्त्तोऽर्थः क्रियायाः साधनं भवितुमर्हति । अतोऽसम्बन्धं क्रीणातिनाऽरुणगुणस्यावगच्छामः । न च अशक्यनीयमर्थं प्रमाणभूतः शब्दोऽभिधास्यतीत्येवं प्रकल्पना कदाचिदुपपद्येताऽपि । केनचित् प्रकारेण सम्बन्ध इति वचनप्रामाण्यप्रकारान्वेषणे बुद्धिर्भवति । तद् यदि परं विचारयन्तः क्रियासम्बन्धसामर्थ्यमवगमिष्यामः । एकवाक्यतया क्रय एवारुणिमानं निवेशयिष्यामः । अथ त्वप्रमाद्यद्भिरन्विष्यमाणो न कथञ्चन सम्बन्ध उपपत्स्यते, ततो वाक्यभेदमभ्युपगम्य प्रकरणधर्ममेनमध्यवसास्यामः । तस्मादवश्यं विचारणीयमेतदिति ॥ किं तावत् प्राप्तम् । कृत्स्ने प्रकरणे निवेशः । कस्मात् । संयोगतोऽविशेषात्, प्रकरणाविशेषाच्च । ननु प्रकरणाद् वाक्यं बलीयो भवतीत्येकवाक्यत्वादरुणिमा क्रयेण सम्भन्त्स्यते इति । नैतदेवमवगम्यते । न हि वचनशतेनाप्यनारभ्योऽर्थः शक्यो विधातुम् । यो हि ब्रूयाद् उदकेन दग्धव्यमग्निना क्लेदयितव्यमिति, किं स वचनप्रयोजनसामञ्जस्यमश्नुवीत । न चामूर्त्तोऽर्थः क्रियायाः साधनमुपपद्यते । तस्मादरुणया क्रीणातीति सम्बन्धाभावादेकवाक्यता न भवतीति ॥ ननु नैवायं गुणवचनः । किं तर्हि । द्रव्यवचनः कुतः । स्त्रीलिङ्गसम्बन्धात् । द्रव्यविशेषा ह्येते स्त्री पुमान् नपुंसकमिति । स्त्रियां यत् प्रातिपदिकं वर्त्तते, तस्मात् स्त्रीप्रत्ययो भवतीति स्त्रीप्रत्ययञ्चारुणयेत्युपलभामहे । तस्माद् द्रव्यवचनोऽरुणशब्द इति । तदेतदपेशलम् । तदेव हि द्रव्यमरुणिम्ना परिच्छिद्यमानमरुणाशब्दाभिधानीयतां लभते । तदेवान्यगुणकं नारुणशब्दः शक्नोत्यभिधातुम् । अरुणिमानमेष शब्दो न व्यभिचरति । व्यभिचरति पुनर्द्रव्यम् । अव्यभिचारि च कारणं कारणवतामिष्टम् । अतोऽस्य गुणः स्वार्थ इति गम्यते । तदस्य प्रत्यक्षतो गुणवचनता गम्यते । स्त्रीप्रत्ययदर्शनात्तु नूनम् अरुणा-प्रातिपदिकं द्रव्यवचनमित्यनुमानम् । प्रत्यक्षञ्चानुमानाद् बलीयः । तस्माद् गुणवचनः । कथं तर्हि स्त्रीप्रत्ययसम्बन्धः । भवति हि गुणवचनस्यापि स्त्रीलिङ्गता । यथा चाऽरुणा बुद्धिः, एवमरुणा इति । गुणवचनश्चेत् क्रीणातिना न सम्बध्यते । तस्माद् वाक्यभेदं कृत्वा प्रकरणे सर्वस्मिन्नेव सन्निवेश इति ॥

अथ यदि क्रीणातिना न सम्बध्यते तस्मिन्नेव वाक्ये एकहायनीशब्देन संभन्त्स्यते, न भविष्यति वाक्यभेद इति । तन्न । केवलं

हि गुणमरुणशब्दोऽभिदधाति, न द्रव्यगुणौ । केवलश्च द्रव्यमेकहायनीशब्दो, न गुणसहितमिति तयोः सम्बन्धस्य वाचिकां षष्ठीमन्तरेण कथं सम्बन्धो गम्यते । आह । अन्तरेणापि षष्ठीम् एकविभक्तिनिर्देशात् सामानाधिकरण्यमवगमिष्यामः । यथा नीलमुत्पलमिति । तदुपपन्नं, रूपादरुणशब्दस्य गुणवचनता कल्पनीयन्त्वेकविभक्तिसंयोगादेकहायनीशब्दसन्निधानाच्च तदेकवाक्यतामभ्युपगम्य एकहायनीशब्दसामानाधिकरण्यम् । न च लिङ्गाद्वाक्यं बलीयः । तस्मादसदेतत् ॥ तत्रोच्यते ॥ यदा केवलगुणवचनतायां शब्दः प्रवर्त्तमानो नान्येन सम्बन्धं लभते, तदाऽनुपदेशकत्वादानर्थक्यं मा भूदिति द्रव्यपरतामापद्यते । तस्यामवस्थायामेकविभक्तियुक्तेन एकहायनीशब्देन सन्निहितेनैकवाक्यतामापद्यमानः समानाधिकरणो भवति । तथा च कृत्वा, नीलमुत्पलमित्युपपद्यते । स चायमरुणाशब्दस्तस्यामवस्थायां वर्त्तते । न हि अस्य स्वार्थमभिदधत इतो विच्छिन्नस्य प्रकरणेऽप्यर्थवत्ता । कुतः । येनैव हेतुना सम्बद्ध्यते, क्रीणातिना न । नामूर्त्तोऽर्थः क्रियायाः साधनं भवतीति । न च क्रियासाधनैर्द्रव्यैः । न हि केवलगुणवचनः शक्नोति द्रव्यमभिधातुमिति स एव हेतुः प्रकरणसम्बन्धाभावेऽपि । तत्रापि सम्बध्यमानः क्रियाभिर्वा सम्बध्येत । तत्साधनैर्वा द्रव्यैः । तच्चोभयमप्यनुपपन्नम् । अतोऽनर्थकत्वपरिजिहीर्षया सन्निहितेनैकहायनीशब्देनारुणाशब्दः सम्बद्ध्यते । नास्ति वाक्यभेदः ॥ नैतदेवम् ॥ न ह्ययमरुणाशब्द एकहायनीविशेषणं भवितुमर्हति । किं कारणम् । करणविभक्त्या तृतीयया समुच्चरितोऽयं, तेनैतेन तृतीयाश्रुतिसामर्थ्यात् क्रियाविशेषणेन भवितव्यम् । कारकाणां हि क्रियया सम्बन्धो न द्रव्येणेति स एव श्रुतिसामर्थ्यात् क्रियाविशेषणमेकहायनीविशेषणम् । श्रुतिश्च वाक्याद् बलीयसी । तस्मान्नास्यैकहायनीसम्बन्ध इति ॥ ननु च गुणस्य क्रियासम्बन्धाभावादविवक्षिता कारकशक्तिरिति एकहायनीसम्बन्धोऽयमध्यवसितः । एवमपि नोपपद्यते । यदि कारकाभिधानमविवक्षितमिति गुणशब्देनैतेन द्रव्यमभिधातुमिष्यते, तदा प्रातिपदिकार्थस्याव्यतिरेक इति प्रथमा विभक्तिः प्राप्नोति । न हि तृतीयान्तस्तमभिसम्बन्धं शक्नोति वक्तुम् । न चान्यथानुपपत्तिरित्यन्योऽस्यानुपपद्यमानोऽर्थः शक्यते कल्पयितुम् । यथा, अग्नौ तिष्ठति माणवक

इत्युक्ते ज्वलनेऽनुपपद्यमानो न अश्वे गवि वा कल्प्यते । अग्निसमीपवचन एवाध्यवसीयते । तद्वदिहाप्यप्रथमान्तः शब्दो न कथञ्चिद्व्यतिरिक्ते प्रातिपदिकार्थे भवितुमर्हतीति । तस्मात् काममनर्थकोऽवगम्यतां, नास्यैकहायनीसम्बन्धोऽध्यवसातव्यः । आह । न द्रव्यं, न कारकमरुणाशब्देनाभिधीयते इति । व्यक्तमरुणगुणविशिष्टमेतेन कारकमभिधीयते । कदाचित्तु किञ्चित् विधित्सितं भवति, कदाचित्तुपसर्जनीभूतोऽर्थो विधित्सितः, प्रधानीभूतोऽनुवादः । तद्यथा, दण्डीत्युपसर्ज्जनीभूतदण्डकपुरुषप्रधानकः शब्दोऽवगम्यते । कदाचित्तु निर्ज्ञाते पुरुषे दण्डगुणविधानार्थमुच्चार्य्यते । दण्डी प्रैषानन्वाहेति । यथा, लोहितोष्णीषा ऋत्विजः प्रचरन्तीति । एवमिहापि यद्यनुपसर्ज्जनभूतोऽरुणो गुणः, प्रधानभूतं कारकम् । तथाप्यनूदिते कारकेऽरुणगुणविधानार्थं वचनं युज्यते । तस्माद् एकहायनीसम्बन्ध उपपद्यते, नास्ति वाक्यभेद इति ॥ नैतत्सारम् । अत्र हि एकहायनी-क्रीणात्योरनवबुद्धं सम्बन्धं बोधयितुमयमेकहायनीशब्द उच्चरितः । स एष कथमिवारुणाशब्देन सम्बद्ध्यते, तदेतदभिहितमपि पुनः पुनः पर्य्यनुयुज्यते । कथं पुनरेकहायनीशब्दस्य क्रीणातिना, अरुणगुणेन च समाने समभिव्याहारे क्रीणातिना सम्बन्धोऽभ्युपगमनीयो ? न पुनरारुण्येनेति । शब्दप्रामाण्यात् । भवति हि क्रियासम्बन्धस्य वाचिका विभक्तिरेकहायनीशब्दमनुनिविष्टा, न तु गुणसम्बन्धस्य वाचिका । का पुनः क्रियासम्बन्धस्य वाचिका, का वा गुणसम्बन्धस्येति । कारकलक्षणा, क्रियासम्बन्धे विवक्षिते भवति द्वितीयादिः । अविवक्षिते पुनः कारके सम्बन्धमात्रविवक्षायां षष्ठी । न चात्र षष्ठीं पश्यामः । पश्यामस्तु खलु तृतीयाम् । अतः क्रीणातिना सम्बन्धमभ्युपगच्छाम एकहायनीशब्दस्य, नारुणाशब्देनेति ॥ कथं तर्हि भवत्यत्र सम्बन्धो, नीलमुत्पलमिति । उच्यते । भवति, न तु श्रुतिलक्षणः, किं तु वाक्यलक्षणः । उत्पलशब्दसन्निधाने तदपेक्षी नीलशब्दस्तेनैकवाक्यतामभ्युपगच्छन्नजहत्स्वार्थवृत्तिरुत्पलविशेषाभिधानपर उच्चार्य्यमाणः सम्बन्धमभ्युपैति ॥

नन्विहापि वाक्यलक्षणस्तद्वदेवारुणिम्ना समं सम्बन्ध एकहायन्या युज्यते । नेति ब्रूमः । श्रुतिर्हि वाक्याद् बलीयसी श्रुतिश्चास्याः क्रियासम्बन्धमाह, न गुणसम्बन्धम् । यदि पुनः श्रुतिसामर्थ्यात्

क्रियासम्बन्धोऽभ्युपगम्येत, एकवाक्यत्वादपि गुणसम्बन्धः । नैवं शक्यम् । यो ह्यन्येन सह सम्बन्द्धुमुच्चार्य्यते, न तत्समीपगतोऽप्यन्यस्तेन सह सम्बन्द्धुमर्हति । यथा, भार्य्या राज्ञः, पुरुषो देवदत्तस्येति भार्य्याविशेषणार्थमुच्चार्य्यमाणो राजशब्दो न पुरुषेण सम्बध्यते। तद्वदिह क्रियाविशेषणार्थम् उच्चार्य्यमाण एकहायनीशब्दो नारुणाशब्देन सम्बन्धमर्हति । आह। सत्यमेवमेतत् । असत्यामाकाङ्क्षायामानन्तर्यमकारणम् । सर्वत्र तु बोधिते पदार्थे वाक्यार्थ उपपद्यते, नान्यथा । सामान्यवृत्ति हि पदं, विशेषवृत्ति वाक्यम् । सामान्येनाभिप्रवृत्तानां पदार्थानां यद्विशेषेऽवस्थानं स वाक्यार्थः । तदेतदुक्तं, तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वादिति ॥ तत्र प्रत्यक्षादिभिः पदार्थो, वाक्यार्थः पुनरानुमानिकः । तदेतदवगम्यताम् । केवलस्वार्थवृत्ति पदमनुपदेशकमिति पदान्तरेण सन्निहितेनैकवाक्यत्वमभ्युपैति, नान्यथेति । तदिह यद्यप्येकहायनीशब्दः क्रीणातिना सम्बध्यमानः कृतार्थो न पदान्तरेण सम्बन्धमाकाङ्क्षति, अरुणाशब्दस्तु पदान्तरेण सम्बन्धमलभमानोऽनर्थक इत्येकहायनीशब्देनैकवाक्यतामभ्युपैति । ननूक्त- क्रियासम्बन्धार्थो, नारुणासम्बन्धार्थ इति । आह। अरुणाशब्दस्यानर्थक्यपरिहारायोभयसम्बन्धार्थ इति वदामः । अन्यार्थमपि कृतमन्यार्थमपि शक्नोति कर्त्तुम् । तद् यथा, शाल्यर्थं कुल्याः प्रणीयन्ते, ताभ्यश्च पानीयं पीयत उपस्पृश्यते च । एवमिहापि क्रयसम्बन्धार्थमेकहायनीशब्द उच्चार्य्यमाणोऽरुणाशब्देन सह सम्भन्त्स्यते, न किञ्चिद् दुष्यति । तस्मान्न वाक्यभेद इति । नैतदस्ति । यद्यप्ययमरुणाशब्दोऽनर्थको मा भूदित्येकहायन्या सम्बद्ध्येत, तथापि सर्वस्मिन् प्रकरणे निवेष्टुमर्हति । न चैनं, सोमं क्रीणाति इत्येष शब्दः शक्नोति विशेष्टुम् । न ह्ययं विशेषणत्वेनोच्चार्यते, किं तर्ह्यपूर्वोऽयं विधीयते ॥

नन्वपूर्वोऽपि विधीयमान एकहायनीशब्दवदितरेण सम्भन्त्स्यते। कथम् । प्रयोजनाय ह्युच्चार्य्यमाणः शब्दो येनार्थस्तस्मै तावत् प्रयोजनायावकल्प्यते । सन्निहितश्च बुद्धौ भवति । तेन बुद्धौ सन्निहितेन शक्यते साकाङ्क्षः शब्दः सम्बन्धयितुमिति । नैतदेवम् । यो ह्यसम्बद्ध्यमानोऽनर्थको भवति स सम्बद्ध्यते, नान्यः ।

कुत एतत् । सम्बध्यमाने हि सामान्यं विशेषे अवस्थाप्येत ।

तत्र वाक्येन श्रुतिः पीडिता स्यात् । न चायमसम्बद्ध्यमानः क्रीणातिनाऽनर्थको भवति । प्रकरणगताभिरेकहायनीभिराभिसम्भन्त्स्यते ॥

नन्वेतदुक्तम् । प्रकरणेऽप्यस्य सम्बन्धोऽनुपपन्न इति । नानुपपन्नः । एकस्मिन् वाक्येऽन्योऽर्थो विधीयमानो नान्येन सम्बध्यते वचनव्यक्तिभेदात् । अन्या हि वचनव्यक्तिर्विधीयमानस्य, अन्या गुणेन सम्बद्ध्यमानस्य । अज्ञातवज्ज्ञाप्यते विधीयमानोऽर्थो ज्ञातवदनूद्यते गुणसम्बन्धार्थम् । न च सकृदुच्चार्य्यमाणो ज्ञातवदज्ञातवच्च भवितुमर्हति । एकहायनीशब्दः क्रये विधीयमानोऽज्ञातवत् स्यात् । अरुणाशब्देन सम्बध्यमानश्च ज्ञातवत् । वाक्यभेदे पुनर्न दोषो भवति, प्रकरणे तु वाक्यान्तरैः क्रियाद्रव्यान्तराणि च प्राप्तानि । तैरिदं वाक्यान्तरविहितं सम्बद्ध्यते । तत्रान्यस्मिन् विधीयते, अन्यस्मिन् वाक्येऽनूद्यते इत्युपपन्नं भवति । तस्मात् संयोगतोऽविशेषात् प्रकरणाविशेषाच्च सर्वस्मिन् प्रकरणे द्रव्येषु निवेश इति ॥ एवं प्राप्ते ब्रूमः ॥ अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यादिति । यत्रार्थैकत्वं श्रूयते द्रव्यगुणयोस्तत्र द्रव्यगुणावेकस्मिन् पदार्थे नियम्येयाताम् । कुतः ऐककर्म्यादेककार्य्यत्वात् । एकं हि कार्यं द्रव्यगुणयोः श्रूयते क्रयसम्बन्धः । कथमेतदवगम्यते । एकवाक्यत्वात् । कथमेकवाक्यत्वम् । अरुणया पिङ्गाक्ष्या एकहायन्येति अपर्यवसितोऽर्थः साकाङ्क्षत्वादभिधातृप्रतिपत्त्रोः । सोमं क्रीणातीति तु पर्यवस्यति । तयोरेवं नैरुत्सुक्यात् । यद्येककार्य्यता, किमिति विकल्पो न भवति । नैतदेवम् । एकार्थास्तु विकल्पेरन्निति विकल्पधर्माणौ प्राप्नुत इत्यऽयुक्तोऽयं पर्य्यनुयोगः । कथम् । पर्य्यनुयोगो नाम स भवति, यः स्वपक्षं साधयति, विपक्षस्य च प्रतीपमाचरति । न च विकल्पोऽस्मत्पक्षस्य प्रतीपमाचरति । क्रयेणारुणिमासम्बन्ध इत्येष नः पक्षः । न च विकल्पो नानाकार्य्यत्वात् ॥ नन्विदानीमेवोक्तम्— एकं कार्य्यमिति । तच्चापि विरुद्धम् । एवं हि पूर्वमभिहितम् । अमूर्त्तत्वात् । गुणो न क्रियया सम्बद्ध्यते इति । इदानीं विपरीतमभिधीयते । उभावपि द्रव्यगुणावेकार्थौ क्रयमभिनिर्वर्त्तयत इति । उच्यते । नैतद्विरुद्धम् । न च विकल्पः, एकं कार्य्यम् । सामर्थ्यभेदस्तु । साक्षाद् हि द्रव्यं क्रियां प्रत्युपकरोति, गुणस्तु विशिष्टानां साधनम् । यद्येवं न तर्हि गुणः क्रियामभिनिर्वर्त्तयति, साधनस्यासौ विशेषक इति । नैत-

द्देवम् । गुणस्य क्रियामभिनिर्वर्त्तयत एतदेव सामर्थ्यं, यत् साधनं विशिंष्यात् । आकाङ्क्षति च क्रिया साधनविशेषणम् । चिह्नभूतो हि गुणः साधनं लक्षयति । असति चिह्ने न लक्ष्येत । कतमत् साधनं क्रियाया इति । ततः क्रियां नाध्यवस्येम कर्त्तुमिति भवति क्रियासाधनं गुणः । न चैवं सति विकल्पो भवति । यथाऽधिकरणस्य कर्त्रादीनाञ्च । अधिकरणं हि कर्त्रादीनि धारयति । तान्यधार्यमाणानि न शक्नुवन्ति क्रियामभिनिर्वर्त्तयितुम् । तथा कर्त्ता करणादीनि समाधत्ते । तान्यसमाहितानि न शक्नुवन्ति स्वं स्वमर्थमभिनिर्वर्त्तयितुम् । यस्मिँस्तु साधनोपकारे कार्य्ये तस्मिन्नेवोपकारेऽन्यत् साधनं विधीयते, तत्र विकल्पः । यथा व्रीहिभिर्यजेत, यवैर्यजेतेति । उभयेऽपि तण्डुलनिर्वृत्त्यर्थाः । एवं तर्हि तदेवेदं सञ्जातम् । भवत्येकहायनीविधानं, तद्विशेषणश्चारुणो गुणः । तत्र स एव दोषो वाक्यभेदः प्रसज्येतेति । न ब्रूमोऽरुणाशब्द एकहायनीशब्देन सम्बद्ध्यते इति, किं तर्हि–क्रीणातिनैव सम्बद्ध्यते । एवं हि श्रूयते–अरुणगुणेन क्रयमभिनिर्वर्त्तयेदिति । यथा च तेन निर्वर्त्यते, तथा यतितव्यं भवति । न चाविशिंषन् साधनं, गुणः क्रियामभिनिर्वर्त्तयतीत्यर्थात् साधनविशेषणतां प्रतिपद्यते । यथा स्थाल्यां पचेदिति क्रियासाधनत्वेन निर्दिष्टेऽर्थात् सम्भवने धारणे च स्थालीं व्यापारयति तद्वदिहापि द्रष्टव्यम् । तस्मान्नास्ति वाक्यभेदप्रसङ्ग इति ॥

नन्वेवमपि वाक्यं भिद्येत । कथम् । प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टेति । यथा देवदत्त–यज्ञदत्त–विष्णुमित्रा भोज्यन्तामिति प्रत्येकं भुजिः समाप्यते । यथा च, यस्य पिता पितामहः सोमं न पिबेदिति । एवमिहाप्यरुणया क्रीणाति, एकहायन्या क्रीणातीति । नैतदस्मत्पक्षस्य बाधकम् । एवमपि क्रये एवारुणिमा निवेक्ष्यति, न सर्वस्मिन् प्रकरणे इति । सत्यमेष दोषो न भवति, किन्त्वनरुणयाप्येकहायन्या क्रयः प्राप्नोति, अरुणया चानेकहायन्या । तत्र यदुक्तं द्रव्यगुणयोर्नियम इति, सा प्रतिज्ञा हीयते । न तर्हि ब्रूमो वाक्यभेद इति । कथम् । क्रयस्य हि द्रव्यारुणिमानावुपदिश्येते, न क्रयस्तयोः । न च प्रधानं प्रतिगुणं भिद्यते, प्रतिप्रधानं हि गुणो भिद्यते इति । अस्ति चायं दृष्टान्तः । समुदाये वाक्यपरिसमाप्तिरिति । यथा गर्गाः शतं दण्ड्यन्तामिति । तथा अभिषुत्य हुत्वा भक्षयन्तीति । तस्मा-

दुभयविशेषणविशिष्टः क्रयो विधीयते ॥ कथं पुनस्तस्मिँश्चेतरस्मिँश्च दृष्टान्ते सति एकान्तेनावधार्य्यते । समुदाय एव वाक्यपरिसमाप्तिर्न प्रत्ययवयवमिति । अत्र ब्रूमः । इह द्रव्यारुणिमानावुभावपि क्रियासम्बद्धावुपलभ्येते परस्परेणासम्बद्धौ । क्रयोऽपि द्रव्यारुणिमभ्यां विशिष्ट उपलभ्यते, नान्यतरेण । तत्र यदि द्रव्यपरमरुणिमपरं च भवति वचनमिदं, ततः प्रत्ययवयवम् असंशयं क्रयसम्बन्धः । अथ क्रयविधित्सयाऽभिधीयते, ततो यथैवायम् एकहायनीविशिष्ट एवम् अरुणिमविशिष्ट इति नियमत उभयसम्बन्धोऽभ्युपगमनीयः । न चात्र द्रव्यारुणिमानावीप्सितौ । ईप्सितस्तु क्रयः । तेन हि ज्योतिष्टोमद्रव्यं सोम परिप्राप्यते । द्रव्यारुणिमानौ क्रयार्थौ सन्तावीप्सितौ स्यातां, नान्यथा । तस्मात् क्रयो विधीयते । स च नान्यतरविशिष्टः प्रतीयते इति समुदाये वाक्यपरिसमाप्तिरिह निश्चीयते । यदा चैवं तदा नैकहायनीं मुक्त्वाऽन्यद् द्रव्यं क्रयसाधनमस्ति । न च अरुणादन्यः साधनस्य विशेषको गुण इति नियमः सिद्धो भवति ॥ अत्र वक्ष्यामः । यदि क्रयस्य साधने गुणोऽभिसम्बन्धमुपैति, तदा वाक्यं भिन्नेऽपि क्रयसाधनत्वादरुणिमास्मिन् द्रव्ये न निवेक्ष्यते, किमर्थमेकवाक्यता प्रयत्नेन साध्यत ? इति । तदेतदभिधीयते । भिन्ने हि वाक्ये एकहायनीसाधनकः क्रयोऽवबुद्धो भवति । अरुणासाधनमपि क्रयान्तरम् । न तस्मिन्नेवैकहायनीसाधने क्रये अरुणिमा विहितो भवति तत्र यत् क्रयान्तरमरुणगुणविशिष्टं तत्रार्थात् प्राप्तमन्यदपि साधनं भवति । तदपि विशिंषन्नरुणो गुणस्तेन सम्बध्येत । एकवाक्यत्वे तु तत् परिहृतं भवति । तस्मात् साधु अभिधीयते । अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यादिति ॥ १२ ॥ आरुण्यादिगुणानामसंकीर्णताऽधिकरणम् ॥ ६ ॥ आरुणन्यायः ॥

एकत्वयुक्तमेकस्य श्रुतिसंयोगात् ॥ १३ ॥

अस्ति ज्योतिष्टोमः । य एवं विद्वान् सोमेन यजते इति । तत्र श्रूयते । दशापवित्रेण ग्रहं सम्मार्ष्टीति । तथा अग्निहोत्रे श्रूयते, अग्नेस्तृणान्यपचिनोतीति । तथा दर्शपूर्णमासयोः श्रूयते । पुरोडाशं पर्य्यग्निकरोतीति । तत्र सन्देहः । किमेकस्य ग्रहस्य, एकस्य अग्नेः, एकस्य पुरोडाशस्य च सम्मार्जनादि कर्त्तव्यम् ? उत सर्वेषां ग्रहा-

र्णा, सर्वेषामग्नीनां, सर्वेषां पुरोडाशानामिति । किं प्राप्तम् । एको ग्रहः, एकोऽग्निः, एकः पुरोडाश इह ग्रहीतव्यः । कुतः । श्रुतिसंयोगात् । एकत्वश्रुतिसंयुक्ता एते पदार्थाः । एकं हि द्रव्यमेषु श्रूयते । शब्दलक्षणे च हि कर्म्मणि यच्छब्द आह तदस्माकं प्रमाणम् । यथा पशुमालभेतेत्युक्तं एक एव पशुः पुमाश्चाँलभ्यते । एवमत्राप्येको ग्रहः सम्मार्ज्जनीयः, एकस्य अग्नेस्तृणान्यपचेयानि, एकः पुरोडाशः पर्य्यग्निकर्त्तव्य इति १३ ॥ ॥ पूर्वपक्षः ॥

सर्वेषां वा लक्षणत्वादविशिष्टं हि लक्षणम् ॥ १४॥

नैतदस्ति । ग्रहादिष्वेकत्वयुक्तेष्वमी पदार्थाः कर्त्तव्या इति । सर्वे ग्रहाः संमार्ष्टव्याः, सर्वेभ्योऽग्निभ्यस्तृणान्यपचेयानि, पुरोडाशमात्रश्च पर्य्यग्निकर्त्तव्यमिति । कुतः । ग्रहजात्या द्रव्यं लक्षयित्वा सम्मार्गादि विधीयते । अविशिष्टश्च लक्षणं सर्वद्रव्येषु । तत्र न गम्यते विशेषः । को ग्रहः सम्मार्ष्टव्यः, को नेति । सामान्यावगमाद्विशेषानवगमाच्च सर्वप्रत्ययः । तथाऽग्निपुरोडाशानामपि । नन्वेकवचनं श्रूयते, तद्विशेक्ष्यति । नैतदस्ति । एकत्वं हि श्रूयमाणं ग्रहादिष्वेकत्वं ब्रूयाद्, न द्वितीयादीन् प्रतिषेधेत् । एकत्वस्यासौ वाचको न द्वितीयादेः प्रतिषेधकः । तेनाप्रतिषिद्धे द्वितीयादौ सामान्यवचनेन प्राप्तं सम्मार्ज्जनादि किमिति न क्रियेत ॥ तत्रैतत् स्यात् एकवचनमिह श्रूयमाणं प्राप्ते एवैकस्मिन् द्रव्ये, द्वितीयादिषु च, किमन्यत् कुर्य्यादन्यतः परिसंख्यायाः । न चैकवचनं परिसञ्चक्षीत द्वितीयादीन्, अनर्थकमेव स्यात् । शक्नोति च द्वितीयादीन् निवर्त्तयितुम् । यथा, अश्वाभिधानीमादत्त इति गर्दभाभिधानं परिसङ्ख्यष्ट, एवमत्रापि द्रष्टव्यमिति ॥ नैतदेवम् ॥ तत्र मन्त्रस्याभिधान्याश्च यः सम्बन्धस्तदभिधानपरं वचनम् । इमामगृभ्णन्नित्यश्वाभिधानीमिति । न अनेन मन्त्रेण, आदत्त इति लिङ्गनैवादाने प्राप्तत्वान्मन्त्रस्य परिसंख्या युक्ता । इह पुनर्यदेकवचनं द्रव्ये श्रूयते, तत् श्रूयमाणमप्यविधीयमानत्वेन न निवर्त्तकं भवितुमर्हति । यथा कश्चिदोदनं निर्दिश्य ब्रूयात्, य एनं भक्षयेत् कश्चित् श्वा मार्ज्जारो वा, स निवारयितव्य इति । तत्र यदि भक्षणं निमित्तत्वेन विधीयते, न श्वमार्ज्जारसम्बन्धस्ततः काकोऽप्यागच्छन् निवार्य्यते । श्रूयमाणे-

ऽपि शुनि मार्जारे वा श्वमार्जारसम्बन्धस्य निमित्तत्वेनाविधीयमानत्वात् । एवमिहाप्येकत्वसम्बन्धस्य अविधीयमानत्वाच्छ्रूयमाणेऽप्येकत्वे ग्रहमात्रं संमृज्येतेति ॥ न चात्र द्रव्यैकत्वसम्बन्धविधायकः कश्चिच्छब्दोऽस्ति । ननु सम्मार्ष्टीति । न ह्येतद् द्रव्यैकत्वसम्बन्धस्य विधायकम् । कस्य तर्हि । द्रव्यसंमार्गसम्बन्धस्य विधायकम् । एवं श्रुत्या स्वपदार्थो विहितो भवति । इतरथा वाक्येन परपदार्थो विधीयेत श्रुत्यसम्भवे च वाक्यं क्रमते, न सम्भवन्त्यां श्रुतौ । अतोऽविधीयमानं विशेषणत्वेन एकत्वं, न द्वितीयादीन् प्रतिषेद्धुमर्हति । एवं सति न द्वितीयादौ सम्मार्गादि क्रियमाणमचोदितं भवति, प्रतिषिद्धं वा । यथैव हि तदेकस्य श्रुतमवगम्यते तथा द्वितीयादेरपि ॥ अयं चापरो दोषः । न तदेकत्वं द्रव्यस्य सम्मार्गादौ विषये नियस्येत । न हि सम्मार्गादिर्यस्मिन् द्रव्ये एकत्वं नियस्येत तस्य विशेषणत्वेन भवति । विधीयते ह्यत्र सम्मार्गादिः । न प्राप्तो लक्षणत्वेन द्रव्यस्याम्नायते । नहि यौगपद्येन विधातुं शक्यते, लक्षणत्वेन चोच्चारयितुम् । प्रसिद्धसम्बन्धो हि शक्नोति लक्षयितुम् । न चाविहित एवञ्जातीयकः शब्दावगम्यः प्रसिद्धसम्बन्धो भवति । विधीयते च सम्मार्गादिः । तस्मान्न विशेषकः । न चेद् विशेषकः, न द्रव्ये एकत्वं नियस्यते इति शक्यमाश्रयितुम् ॥ अथैकत्वं सम्मार्गे उच्यते । तत्रापि द्वयी गतिः स्यात् । एकत्वं प्रधानं, सम्मार्गो वा । तच्चोभयमप्यनुपपन्नम् । न तावदेकत्वस्य सम्मार्गः शक्यते कर्तुम् । न च द्रव्ये क्रियमाण एकत्वस्योपकरोति केनचित् प्रकारेण । न चैकत्वस्योपकृतेन किञ्चित् प्रयोजनमस्ति । न हि तद्गुणभूतं श्रुतम् । अथैकत्वं सम्मार्गं प्रति गुणभूतमिति । तदपि न । कथम् । अमूर्त्तत्वात् । न हि तत् सम्मार्गं निष्पादयति । यद्यप्यन्यदमूर्त्तं क्रियां निष्पादयति साधनं विशिषत्, तथाप्येतन्न भवितुमर्हति । न ह्यत्र ग्रहः सम्मार्गार्थः, सम्मार्गोऽत्र ग्रहाय चोद्यते । स हि प्रयोजनवान्, कल्प्यप्रयोजनः सम्मार्गः । यदि ग्रहः सम्मार्गस्योपकुर्य्यात् तदुपकारिण उपकरोतीति सम्मार्गस्योपकारकमेकत्वं भवेत् । न त्वेतदेवम् । तस्मादेकत्वसम्मार्गयोरसम्बन्धः ॥ ननु प्रधानभूतमपि ग्रहादि सम्मार्गं निष्पादयत्येव । अतस्तत्साधनं तच्च विशिषत् तदुपकरिष्यति । यथा इज्यार्थे दधनि पयसि च प्रणीता धर्म्माः पाकं उपकुर्वन्ति । परिधानार्थे च परिधौ

यूपधर्म्मो बन्धने । तस्मादयम् असमाधिरिति । अत्रोच्यते । न ब्रूमः । अतदर्थे साधके न शक्नुवन्त्युपकर्तुमिति । किं तर्हि । यदा प्रधानभूतं ग्रहादि लक्षणत्वेनोच्यते, न तदेकत्वस्य ग्रहादिना सम्बन्धो, न सम्मार्गादिनेति । कथम् । यावदिह लक्षणत्वेन किञ्चिदुच्यते, संवादस्तत्र भवति । न तु तद्विधीयते विज्ञानाय । किमर्थं तर्ह्युच्चार्य्यते । अन्यत्तस्य किञ्चिद् विधायिष्यते इति । तदेतद् ग्रहादि लक्षयित्वा तस्य सम्मार्गादि विधीयते । तद् यद्येकत्वसम्बन्धोऽपरो ग्रहद्रव्ये सम्मार्गादौ वा पदार्थे विधीयेत, द्वयोः सम्बन्धयोर्विधानाद् भिद्येत वाक्यम् । अथोच्यते, ग्रहादि लक्षयित्वा तस्यैकत्वसम्बन्धो विधीयते, न सम्मार्गादिसम्बन्ध इति । तथाच सम्मार्गादीनामध्ययनं प्रमाद इत्यभ्युपगतं स्यात् । नचैतदेवम् । तस्मादुभाभ्यामेकवचनस्यासम्बन्ध इति । एवमेतदेकत्वं ग्रहस्य न किञ्चिदुपकारं करोति, न सम्मार्गस्यैवमेव सदनूद्यते । तस्मान्नैतत् किञ्चिदपि कर्तुं विवक्ष्यते इति सर्वेषां ग्रहादीनां सम्मार्गादि कर्त्तव्यमिति । कुतः । संयोगतोऽविशेषात् प्रकरणाविशेषाच्च ॥ यद्यविवक्षितमेकत्वं, कथं तर्ह्येकवचनमुच्चार्य्यते । ननु बहुषु विवक्षितेषु बहुवचनेन भवितव्यम् । उच्यते । न वयमेतद्विचारयामः– एकवचनमुच्चारयितव्यं, नोच्चारयितव्यमिति । उच्चार्य्यमाणे सति किं प्रतिपत्तव्यम् । एकस्मिन्नेव सम्मार्गादि ? उत सर्वेष्विति । तच्च सर्वेष्विति स्थापितम् । अपि च, न विभक्तेर्वचनमेवैकं प्रयोजनम् । किं तर्हि । कारकसम्बन्धोऽपि । अविवक्षिते एकत्वे कारकसम्बन्धार्थमस्योच्चारणं भविष्यति । तस्मान्नानर्थकम् ॥

अपि च, ग्रहः प्रातिपदिकार्थ एकत्वं विभक्त्यर्थः । किमतो यद्येवम् । एतदतो भवति । प्रातिपदिकार्थगतं हि विभक्तिः स्वमर्थं श्रुत्यैव वदति । अथैवं सति किं न सम्मार्गेण सम्भन्त्स्यते ? इति । तेन हि सम्बध्यमानं वाक्येन सम्बद्ध्येत । न च श्रुत्याऽन्येन सम्बध्यमानं वाक्येनाच्छिद्यान्येन सम्बन्धमर्हति । असम्बध्यमानस्त्वेकत्वेन सम्मार्गो यदि नैकत्वविशिष्टः क्रियते, न किञ्चिद् विपन्नं भवति । नचैकत्वविशिष्टः सम्मार्गादिर्ग्रहादिमात्रस्य च विधीयते इति किमिति द्वितीयस्य तृतीयस्य च न क्रियेतेति ॥ १४ ॥

चोदिते तु परार्थत्वाद्यथाश्रुति प्रतीयेत ॥ १५ ॥

अथ यदुक्तं– यथा, पशुमालभेतेत्येक एव पशुः पुंपशुश्चालभ्यते, एवमिहापीति । अस्त्यत्र वैपरीत्यम् । इह ग्रहार्थः सम्मार्गः । तत्र-पुनर्यागार्थः पशुः । किमेवं सति भवति । यो यागार्थं परिच्छिनत्ति स यागस्योपकरोति । अपरिच्छिन्नेन न शक्यो यागः कर्तुमिति । न तु ग्रहेण केनचिद्विशिष्टेन सम्मार्गः कर्त्तव्यो यद् ग्रहं विशिषत् सम्मार्गस्योपकुर्य्यात् । पशोश्चैतरेकत्वं यागं प्रत्युपदिश्यते । ननूक्तं, प्रातिपदिकार्थगतं स्वमर्थं विभक्तिः श्रुत्यैवाभिवदतीति । यागे एतद् वाक्येन विधास्यति । तत्र वाक्याच्छ्रुतिर्बलीयसीत्युक्तम् । सत्यं, यत्र श्रौतोऽभिसम्बन्धो विवक्ष्यते । अविवक्ष्यमाणे च वाक्यावगतः सन्नपर्य्युदसितव्यो भवति । तस्मादेकः पुपशुश्चालभ्यते इति, ग्रहैकत्वं न सम्मार्गस्योपकरोतीति, न ग्रहं शक्नोति विशेष्टुम् । तस्माद-ऽविवक्षितमिति ॥ १५ ॥ ॥ आ० नि० ॥ सर्वेषां ग्रहादीनां सम्मार्गाद्यधिकरणम् ॥ ७ ॥ ग्रहैकत्वन्यायः ॥

संस्काराद्वा गुणानामव्यवस्था स्यात् ॥ १६ ॥

अस्ति ज्योतिष्टोमः । तत्र श्रूयते, दशापवित्रेण ग्रहं सम्मार्ष्टीति । तत्रैषोऽर्थोऽधिगतः, सर्वे ग्रहाः सम्मार्जितव्या इति । इदमिदानीं संदिह्यते । किं चमसा अपि सम्मार्ष्टव्या, उत नेति ॥ किं तावत् प्राप्तम् ॥ चमसाद्यपि सर्वं सम्मार्ज्यमिति । कुतः । संयोगतोऽविशेषात् प्रकरणाविशेषाच्चेति । यथैव हि ग्रहाणामपूर्वसम्बन्ध, एवं चमसानामपि । यथैव च ग्रहा अस्मिन् प्रकरणे, एवं चमसा अपि । तस्मात् सर्वत्र सम्मार्गः ॥ ननु ग्रहाः श्रूयन्ते, ते चमसानां निवर्त्तका भविष्यन्ति । उच्यते । प्रदर्शनार्थं ग्रहग्रहणं भविष्यति । ग्रहादि सोमपात्रम् । यस्मिन् गृह्यमाणः सोमो व्यवसिच्येतेत्येवमाशङ्क्यते, तत् सर्वं सम्मार्जितव्यम् । यथा भोजनकालो वर्त्तते, स्थालानि सम्मृज्यन्तामित्युक्ते, यानि यानि भोजने उपयोगमर्हन्ति, तानि तानि सर्वाणि सम्मृज्यन्ते । स्थालग्रहणं लक्षणार्थमिति गम्यते । एवमिहापि द्रव्यमिति ॥ उच्यते ॥ लोकेऽर्थलक्षणः संव्यवहारः । येन येनार्थः सम्मृष्टेन, उक्तोऽनुक्तो वा, स सम्मृज्यतैव । इह तु वेदे शब्दलक्षणः । शब्दश्च ग्रहस्य सम्मार्गमाह । तत्र किमर्थं श्रुतौ सम्भवन्त्यां ग्रहशब्दो लक्षणया कल्प्यते । उच्यते । सम्मार्ष्टीति सम्मार्गे पुरुष-

प्रयत्नं विधातुमेष शब्दः शक्नोति श्रवणेनैव, ग्रहसम्बन्धे तु वाक्येन। श्रुतिश्च वाक्याद् बलीयसी । तस्माल्लक्षणया ग्रहशब्दो वर्ण्यते, न यथाश्रुत इति । तेन यो यः सम्मार्जनसंस्कारार्हः स स सम्मार्जितव्यः।न ग्रहेष्वेव व्यवतिष्ठेत, एवञ्जातीयको गुण इति ॥१६॥ ॥ पूर्व० ॥

व्यवस्था वाऽर्थस्य श्रुतिसंयोगात् तस्य शब्दप्रमाणत्वात् ॥ १७ ॥

व्यवतिष्ठेत वा ग्रहेष्वेव सम्मार्गो, न चमसेष्वपि प्रसज्ज्येतेति । कुतः । अर्थस्य श्रुतिसंयोगात् । श्रूयमाणो हि ग्रहो नोत्स्रष्टव्यः । उत्सृज्यमाने श्रुतिरेव बाध्यते ग्रहमिति । प्रमत्तगीतं तत्रभवतामित्यवगम्यते । न चैतन्न्याय्यम् । तस्माद् ग्रहशब्देन ग्रहं लक्षयित्वा तस्य सम्मार्गसम्बन्धो विधीयते । न चाविद्धत् सम्मार्गं शक्नोति तत्सम्बन्धं विधातुम् । अतो विदधात्येवैष शब्दः सम्मार्गम् । न च श्रुतिर्बाधिष्यते । कुतः । सम्मार्ष्टीति सम्मृजिगतं पुरुषप्रयत्नं श्रुत्या शक्नोति विधातुम् । न तत्र कश्चिद्विशेषः । उत्पाद्यमाने वा सम्मृजौ, परेण वा सम्बध्यमाने इति । तेन न ग्रहसम्बन्धेऽपि श्रुतिर्बाधिता भवति । अतो ग्रहेष्वेव सम्मार्गो व्यवस्थातुमर्हतीति ।

नन्वपूर्वसंयोगाविशेषात् प्रकरणाविशेषाच्च चमसेष्वपि प्रसज्ज्यते, न ग्रहेष्वेवास्य विधानमित्युक्तम् । अत्रोच्यते । प्रकरणवत्त्रिरेकवाक्यतां कृत्वा शक्नोति तत्र विधातुम् । नाऽकृत्वैकवाक्यताम् । सा च प्रकरणाद् अनुमीयते । इयं पुनर्ग्रहशब्देन सह प्रत्यक्षा । तस्मान्न प्रकरणे विधानम् । ग्रहैकत्वसम्बन्धे पुनरुत्सृज्य स्वार्थं, न शक्नोति विधातुम् । यदुक्तं, यथा स्थालानि सम्मृज्यन्तामिति लक्षणा, तद्वदिहापीति । परिहृतमेतत् । लोके कर्मार्थे लक्षणं, शब्दलक्षणं पुनर्वेद इति ॥ १७ ॥ ॥ सिद्धान्तः ॥ चमसादौ सम्मार्गाद्यप्रयोगाधिकरणम् ॥ ८ ॥

आनर्थक्यात्तदङ्गेषु ॥ १८ ॥

वाजपेये श्रूयते, सप्तदशारत्निर्वाजपेयस्य यूपो भवतीति । तत्र सन्देहः । किं सप्तदशारत्निता वाजपेयस्य ऊर्ध्वपात्रे निविशते, उत पशोर्यूपे निविशते इति । किं तावत् प्राप्तम् । ऊर्ध्वपात्रे इति । कुतः । वाजपेयस्य यूपाभावात् । यद् वाजपेयस्यास्ति पात्रं यूपसदृशं तत्र

भवितुमर्हति । अस्ति च षोडशिपात्रम् । तच्च खादिरत्वादूर्ध्वत्वाच्च यूपसदृशम् । तत्र निवेशे सति वाजपेयशब्द आञ्जस्येन भवति । इतरथा वाजपेयाङ्गे पशुयागे लक्षणया वाजपेयशब्दो वृत्त इति गम्यते । ननु त्वत्पक्षेऽपि यूपशब्दो लक्षणयोर्ध्वपात्रे । उच्यते । सर्वथा वयं लक्षणाशब्दान्न मुच्यामहे । मत्पक्षे तु वाजपेयप्रकरणमनुगृह्यते तस्मादूर्ध्वपात्रे निवेश इति ॥ एवं प्राप्ते ब्रूमः ॥ आनर्थक्यात् तदङ्गेषु ॥ वाजपेयशब्दस्तावत् सोमयागविशेषवचनः । तस्य साक्षाद्यूपेन न प्रयोजनम् । अस्ति तु तस्याङ्गं पशुयागः । तस्य तु पशुं बन्द्धुं यूपेन कार्यम् । साक्षाद्वाजपेययूपस्य यदि सप्तदशारत्निता विधीयते, तस्याभावादनर्थकमेव वचनं प्राप्नोति । तदनर्थकं मा भूदिति योऽस्य पशुयागे यूपस्तत्र निवेशमर्हति । ऊर्ध्वपात्रे च यूपशब्दो लक्षणया स्यात् । नन्वितरस्मिन्नपि पक्षे वाजपेयशब्दो लक्षणयेति । नेति ब्रूमः । वाजपेये एव वाजपेयशब्दो भविष्यति । शक्ष्यति च स पशुयूपं विशेष्टुम् । सोऽस्याङ्गस्योपकारकः । यश्च यस्योपकारिण उपकरोति, भवति स तस्य सम्बद्धो मुख्येनैव सम्बन्धेन । न चैकान्तरितम् इति कृत्वाऽसम्बद्धो भवति । यथा देवदत्तस्य नप्ता इति पुत्रेण च असावन्तरितः । अथ च देवदत्तेन मुख्येनैव सम्बन्धेन सम्बद्धः । तस्मादेष एव पक्ष आश्रयणीयः । न हि एतस्मिन् पक्षे कश्चिदपि लक्षणाशब्दो भवतीति ॥ १८ ॥ ॥ सप्तदशारत्निताया: पशुधर्मताधिकरणम् ॥ ९ ॥

कर्तृगुणे तु कर्मासमवायाद्वाक्यभेदः स्यात् ॥१९॥

दर्शपूर्णमासयोः प्रयाजवाक्ये श्रूयते, अभिक्रामं जुहोत्यभिजित्या इति । तत्र सन्देहः । किमभिक्रमणं प्रयाजेष्वेव, निविशते, उत कृत्स्ने प्रकरणे इति । किं तावत् प्राप्तम् । कर्तृगुणेऽभिक्रमणे ब्रूमः । वाक्यभेदः स्यादिति । कर्मणा कर्मणोऽसमवायात् । अभिक्रमणं कर्म अमूर्त्तम्, न तत्कर्म्म हवनं साधयितुं शक्नोति, तस्मान्न तेनैकवाक्यतां याति । अतः सर्वस्मिन् प्रकरणे निविशते । संयोगतोऽविशेषात् प्रकरणाविशेषाच्चेति ॥ नन्वनेनैव हेतुनाऽन्यस्मिन्नपि न निवेक्ष्यते । उच्यते । अन्यत्र पुरुषैः सम्भन्त्स्यते । ननु प्रयाजेष्वपि पुरुषैः सम्बद्ध्येत । नैतदेवम् । जुहोतीति हवने एष शब्दः पुरुषप्रयत्नं वि-

द्धातुं शक्नोति, न पुरुषाभिक्रमणसम्बन्धम् । नन्वन्यत्रापि पुरुषाभिक्रमणसम्बन्धस्याविधानम् । नैष दोषः । अन्यत्र प्रकरणाम्नानादङ्गभावे निर्ज्ञाते प्रयोगवचनोऽस्य कर्त्तव्यतां वक्ष्यति । तस्मात् सर्वस्मिन् प्रकरणेऽभिक्रमणस्य निवेश इति ॥ १९ ॥ ॥ पूर्वपक्षः ॥

साकाङ्क्षं त्वेकवाक्यं स्यादसमाप्तं हि पूर्वेण ॥ २० ॥

नैतदस्ति । यदुक्तमभिक्रमणं प्रकरणे निविशते इति । प्रयाजेष्वेव भवितुमर्हति । कुतः । तैः सहास्यैकवाक्यता । यतः साकाङ्क्षमेतत् पूर्वेण पदेनासमाप्तं वाक्यम्, अभिक्रामं जुहोतीत्यत्र पर्यवस्यति । प्रकरणाच्च वाक्यं बलवदिति प्रयाजेष्वेवाभिक्रमणं निविशते । नन्वभिक्रमणममूर्त्तत्वाद्धोमनिर्वृत्तावसमर्थमित्युक्तम् । उच्यते । साक्षादसमर्थं कर्त्रा सम्बध्यमानं शक्ष्यति निर्वर्त्तयितुम् । कथम् । अभिक्रमणेन समासीदति आहवनीयं कर्त्ता, द्वयमभ्युपायभूतं होमस्य । दूराद्वाऽभिप्रसार्य हस्तं जुहुयात्, समासीदेद् अन्वाभिक्रमणेन । तस्मादभिक्रमणमुपकरोति होमस्येत्यवगम्यते । अतः प्रयाजेष्वेव निवेश इति ॥ २० ॥ ॥ सिद्धान्तः ॥ अभिक्रमणादीनां प्रयाजमात्राङ्गताऽधिकरणम् ॥ १० ॥

संदिग्धे तु व्यवायाद्वाक्यभेदः स्यात् ॥ २१ ॥

दर्शपूर्णमासयोः सप्तमाष्टमयोर्ब्राह्मणानुवाकयोः सामिधेन्य उक्ताः, नवमे निविदः, दशमे काम्याः सामिधेनीकल्पाः । इदंकामस्यैतावतीरनुब्रूयात्, इदंकामस्यैतावतीरिति । एकादशे च यज्ञोपवीतमाम्नातम् । उपव्ययते देवलक्ष्ममेव तत् कुरुते इति । तत्र संदेहः । किं सामिधेनीरेवानुब्रुवाण उपव्ययेत, उत प्रकरणे सर्वानेव पदार्थाननुतिष्ठता उपव्यातव्यमिति । कुतः संशयः । उपवीतं सामिधेनीनां प्रकरणे समाम्नातम्, अथ निवृत्ते वा तासां प्रकरणे ? इति न ज्ञायते ॥ ननु दर्शपूर्णमासयोरेव प्रकरणमिदम् । परप्रकरणे सामिधेन्यः श्रूयन्ते । सत्यं परप्रकरणे श्रूयन्ते, तथापि तासामवान्तरप्रकरणमपरम् । भवति हि, सामिधेनीरनुब्रूयादिति विशेषाकाङ्क्षं वचनम् । येन तत्सन्निधावभिधीयमानं तस्येति ज्ञायते ॥

कथं पुनर्निवृत्तं तासां प्रकरणमित्याशङ्क्यते । निवित्पदानि तासां प्रकरणं व्यवदधतीति । यद्येवं, कथमनुवर्त्तते प्रकरणमित्याशङ्का ।

परस्तान्निविदां सामिधेनीगुणा एव काम्या विधीयमानाः श्रूयन्ते, यदनन्तरं यज्ञोपवीतमाम्नातं, तेनानिवृत्तं सामिधेनीनां प्रकरणमिति भवति मतिः। अतः परप्रकरणे निविदः समुपनिपतिता न व्यवदधति यथा द्वादशोपसत्ताऽहीनधर्मो ज्योतिष्टोमप्रकरणे इति । तेन भवति सन्देहः ॥ अस्मिन् सन्देहे किं तावत् प्राप्तम् । सामिधेनीप्रकरणम् अनिवृत्तम्। तत्र उपवीतं समाम्नातमिति। कुतः। काम्यानां सामिधेनी-कल्पानामानन्तर्य्यवचनात्। हृदयमनुविपरिवर्त्तमानासु सामिधेनीषु उपवीतमामनन्ति । कर्तुश्च वासोविन्यासमात्रं गुणो भवत्युपवीतं नाम । किं कुर्वता तत् कर्त्तव्यमिति भवति तत्र पदार्थाकाङ्क्षा । तत्र बुद्धा सन्निहितेनाविप्रकृष्टेन सामिधेनीवाक्येनैकवाक्यतामुपगम्य सामिधेनीषूपवीतमुपव्ययते इत्येष शब्दो विदधातीति गम्यते ॥ एवं प्राप्ते ब्रूमः ॥ नास्मिन् सन्देहे यस्त्वयोक्तः स निर्णयः । अस्मिन् सन्देहे, वाक्यभेद इति निर्णय इति । कुत ? । व्यवायात् । इह समाप्तस्य सानुबन्धस्य सामिधेनीवाक्यस्य, अस्य चोपव्ययते इति वचनस्य, निविदां विधायकेन सामिधेनीभिरसम्बद्धेन ग्रन्थेन व्यवधानं भवति। यस्य च पर्य्यवसितेऽपि वचने तत्सम्बद्धमेवार्थान्तरं प्रक्रमन्ते, न तत्राननुवृत्तं प्रकरणम् । आगच्छति हि तत्सम्बद्धाभिधाने हृदयम् । यत्र तु पर्य्यवसिते वचने तदसम्बद्धमेवार्थान्तरं प्रक्रमन्ते, न तत्र बुद्धौ पूर्वः पदार्थः सन्निधीयते। न च बुद्धावसन्निहितेनैकवाक्यता भवति । द्वाभ्यां हि बुद्धाभ्यां पदार्थाभ्यां वाक्यार्थः सञ्जन्यते, नान्यतरेण । सन्निधौ समाम्नानस्यैतदेव प्रयोजनम् । कथमुभाभ्यां पदार्थाभ्यां विशिष्टां बुद्धिमुत्पादयेयुरिति । अनन्तरावबुद्धेन सह वाक्यार्थः शक्यते कर्तुम् । असम्बद्धपदोच्चारणे च नानन्तरावबुद्धो भवति। तस्माद् व्यवहितेन सह नैकवाक्यता भवतीति ॥ अथान्येन प्रकारेण ध्यानादिना पूर्वपदार्थमवगम्य वाक्यार्थं सञ्जनयेद्, अवैदिकः स पुरुषबुद्धिपूर्वको वाक्यार्थो भवेत्। यथाऽन्यस्मादनुवाकादाख्यातपदं गृहीत्वान्यस्माच्च नामपदं यो वाक्यार्थः सञ्जन्यते तादृशं तद् भवेद् यत्रान्येन ध्यानादिना पूर्वपदार्थम् अवगम्य वाक्यार्थं सञ्जनयेत्। तस्मान्नासंम्बद्धार्थव्यवधाना एकवाक्यता भवतीति निश्चीयते। तस्मान्न सामिधेनीभिरेकवाक्यता उपवीतस्येति। ननु सामिधेनीकल्पानामनन्तरबुद्धानां सन्निधावुपवीतमाम्ना-

यते । तेन सामिधेनीभिः सम्भन्त्स्यते इति । नेति ब्रूमः अतिवृत्तमेवहि सामिधेनीनां प्रकरणम् । निवित्पदव्यवधानात् । वाक्येन हि सामिधेनीकल्पाः काम्याः सम्बन्धमुपगच्छन्ति, न प्रकरणमनुवर्त्तते । न च पुनःकल्पवचनेन सामिधेन्यः प्रकृता भवन्ति । न हि तत्र तासां वचनं, कर्त्तव्या इति । किं तर्हि, संख्याभिः सम्बन्धयितव्या इति । तदपि वाक्येन, न प्रकरणेन । तत्राप्रकृतासु सामिधेनीषु यस्यैकवाक्यता गुणस्य सामिधेनीभिर्नास्ति, न तस्य ताभिः । तस्मात् प्रकरणे तदनुष्ठेयं, तद् यज्ञोपवीतिनेति सिद्धम् ॥ २१ ॥ उपवीतस्य प्राकरणिकाङ्गताधिकरणम् ॥ ११ ॥

गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात् स्यात् ॥२२॥

अग्न्याधेये वारण-वैकङ्कतपात्राण्यहोमार्थानि होमार्थानि च श्रूयन्ते- तस्माद् वारणो वै यज्ञावचरः स्यात्, न त्वेतेन जुहुयात् । वैकङ्कतो यज्ञावचरः स्यात्, जुहुयादेतेनेति । न च वारणवैकङ्कतानां पात्राणामग्न्याधेयेन सम्बन्धः । कुतः । यज्ञावचरवचनात् । यज्ञस्यैतानि पात्राणि, वाक्येन प्रकरणं बाधित्वा भवन्ति । तत्रैव सन्देहः । किं पवमानेष्टिषु निविशन्ते, उत दर्शपूर्णमासादिषु सर्वयागेष्विति । किं तावत् प्राप्तम् । पवमानहविःष्विति । कुतः । उक्तमेतत् । प्रधानेऽसम्भवन् पदार्थस्तद्गुणे कल्प्यते इति । अग्न्याधेयप्रकरणे च समाम्नानात् पवमानहविषां तद्गुणता । तस्मात् पवमानहविःष्वित्येवं प्राप्तम् ॥ एवं प्राप्ते ब्रूमः ॥ गुणानां समत्वात् । पवमानहविषामग्न्याधेयस्य च न परस्परेण सम्बन्धः । यथाऽऽधानमग्नेर्गुणः संस्कारार्थ एवं पवमानहवींष्यप्यग्नेरेव गुणभूतानि । कस्तत्र परस्परेण सम्बन्ध इति । यदुक्तम्- आधानस्य प्रकरणे समाम्नायन्ते इति । यद्यपि समाम्नायन्ते तथापि प्रकरणं बाधित्वा वाक्येनाग्नेर्भवन्ति । किमिह वाक्यम् । यदाहवनीये जुहोति तेन सोऽस्याभीष्टः प्रीतो भवतीति ॥ नन्वाहवनीयोऽत्र यागस्याधिकरणत्वेन गुणभूतः श्रूयते । सत्यम्, अधिकरणमाहवनीयः । तथापि त्वाहवनीयार्थ एव यागः । प्रयोजनवत्त्वादाहवनीयस्य, निष्प्रयोजनत्वात् पवमानहविषाम् । कथमेषां निष्प्रयोजनता । फलाश्रवणात् । कल्प्यं फलमिति चेत् । सत्यं कल्प्यम् । अग्निसंस्कारस्तु तत् फलं, न स्व-

र्गः । स्वर्गे कल्प्यमाने द्विरदृष्टं कल्प्येत । होमाच्च स्वर्गो भवति । तस्य चाहवनीयेनापरोऽदृष्टः संस्कार इति । तस्मादग्न्यर्थता पवमानहविषाम् । नैषामाधानेन सम्बन्धः । तस्मान्नाधाने श्रूयमाणं, पवमानहविषां भवितुमर्हति । किं तर्हि ? सर्वयागेषु दर्शपूर्णमासप्रभृतिष्वाधानस्य प्रधानभूतेषु निवेश इति ॥ २२ ॥ वारणवैकङ्कतादिपात्राणां कृत्स्नयागगुणताधिकरणम् ॥ १२ ॥ मिथोऽसंबन्धन्यायः ॥

मिथश्चानर्थसम्बन्धात् ॥ २३ ॥

दर्शपूर्णमासयोः श्रूयते । वार्त्रघ्नी पौर्णमास्यामनूच्येते, वृधन्वती अमावास्यायामिति । तत्र सन्देहः । किमनुवाक्याद्वित्वस्य प्रधाने निवेशः ? उताज्यभागयोरिति । किं तावत् प्राप्तम् । प्रधाने इति । कुतः पौर्णमासीसमभिव्याहारादमावास्यासमभिव्याहाराच्च । प्रधानं पौर्णमासी चामावस्या च, नाज्यभागौ । तस्मात् साक्षाद्वाक्यात् प्रधानस्येति प्राप्तम् ॥ तत्र ब्रूमः ॥ मिथः सह द्वाभ्यामनुवाक्याभ्यां न प्रधानस्य कार्य्यमस्ति । यत्र तु द्वे अनुवाक्ये, तत्र तयोर्वार्त्रघ्नता वृधन्वत्ता च विधीयते । प्रधाने चैका अनुवाक्या । तत्र द्वित्वं वार्त्रघ्नतां वृधन्वत्तां च विदधद् वाक्यमभिधेत । आज्यभागयोस्तु द्वे प्राप्ते, आग्नेयी सौमी च । तत्र वार्त्रघ्नतां वृधन्वत्तां केवलां शक्ष्यति विधातुम् । ननु प्रधानगामित्वेऽपि द्वयोः प्रधानयोर्द्वे अनुवाक्ये आग्नेयस्याग्नीषोमीयस्य चेति । उच्यते । एका वार्त्रघ्नी आग्नेयी, एका सौमी । तथा वृधन्वत्यौ । तत्र या आग्नेयी सा विधीयमाना सम्बध्येत, न सौमी । अमावस्यायां तावन्नास्त्येव, पौर्णमास्यामप्यग्नीषोमीये एव क्रियमाणे क्रियेत, तत्राप्येकदेवत्या न शक्नुयाद्देवताद्वित्वे कार्य्यं कर्तुम् । अथोभे अग्नीषोमीये प्राप्ते इति । नैकस्य यागस्य द्वाभ्यामनुवाक्याभ्यां प्रयोजनम् । उपादेयत्वेन ह्यनुवाक्या चोद्यते । तत्रैकत्वं विवक्षितम् । तेन तत्रापि न द्वे । तस्मादाज्यभागयोर्निवेश इति ॥ २३ ॥ ॥ वार्त्रघ्न्याद्यनुवाक्यानामाज्यभागाङ्गताऽधिकरणम् ॥ १३ ॥ वार्त्रघ्नीन्यायः ॥

आनन्तर्य्यमचोदना ॥ २४ ॥

ज्योतिष्टोमे श्रूयते– मुष्टीकरोति, वाचं यच्छति, दीक्षितमावेदयतीति । तथा, हस्ताववनेनिक्ते, उलपराजिं स्तृणातीति । तत्र सन्दे-

हः । किं मुष्टीकरणं वाग्यमश्च आवेदनार्थम्, उत कृत्स्नप्रकरणे निवेश इति । तथा हस्तावनेजनं किमुलपराजि स्तरितुम्, उत प्रकरणे सर्वपदार्थान् कर्तुमिति । किं तावत् प्राप्तम् । हस्तावनेजनं हस्तसंस्कारार्थं, वाग्यमः पुरुषसंस्कारार्थः । आमन्त्र्यमाण एकाग्रो भवति, पदार्थाननुतिष्ठति । तेन केषां केषां पदार्थानामिमे संस्काराविस्याकाङ्क्षाऽस्ति । सत्यामाकाङ्क्षायामानन्तर्य्येण निराकाङ्क्षीकरणम् । तस्मादानन्तर्य्यादावेदनार्थौ वाग्यमो मुष्टीकरणश्च । हस्तावनेजनं चोलपराजि स्तरितुम् ॥ एवं प्राप्ते ब्रूमः ॥ सर्वैः प्रकरणाधीतैः सम्बन्ध इति । कुतः । वाक्यभेदात् । कथं वाक्यभेदः । अर्थद्वयस्याभिधानात् । न हि दीक्षितमावेदयितुमित्यस्मिन्नर्थे, आवेदयतीति । न च स्तरितुमित्यस्मिन्नर्थे, स्तृणातीति । स्तरणमपि विधीयतेऽवनेजनं च । मुष्टीकरणं वाग्यमश्च विधीयते, आवेदनञ्च । न चैषां परस्परेण कश्चित् सम्बन्धोऽस्ति । न च पदार्थाकाङ्क्षायां सत्यामानन्तर्य्यमेकवाक्यत्वे कारणं भवति । तस्मात् प्रकरणधर्म्मा एवञ्जातीयकाः ॥ २४ ॥ ॥ सिद्धान्तः ॥

वाक्यानाञ्च समाप्तत्वात् ॥ २५ ॥

स्वेन स्वेन पदसमूहेन परिपूर्णमेकं वाक्यम् । तथा अपरं, तथा सर्वाणि यान्युदाहृतानि । तस्माद् विस्पष्टमर्थद्वयं, विभागे च निराकाङ्क्षता । तेन वाक्यभेदः । अतः संयोगतोऽविशेषात् प्रकरणाविशेषाच्च कृत्स्ने प्रकरणे निवेश इति ॥ २५ ॥ ॥ युक्तिः ॥ मुष्टीकरणादीनां कृत्स्नप्राकरणिकाङ्गताधिकरणम् ॥ १४ ॥

शेषस्तु गुणसंयुक्तः साधारणः प्रतीयेत मिथस्तेषामसम्बन्धात् ॥ २६ ॥

दर्शपूर्णमासयोः समाम्नायते—आग्नेयं चतुर्धा करोतीति । तत्र सन्देहः । किमाग्नेयेऽग्नीषोमीये च ऐन्द्राग्ने च सर्वत्र चतुर्धाकरणं, किं वाऽऽग्नेये एवेति । किं प्राप्तम् । शेषश्चतुर्धाकरणम्, आग्नेयमिति देवतागुणसंयुक्तः साधारणः प्रतीयते । अग्नीषोमीयेऽपि स्यादैन्द्राग्नेऽपि । कुतः । तावप्याग्नेयौ । यस्याग्निर्देवता, अन्या च भवत्यसावाग्नेयः । तद् यथा । या डित्थस्य डवित्थस्य च माता, सा डवित्थस्य भवत्येवमिहापि । यद्याग्नेयस्याग्नीषोमीयस्य च पुरोडाशस्य मिथः

सम्बन्धो न भवेत्, तत आग्नेय एव चतुर्धाकरणं व्यवतिष्ठेत । भवति तु सम्बन्ध. । तस्मादव्यवस्था । यथाग्नेयस्य मस्तकं विभज्य प्राशित्रमवद्यतीति सर्वेभ्य. प्राशित्रावदानमेवं चतुर्धाकरणमपि ॥२६॥ पूर्वपक्षः ॥

व्यवस्था वाऽर्थसंयोगाल्लिङ्गस्यार्थेन सम्बन्धाल्लक्षार्था गुणश्रुतिः ॥ २७ ॥

वाशब्दः पक्षं व्यावर्त्तयति । व्यवतिष्ठेत वा चतुर्धाकरणमाग्नेये एव, न साधारणं भवितुमर्हति । कुतः । अर्थसंयोगात् । अग्निना देवतयाऽर्थेनैकदैवत्यस्य संयोगो, न द्विदैवत्यस्याग्नीषोमीयस्यैन्द्राग्नस्य चेति । कुतः । यस्य ह्यग्नीषोमौ देवता, उभयविशेषणविशिष्टः संकल्पः क्रियते । तस्याग्निः सोममपेक्षमाणो देवता, न निरपेक्षः । यस्य चाग्निः सोममपेक्षमाणो देवता, न तस्मात्तद्धित उत्पद्यते । समर्थानां हि स उच्यते । सापेक्षं चासमर्थम् । तस्मान्न तद्धितान्तेन निरपेक्षाग्निदैवत्येन द्विदैवत्यस्याभिधानम् । अतो यत्र निरपेक्षोऽग्निर्देवता, तत्रैव चतुर्धाकरणमिति । देवतालिङ्गस्य हि सामर्थ्येन संयोगो भवति तद्धितार्थस्य, नासति सामर्थ्ये ॥

अथ यदुक्तं, यथा प्राशित्रावदानं सर्वेभ्यः क्रियते एवं चतुर्द्धाकरणमपीति । युक्तं प्राशित्रावदानेन तत्रैव सम्बन्धः क्रियते । आग्नेयस्य प्राशित्रमवद्यतीति । कथं तर्हि, आग्नेयस्य मस्तकं विभज्येति । एकं ह्येतद्वाक्यं प्राशित्रमवद्यतीति, द्वितीयमाग्नेयस्य मस्तकं विभज्येति । तत्राग्नेयस्य मस्तकादवद्यतीति गम्यते । अन्यस्य मस्तकादन्यस्माद्वेत्यनियमः । यदि तु तत्र केवलाग्निदैवत्यो नाभविष्यत्, तदाऽऽनर्थक्यपरिहाराय द्विदैवत्योऽप्यग्रहिष्यत ॥ यत्तु— डित्थस्य मातेति । युक्तं तत्राव्यासङ्गि मातृत्वम् । ततो जातो डित्थः । एतावता सम्बन्धेन, मातेत्युच्यते । नात्र किञ्चिदपेक्ष्यते । स च तावांस्तत्र सम्बन्धोऽस्तीति डित्थस्य मातेति युक्तं वचनम् ॥ २७ ॥ सिद्धान्तः ॥ चतुर्धाकरणस्याग्नेयमात्राङ्गताऽधिकरणम् ॥ १५ ॥

इति श्रीभट्टशबरस्वामिकृते मीमांसाभाष्ये तृतीयस्याऽध्यायस्य प्रथमः पादः ॥ ३ ॥ १ ॥

अथ तृतीयेऽध्याये द्वितीयः पादः ॥ ३ ॥ २ ॥

अर्थाभिधानसामर्थ्यान्मन्त्रेषु शेषभावः स्यात्तस्मादुत्पत्तिसम्बन्धोऽर्थेन नित्यसंयोगात् ॥ १ ॥

इह मन्त्रा उदाहरणं, बर्हिर्देवसदनं दामीत्येवमादयः। किं मुख्ये एवाऽभिधेये मन्त्राणां विनियोगः ? उत गौणेऽपीति । क पुनर्मुख्यः, को वा गौण इति । उच्यते । यः शब्दादेवावगम्यते, स प्रथमोऽर्थो मुख्यः । मुखमिव भवतीति मुख्य इत्युच्यते । यस्तु खलु प्रतीतादर्थात् केनचित् सम्बन्धेन गम्यते, स पश्चाद्भावाज्जघनमिव भवतीति जघन्यः । गुणसम्बन्धाच्च गौण इति ॥ यद्येवं सर्व एव मुख्यः । सर्वो हि शब्दाद् गम्यते । यथैव ह्यग्निर्ज्वलतीत्युक्ते ज्वलन सम्प्रत्ययः, एवमेवाऽग्निर्माणवक इति शब्द एव उच्चारिते माणवके सम्प्रत्ययः । अथोच्येत, यस्मिन् निरुपपदाच्छब्दात् सम्प्रत्ययः स मुख्यः, यस्मिन् सोपपदात् स गौण इति । नैतद् युक्तम् । यस्य हि शब्दस्य रूपं कस्यचिदर्थस्य निमित्तं, सोपपदस्यापि तदेव रूपं, निरुपपदस्यापि । न च शक्यं निमित्ते सति नैमित्तिकेन न भवितुम् । किमतः । यद्येवम्, इदं न शक्यते वदितुम् । उपपदादृते न सोऽर्थो भवति । उपपदे तु सञ्जाते सोऽर्थः सञ्जनिष्यते इति । न चासौ समुदायार्थः शक्यते विज्ञातुम् । अन्वयव्यतिरेकाभ्यां हि विभागोऽवगम्यते । अथ वाक्यार्थोऽयमित्युच्यते । नैवं शक्यम् । न ह्यनन्वितः पदार्थो भवति वाक्यार्थः तदेवं दृश्यताम् । अग्निशब्द एवायं ज्वलनवचनः । अग्निशब्द एव माणवकस्याभिधातेति । तस्मान्न गौणो मुख्य इति कश्चिद्विशेषः ।

अथोच्यते, यः सुष्ठु प्रसिद्धः स मुख्यः, यो मनागिव स गौणः इति । इदमपि नोपपद्यते । प्रसिद्धिर्नाम प्रज्ञानम्, न च प्रज्ञाने कश्चिद्विशेषोऽस्ति । अथोच्येत, यस्य बहुशः प्रयोगोऽस्ति स मुख्यः । अल्पशः प्रयुज्यमानो गौण इति । नैतदेवम् । अल्पशोऽपि प्रयुज्यमानो नासति सामर्थ्ये प्रत्याययेत् । अतः सोऽपि शब्दात् प्रतीयते इति मुख्य एव ॥ अत्रोच्यते ॥ अस्त्यत्र विशेषः । माणवको नाग्निशब्दात् प्रतीयते । कथमवगम्यते । उक्तम्, अन्यायश्चानेकार्थत्वमिति । कथं न विपर्ययः । उच्यते । अनादृत्यैव माणवकप्रत्ययं ज्वलनमग्निशब्दात् प्रतिय-

न्तो दृश्यन्ते, न त्वनादृत्य ज्वलनं, माणवकमग्निशब्दात् प्रतियन्ति । कुत एतत् । यो योऽग्निसदृशो विवक्ष्यते, तत्र तत्राग्निशब्दो नियत इति । अत एव विगतसादृश्यादयं तु दृश्यते । अतोऽग्निसादृश्यमस्य प्रवृत्तौ निमित्तम् । न च ज्वलने अप्रतीते तत्सादृश्यं प्रतीयते । तस्माज्ज्वलनस्याग्निशब्दो निमित्तं, न माणवकस्य । तस्माज्ज्वलने मुख्यो, न माणवके । एवमेव तृणप्रत्ययस्य बर्हिःशब्दो निमित्तं, न तृणसदृशप्रत्ययस्य । तदेवं द्वैते सति मुख्यपरता शब्दस्य, उत गौणपरताऽपीति युक्तो विचारः ॥ किं तावत् प्राप्तम् ॥ मुख्ये गौणे च विनियोगः । कुतः । उभयस्य शक्यत्वादुभयमपि बर्हिःशब्देन शक्यते प्रत्याययितुम्, तृणं च तृणसदृशं च, तृणं साक्षात्, तृणसदृशं तृणप्रत्ययेन । यच्च नाम दर्शपूर्णमासयोः साधनभूतं बर्हिःशब्देन शक्यते प्रत्याययितुं तत् सर्वं प्रत्याययितव्यम् । विनिगमनायां हेत्वभावात् ॥ अपि चैवमाश्रीयमाणे पूषाद्यनुमन्त्रणादीनि दर्शपूर्णमासाभ्यां नोत्कृष्यन्ते । तत्रैव गौणेनाभिधानेन प्रकृतां देवतामभिवदिष्यन्ति ॥

एवं प्राप्ते ब्रूमः ॥ मुख्ये एव विनियोक्तव्यो मन्त्रो, न गौणे इति कुतः । उभयाशक्यत्वात् । प्रकरणे हि समाम्नानात् प्रधानेनैकवाक्यतामुपैति । तत्रैतदापतति, यच्छक्नुयादनेन मन्त्रेण साधयितुं, तथा साधयेदिति । स चासावर्थाभिधानसंयोगाच्छक्नोत्युपकर्तुं न गौणमर्थं शक्नोत्यभिधातुम् । तस्मान्न गौणे विनियोगः ॥

ननु मुख्यप्रत्ययाच्छक्यते गौणः प्रत्याययितुम् । सत्यमेतत् । मुख्यप्रत्यायनेनैवास्य प्रयोजनवत्ता निर्वृत्तेति न गौणं प्रति विनियोगे किञ्चित् प्रमाणमस्ति । मुख्ये विनियोगेन त्वानर्थक्यं परिह्रियते । परिहृते आनर्थक्ये न गौणाभिधानमापतति । न ह्यनभिधाय मुख्यं, गौणमभिवदति शब्दः । अतः प्रमाणाभावान्न गौणे विनियुज्येत ॥ अपि च, गौणस्य प्रत्यायने सामर्थ्याद् बहवोऽभ्युपायाः प्राप्नुवन्ति । सामर्थ्यं च शब्दैकदेश इत्युक्तम्, अर्थाद्वा कल्पनैकदेशत्वादिति । तत्र मन्त्रे नियोगतो गौणं प्रति विनियुज्यमाने उपायान्तरं, विना प्रमाणेन बाध्येत । मन्त्राम्नानं प्रमाणमिति चेद् ? न तस्योपायान्तरनिवृत्तौ सामर्थ्यमस्ति । ननु मुख्येऽपि विनियुज्यमानस्यैष एव दोषः । नेत्युच्यते । यदि मुख्येऽपि न विनियुज्येत, नैव प्रधान-

स्योपकुर्यात् । तत्र चास्योत्पत्तिरनर्थिकैव स्यात् । तस्मादस्ति गौणे मुख्ये च विशेषः । अपि च, यो गौणे मन्त्रं विनियुङ्क्ते स वक्तव्यः-किमर्थं मुख्यं प्रत्याययसीति । स चेत् ब्रूयाद्, नान्यथा गौणप्रत्ययोऽस्तीति । प्रतिब्रूयादेनम्-अन्येऽपि गौणप्रत्ययस्याभ्युपायाः सन्तीति । अथ स एवमभियुक्तः प्रतिब्रूयाद्- मुख्यप्रत्ययोऽपि पाक्षिकोऽभ्युपाय इति ब्रूयादेनं- न तर्हि नियोगतो गौणे विनियोजनीयः । यदा गौणप्रत्ययाय मुख्यमुपादत्ते, तदैतदापतितं भवति । मुख्य एवं विनियोग इति । अर्थेन च प्रतीतेन प्रयोजनं, न प्रत्यायकेन मन्त्रेण । अतोऽन्येनाप्युपायेन गौणः प्रत्याययितव्यः । न स एव मन्त्र आदर्त्तव्यः । अथापि मन्त्रेण प्रत्यायकेन प्रयोजनं स्यात् तथापि मुख्यप्रत्ययनेनैव निर्वृत्तं प्रयोजनमिति नतरां गौणे विनियुज्येत । तस्मान्मुख्यगौणयोर्मुख्ये कार्यसम्प्रत्यय इति सिद्धम् ॥ १ ॥

संस्कारकत्वादचोदितेन स्यात् ॥ २ ॥

अथ यदुक्तं- पूषाद्यनुमन्त्रणादीनामुत्कर्षो न भविष्यतीति । युक्तस्तेषामुत्कर्षः । संस्कारको हि मन्त्रः । सोऽसति संस्कार्येऽनर्थक इति यत्रार्थवान् तत्र नायिष्यते । न च कश्चिद्दोषो भविष्यति ॥ २ ॥ आ० नि० ॥ लवनप्रकाशकमन्त्राणां मुख्ये विनियोगाधिकरणम् ॥ १ ॥ बर्हिर्न्यायः ॥

वचनात्त्वयथार्थमैन्द्री स्यात् ॥ ३ ॥

अग्नौ श्रूयते- निवेशनः सङ्गमनो वसूनामित्यैन्द्र्या गार्हपत्यमुपतिष्ठत इति । तत्र सन्देहः । किमिन्द्रस्योपस्थानं कर्त्तव्यमुत गार्हपत्यस्येति । कुतः पुनर्गार्हपत्यमुपतिष्ठत इत्येवं विस्पष्टे वचने संशय इति । उच्यते यद्धि वाक्येनोपस्थानं तत् स्तुतिवचनेन संस्करणं, न समीपस्थानमात्रम् । न चैन्द्रेण मन्त्रेणाग्नेरभिधानं शक्यते कर्त्तुम् । अतो, गार्हपत्यमुपतिष्ठत इति न गार्हपत्यार्थमुपस्थानमेतदिति जायेत शङ्का । गार्हपत्ये उपस्थानार्थो भवेदिति । तादृशश्च शब्दो नास्ति, तृतीयान्तः सप्तम्यन्तो वा । तस्माद् विचारः, कथमुपपन्नं भवतीति ॥ किं तावत् प्राप्तम् ॥ सामर्थ्यादिन्द्रोपस्थानम् । अशक्यत्वाच्च गार्हपत्योपस्थानस्य । कथं द्वितीया विभक्तिरिति चेत् । अविवक्षितेप्सितार्था वा सम्बन्धमात्रप्रधाना । यच्चोपस्थानवि-

२२

शेषणं सम्बन्धाद् गार्हपत्यशब्दः । तस्माद् गार्हपत्यविशिष्टमुपस्थानमिन्द्रार्थं कर्त्तव्यमिति । गार्हपत्यश्च देशेन विशिंष्यान्मुख्यमेव कार्यं मन्त्राणाम् ॥ एवं प्राप्ते ब्रूमः ॥ वचनात्त्वयथार्थमैन्द्री स्यात् । नैतदस्ति, इन्द्रार्थमुपस्थानमिति, अयथार्थमैन्द्री स्यात् । कुतः । वचनसामर्थ्यात् वचनमिदं भवति, ऐन्द्र्या गार्हपत्यमुपतिष्ठते इति । गार्हपत्ये द्वितीया विभक्तिः प्राधान्यमाह किमिव वचनं न कुर्यात् । नास्ति वचनस्यातिभारः । तस्माद् गार्हपत्यार्थमुपस्थानम् ॥ ३ ॥

गुणाद्वाप्यभिधानं स्यात् सम्बन्धस्याशास्त्रहेतुत्वात् ॥४॥

अत्राह । नन्वेतदुक्तं–नैन्द्रेण मन्त्रेण गार्हपत्योपस्थानं भविष्यतीति । उच्यते । वचनाद् भविष्यति । आह । न वचनशतेनापि शक्यमेतत् इन्द्रशब्देनाग्निं प्रत्याययेदिति ब्रुवन् विहन्येत । यथा अग्निना सिञ्चेदिति, उदकेन दीपयेदिति । न हि शास्त्रहेतुकः शब्दार्थयोः सम्बन्धो भवति । नित्योऽसौ लोकतोऽवगम्यते इत्युक्तम् । औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्ध इति । ननु शब्दलक्षणोऽपि भवति शब्दार्थयोः सम्बन्धः कृत्रिमः । यथा देवदत्तो यज्ञदत्त इति । भवति कश्चिद् यत्र सम्बन्धस्य विधायकं वाक्यं भवति, न त्वेतद्वाक्यं शब्दार्थयोः सम्बन्धस्य विधायकं, गार्हपत्यस्येन्द्रशब्दो नामेति । कथं तर्हि ? सिद्धसम्बन्धेन इन्द्रशब्देन गार्हपत्यमुपतिष्ठते इति । न च शक्यते परशब्देन परो वदितुम् । किमत्र वचनं करिष्यति ॥ अत्रोच्यते ॥ गुणाद् वाप्यभिधानं स्यात् सम्बन्धस्याऽशास्त्रहेतुत्वादिति ॥ यद्यपि नेदं वाक्यं शब्दार्थसम्बन्धस्य विधाने हेतुभूतं, तथाप्यनेनेन्द्रशब्देन शक्यं कर्तुं गार्हपत्याभिधानम् । कुतः । गुणसंयोगाद् गौणमिदमभिधानं भविष्यति । भवति हि गुणादप्यभिधानम् । यथा, सिंहो देवदत्त, अग्निर्माणवक इति । एवमिहाप्यनिन्द्रे गार्हपत्ये इन्द्रशब्दो भविष्यति । अस्ति तु चास्येन्द्रसादृश्यम् यथैव इन्द्रो यज्ञसाधनमेवं गार्हपत्योऽपीति । अथवा इन्द्रतेरैश्वर्यकर्मण इन्द्रो भवति । भवति च गार्हपत्यस्यापि स्वस्मिन् कार्ये ईश्वरत्वम् । तस्मादिन्द्रशब्देन यः प्रत्याय्यतेऽर्थः स प्रतीतः सादृश्याद् गार्हपत्यं प्रत्याययिष्यति, ऐश्वर्याद् वा प्रत्याययिष्यतीति न दोषः ॥ ४ ॥

आ० नि० ॥ इन्द्रप्रकाशकमन्त्राणां गार्हपत्ये विनियोगाधिकरणम् ॥

॥ २ ॥ गार्हपत्यन्यायः ॥

तथाह्वानमपीति चेत् ॥ ५ ॥

स्तो दर्शपूर्णमासौ, तत्रेदं समाम्नायते । हविष्कृदेहीति त्रिरवघ्नन्नाह्वयतीति । तत्र सन्देहः । किमेष मन्त्रोऽवहन्तिं प्रत्युपदिश्यते उत हन्तिरस्य कालं लक्षयतीति । कथं हन्तिं प्रत्युपदिश्यते, कथं वा कालं लक्षयेत् ? यद्येवं सम्बन्धः क्रियेत– हविष्कृदेहीत्यवघ्नन्निति, ततो हन्तिं प्रत्युपदिश्यते । अथावघ्नन्नाह्वयतीति. ततोऽस्य कालं लक्षयतीति । किं तावत् प्राप्तम् ॥ तथा आह्वानमपि ॥ यथा ऐन्द्री गार्हपत्यं प्रत्युपदिश्यते, एवमेष मन्त्रो हन्तिं प्रत्युपदिश्यते । एवं श्रुतिरनुगृहीता भवति । इतरथा लक्षणा स्यात् । हन्तिकालस्य मन्त्रस्य च सम्बन्धो भवेत् । न हन्तेर्मन्त्रस्य । एवं च सत्याह्वयतीत्ययमनुवादः । आह्वानं करोति । यो हि, एहीति ब्रूते स आह्वयति । तत्र केनचिद् गुणेन मन्त्रो हन्तिं प्रत्याययिष्यति । तस्मान्नाह्वाने विनियोक्तव्यः ॥ ५ ॥ ॥ पूर्वपक्षः ॥

न कालविधिश्चोदितत्वात् ॥ ६ ॥

नैतदस्ति, हन्तिं प्रत्युपदिश्यते इति । किं तर्हि । काललक्षणा स्यात् । कुतः । त्रिराह्वयतीति त्रित्वमत्र विधीयते । यद्यस्मिन्नेव वाक्ये मन्त्रो विधीयेत, अनेकगुणविधानाद् वाक्यम्भिद्येत । तस्मान्नैवमभिसम्बन्ध एवमवघ्नन्निति । कथं तर्हि । अवघ्नन्नाह्वयतीति । नन्वस्मिन्नपि पक्षे मन्त्रो विधीयते कालश्च तत्र स एव दोषो भवेत् । नेति ब्रूमः । अवहननकाल एवार्थेन हविष्कृदाह्वातव्या । तत्रायमेव सम्बन्धोऽनूद्यते, केवला तु त्रिरावृत्तिर्विधीयते । यत्तु काललक्षणाऽर्थः शब्द इति । नैष दोषः । लौकिकी हि लक्षणा, मन्त्रोऽपि च रूपादेवाह्वाने प्राप्तः, सोऽप्यनूद्यत एव । चोदितश्च वाक्यान्तरेणावघातः शक्नोति कालं लक्षयितुम् । तस्मादाह्वाने विनियोक्तव्यम् इति ॥ ६ ॥ ॥ सि० ॥

गुणाभावात् ॥ ७ ॥

इदं पदोत्तरं सूत्रम् । अथ कस्मान्न गुणादवहन्तिं ब्रूते । हविष्करोति हि अवहन्तिः । तस्माद् हविष्कृत् किमेतं भविष्यति । रूपादेवावहन्तौ मन्त्रे प्राप्ते केवलं त्रिरावृत्तिमेव वक्ष्यति, न भावष्यति

शेषणं सम्बन्धाद् गार्हपत्यशब्दः । तस्माद् गार्हपत्यविशिष्टमुपस्थान-मिन्द्रार्थं कर्त्तव्यमिति । गार्हपत्यश्च देशेन विशिंष्यान्मुख्यमेव कार्यं मन्त्राणाम् ॥ एवं प्राप्ते ब्रूमः ॥ वचनात्त्वयथार्थमैन्द्री स्यात् । नैतदस्ति, इन्द्रार्थमुपस्थानमिति, अयथार्थमैन्द्री स्यात् । कुतः । वचनसामर्थ्यात् वचनमिदं भवति, ऐन्द्र्या गार्हपत्यमुपतिष्ठते इति । गार्हपत्ये द्वितीया विभक्तिः प्राधान्यमाह किमिव वचनं न कुर्यात् । नास्ति वचन-स्यातिभारः । तस्माद् गार्हपत्यार्थमुपस्थानम् ॥ ३ ॥

गुणाद्वाप्यभिधानं स्यात् सम्बन्धस्याशास्त्रहेतुत्वात् ॥४॥

अत्राह नन्वेतदुक्तं—नैन्द्रेण मन्त्रेण गार्हपत्योपस्थानं भविष्य-तीति । उच्यते । वचनाद् भविष्यति । आह । न वचनशतेनापि श-क्यमेतत् इन्द्रशब्देनाग्निं प्रत्याययेदिति ब्रुवन् विहन्येत । यथा अग्निना सिञ्चेदिति, उदकेन दीपयेदिति । न हि शास्त्रहेतुकः श-ब्दार्थयोः सम्बन्धो भवति । नित्योऽसौ लोकतोऽवगम्यते इत्युक्तम् । औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्ध इति । ननु शब्दलक्षणोऽपि भ-वति शब्दार्थयोः सम्बन्धः कृत्रिमः । यथा देवदत्तो यज्ञदत्त इति । भवति कश्चिद् यत्र सम्बन्धस्य विधायकं वाक्यं भवति, न त्वेतद्वा-क्यं शब्दार्थयोः सम्बन्धस्य विधायकं, गार्हपत्यस्येन्द्रशब्दो नामे-ति । कथं तर्हि । सिद्धसम्बन्धेन इन्द्रशब्देन गार्हपत्यमुपतिष्ठते इति । न च शक्यते परशब्देन परं वदितुम् । किमत्र वचनं करिष्यति ॥ अत्रोच्यते ॥ गुणाद् वाप्यभिधानं स्यात् सम्बन्धस्याऽशास्त्रहेतुत्वा-दिति ॥ यद्यपि नेदं वाक्यं शब्दार्थसम्बन्धस्य विधाने हेतुभूतं, तथा-प्यनेनेन्द्रशब्देन शक्यं कर्तुं गार्हपत्याभिधानम् । कुतः । गुणसंयो-गाद् गौणमिदमभिधानं भविष्यति । भवति हि गुणादप्यभिधानम् । यथा, सिंहो देवदत्त , अग्निर्माणवक इति । एवमिहाप्यनिन्द्रे गार्ह-पत्ये इन्द्रशब्दो भविष्यति । अस्ति तु चास्येन्द्रसादृश्यम् यथैव इन्द्रो यज्ञसाधनमेवं गार्हपत्योऽपीति । अथवा इन्दतेरैश्वर्यकर्मण इन्द्रो भवति । भवति च गार्हपत्यस्यापि स्वस्मिन् कार्ये ईश्वरत्वम् । तस्मादिन्द्रशब्देन यः प्रत्याय्यतेऽर्थः स प्रतीतः सादृश्याद् गार्हप-त्यं प्रत्याययिष्यति, ऐश्वर्याद् वा प्रत्याययिष्यतीति न दोषः ॥ ४ ॥ आ० नि० ॥ इन्द्रप्रकाशकमन्त्राणां गार्हपत्ये विनियोगाधिकरणम् ॥

॥ २ ॥ गार्हपत्यन्यायः ॥

तथाह्वानमपीति चेत् ॥ ५ ॥

स्तो दर्शपूर्णमासौ, तत्रेदं समाम्नायते । हविष्कृदेहीति त्रिरवघ्नन्नाह्वयतीति । तत्र सन्देहः । किमेष मन्त्रोऽवहन्तिं प्रत्युपदिश्यते उत हन्तिरस्य कालं लक्षयतीति । कथं हन्तिं प्रत्युपदिश्यते, कथं वा कालं लक्षयेत् ? यद्येवं सम्बन्धः क्रियेत– हविष्कृदेहीत्यवघ्नन्निति, ततो हन्तिं प्रत्युपदिश्यते । अथावघ्नन्नाह्वयतीति. ततोऽस्य कालं लक्षयतीति । किं तावत् प्राप्तम् ॥ तथा आह्वानमपि ॥ यथा ऐन्द्री गार्हपत्यं प्रत्युपदिश्यते, एवमेष मन्त्रो हन्तिं प्रत्युपदिश्यते । एवं श्रुतिरनुगृहीता भवति । इतरथा लक्षणा स्यात् । हन्तिकालस्य मन्त्रस्य च सम्बन्धो भवेत् । न हन्तेर्मन्त्रस्य । एवं च सत्याह्वयतीत्ययमनुवादः । आह्वानं करोति । यो हि. एहीति ब्रूते स आह्वयति । तत्र केनचिद् गुणेन मन्त्रो हन्तिं प्रत्याययिष्यति । तस्मान्नाह्वाने विनियोक्तव्यः ॥ ५ ॥ ॥ पूर्वपक्षः ॥

न कालविधिश्चोदितत्वात् ॥ ६ ॥

नैतदस्ति, हन्तिं प्रत्युपदिश्यते इति । किं तर्हि । काललक्षणा स्यात् । कुतः । त्रिराह्वयतीति त्रित्वमत्र विधीयते । यद्यस्मिन्नेव वाक्ये मन्त्रो विधीयेत, अनेकगुणविधानाद् वाक्यम्भिद्येत । तस्मान्नैवमभिसम्बन्ध एवमवघ्नन्निति । कथं तर्हि । अवघ्नन्नाह्वयतीति । नन्वस्मिन्नपि पक्षे मन्त्रो विधीयते कालश्च तत्र स एव दोषो भवेत् । नेति ब्रूमः । अवहननकाल एवार्थेन हविष्कृदाह्वातव्या । तत्रायमेव सम्बन्धोऽनूद्यते, केवला तु त्रिरावृत्तिर्विधीयते । यत्तु काललक्षणार्थः शब्द इति । नैष दोषः । लौकिकी हि लक्षणा, मन्त्रोऽपि च रूपादेवाह्वाने प्राप्तः, सोऽप्यनूद्यत एव । चोदितश्च वाक्यान्तरेणावघातः शक्नोति कालं लक्षयितुम् । तस्मादाह्वाने विनियोक्तव्यम् इति ॥ ६ ॥ ॥ सि० ॥

गुणाभावात् ॥ ७ ॥

इदं पदोत्तरं सूत्रम् । अथ कस्मान्न गुणादवहन्तिं ब्रूते । हविष्करोति हि अवहन्तिः । तस्माद् हविष्कृत् किमेवं भविष्यति । रूपादेवावहन्तौ मन्त्रे प्राप्ते केवलं त्रिरावृत्तिमेव वक्ष्यति, न भावयति

वाक्यभेद इति । अत्रोच्यते । गुणाभावाद् गौणमभिधानमवहन्तौ न सम्भवतीति । न ह्यसौ आहूतोऽस्मीत्यवगच्छति । तत्र अदृष्टार्थमाह्वानं स्यात् । यजमानस्य पत्न्यां हविष्कृति दृष्टार्थमाह्वानम् । तस्मान्न हन्तिमन्त्र इति ॥ ७ ॥ ॥ आ० नि० ॥

लिङ्गाच्च ॥ ८ ॥

लिङ्गं च भवति । वाग्वै हविष्कृद्वाचमेवैतदाह्वयतीति । न च वाचोऽवहन्तिना सादृश्यमस्ति । अस्ति तु यजमानस्य पत्न्या । सा हि स्त्री । वागिति च स्त्रीलिङ्गः । अवहन्तिस्तु न स्त्री, न पुमान्, न नपुंसकमिति । नन्ववहन्तेरपि स्त्रीलिङ्गः शब्दोऽस्ति, क्रिया इति । अत्र ब्रूमः । न नियोगतोऽवहन्तेः स्त्रीलिङ्गः शब्दः । पुँल्लिङ्गोऽपि तस्याऽस्ति, अवघात इति । नपुंसकलिङ्गोऽपि, कर्मेति । अपि च, पत्न्याः स्वरूपेण सादृश्यम्, अवहन्तेः पररूपेण शब्देन । तस्मात् पत्न्यां हविष्कृति लिङ्गमनुरूपतरं भवति ॥ ८ ॥

विधिकोपश्चोपदेशे स्यात् ॥ ९ ॥

अवहन्तिमन्त्रे सति अस्मिन्मन्त्रे विध्यन्तरकोपः स्यात् । अपहतं रक्ष इत्यवहन्ति, अपहता यातुधाना इत्यवहन्तीति । तत्र पक्षे अभावान्नित्यवच्छ्रुतिरुपरुध्येत । तस्मादवघ्नन्निति काललक्षणार्थ इति ॥ ९ ॥ युक्तिः ॥ आह्वानप्रकाशकमन्त्राणाम् आह्वाने विनियोगाऽधिकरणम् ॥ ३ ॥

तथोत्थानविसर्जने ॥ १० ॥

ज्योतिष्टोमे श्रूयते– उत्तिष्ठन्नन्वाह, अग्नीदग्नीन् विहरेति । तथा, व्रतं कृणुतेति वाचं विसृजतीति । तत्र सन्देहः । किमुत्थानं वाग्विसर्जनं च प्रतिमन्त्रयोरुपदेशः, उत कालार्थः संयोग इति । अत्र पूर्वाधिकरणन्यायोऽतिदिश्यते । यस्तत्र पूर्वः पक्षः स इह पूर्वः पक्षः । यस्तत्र सिद्धान्तः स इह सिद्धान्तः । अग्नीदग्नीनित्येवमुत्तिष्ठन्नन्वाहेति । व्रतं कृणुतेत्येवं वाचं विसृजतीति पूर्वः पक्षः । लक्षणाऽभावादुत्तिष्ठन्नन्वाहेति सिद्धान्ते सम्बन्धः । व्रतं कृणुतेत्युच्यमाने वाचं विसृजतीति वाक्येन पूर्वः पक्षः । लिङ्गेन सिद्धान्तः ॥ यद्यपि च शक्यते, उत्थानक्रिययाऽग्नीदग्नीन् विहरेति वक्तुम् । उत्थानेनाग्निरिष्यते, विह्रियश्च विह्रियते इति । व्रतं कृणुतेति च वागभिधानम् । त-

थाऽदृष्टार्थं वचनं भवतीति न मन्त्रयोरुत्थानविसर्जनार्थता कल्प्येत । कल्प्यमानायां च मन्त्रान्तरं विहितं बाध्येत । याः पशूनामृषभो वाच इति । अपि चोत्थानवाग्विसर्गौ प्रति मन्त्रौ विधीयमानावदृष्टार्थौ स्याताम् । प्रेषणे तु दृष्टार्थौ । तत्, लक्षणैवात्र न्याय्या ॥ ॥ १० ॥ ॥ ॥ अग्निविहरणादिप्रकाशकमन्त्राणां तत्रैव विनियोगाऽधिकरणम् ॥ ४ ॥

सूक्तवाके च कालविधिः परार्थत्वात् ॥ ११ ॥

दर्शपूर्णमासयोः श्रूयते, सूक्तवाकेन प्रस्तरं प्रहरतीति । तत्र सन्देहः । किं सूक्तवाकः प्रस्तरप्रहरणं प्रत्युपदिश्यते, उत इयं काललक्षणेति । तदुच्यते । काललक्षणेति । कुतः । सूक्तवाकस्य देवतासङ्कीर्त्तनार्थत्वात् । प्रस्तरप्रहरणं च प्रत्यशक्तेः, प्रस्तरस्य च स्रुग्धारणार्थत्वात् ॥ ११ ॥ ॥ पूर्वपक्षः ॥

उपदेशो वा याज्याशब्दो हि नाकस्मात् ॥ १२ ॥

उपदेशो वा प्रस्तरप्रहरणं प्रति मन्त्रस्य स्यात् । एवं श्रुतिविहितोऽर्थो भवति । सूक्तवाकेनेति करणविभक्तिसंयोगात् । इतरथा लक्षणा स्यात्, सूक्तवाकेन लक्षणेन प्रस्तरं प्रहरेदिति । एवञ्च कृत्वा याज्याशब्द उपपन्नो भवति । सूक्तवाक एव याज्या, प्रस्तर आहुतिरिति ॥ १२ ॥ ॥ सिद्धान्तः ॥

स देवतार्थस्तत्संयोगात् ॥ १३ ॥

यदुक्तं– देवतासङ्कीर्त्तने सूक्तवाकः समर्थो, न प्रस्तरप्रहरणे इति । उच्यते । न । देवतावचनं प्रहरणेन न सम्बध्यते । प्रहरणं हि याजिः । मान्त्रवर्णिको देवताविधिः । एवमभिसम्बन्ध । अग्निरिदं हविरजुषतावीवृधत इत्येवं देवतामनुक्रम्य, आशास्तेऽयं यजमान इत्युक्त्वा, इदमिदमशास्ते इति च । यदनेन हविषा आशास्ते तदस्य स्यादिति प्रस्तरं हविर्निर्दिशति । अग्न्यादींश्च देवताविशेषान् । तेन प्रहरतिर्यजतिः । एवं सूक्तवाकेन प्रस्तरः प्रहर्तुं शक्यते, यदि प्रहरतिर्यजतिरग्न्यादिदेवताकश्च । तस्मात् सूक्तवाकस्य हरतिसंयोगेऽपि देवतार्थता घटते एव । यदि, अग्निरिदं हविरजुषतावीवृधत इत्येवमाद्येव श्रूयेत, न, आशास्तेऽयं यजमान इत्येवमादीनि अपराणि, ततोऽग्न्यादय एवेष्टानान्तरिता इत्येव पर्यवसितं वाक्यं भवेत्

यतस्तु खलु आशास्तेऽयं यजमान इत्येवमादीन्यपराणि श्रूयन्ते, तेनेह पर्यवसानम् । अग्न्यादयः पुरोडाशादिभिरिष्टाः । अपरं तु यजमान आशास्ते । तदनेन प्रस्तरेण प्राप्नुयादिति ॥ ननु सत्स्वप्येतेषु देवतासङ्कीर्त्तने एव पर्यवस्येत्, पुरोडाशादिभिरिष्टा अग्न्यादयः । तत एव यजमान आयुरादीन्यप्याशासानः प्राप्नुयादिति । उच्यते । उभयथा सम्बन्धे सति प्रहरणे विनियोक्तव्यः । लिङ्गं च न बाधितं भविष्यति । वाक्यं चानुग्रहीष्यते इति ॥ अथ वाऽग्निरिदं हविरजुषतेति प्रस्तर एव हविर्निर्दिश्यते एवमिदमिति । सन्निहितवचनमुपपन्नं भविष्यतीति ॥ १३ ॥ ॥ पूर्वपक्षनिरासः ॥

प्रतिपत्तिरिति चेत् स्विष्टकृद्वदुभयसंस्कारः स्यात् ॥ १४ ॥

अथ स्रुग्धारणे विनियुक्तस्य प्रस्तरस्य प्रहरणं प्रतिपत्तिरित्युच्यते । तत्र प्रतिवचनं, स्विष्टकृद्वदेतत् स्यादिति । यथेज्यार्थात् पुरोडाशाद्, वचनप्रामाण्यात् स्विष्टकृदिज्यते, यागश्च स भवति । प्रतिपाद्यते च पुरोडाशः, एवं प्रतिपाद्यतैव हि प्रस्तरो यागश्च निर्वर्त्स्यते इति न दोषः । प्रतिपाद्यमानोऽपि हि त्यज्यते । प्रत्यक्षतः प्रतिपाद्यते । वचनादिज्यां साधयतीत्येवं गम्यते । तस्मात् सूक्तवाकः प्रहरतिमन्त्र इति ॥ १४ ॥ ॥ आशङ्कानिरासः ॥ सूक्तवाकस्य प्रस्तरप्रहरणाङ्गताधिकरणम् ॥ ५ ॥ प्रस्तरप्रहरणन्यायः ॥

कृत्स्नोपदेशादुभयत्र सर्ववचनम् ॥ १५ ॥

दर्शपूर्णमासयोः, सूक्तवाकेन प्रस्तरं प्रहरतीति श्रूयते । तत्र सन्देह । किं पौर्णमास्यां कृत्स्नः सूक्तवाकः प्रयोक्तव्यः, कृतस्नोऽमावास्यायाम्, उत यथासामर्थ्यं निष्कृष्य यथायथं प्रयोग इति । तदुच्यते । उभयत्र सर्ववचनमिति । कुतः । कृत्स्नो हि मन्त्रः सूक्तवाक इत्युच्यते । स पदेनापि विना, सूक्तवाको न स्यात् । तत्र सूक्तवाकेन न प्रहृतं भवेत् । तस्मादुभयत्र कृत्स्नः सूक्तवाको वदितव्यः ॥ १५ ॥ ॥ पूर्वपक्षः ॥

यथार्थं वा शेषभूतसंस्कारात् ॥ १६ ॥

ये पौर्णमासीदेवतावाचिनः शब्दास्ते पौर्णमास्यां प्रयोक्तव्याः, नाऽमावास्यायाम् । ये अमावास्यादेवतावाचिनस्ते अमावास्यायां, न पौर्णमास्याम् । शेषभूतमर्थं संस्कुर्वन्तो मन्त्रा उपकुर्वन्ति, नान्यथे-

त्युक्तम् । तस्माद् ये यत्रोपकुर्वन्ति, ते तत्र प्रयोक्तव्या इति न कृत्स्नः पौर्णमास्यां, न कृत्स्नश्चामावास्यायामिति ॥ १६ ॥ ॥ सि० ॥

वचनादिति चेत् ॥ १७ ॥

अथ यदुक्तं वचनमिदं भविष्यति, सूक्तवाकेन प्रहरतीति । तत्र पदेनापि ऊनेन न सूक्तवाकेन प्रहृतं भवेत् । कृत्स्नस्य हि सूक्तवाकस्योपदेश इति ॥ १७ ॥ ॥ आशङ्का ॥

तदुच्यते ॥

प्रकरणाविभागादुभे प्रति कृत्स्नशब्दः ॥ १८ ॥

उभे पौर्णमास्यमावास्ये प्रति एष कृत्स्नशब्दः । उभयोः प्रकरणात् । उभयोरसौ कृत्स्न उच्यते, अवयवेऽवयवे इति ॥ नैतदेवम् ॥ न हि सापेक्षाणाम् इतिकर्त्तव्यतया सम्बन्धः । न हि इतिकर्त्तव्यता एतद्विशिष्टा श्रूयते । इतिकर्त्तव्यताविशिष्टास्त्वेते गम्यन्ते । कुतः । न हि इतिकर्त्तव्यतां प्रति कर्माणि विधीयन्ते । फलं प्रति तेषां विधिः । इतिकर्त्तव्यता तु कर्मणां विधीयते । तत्र सन्निधानाविशेषात्, कस्य किं विधीयते, कस्य नेति न गम्यते विशेषः । साधनत्वेन च सर्वेषां निर्देशादितिकर्त्तव्यतायाः सन्निधानाच्च, वचनाच्चास्य, प्रकरणलिङ्गस्याविशेषात् एकैकस्य कृत्स्नं प्रकरणं निराकाङ्क्षस्य, न सहायमपेक्षमाणस्य । तस्मादेकैकं प्रति कृत्स्नः सूक्तवाक उपदिश्यते । संविभागेऽपि प्रधानानां, कृत्स्न एव प्रयोक्तव्य इति यानि यत्रानर्थकानि पदानि, तान्यपि तत्र प्रयोक्तव्यानि । अदृष्टाय भविष्यन्ति । सूक्तवाकेन प्रहरतीति वचनात् । नास्ति वचनस्यातिभारः । गुणेन वा केनचिदभिधानं तासां देवतानां निर्वर्त्तयिष्यन्तीति ॥ अत्रोच्यते नैतदेवम् । उक्तम् । मुख्यमेव कार्य्यं मन्त्राणां, न गौणमिति । संस्कारार्थत्वादेवोत्कर्षो न्याय्यः । न गौणमभिधानमिति । कस्तर्हि कृत्स्नसंयोगस्य समाधिरुच्यते ? इति । एष समाधिः । न ह्येतदेकं वाक्यं यः कृत्स्नः सूक्तवाकः । बहून्येतानि वाक्यानि । येषां प्रधानदेवताभिधायीनि पदानि मध्ये, साधारणानि तन्त्रपदानि पुरस्तादुच्चार्यन्ते, तथा परस्तात् । यथा परस्तात् । यथाऽग्निरिदं हविरजुषतावीवृधत महोज्यायीकृताग्नीषोमाविदं हविरजुषेतामवीवृधेतामित्येवमादीनि । तेषां पुरस्तात्तन्त्रम् । यथा, इदं द्यावापृथिवी-

इति । परस्तादपि, यथा, अस्यामृधेदिति । तान्येतानि सर्वाणि सूक्तवचनेन सूक्तवाकशब्दं लभन्ते । न च, तेषां समुदायः कञ्चिदर्थं वदति । तस्मान्न समुदायः सूक्तवाकः । न च साक्षात्साधनम् । सूक्तवाकसामान्यस्यैकत्वात् । सूक्तवाको वर्त्तते इत्येकवचनं भवति । सूक्तवाकेन प्रस्तरं प्रहरतीति तु येन केनचित् सूक्तवाकेन प्रह्रियमाणं यथाश्रुतं कृतं भवति । तस्मान्न समुदायः सूक्तवाकः । यत्तु अमावास्यादेवतावाचीनि पदानि, न पौर्णमास्यां प्रयुज्यन्ते, न तत्र सूक्तवाकशब्दो बाध्यते । प्रकरणं तत्र लिङ्गेन बाधितम् । तच्च न्याय्यमेव तस्मात् पौर्णमास्याममावास्यायां च विभज्य सूक्तवाकः प्रयोक्तव्य इति ॥ १८ ॥ ॥ आ० नि० ॥ सूक्तवाकानामर्थानुसारेण विनियोगाधिकरणम् ॥ ६ ॥ सूक्तवाकन्यायः ॥

लिङ्गक्रमसमाख्यानात् काम्ययुक्तं समाम्नानम् ॥ १९ ॥

इह काम्ययाज्यानुवाक्याकाण्डमुदाहरणम् । इन्द्राग्नी रोचना दिवः, प्रवर्षणिभ्यः, इन्द्राग्नीनवति पुरः श्लथद्वृत्रमित्येवमाद्या ऋचः । अपरा अपि काम्या इष्टयः । ऐन्द्राग्नमेकादशकपालं निर्वपेत्, यस्य सजाता वियायुः, ऐन्द्राग्नमेकादशकपालं निर्वपेद् भ्रातृव्यवान् अग्नये वैश्वानराय द्वादशकपालं निर्वपेद् रुक्कामः ।अग्नये वैश्वानराय द्वादशकपालं निर्वपेत् सपत्नमभिद्रोष्यन्नित्येवमाद्याः । तदेता याज्यानुवाक्याः प्रति सन्देहः । किं यावत् किञ्चिदैन्द्राग्नं कर्म, तत्र सर्वत्रानेन ऐन्द्राग्नेन याज्यानुवाक्यायुगलेन भवितव्यम्, उतैतस्यामेव ऐन्द्राग्न्यामिष्टौ काम्यायामिति । एवं वैश्वानरीययोर्याज्यानुवाक्ययोः । एवं सर्वत्र ॥ किं तावत् प्राप्तम् ॥ यावत् किञ्चिदैन्द्राग्नं वैश्वानरीयमग्नीषोमीयं जातवेदसं च सर्वत्रैता याज्यानुवाक्या भवेयुः । कुतः । लिङ्गात् । ननु क्रमसमाख्याने विशेषके भविष्यतः । सत्यम् । तथापि क्रमं समाख्यां च शक्नोति लिङ्गं बाधितुमिति ॥ एवं प्राप्ते ब्रूमः ॥ लिङ्गक्रमसमाख्यानात् तास्वेव काम्यास्वेता याज्यानुवाक्या इति गम्यते । य एव हि लिङ्गक्रम एषां कर्मणां, स एवासां याज्यानुवाक्यानाम् । तेन तासामेव ताः शेषभूता इति ॥

ननु लिङ्गं बलवत्तरमित्युक्तम् । सत्यमेतत् । इह तु समाख्या बलीयसी । न ह्येताः समाख्यानादृते एषां काम्यानां कर्मणां प्राप्नुव-

न्ति । न भिन्नदेशानां कर्म्मणाम् । कुतः । समाख्यामन्तरेण आसाम् ऋचां याज्यानुवाक्यात्वमेव न विज्ञायते, कुतो भिन्नदेशानां कर्म्मणां याज्यानुवाक्या भविष्यन्ति ? इति । या चैषां समाख्या सा काम्यानामेव याज्यानुवाक्यात्वमाचष्टे, न सर्वेषाम् । यदि समाख्या नाद्रियते । याज्यानुवाक्यात्वमेवैषां न भवति । यदि आद्रियते, तदा काम्यानामेव । एवं हि तत् समाख्यायते, काम्ययाज्यानुवाक्याकाण्डमिति ॥

अथ किमर्थमुभयमुपदिश्यते, लिङ्गक्रमादिति । समाख्यानादिति च । अस्ति तत्र पाथिकृतीयं व्रातपतीयं च कर्म्म । सामिधेनीकार्यमप्यस्ति । याज्यानुवाक्याकार्यमपि । यदि लिङ्गक्रमादित्येतावदेवोच्येत, सामिधेनीकार्येऽपि लिङ्गेन तासां विनियोगः स्यात् । अथ किमर्थं लिङ्गक्रमौ व्यपदिश्येते । सर्वा याज्यानुवाक्याकार्ये एव विनियुज्येरन्, सामिधेनीषु विनियोगो न स्यात् । अथ पुनः समाख्यानाल्लिङ्गक्रमाच्च निर्वृत्ते याज्यानुवाक्याकार्ये, सामिधेनीषु विनियोगः सिद्धो भवति, यथा आग्निवारुण्या इष्टेः क्रमेऽतीते सौमारौद्रीणामनागते, मनोऋचस्ताः सामिधेनीषु धाय्या इत्युच्यन्ते । तथा, पृथुपाजास्तं सम्बाधे इति द्वे धाय्ये कल्प्येते । तस्मादुभयं व्यपदेष्टव्यमिति ॥ १९ ॥ काम्ययाज्यानुवाक्याकाण्डानां काम्यमात्राङ्गताऽधिकरणम् ॥ ७ ॥

अधिकारे च मन्त्रविधिरतदाख्येषु शिष्टत्वात् ॥२०॥

ज्योतिष्टोमे श्रूयते । आग्नेय्या आग्नीध्रमुपतिष्ठते, ऐन्द्र्या सदः, वैष्णव्या हविर्धानमिति । तत्र सन्देहः । किं प्रकृताभिरेवंलिङ्गवतीभिरुपस्थातव्यम्, उत दाशतयीभ्यः एवंलिङ्गा आगमयितव्याः ? इति ॥ किं तावत् प्राप्तम् ? प्रकरणे च मन्त्रो लिङ्गेन विधीयमानो दाशतयीभ्य एवागमयितव्यः, आग्नेयीत्येवमादिभिर्हि शक्या दाशतय्योऽभिवदितुम् । यश्चायं प्रकृतः, स कार्यान्तरे विनियुक्तो, न इहाप्युपदेशमर्हति । उपदिष्टोपदेशो हि न न्याय्य एवञ्जातीयकस्य । कथञ्जातीयकस्य ? । यः कस्मिँश्चिद्विशेषेणोपदिष्टः । नासौ सामान्येन लिङ्गेन अन्यत्रोपदेशमर्हति । कथम् । यदि तत् लिङ्गं तस्य लक्षणत्वेन, ततः स विशिष्टो लक्ष्येत, येनानेनैवंलिङ्गेनैतत् करोतीति । ततो नोपदि-

ऐो भवति । अथोपदिश्यते, एवँल्लिङ्गेन करोतीति । ततो न लक्ष्यते, तेनोपदिष्टस्यैवञ्जातीयकस्यैवञ्जातीयकः पुनरुपदेशो न न्याय्यः । तस्माद् दाशतयीलिङ्गवन्तो मन्त्रा ग्रहीतव्याः ॥ ननु प्रकरणसामर्थ्यतः प्रकृता ग्रहीतुं न्याय्याः । नेत्युच्यते । लिङ्गं हि प्रकरणाद् बलीयः । आह विरोधे सति लिङ्गेन प्रकरणं बाध्येत । न चैतयोर्विरोधः न वयं प्रकरणमनुजिघृक्षन्तः प्रकृतं लिङ्गवन्तमुपाददाना लिङ्गमुपबाधेमहि । यदि तु प्रकृतं विलिङ्गमुपाददेमहि, ततो बाधेमहि लिङ्गम् । उभयं सम्पादयिष्यामः प्रकरणं लिङ्गञ्च । नैतदेवम् । लिङ्गेन प्रत्ययो भवति । दाशतयेनापि कर्त्तव्यमिति । दाशतय्योऽपि हि आग्नेयीशब्देन शक्यन्ते वदितुम् । स प्रत्ययो लिङ्गजनितो यन्मिथ्येति कल्प्यते, तत् प्रकरणानुरोधात् । स चेत् प्रकरणमनुरुद्ध्यते, मिथ्येति कल्प्यते । अथ नानुरुद्ध्यते सम्यगिति, तस्माद् विरोधः । विरोधे च प्रकरणदौर्बल्यम् ॥

उच्यते । तल्लिङ्गवत्ताऽनेनोपस्थानेनानुग्रहीतव्या, न दाशतयी मन्त्रव्यक्तिः । सा च प्रकृते मन्त्रे उपादीयमाने निरवशेषा उपात्ता भवति । दाशतय्यां पुनर्मन्त्रव्यक्तौ उपादीयमानायां प्रकरणाद् या मन्त्रव्यक्तिः प्राप्नोति, सा बाधिता भवत्यऽसति विरोधे । न च इह लिङ्गप्रकरणयोर्विरोधः, प्रकरणाद् व्यक्तिः प्रतीयते, लिङ्गात् सामान्यम् । अन्या च व्यक्तिरन्यत् सामान्यम् । तस्मात् प्रकृतो लिङ्गवानुपादेय इति । उच्यते । सत्यमेवमेतत् । प्रकृते उपादीयमाने प्रकरणं न बाधितं भवति लिङ्गमप्यनुगृहीतम् । लिङ्गजनितस्तु प्रत्ययः कश्चिन्मिथ्येति कल्पितो भवति । ननु व्यक्तिरपदार्थः । कथं व्यक्तावनुपादीयमानायां प्रत्ययो बाध्येत । उच्यते । एतदेव न विजानीमो, लिङ्गवत्ताऽप्राङ्गं न वेति । किन्तु तद्धितनिर्देशोऽयम् । तत्र देवताया मन्त्रो लक्ष्यते । मन्त्रव्यक्तिर्हि साधनं, न सामान्यं नाम किञ्चित्परम् । देवतैवात्र सामान्यं, यया साधनं लक्षयितव्यम् । न च गम्यते विशेषः— अयमसौ मन्त्रो, नायमसाविति । अनवगम्यमाने विशेषे सर्वे तल्लिङ्गा ग्रहीतव्या इति । दाशतय्यामपि मन्त्रव्यक्तौ भवति प्रत्ययः । स प्रकरणानुरोधेन बाध्येतेत्यन्याय्यम् । एवं सति न दाशतय्य एवोपादातव्या भवन्ति । प्रकृतमप्युपाददीरन् । नन्वेतदुक्तं— कार्य्यान्तरे प्रकृतस्योपदेशो नासावर्थान्तरे उपदेक्ष्यते इति ।

उच्यते। न नियोगत स एवार्थान्तरे वर्त्तते। स चान्यश्च सामान्येन लिङ्गेन। नैवं सति किञ्चिद् दुष्यति। नन्वेतद् दुष्यति। न। उभयमनुगृहीतं भवति लिङ्गं प्रकरणञ्च। सत्यम्। नानुगृहीत भवति। किन्त्वननुग्राह्यमेव प्रकरणं लिङ्गप्रत्ययविरुद्धात्। अपि च, न लिङ्गं प्रकरणं वा अनुग्रहीतव्यमिति। तत्परिच्छिन्ने प्रवृत्तिर्भवति यदवगम्यते, एतत् फलवदिति। तत्र प्रवर्त्तते। किमतो यद्येवम्। एतदतो भवति। न लिङ्गमनुगृहीतं क्वचिदित्यपरस्मिँस्तत्परिच्छिन्ने न प्रवृत्तिर्भवितुमर्हति। तस्माद्दाशतय्यो ग्रहीतव्या इति गम्यते॥२०॥ पूर्व०॥

तदाख्यो वा प्रकरणोपपत्तिभ्याम् ॥ २१ ॥

तदाख्यो ज्योतिष्टोमसमाख्यात एव ग्रहीतव्यः। कुतः॥ प्रकरणोपपत्तिभ्याम्॥ प्रकृतो हि असौ। प्रकृतप्रत्ययश्च न्याय्यः। कथम्। न ज्योतिष्टोमं प्रति मन्त्रस्य व्यापारविधानमुपपद्यते। प्राप्तत्वादेव। व्यापारविशेषविधानं तूपपद्यते। अप्राप्तत्वाद् व्यापारविशेषस्य। अनपेक्ष्य च प्रकरणं दाशतये विधीयमाने वाक्यं भिद्येत। उपस्थानञ्च कुर्यात्। तच्चैवं लिङ्गेनेति॥ २१॥ ॥ सि०॥

अनर्थकश्चोपदेशः स्यादसम्बन्धात् फलवता न ह्युपस्थानं फलवत् ॥ २२ ॥

ननु च प्रकरणाज्ज्योतिष्टोमस्योपकारकं स्यात्। यद्युपस्थानज्योतिष्टोमसम्बन्धो विवक्ष्येत, तदोपस्थानं ज्योतिष्टोमे उपदिश्येत। प्रकरणात्तेनैकवाक्यतामियात्। यदा तु खलूपस्थानस्य मन्त्रसम्बन्धो विवक्ष्यते सर्वोपस्थानेषु, तदा मन्त्रः प्राप्नोति प्रकरणं बाधित्वा-न प्रकरणं विशेषकं भवितुमर्हति। उभयसम्बन्धे वाक्यभेदः। अस्मत्पक्षे न पुनरयं दोषः। येनाग्नेयेनैन्द्रेण वा ज्योतिष्टोमे व्यापारः क्रियते, तेनोपस्थानव्यापारविशेषः। तदा ज्यौतिष्टोमिको विधीयते, अन्यत् सर्वमनूद्यत इति, न दोषो भवति। अथवा आग्नीध्र-हविर्धानसदःसम्बन्धमात्रं विधीयते, उपतिष्ठते इत्ययमनुवादः। अनेन मन्त्रेण आग्नीध्रमुपतिष्ठते इति समासीदति इत्यर्थः। तस्मात् प्रकृता मन्त्रा एवञ्जातीयका उपादातव्या इति॥ २२॥

सर्वेषां चोपदिष्टत्वात् ॥ २३ ॥

यदप्युक्तमुपदिष्टा हि ते प्रकृताः कार्य्यान्तरे इति। तदुच्यते।

उक्तोत्तरमेतत् । अपि च न केनाचिद् नोपदिष्टाः, सर्वे यावस्तोमे आश्विने शस्यमाने सूर्येऽनुद्यति । तेन न प्रकृते कश्चिद्विशेषः । तस्मात् प्रकृतस्यैव ग्रहणम् ॥ २३ ॥ युक्तिः ॥ आग्नीध्रोपस्थाने प्राकृतानां मन्त्राणां विनियोगाधिकरणम् ॥ ८ ॥

लिङ्गसमाख्यानाभ्यां भक्षार्थताऽनुवाकस्य ॥ २४ ॥

भक्षमन्त्रः श्रूयते— भक्षे हि मा विश दीर्घायुत्वाय शन्तनुत्वाय रायस्पोषाय वर्चसे सुप्रजास्त्वाय । एहि वसो पुरोवसो प्रियो मे हृदयोऽस्यश्विनोस्त्वा बाहुभ्यां सध्यासम् । नृचक्षसन्त्वा देव सोम सुचक्षा अवख्येषम् । हिन्वमे गात्रा हरिवोगणान्मे मा वितीतृषः । शिवो मे सप्तर्षीन् उपतिष्ठस्व मा मेऽवाङ्नाभिमतिगाः मन्द्राभिभूतिः केतुर्यज्ञानां वागूजुषाणा सोमस्य तृप्यतु वसुमद्गणस्य रुद्रमद्गणस्य आदित्यमद्गणस्य सोमदेवते मतिविदः प्रातःसवनस्य माध्यन्दिनस्य सवनस्य तृतीयसवनस्य गायत्रच्छन्दसस्त्रिष्टुप्छन्दसो जगच्छन्दसोऽग्निष्टुत इन्द्रपीतस्य नराशंसपीतस्य पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामि इत्येवमादिः ॥

तत्र सन्देहः । किं कृत्स्न एषोऽनुवाको भक्षणे विनियोजनीयः, उत कश्चिदस्यावयवोऽन्यत्रापीति । किं प्राप्तम् ॥ लिङ्गसमाख्यानाभ्यां भक्षार्थताऽनुवाकस्य ॥ सर्वोऽनुवाको भक्षणे विनियोजनीयः । कुतः । भक्षयामीत्येष शब्दो व्यक्तं भक्षणे विनियोजनीयः, भक्षणमेष शक्नोति वदितुं, नान्यत् किञ्चित् । अन्यानि चास्य पदानि भक्षणविशेषणवचनान्येव, यत्र यत्र भक्षयामीति तत्र तत्र प्रयुज्यन्ते ॥ नन्वेहि वसो इत्येवमादि, सध्यासमित्येवमन्तं ग्रहणार्थं, स्वेन पदसमूहेन परस्पराकाङ्क्षिणैकार्थं, विभिन्नं भक्षणवाक्यात् । नृचक्षसमित्येवमादि अवख्येषमित्येवमन्तमवेक्षणवचनम् । हिन्व मे गात्रा हरिव इत्येवमादि च, मा मेऽवाङ्नाभिमतिगा इत्येवमन्तं सम्यग्जरणार्थम् । तद् बहुत्वादर्थानाम् । बहूनि वाक्यानि । कथमेतच्छक्यं वदितुं, सर्वमिदमेकं वाक्यं भक्षणे विनियुज्यते इति ॥ उच्यते ॥ सर्वाण्येतानि भक्षणविशेषणानीत्युक्तम् । आह । एवमपि भिद्येत वाक्यं विशेषणविशेष्याणां युगपद्वचनासम्भवात् । उच्यते । न विशेषणानि विवक्षामो, विशेषणैर्ग्रहणावेक्षणादिभिर्विशिष्ट एकोऽर्थो विवक्ष्यते । नैवं सम्यग्

भवति । विशेषणवचनानामविवक्षितस्वार्थवचनता, भक्षणविशेषणपरता चेति । लक्षणया तु गम्यते । श्रुतिलक्षणाविषये च श्रुतिर्न्याय्या, न लक्षणा । तस्मान्नैकं वाक्यमिति ॥ अत्रोच्यते ॥ यद्यप्यमी ग्रहणादयो बहवोऽर्था गम्यन्ते, न तु सर्वे ईप्सिता इति, भक्षणमेवैकं प्रत्याययितव्यम् । तद्धि श्रुतम् । विशेषणान्यश्रुतानि । न तैः प्रतीतैः प्रयोजनम् । प्रयोजनं च यावतः पदसमूहस्यैकं, तावदेकं वाक्यम् । तस्माद् विशिष्टभक्षणार्थमेतदेकं वाक्यमिति भक्षणे विनियोक्तव्यम् । समाख्यानं च भवति । भक्षाऽनुवाक इति । कृत्स्नश्चाऽनुवाको, नावयवः ॥ ननु च समाख्या लौकिकः शब्दः कथं वैदिकमङ्गं नियंस्यतीति । यद्यपि लौकिकस्तथाप्यनादिस्तस्यानुवाकेन सम्बन्धः । किमतो यद्येवम् । एतदतो भवति । भक्षणसमभिव्याहृतमनुवाकं ब्रूते । समभिव्याहारश्च सति सम्बन्धे भवति । यथा पाचको लावक इति । समभिव्याहारात् सम्बन्धमनुमास्यामहे । आह । नानुमानगम्य एवञ्जातीयकेष्वङ्गभावो, विधानादेवावगम्यते, नान्यथा । न च समाख्या विधात्री । अत्रोच्यते । समाख्या सम्बन्धिनौ बुद्धौ सन्निधिमुपनेष्यति, प्रयोगवचनो विधास्यतीति । तस्मात् कृत्स्नोऽनुवाको भक्षणे विनियोक्तव्य इति ॥ २४ ॥ ॥ पूर्व० ॥

तस्य रूपोपदेशाभ्यामपकर्षोऽर्थस्य चोदितत्वात् ॥२५॥

नैतदेवं, कृत्स्नोऽनुवाको भक्षणे विनियुज्यत इति, रूपाद् ग्रहणवाक्यं ग्रहणे विनियुज्येत, एहि इत्येवमादि सध्यासमित्येवमन्तम् । नृचक्षसमित्येवमादि च, अवख्येषमित्येवमन्तं दर्शने । कुतः । मुख्यार्थमेवं तद्वाक्यं भवति, इतरथा लक्षणार्थता स्यात् । मुख्यार्थता च न्याय्या, न लक्ष्यार्थता ॥ उच्यते ॥ विशेषणानामभिधाने, न किञ्चिदस्ति प्रयोजनमित्युक्तम् । अत्रोच्यते । नैवैतानि विशेषणानि । पृथगेवैतानि ग्रहणादीनि स्वैः स्वैर्वाक्यैरुच्यन्ते इति । कुतः । अस्ति हि तैः प्रयोजनम । चोदितानि हि तानि । कानिचित्तु पृथग्वाक्यैः, कानिचिदर्थप्राप्तानि, तान्यवश्यं प्रकाशयितव्यानि । तानि प्रकाशयिष्यन्त्येतानि वाक्यानि । रूपं चैषां तत्प्रकाशनसामर्थ्यम् । अतो नानार्थत्वान्नैकं वाक्यमुच्यते । ननु भक्षणवाक्यशेषीभवितुमप्येषां रूपमिति । उच्यते । बाढमस्ति रूपं, न तु तद्विशेषणान्येतानि कल्प्यन्ते ।

कस्य हेतोरदृष्टार्थानि तथा भवन्ति । उक्तैरनुक्तैर्वा विशेषणैस्तावानेव सोऽर्थः । इतरथा ग्रहणादीनि प्रकाशयिष्यन्ति । तथा दृष्टार्थानि भविष्यन्ति । तस्माद् रूपोपदेशाभ्यामपकर्षो भवेत् केषाञ्चिदत्र इति ॥ २५ ॥ ॥ सिद्धान्तः ॥ भक्षमन्त्राणां यथालिङ्गं ग्रहणादौ विनियोगाधिकरणम् ॥ ९ ॥

गुणाभिधानान्मन्द्रादिरेकमन्त्रः स्यात्तयोरेकार्थसंयोगात् ॥ २६ ॥

भक्षानुवाके श्रूयते । मन्द्राभिभूतिः केतुर्यज्ञानां वाग्जुषाणा सोमस्य तृप्यतु । वसुमद्गणस्य सोमदेवते मतिविदः प्रातःसवनस्य गायत्रच्छन्दसोऽग्निष्टुत इन्द्रपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीति । तत्र सन्देहः, किं मन्द्रादिः तृप्यत्वित्येवमन्त एको मन्त्रः, वसुमद्गणादिरपरः ? उत मन्द्रादिर्भक्षयाम्यन्त एक एव मन्त्र इति । किं तावत् प्राप्तम् । द्वौ मन्त्रौ, द्वौ ह्येतावर्थौ । अन्या तृप्तिरन्यद् भक्षणम् । ततोऽर्थभेदाद् वाक्यभेदः । तदुक्तम् । तस्य रूपोपदेशाभ्यामपकर्षोऽर्थस्य चोदितत्वादिति ॥ एवं प्राप्ते ब्रूमः । गुणाभिधानान्मन्द्रादिरेकमन्त्रः स्यादिति । तृप्तिर्भक्षणविशेषणत्वेनाभिधीयते । भक्षयामि वाक् तर्प्स्यतीति ॥ ननु तृप्यत्वित्येषाऽन्यः शब्दोऽन्यश्च तर्प्स्यतीति । एषा भविष्यन्ती क्रियायामुपपदभूतायां भवतीति । तत्र द्वयोः क्रिययोरस्ति सम्बन्धो भक्षयामि वाक् तर्प्स्यतीति । इह पुनर्भक्षयामि तृप्यत्विति नास्ति कश्चित् सम्बन्धः । उच्यते । न ह्ययं विधौ तृप्यत्विति विज्ञायते । क तर्हि ? । प्रार्थनायां वा प्राप्तकाले वा । यदि भक्षयामि वाक् तर्प्स्यतीत्येवमभिसम्बन्धः क्रियते, यदि वा भक्षयामि वाचस्तर्प्तुं प्राप्तः काल इति । तेन विशेषणविशेष्यभावादेकार्थतायामेकवाक्यत्वे मन्त्रैक्यमुपपद्यते । ननु निराकाङ्क्षे एते वाक्ये भङ्क्त्वा रूपं साकाङ्क्षे क्रियेते । अत्रोच्यते । यद्यप्येते वाक्ये भिन्नार्थे निराकाङ्क्षे द्वावर्थावभिवदेयातां, तथापि भक्षणस्य प्रकाशनं दृष्टं प्रयोजनं, न तर्पणस्येति कृत्वैकार्थ्यमेव भवेत् । किमङ्ग पुनर्गुणभावे गम्यमाने एवात्र । तस्माद् गुणाभिधानान्मन्द्रादिरेकमन्त्रः स्यादिति ॥ २६ ॥ ॥ मन्द्राभिभूतिरित्यादेर्भक्षयामीत्यन्तस्यैकमन्त्रताधिकरणम् ॥ १० ॥

लिङ्गविशेषनिर्देशात् समानविधानेष्वनैन्द्राणा-मसन्त्रत्वम् ॥ २७ ॥

एष एव मन्त्र उदाहरणम् । इह च प्रदानानि ऐन्द्राणि अनैन्द्राणि च विद्यन्ते । तेषां भक्षणान्यपि सन्ति । तत्र सन्देहः । किमैन्द्रेष्वनैन्द्रेषु च मन्त्रः ? उतैन्द्रेष्वेव मन्त्रः । अनैन्द्राणाममन्त्रकं भक्षणमिति । किं तावत् प्राप्तम् । अनैन्द्राणाममन्त्रकं भक्षणमिति । कुतः । समानविधानान्येतानि प्रदानानि । तेष्विन्द्रपीतस्येति मन्त्रोऽनिन्द्रपीतं न शक्नोति वदितुम् । न च समानप्रकरणे ऊहः सम्भवति । असति वचने अन्यार्थानभिधानात् । तस्मादमन्त्रकं भक्षणमेवञ्जातीयकेष्विति ॥ २७ ॥ ॥ पूर्वपक्षः ॥

यथादेवतं वा तत्प्रकृतित्वं हि दर्शयति ॥ २८ ॥

अथ वा यथादेवतमूहेन लक्षयितव्यम । कस्मात् । ध्रुवचमसा हि प्रकृतिभूताः । के पुनर्ध्रुवचमसाः । ये शुक्रामन्थिप्रचारे सवनमुखीयाः । ऐन्द्रास्ते भवन्ति । तेषां प्रकृतिभूतं प्रदानं, विकृतिभूतान्यन्यानि । कथमवगम्यते ? तत्प्रकृतित्वं हि दर्शयति । कथम् । अनुष्टुप्छन्दस इति षोडशिनि अतिरात्रे भक्षमन्त्रं नमतीति । किमत्र दर्शनम् । नमतीति विपरिणामं दर्शयति ॥ ननु वचनमेतत् स्यात् । नेत्युच्यते, नैतत् नमतीति श्रूयते । कथं तर्हि ? नमतीति, अनुष्टुप्छन्दस इति भक्षमन्त्रं नमतीति । स एव ऊहो विकारेषूपपद्यते । तस्मादेते विकाराः । अतोऽनैन्द्रेष्वपि चोदकप्राप्तो मन्त्र ऊहितव्यो भवति । उच्यते । विकारा एते इति लिङ्गमपदिष्टम् । न्यायोऽभिधीयतामिति । उच्यते । ऐन्द्रः सोमो गृह्यते मीयते च । तेन ऐन्द्रेषु सोमोऽनैन्द्रेषु सोम एव नास्तीति सर्वे सोमधर्मा ऐन्द्रेष्वेव, अधर्मका इतरे साकाङ्क्षाः । कथं पुनर्ज्ञायते, ऐन्द्रः सोमो गृह्यते मीयते चेति । मन्त्रवर्णात् । इन्द्राय त्वा वसुमत इत्येवमादिर्मन्त्र ऐन्द्रं सोमं वदितुं शक्नोतीति, नान्यम् । तस्मादैन्द्रः सोमः । तेन ऐन्द्रेषु सोमधर्मा । अन्यानि तु प्रदानानि साकाङ्क्षाणि । अतो धर्मान् ग्रहीष्यन्तीति—न्यायः । तस्माद् यथादेवतमूहितव्यो मन्त्र इति । एवं स्थितं तावदपर्यवसितम । तत एवं सति चिन्तान्तरं वर्तिष्यते ॥ २८ ॥ ॥ सिद्धान्तः ॥ इन्द्रपीतस्येत्यादिमन्त्राणां सर्वेषु भक्षणेषूहेन विनियोगा-

ऽधिकरणम् ॥ ११ ॥

पुनरभ्युन्नीतेषु सर्वेषामुपलक्षणं द्विशेषत्वात् ॥ २९ ॥

सन्ति पुनरभ्युन्नीताः सोमाः, शुक्रामन्थिप्रचारे एव सवनमुखीयाः। तेषां होतुर्वषट्कारेऽनुवषट्कारे च चतुर्भिर्मध्यतःकारिणां चमसैर्हुत्वा होत्रकाणां चमसैः सकृत्सकृद् वषट्कारे एव हुत्वा पुनः सशेषेष्वेव पात्रेषु सोमोऽभ्युन्नीतः। एवं हि तत्र अध्वर्य्युः सम्प्रेष्यति। मध्यतः-कारिणां चमसाध्वर्यवो वषट्कृतेऽनुवषट्कृते जुहुत होत्रकाणां च-मसाध्वर्यवः सकृद् हुत्वा शुक्रस्याभ्युन्नीयोपावर्त्तध्वमिति। तत्र होत्रका नानादेवता यजन्ति। मैत्रावरुणो मित्रावरुणौ, मित्रं वयं हवामहे इति। ब्राह्मणाच्छंसी इन्द्रम्, इन्द्रं त्वा वृषभं वयमिति। पोता मरुतः, मरुतो यस्य हि क्षये इति। नेष्टा त्वष्टारं पत्नीश्च, अग्ने पत्नीः इहावह इति। आग्नीध्रोऽग्निम्, उक्षां नाय वशां नाय इति। तत्र तैश्चमसैः पूर्वस्मिन् वषट्कारे इन्द्र इष्टः। पुनरभ्युन्नीय मित्रा-वरुणाद्या देवता इष्टाः। शेषास्तत्रेन्द्रस्य मित्रावरुणादीनां च। तत्र सन्देहः। किं प्रस्थितदेवतायाश्च इन्द्रस्य मित्रावरुणादीनां चोपल-क्षणमुतेन्द्रो नोपलक्षयितव्यः? इति॥ किं तावत् प्राप्तम्॥ पुनरभ्यु-न्नीतेषु सर्वेषामुपलक्षणम्। कस्मात्। द्विशेषत्वात्। चमसे चमसे तत्र द्वयोः शेषः। प्रकृतौ यस्यै हुतं, तच्छेषस्तत्पीत इत्युक्तम्। इहापि तद्वदेव वदितव्यम्। तस्माच्चमसे चमसे द्वयोरुपलक्षणम्॥ २९॥

अपनयाद्वा पूर्वस्यानुपलक्षणम् ॥ ३० ॥

अपनीतं प्रस्थितदेवतायाः शेषं मन्यामहे। कुतः। मित्रावरुणा-दिभ्यस्तत्पात्रस्थमभ्याश्राव्यते। कथमेतत्। उच्यते। मित्रावरुणा-दयो हीज्यन्ते। तद् यथा आचार्य्यशेषं देवदत्तो भुञ्जानो यदि शेषं पूर्णकाय प्रयच्छति। पूर्णको देवदत्तमुपलक्षयति। देवदत्तशेषं भुङ्क्ते इति, नाचार्य्यशेषम्। तस्मान्न प्रस्थितदेवतया इन्द्र उपलक्ष-यितव्य इति॥ ३०॥ ॥ पूर्वपक्षः॥

ग्रहणाद्वापनयः स्यात् ॥ ३१ ॥

नचैतदस्ति, इन्द्रो नोपलक्षणीय इति। तस्यापि ह्यसौ शेषः प्र-त्यक्षमवगम्यते। नन्वपनीत इति। उच्यते। नासावपनीयते। सकृ-द्धुताश्चमसानभिद्रोणकलशाद् गृह्णाति। सशेषश्चमसो लक्षणमन्य-

स्योन्नीयमानस्य । ततश्चमसस्थो होतुमुन्नेतव्यः प्रेषितो वा । यत्तु यक्ष्यमाणा देवताः प्रति आश्रावित इति । उच्यते । आश्राव्यते तत्र देवताभ्यो, न त्विदं वा तद्वेति । तेन यद्धोतुं गृहीतं तद् आश्रावितमिति गम्यते । न चाऽऽश्रावणवेलायां देवताभिसम्बन्धः, यद् यद् देवताभिसम्बद्धं, तद् आश्राव्यते । तस्मादस्तीन्द्रशेषो लक्ष्यते च । अतः सर्वेषामुपलक्षणमिति । कृत्वाचिन्तैषा । नात्र प्रयोजनं वक्तव्यम् । पूर्वाधिकरणस्यैवैतत् प्रयोजनमवधार्य्यते ॥ ३१ ॥ सिद्धान्तः ॥ अभ्युन्नीतसोमभक्षणे इन्द्रस्याप्युपलक्षणाधिकरणम् ॥ १२ ॥

पात्नीवते तु पूर्ववत् ॥ ३२ ॥

अस्ति पात्नीवतो ग्रहः, यदुपांशु पात्रेणाग्रयणात् पात्नीवतं गृह्णातीति । द्विदेवत्यानां शेषा आग्रयणस्थाल्यामुपनीताः । ततः पात्नीवतो गृह्यते । अथ हुते पात्नीवते तच्छेषे भक्ष्यमाणे भवति सन्देहः । किमिन्द्रवाय्वादय उपलक्षयितव्याः, न वा ? इति । किं तावत् प्राप्तम् । उपलक्षयितव्याः । तेषामपि स्यात्सौ शेषो यथा प्रस्थितदेवताया इति ॥ ३२ ॥

ग्रहणाद्वापनीतं स्यात् ॥ ३३ ॥

अपनीयते हि स शेष इह, न यथापूर्ववत् । तत्र हि पात्रलक्षणत्वेन सङ्कीर्त्यते, न सोमो ग्राह्यत्वेन । इह त्वाग्रयणाद् गृह्णातीति स्थालीस्थः सोमो निर्दिश्यते होतुं यक्ष्यमाणदेवतां प्रति । ननु स्थाल्यामाग्रयणो नाग्रयणश्च । तत्र यस्तस्माद् आग्रयणाद् गृह्यते, स पात्नीवतः । यस्तु सम्पातान्नासौ पात्नीवत इति । उच्यते । आग्रयणोऽपादानं, तस्माद् योऽपैति आग्रयणो नाग्रयणो वा, स सर्वः पात्नीवतः । आग्रयणाच्चैष सर्वोऽपेतः ॥

नन्वनाग्रयणादप्यपेतः । नैष दोषः । आग्रयणात्तावदपेतः । तेनाऽसौ पूर्वदेवताभिः पीत इति न शक्यते वक्तुम् । यो हीन्द्रार्थस्य सोमस्यावयवः शेषः स इन्द्रपीत इति प्रकृतावुच्यते । इहापि तद्वदेव पूर्वदेवतार्थस्यावयवो वदितव्यः । ननु योऽसौ पूर्वदेवतार्थस्तस्यैवायमवयवः । नेति ब्रूमः । न हि हुतस्यावयवो दृश्यते । ननु प्रकृतावपि हुतस्यावयवो न दृश्यते । उच्यते । हुताहुतस्य समुदायस्य तत्राऽवयव उपलक्ष्यते तद्देवतस्य । नन्विहापि समुदाय एवासीत्तद्देवत्यः ।

तस्यैवायमवयवः । नेत्युच्यते । आसीदयं समुदायस्तद्देवत्यः, इदानीं तस्यावयवोऽन्यदेवत्यो जातः । तेन समुदायस्तद्देवत्यत्वादपेतः । आह । पूर्वदेवतापीतस्यासावयव आसीत्तेन भूतपूर्वगत्या भविष्यति । उच्यते । प्रकृतौ न भूतपूर्वगत्याभिधानं कृतम् । इहापि तद्वदेव न कर्त्तव्यमिति । अपि चेन्द्रदेवत्यस्तत्रेन्द्रपीत इत्युक्तम् । अनपनीता च तस्यैन्द्रदेवत्यता, अस्य पुनः पूर्वदेवतासम्बन्धोऽपगतः । तस्मान्नात्र पूर्वदेवता उपलक्षणीया इति ॥ ३३ ॥ ॥ सिद्धान्तः ॥ पात्नीवतभक्षणे इन्द्रादीनामनुपलक्षणाधिकरणम् ॥ १३ ॥

त्वष्टारं तूपलक्षयेत् पानात् ॥ ३४ ॥

अस्ति पात्नीवतः सोमः । तत्र मन्त्रः, अग्नाइ पत्नीवन् सजूर्देवेन त्वष्ट्रा सोमं पिबेति । तत्र सन्देहः । किं त्वष्टा उपलक्षयितव्यो, न वेति । किं प्राप्तम् । उपलक्षयितव्यः । कुतः । पानात् । पानं श्रूयते सजूर्देवय त्वष्ट्रा सोम पिबेति । तेनायमग्नये पत्नीवते सह त्वष्ट्रा दीयत इति गम्यते । यस्मै च येन सह दीयते, उभाभ्यां तद्दीयते । एवं तत्सहदानं भवति यथा देवदत्ताय यज्ञदत्तेन सह शतं दीयतामित्युक्ते, तत्रोभाभ्यामपि दीयते । तस्मात् त्वाष्ट्रोऽप्यसौ सोम इति त्वष्टोपलक्षयितव्यः । असावपि इन्द्र इव पिबतीति ॥ ३४ ॥ पूर्व० ॥

अतुल्यत्वात्तु नैवं स्यात् ॥ ३५ ॥

नैतदेवम् । शब्दप्रमाणका वयम् । यच्छब्द आह, तदस्माकं प्रमाणम् । शब्दश्चाग्नेः पत्नीवतः पानमाह, त्वष्टुः सहभावमात्रम् । न ह्यनुष्ठीयमाने सहभावः सिद्ध्यतीति त्वष्टरि पानमनुमीयते । ननु त्वष्ट्रे पानञ्चोदितम् । सत्यं चोदितं मन्त्रवर्णेन, न चोदनया । चोदना हि पात्नीवतं गृह्णातीति । लोके तु कार्यं दृष्ट्वा चोदितमनुष्ठीयत एव । लोकतश्चैतत्परिच्छिन्नं, नैवञ्जातीयकेन वाक्येन, त्वष्टुः सोमः कृतो भवतीति ॥ ३५ ॥ ॥ सिद्धान्तः ॥ पात्नीवतशेषभक्षे त्वष्टुरनुपलक्षणीयताधिकरणम् ॥ १४ ॥

त्रिंशच्च परार्थत्वात् ॥ ३६ ॥

तस्मिन्नेव पात्नीवते मन्त्रः, एभिरग्ने सरथं यह्यर्वाङ् नानारथं वा विभवो ह्यश्वाः । पत्नीवतस्त्रिंशतं त्रींश्च देवाननुष्वधमावह मादयस्वेति । तत्र सन्देहः । किं त्रयस्त्रिंशतो देवानामुपलक्षणं कर्त्तव्य-

म, उत नेति । किं प्राप्तम् । त्रयस्त्रिंशतं देवानुपलक्षयेत् । कथम् । दीयते हि सोमस्त्रयस्त्रिंशते देवेभ्यः । एवं हि, अग्निमग्नीदधीच्छति, आयाहि अग्नेऽर्वाचीनं, त्रयस्त्रिंशता देवैः सह समानं रथमधिष्ठाय नानारथैर्वा विभवन्ति हि ते अश्वाः । तदिदमनुष्वधमावह त्रयस्त्रिंशतं पत्नीवतो देवान् आगमय तर्पय चेति । अत्र हि, अग्निमग्नीदधिच्छति त्रयस्त्रिंशतो देवानां तृप्तये इति गम्यते । यत्प्रधानश्चात्र मन्त्रस्तत्परः सोमः । तस्मादुच्यते । त्रयस्त्रिंशद्देवा उपलक्षयितव्या इति ॥ ननु चोदनायां पत्नीवान् केवलोऽग्निर्देवतात्वेन श्रूयते । सत्यम् । चोदनायां पत्नीवान् देवतात्वेन श्रूयते, न तु देवतान्तरं निषिद्ध्यते । किमतो यद्येवम् । एतदतो भवति । मान्त्रवर्णिकास्त्रयस्त्रिंशद्देवा अविरुद्धाश्चोदनायां प्रतीयन्ते इति ॥ एवं प्राप्ते ब्रूम ॥ न त्रयस्त्रिंशद्देवा उपलक्षयितव्या इति । नात्र मन्त्रे अग्निः आह्वाता परिवेष्टा वा तर्पयिता वा अभ्येष्यते । नात्र त्रयस्त्रिंशद्देवेष्विष्टेषु प्रयोजनं निर्वर्त्यते । कस्तर्हि यष्टव्यः । पत्नीवान् । कुत एतत् ? । स हि चोद्यते, पात्नीवतं गृह्णातीति । ननु मान्त्रवर्णिकानां त्रयस्त्रिंशतो देवानामत्र सङ्कीर्त्तनम् । उच्यते । परार्थत्वेन ताः सङ्कीर्त्यन्ते कथम् । न हि अप्रत्तमग्नेस्तद्भवति । न च परकीयस्य दानमवकल्पते । तस्मात्, त्वममूभ्यस्त्रयस्त्रिंशद्देवताभ्यो देहीत्यसमञ्जसं वचनम् । अग्नये त्वनेन दानमुक्तं भवति । कथम् । ईशानो हि विलम्भयति द्रव्यम् । तदिह विलम्भनं सङ्कीर्त्तयन्, त्वमस्य ईशान इति प्रत्याययति ॥

ननु मादयस्वेत्युच्यते, न विलम्भयेति । उच्यते । न हि माद्यन्ति देवताः । तस्मान्मदकरणसङ्कीर्त्तनमदृष्टाय स्यात् । दृष्टाय तु त्यागसङ्कीर्त्तनं लक्षणया । लक्षणा हि अदृष्टकल्पनाया ज्यायसी । प्रमाणाद् हि सा भवति । ननु त्यागेऽपि लक्ष्यमाणेऽग्निः कर्त्ता अधीष्यते । तदुच्यते । अग्नेरप्यध्येषणाऽदृष्टायैव । तस्मादग्नेरैश्वर्य्यकरणमेतद् वाक्यं लक्षयतीति न्याय्यम् । अपि च पात्नीवते सोमश्चोद्यते, पात्नीवतं गृह्णातीति ॥

ननूक्तं, मान्त्रवर्णिकं न प्रतिषेधति चोदनेति । उच्यते । तदपि मान्त्रवर्णिकं नास्तीत्युक्तम् । अपि च । सामर्थ्यात् प्रतिषेधतीति गम्यते । न हि सापेक्षः पत्नीवच्छब्दः । तद्धितार्थेन संलक्ष्यते । तस्मा-

न केवलः पत्नीवान् देवतेति । एतच्चोदनावशेन मन्त्रो वर्णनीयः । तस्माद् यथैवास्माभिर्वर्णितो मन्त्रस्तथैव भवितुमर्हतीति पत्नीवाँश्चाग्निः, अग्ने पत्नीवन्निति सामानाधिकरण्येन निर्दिश्यते । तस्मादग्निरुपलक्षयितव्यो, न त्रयस्त्रिंशद्देवता इति ॥ ३६ ॥ पात्नीवतशेषभक्षे त्रिंशतोऽनुपलक्षणाधिकरणम् ॥ १५ ॥

वषट्कारश्च कर्तृवत् ॥ ३७ ॥

अस्ति अनुवषट्कारदेवता । सोमस्याग्ने वीहीत्यनुवषट् करोतीति । तत्र सन्देहः । किमनुवषट्कारदेवता उपलक्षयितव्या, न वेति । किं प्राप्तम् । उपलक्षयितव्येति, न तत्र पारार्थ्यं किञ्चित् पूर्ववदुपलक्ष्यते । तस्मादुपलक्षयितव्येति । एवं प्राप्ते ब्रूमः । अनुवषट्कारदेवता नोपलक्षयितव्या । कर्तृवत् । यथा कर्त्ता नोपलक्ष्यते, होतृपीतस्याऽध्वर्य्युपीतस्येति । एवमेवानुवषट्कारदेवतापि । न हि सा प्रकृतावुपलक्षिता । यच्च नाम प्रकृतौ कृतं, तदिह करणीयम् । तस्मान्नोपलक्षयितव्येति ॥ ३७ ॥ ॥ भक्षणेऽनुवषट्कारदेवताया अनुपलक्षणाऽधिकरणम् ॥ १६ ॥

छन्दःप्रतिषेधस्तु सर्वगामित्वात् ॥ ३८ ॥

स्थितादुत्तरमुच्यते । नैतदस्ति । यदुक्तमूहेन मन्त्रवद् भक्षणं कर्तव्यमिति । अमन्त्रकं भक्षणं कर्त्तव्यम् । कस्मात् । उच्यते । समानविधानत्वात् । नास्त्यत्र प्रकृतिविकृतिभावः । कथम् । प्रकरणस्य तुल्यत्वात् । यल्लिङ्गमुक्तं, छन्दःप्रतिषेधः स इति उच्यते । तृतीयसवनत्वाज्जगतीच्छन्दस इति प्राप्ते, अनुष्टुप्छन्दस इति षोड़शिनि भक्षमन्त्रं नमतीति समानविधानेऽप्यवकल्पते । यत्तूक्तम् । ऐन्द्रः सोमो गृह्यते मीयते चेति । नैते ऐन्द्रा अनैन्द्राश्च भिन्ना यागाः । एकस्यैव एतेऽभ्यासविशेषाः । न चाभ्यासविशेषाणां धर्माः । गुणत्वात् । सर्वे एते यागधर्माः । तेन कृत्स्ना यागस्य चोद्यन्ते सोमधर्माः, सोमश्चेति । यच्च, इन्द्रो गृह्यते मीयते चेति । इन्द्रस्य मन्त्राम्नानान्मन्त्रेण ग्रहणं प्रकाशयितव्यम् । इतरासां देवतानां ध्यानादिनेति । तस्मादनैन्द्राणाममन्त्रकं भक्षणमिति ॥ ३८ ॥ अनैन्द्राणाममन्त्रकभक्षणाधिकरणम् ॥ कृत्वाचिन्तारूपम् ॥ १७ ॥

ऐन्द्राग्ने तु लिङ्गभावात् स्यात् ॥ ३९ ॥

एवं स्थिते चिन्त्यते । अस्ति तत्रैन्द्राग्नः सोमः । ऐन्द्राग्नं गृह्णातीति । तत्र सन्देहः किं मन्त्रवद् भक्षणम्, अमन्त्रकं वेति किं प्राप्तम् । ऐन्द्राग्ने तु मन्त्रः स्यात् । यस्य हि इन्द्राग्नी देवता तस्येन्द्रः शक्यते हि स इन्द्रपीत इति व्यपदेष्टुम् । यस्य हि अवयवान्तरमिन्द्रेण पीतं, स इन्द्रपीतः । तस्यैन्द्राग्नाभ्यां पिबद्भ्यां पीतमवयवान्तरमिन्द्रेण । तस्मान्मन्त्रवद् भक्षणमिति ॥ ३९ ॥ पूर्व० ॥

एकस्मिन् वा देवतान्तराद्विभागवत् ॥ ४० ॥

नाऽस्यावयवान्तरम् इन्द्रेण पीयते । न चाऽवयवाऽन्तरेण इन्द्रपीतेन तत्पीतं भवति । तेन पीत इति लक्षणाशब्दोऽयम् । इन्द्रमुद्दिश्य यः सङ्कल्पितः, इन्द्रो यस्य देवतेति । यथैव च साकाङ्क्षस्य तद्धितार्थेन असम्बन्धः, एवं समासोऽपि इन्द्रपीतस्येति साकाङ्क्षस्य नावकल्पते । तदुक्तं, व्यवस्था वाऽर्थसंयोगादिति । आह । ननु तेनैवाधिकरणेनैतद् गतं, किमर्थं पुनश्चिन्त्यते इति । उच्यते । यत् तत्र विचारितं सिद्धमेव तत् कथं पुनर्विचार्यते । नैव साकाङ्क्षस्य देवतासम्बन्ध इति । नैवेह देवतासम्बन्ध इति पूर्वः पक्षः । पानमात्रसम्बन्धोऽत्रेति । पानमात्रसम्बन्धेन यत्र द्वाभ्यां पीयते, तत्रैकेन देवतासम्बन्ध इत्युत्तरः पक्षः । तस्मान्न पुनरुक्तमिति ॥ ४० ॥ ॥ सिद्धान्तः ॥ ऐन्द्राग्नभक्षस्यामन्त्रकताधिकरणम् ॥ १८ ॥

छन्दश्च देवतावत् ॥ ४१ ॥

अस्मिन् मन्त्रे गायत्रच्छन्दस इत्युच्यते । तत्र सन्देहः । किमेकच्छन्दसि सोमे मन्त्रः, उत नानाच्छन्दस्यपीति । उच्यते ॥ छन्दश्च देवतावत् ॥ यथा अन्यसहितेन्द्रे न मन्त्रः, एवमनेकच्छन्दस्के सोमे न स्यान्मन्त्र इति । अत्रापि हि गायत्रच्छन्दस इति सविशेषणस्य समासो नावकल्पते ॥ ४१ ॥ पूर्वपक्षः ॥

सर्वेषु वाऽभावादेकच्छन्दसः ॥ ४२ ॥

सर्वेषु वा मन्त्रः स्यात् । कुतः । अभावादेकच्छन्दसः । नैव कश्चिदेकच्छन्दाः सोमोऽस्ति । तेन यथाभूतोऽयं, तथाभूतस्य छन्दो विशेषणम् । तस्मादनेकच्छन्दस्के सोमे मन्त्रः स्यादिति ॥ ४२ ॥ ॥ सिद्धान्तः ॥ गायत्रच्छन्दस इत्यादिमन्त्राणामनेकच्छन्दस्के विनियोगाऽधिकरणम् ॥ १९ ॥

सर्वेषां वैकमन्त्र्यमैतिशायनस्य भक्तिपानत्वात् सवनाधिकारो हि ॥ ४३ ॥

यदुक्तम्, अनैन्द्राण ममन्त्रकं भक्षणमिति । तन्न । सर्वेषां समन्त्रकं भक्षणमिति । यथासमाम्नातश्च मन्त्रः स्यात् । न इन्द्रपीत इति सोम उच्यते । किं तर्हि । सवनम् । प्रातःसवनशब्देन सामानाधिकरण्यात् । ननु सोमेऽपि षष्ठी । सत्यमस्ति षष्ठी, न तु तेन सामानाधिकरण्यम् । नासाविन्द्रेण सोमः पीतः, नापीन्द्राय दत्तः । अन्य एव पीतो दत्तो वा स गत एव । न चातीतः समुदायो व्यपदिश्यते । प्रत्यक्षवचनो ह्ययं शब्द । सवने तु न दोषः । इन्द्रपीतं भवति सवनम् । यत्रेन्द्रेण पीतम् । तस्मादनैन्द्रोऽपीन्द्रपीतसवनेऽन्तर्भवतीति शक्यते मन्त्रेण वदितुम । शक्यते चेत् समानविधाने कथमिव मन्त्रो न भविष्यति । भक्त्या ह्यपीतः पीत इत्युच्यते । एवमेव ऐतिशायन आचार्यो मन्यते स्म । अस्माकमप्येतदेव मतमाचार्यग्रहणम् । तस्माद् आगतमिति तस्य सङ्कीर्त्यर्थम् ॥ ४३ ॥ ॥ एकादशाधिकरणोक्तस्योपसंहारः ॥ इति श्रीशबरस्वामिकृते मीमांसाभाष्ये तृतीयाध्यायस्य द्वितीयः पादः ॥ ३ ॥ २ ॥

अथ तृतीयाध्याये तृतीयः पादः ॥ ३ ॥ ३ ॥

श्रुतेर्जाताधिकारः स्यात् ॥ १ ॥

ज्योतिष्टोमे श्रूयते । उच्चैर्ऋचा क्रियते, उच्चैः साम्ना, उपांशु यजुषेति । तत्र सन्देहः । किम् ऋगादिजातिमधिकृत्य एते शब्दाः प्रवृत्ताः, उत वेदमधिकृत्य ? इति । किं तावत् प्राप्तम् ' जाताधिकारः स्यात् । कुतः ॥ श्रुतेः ॥ एषां शब्दानां श्रवणादेव जातिं प्रतिपद्यामहे तेनोपांशुत्वं जात्याधिकृतया सम्बध्यते ' वेदानामधिकारकः शब्दो नास्तीति अपि च, ऋग्वेदव्यतिक्रान्तानाम् ऋचां यजुर्वेदे उच्चैः प्रयोगो भविष्यति । इतरथा तस्या एव ऋच उभौ धर्मौ वैकल्पिकौ स्याताम् । तत्र पक्षे बाधः स्यात् । प्रकरणञ्चैवमनुगृहीतं भवति । इतरथा वेदसंयोगे सर्वस्मिन्नपि क्रतावुपांशुत्व स्यात् । तस्माज्जाताधिकारा एते शब्दा इति ॥ १ ॥ ॥ पूर्वपक्षः ॥

वेदो वा प्रायदर्शनात् ॥ २ ॥

वेदं वा अधिकृत्य इदमुच्यते। कुतः। प्रायदर्शनात्। किमिदं प्रायदर्शनादिति। वेदप्राये वाक्ये वेदोपक्रमे निगम्यमाना इमे शब्दाः श्रूयन्ते। प्रजापतिर्वा इदमेक आसीत्। स तपोऽतप्यत। तस्मात् तपस्तेपानात् त्रयो देवा असृज्यन्त अग्निर्वायुरादित्यः। ते तपोऽतप्यन्त। तेभ्यस्तेपानेभ्यस्त्रयो वेदा असृज्यन्त। अग्नेर्ऋग्वेदो वायोर्यजुर्वेदः आदित्यात् सामवेद इत्येवमुपक्रम्य निगमने इदं श्रूयते— उच्चैर्ऋचा क्रियते, उच्चैः साम्ना, उपांशु यजुषेति। एतस्मात् कारणादेभिः प्रकृतैरुपांश्वादि कर्त्तव्यं, न जात्या ऋगादिभिरित्युच्यते। कुत एतदवगम्यते। वाक्योपसहारे श्रुतत्वात्। यस्मादित एते वेदा जातास्तस्मादेतैरुपांश्वादि कर्त्तव्यमिति। ऋगादिभिरपि वेदवचनैरेवोपसंहारेण भवितव्यम्। इतरथा वाक्यमेव नावकल्पेत। तत्रानर्थका एव भवेयुः। तस्माद् वेदाधिकारा इति ॥ २ ॥ ॥ सिद्धान्तः ॥

लिङ्गाच्च ॥ ३ ॥

लिङ्गमप्यस्मिन् अर्थे भवति। यथा ऋगादयः शब्दाः शक्नुवन्ति वेदमभिवदितुमिति। ऋग्भिः प्रातर्दिवि देव ईयते यजुर्वेदेन तिष्ठति मध्ये अह्नः, सामवेदेनास्तमये महीयते। वेदैरशून्यैस्त्रिभिरेति सूर्यः इति द्वौ वेदौ सङ्कीर्त्य, ऋक्शब्दं च त्रिषु पादेषु, चतुर्थे पादे उपसंहरति। बहुवचनेन, वेदैरशून्यैस्त्रिभिरेति सूर्य्य इति ऋक्शब्दं वेदवचनं दर्शयति। तस्मादपि पश्यामो वेदाधिकारा एते शब्दा इति॥३॥

धर्म्मोपदेशाच्च न हि द्रव्येण सम्बन्धः ॥ ४ ॥

धर्मोपदेशश्च भवति साम्नः, उच्चैः साम्नेति। स वेदाधिकारपक्षे युज्यते। जाताधिकारे तु ऋच उच्चैस्त्वेन साम्न उच्चैस्त्वं सिद्धम्। नास्य सामद्रव्येण सह सम्बन्धो वेदितव्यः। तस्मादपि वेदाधिकारा इति ॥ ४ ॥ ॥ युक्तिः ॥

त्रयीविद्याख्या च तद्विदि ॥ ५ ॥

त्रयी यस्य विद्या स त्रयीविद्यः। यस्त्रीन् वेदानधीते स एवं प्रख्यायते। त्रयीति चैष शब्द ऋक्सामयजुःषु प्रसिद्धः। यदि ऋक्सामयजूंषीति त्रयो वेदा उच्यन्ते, एवं तद्विदि त्रयीविद्याख्या युज्यते, भवति च। तस्माद् वेदाधिकारा एते ॥ ५ ॥

व्यतिक्रमे यथाश्रुतीति चेत् ॥ ६ ॥

अथ यदुक्तम्, ऋग्वेदमतिक्रान्तानाम् ऋचां यजुर्वेदेऽप्युच्चैस्त्वं भविष्यतीति । तत्र मत्पक्षे यथाश्रुतः प्रयोगो भविष्यतीति यदुक्तं, तत् परिहर्त्तव्यमिति ॥ आभाषान्तं सूत्रम् ॥ ६ ॥ ॥ आ० ॥

न सर्वस्मिन्निवेशात् ॥ ७ ॥

नैष दोषः । सर्वस्मिन् ऋग्वेदे उच्चैस्त्वं, सर्वस्मिँश्च यजुर्वेदे उपांशुत्वम् । तत्र यदि ऋग्वेदव्यतिक्रान्ताया ऋचो यजुर्वेदे उपांशुत्वं भवतीति । नैतद् दूष्यति । वेदधर्म्मः सन् ऋग्धर्म्म इति वेदस्य च न धर्म्मद्वयेन सम्बन्ध ॥ ७ ॥

वेदसंयोगान्न प्रकरणेन बाध्येत ॥ ८ ॥

यदुक्तं, प्रकरणमेवमनुगृहीतं भवतीति वेदसंयोगाद् वाक्येन प्रकरणे बाध्यमाने न दोषो भविष्यति ॥ ८ ॥ आ० नि७ ॥ उच्चैस्त्वादीनां वेदधर्मताधिकरणम् ॥ १ ॥

गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोगः ॥९॥

अस्त्याधानं, य एवं विद्वानग्निमाधत्ते इति । तद् याजुर्वैदिकम् । तत्र सामगानमामनन्ति । य एवं विद्वान् वारवन्तीयं गायति, य एवं विद्वान् यज्ञायज्ञीयं गायति, य एवं विद्वान् वामदेव्यं गायतीति । तत्र सन्देहः । किमाधाने सामगानमुच्चैः, उत उपांशु ? इति ॥ उच्चैरिति प्राप्तम् । कुतः । सामवेदेनैतत् क्रियते यद् वारवन्तीयादिभिः । तस्मादुच्चैरेतानि सामानि गेयानीति ॥ एवं प्राप्ते, ब्रूमः ॥ गुणाऽनुरोधेन वा मुख्यं व्यतिक्रमेद्, मुख्यानुरोधेन वा गुणमिति गुणो व्यतिक्रमितव्यो न्याय्यः, मुख्यश्चानुग्रहीतव्य इति । कुतः 'मुख्याऽर्थत्वाद् गुणस्य' गुणस्यानुष्ठानेन मुख्यः सगुणः कथं स्यादिति गुणे प्रवर्त्तते । गुणप्रवृत्त्या चेन्मुख्यस्य गुणहानिर्भवति, गुणप्रवृत्तौ फलमेव नावाप्तं भवति । अथ प्रधानं सगुणं करिष्यामीति गुणे प्रवर्त्तमानो गुणस्य गुणं विनिपातयति, नास्य स्वार्थो हीयते । नाऽसौ गुणं सगुणं कर्तुं प्रवर्त्तते । गुणश्च सामगानं, प्रधानमाधानम् । आधानस्य याजुर्वैदिकत्वात् । उपांशुता गुणः । स गुणधर्म्ममुच्चैस्त्वं सामवैदिकं बाधते तस्मादुपांशु सामानि गेयानीति ॥ ९ ॥ ॥ आधाने गानस्योपांशुताधिकरणम् ॥ २ ॥

भूयस्त्वेनोभयश्रुति ॥ १० ॥

यजुर्वेदे ज्योतिष्टोमं समामनन्ति, ज्योतिष्टोमेन स्वर्गकामो यजेतेति। तथा सामवेदेऽप्यस्यैवमेव समाम्नानम्। सकृच्च कृतायां बुद्धौ द्वितीयं गुणार्थं श्रवणं भवति। तत्र सन्देहः। किं याजुर्वैदिकमाम्नानं क्रियार्थं, सामवैदिकं गुणार्थम्? उत विपरीतमिति। यतरच्चाम्नानं क्रियार्थं तद्धर्म्मा भविष्यन्ति। किं तावत् प्राप्तम्। सामवैदिकं क्रियार्थं याजुर्वैदिकं वेत्यनिश्चयो विशेषानवगमादिति। एवं प्राप्ते ब्रूमः। भूयस्त्वेन गुणानां परिच्छिद्येत। यत्र भूयांसो गुणाः समाम्नातास्तत्र क्रियार्था चोदना इति गम्यते। यत्र हि कर्त्तव्यतया चोदना, तत्र इतिकर्त्तव्यता आकाङ्क्ष्यते। यत्राकाङ्क्षिता इतिकर्त्तव्यता, तत्र इतिकर्त्तव्यतावचनं न्याय्यम्। ये च भूयांसो गुणाः,सा इतिकर्त्तव्यता। तदितिकर्त्तव्यतालिङ्गेन कर्त्तव्यताचोदनामनुमिमीमहे।यथा बहुषु राजप्रतिमेषूपविष्टेषु यस्य श्वेतं छत्रं बालव्यजनञ्च, स राजेत्यवगम्यतेऽनाख्यातोऽपि राजलिङ्गेन। एवं कर्त्तव्यतालिङ्गेन गुणानां भूयस्त्वेन ज्योतिष्टोमस्य याजुर्वैदिकस्य चोदना अनुमीयते। तस्माज्ज्योतिष्टोमस्योपांशुत्वयोगः। यजुर्वेदेन हि ज्योतिष्टोमः क्रियते, यत्तेन चोद्यते। अचोदितं न शक्यते कर्तुमिति ॥ १० ॥ ॥ ज्योतिष्टोमस्य याजुर्वैदिकताधिकरणम् ॥ ३ ॥

असंयुक्तं प्रकरणादितिकर्त्तव्यतार्थित्वात् ॥ ११ ॥

उक्तानि विनियोगकारणानि श्रुतिर्लिङ्गं वाक्यमिति। श्रुतिः, ऐन्द्र्या गार्हपत्यमिति द्वितीया विभक्तिः। लिङ्गं मन्त्रेषु वचनसामर्थ्यं बर्हिर्देवसदनं दामीति। वाक्यम् अरुणया क्रीणातीति। अथ किमेतावन्त्येव विनियोगकारणानि? नेत्युच्यते। किमपरं कारणमिति प्रश्नेनैवोपक्रमः। भवति च प्रश्नेनैवोपक्रमः। यथा, का नामेयं नदी। को नामायं पर्वतः। किमिदं फलमिति। तदुच्यते॥ असंयुक्तं प्रकरणादितिकर्त्तव्यार्थित्वात्॥ यद् असंयुक्तं श्रुत्या लिङ्गेन वाक्येन वा तत् प्रकरणाद्, इतिकर्त्तव्यतार्थित्वात्। यदितिकर्त्तव्यताकाङ्क्षिणः सन्निधौ पूरणसमर्थमुपनिपतति यद् वचनं तत् तेन प्रकृतेन सहैकवाक्यतां याति। तस्मात् प्रकृते विनियुज्यते। किमिहोदाहरणं, किञ्च प्रयोजनमिति। दर्शपूर्णमासौ प्रकृत्य श्रूयते। समिधो यजति, तनूनपातं यजति, इडो यजति बर्हिर्यजति, स्वाहाकारं यजति। तानि

तत्रैव प्रकरणसामर्थ्याद् विनियुज्यन्ते, न अग्निहोत्रे ज्योतिष्टोमे वा ॥
॥ ११ ॥ ॥ प्रकरणस्य विनियोजकताधिकरणम् ॥ ४ ॥

क्रमश्च देशसामान्यात् ॥ १२ ॥

अथ किमेतावन्त्येव विनियोगकारणानि। नेत्युच्यते। किञ्च ॥ क्रमश्च देशसामान्यात् ॥ क्रमवतामानुपूर्व्येणोपदिश्यमानानां यस्य पर्याये यं धर्ममामनन्ति, तस्य तं प्रति आकाङ्क्षाऽनुमीयते। सत्यामाकाङ्क्षायामेकवाक्यभावः। तस्मात्ततो विनियोग इति। किमिह उदाहरणं, किञ्च प्रयोजनम्। आनुपूर्व्यवतां यागानामनुमन्त्रणेष्वाम्नातेपूपांशुयाजस्य क्रमे दब्धिर्नामासीति समाम्नातः। तस्याकाङ्क्षामुत्पाद्य तेनैकवाक्यतां यात्वा तत्रैव विनियोगमर्हतीति। तथा-चैन्द्राग्नं कर्म्म वियातसजातस्यास्ति भ्रातृव्यवतः। तस्य याज्यानुवाक्यायुगलमभ्याम्नायते ऐन्द्राग्नम्, इन्द्राग्नी रोचनादिवः प्रवर्विणिश्य इत्येकम्। अपरम्, इन्द्राग्नी नवतिं पुरःश्नथद्वृत्रमिति। तत्र लिङ्गाद्विनियोगे सिद्धे विशेषविनियोगो भवति। पूर्वं युगलं पूर्वस्यैन्द्राग्नस्य। उत्तरमुत्तरस्येति। एतदुदाहरणं प्रयोजनश्चेति ॥ १२ ॥
क्रमस्य विनियोजकताधिकरणम् ॥ ५ ॥

आख्या चैवं तदर्थत्वात् ॥ १३ ॥

अथ किमेतावन्त्येव विनियोगकारणानीति। नेत्युच्यते। किञ्च, समाख्या चैवं स्यात्। कथं विनियोगकारणमिति। समाख्या सति सम्बन्धे भवति, यथा पाचको लावक इति। तत्र पाचकशब्दमुपलभ्य पचतिना अस्य सम्बन्ध इति गम्यते। एवं वेदेऽपीति। अकृतकार्थसम्बन्धं समाचक्षाणं शब्दमुपलभ्य भवति सम्बन्धे तस्मिन् सम्प्रत्ययः। किमिहोदाहरणं प्रयोजनं च। आध्वर्य्यवमिति समाख्यातानि कर्म्माणि अध्वर्य्युणा कर्त्तव्यानि। हौत्रमिति च होत्रा। एतद् उदाहरणं प्रयोजनश्चेति ॥ १३ ॥ ॥ ॥ समाख्याया विनियोजकताऽधिकरणम् ॥ ६ ॥

श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात् ॥ १४ ॥

उक्तानि विनियोगकारणानि। श्रुतिर्लिङ्गं वाक्यं प्रकरणं स्थानं समाख्यानमिति। तेषां समवाये किं बलीय इति चिन्त्यते। एका-

ऽर्थवृत्तित्वाद्वाचो युगपदसम्बन्धाद् द्वयोर्द्वयोः सम्प्रधारणा । तत्र श्रुतिलिङ्गयोः किं श्रुतिर्बलीयसी, आहोस्विल्लिङ्गमिति ? किं पुनरत्रोदाहरणम् । ऐन्द्र्या गार्हपत्यमुपतिष्ठते इति । अत्र चिन्त्यते । किमिन्द्रस्य गार्हपत्यस्य वोपस्थानं कर्त्तव्यमित्यनियमः, उत गार्हपत्यस्यैवेति । यदि तुल्यबले एते कारणे ततो विकल्पः । अथ श्रुतिर्बलीयसी, गार्हपत्य एवोपस्थेयः ॥

का पुनरत्र श्रुतिः । किं लिङ्गम् । श्रुतिर्गार्हपत्यशब्दश्रवणम् । लिङ्गं पुनः, कदा च नस्तरीरसि नेन्द्रसश्चसि दाशुषे इतीन्द्रशब्दस्य विशिष्टदेवताभिधानसामर्थ्यम् अथ किं वाक्यं नाम ? संहत्य अर्थमभिदधति पदानि वाक्यम् । यद्येवमिदमपि वाक्यम्—ऐन्द्र्या गार्हपत्यमुपतिष्ठते इति, इदमपि— कदा च नस्तरीरसीति । उभयत्रापि संहत्य अर्थमभिदधति पदानि । तेन वाक्यस्य चैषा संप्रधारणा, न श्रुतिलिङ्गयोः । यदि वा श्रुतिलिङ्गवाक्यानि विवेक्तव्यानि, इदं श्रुतिवाक्ययोरन्तरम्, इदं लिङ्गवाक्ययोरिति ॥ तदभिधीयते ॥ यत् तावच्छब्दस्यार्थमभिधातुं सामर्थ्यं, तल्लिङ्गम् । यदर्थस्याभिधानं शब्दस्य श्रवणमात्रादेवावगम्यते, स श्रुत्याऽवगम्यते श्रवणं श्रुतिः। एकार्थमनेकं पदं वाक्यमित्युक्तमेव । तदेतत् सर्वेष्वेव वाक्येषु समवेतं विविक्तञ्च दृश्यते । इह तावत् कदाच नस्तरीरसीत्यनेन मन्त्रेण इन्द्र उपस्थातव्य इति । नैतत् कस्यचिच्छब्दस्य श्रवणादेवावगम्यते । नापि शब्दान्तरस्य समीपे उच्चारितस्य सामर्थ्यमस्ति, येनैतद् अवगम्येत । एतस्यां खलु ऋचि इन्द्रशब्दो विद्यते, यो विशिष्टां देवतामवगमयितुं शक्नोति । तया चावगमितया प्रयोजनमस्तीति, तेनेन्द्रोपस्थाने इन्द्रशब्दः प्रयुज्यते । तदेकवाक्यत्वाच्चावशिष्टानि पदानि, न त्वेवमस्यामृचि कस्यचिच्छब्दस्य सामर्थ्याद् गार्हपत्यस्योपस्थानं भवति । श्रवणादेव तु गार्हपत्यशब्दस्य वयमग्निं प्रतीमो, न लिङ्गात् । यदि तु लिङ्गं बलीयः, इन्द्र उपस्थातव्यः । यदि गार्हपत्यश्रवणं, ततो गार्हपत्यः ॥ एवं तर्हि लिङ्गवाक्ये विरुद्ध्यमाने इह सम्प्रधार्ये, न श्रुतिलिङ्गे । इन्द्रशब्दस्य विशिष्टदेवताभिधानसामर्थ्यादिन्द्रोपस्थानं, यदि लिङ्गं बलीयः । अथ नु वाक्यं, गार्हपत्य उपस्थेयः । वाक्यं ह्येतदैन्द्र्या गार्हपत्यमुपतिष्ठते इति । नैतदेवम् । यद्यप्येतद् वाक्यं श्रुतिरप्यत्रास्ति, या त्व-

त्र श्रुतिः सा लिङ्गेन विरुद्ध्यते, न यद् वाक्यम् । कथम् । बलीय-स्यपि हि लिङ्गे, ऐन्द्र्योपतिष्ठते इत्येतद् गार्हपत्यशब्देन सहैक-वाक्यतामुपैत्येव । यदि हि नोपेयात्, ततो लिङ्गेन विरुद्ध्येत । य-स्तु गार्हपत्यश्रवणादेवार्थः प्रतीयते, स लिङ्गे बलीयसि परित्यक्तो भवति । नासावुपस्थानेन सम्बध्यते । तदा हि इन्द्रं गार्हपत्यशब्दो-ऽभिवदेदग्निसमीपं वा । अथ नु श्रुतिः प्रमाणं भवति, ततो लिङ्गेन अवगतमिन्द्रोपस्थानं बाध्येत । तस्माच्छ्रुतिलिङ्गयोरेवैष विरोधो, न लिङ्गवाक्ययोरिति । अथ वा नात्रैकवाक्यत्वाद् इन्द्रप्राधान्यं गा-र्हपत्यप्राधान्यं वोपस्थानस्य । कुतस्तर्हि । इन्द्रशब्दवत्त्वान्मन्त्रस्ये-न्द्रप्राधान्यं, द्वितीयाविभक्तिश्रवणाद् गार्हपत्यप्राधान्यम् । तस्मा-च्छ्रुतिलिङ्गयोर्विरोधः ॥ किं तावत् प्राप्तम् । तुल्यबले एते कारणे इति । कथम् । इदमपि कारणम्, इदमपि, श्रुतिरपि लिङ्गमपि । न हि विज्ञानस्य विज्ञानस्य च कश्चिद्विशेष उपलभ्यते रूपं प्रति, अस्य भङ्गुरस्येव रूपम्, अस्य दृढस्येवेति । ननु लिङ्गस्य भङ्गुरस्येव रूपं, सविचिकित्सो हि भवति लिङ्गात् प्रत्ययः । निर्विचिकित्सः श्रुतेः । नैतद् युक्तम् । यतो लिङ्गात् सविचिकित्सः प्रत्ययः । तस्य च श्रुते-श्च नैव सम्प्रधारणास्ति । यतस्तु खलु लिङ्गान्निर्विचिकित्सः प्रत्ययः स श्रुत्या विकल्पितुमर्हति । ननु नैव कदाचिल्लिङ्गान्निर्विचिकित्सः प्रत्ययोऽस्ति । नैतदेवम् । एवं हि सति नैव लिङ्गं नाम किञ्चित् प्रमाणमभविष्यत् । कामं मा भूत् प्रमाणं, भवति तु संशयो लिङ्ग-परिज्ञातेष्वर्थेषु । यदि वा विस्पष्टमेवाप्रामाण्यं, न संशयः । कथम् । समर्थमेतदिममर्थमभिनिर्वर्त्तयितुमिति । लिङ्गादेतावद् अवगम्यते । न च यद् यस्य निर्वर्त्तनायालं, तदसत्येव वचने तन्निर्वर्त्तयितुमर्हति । तस्मान्न लिङ्गं विनियोजकमिति ॥

अत्राभिधीयते । प्रकरणवतोऽर्थस्य सन्निधाने यमर्थमामनन्ति-स तस्य साधनभूत इत्येव गम्यते, कथं खलु उपकरिष्यतीति स-न्दिह्यमाने भवति सामर्थ्यात् परिनिश्चयः । यत्रायं समर्थः, तत्र श-क्यो विनियोक्तुमिति । तस्माद् भवति लिङ्गं प्रमाणमिति । न च लिङ्गप्रामाण्ये विनिगमनायां हेतुरस्ति । तस्मात् तुल्यबले एते कारणे । कदा च नस्तरीरसीति लिङ्गादिन्द्र उपस्थातव्यः, श्रुतेर्गार्ह-पत्य इति । अविरोधात् खल्वऽपीममेवार्थं प्रतिपद्यामहे । बलीया-

नापि हेतुर्विरुद्ध्यमानमबलीयांसं बाधितुमर्हति, नाविरुद्धम् । न च कश्चन विरोधो, यदिन्द्रमुपतिष्ठेतानेन मन्त्रेण, गार्हपत्यमपि ॥ नन्वऽयमेव विरोधः सकृदुपस्थानं चोदितम्, असकृदभिनिवर्त्त्येत इति । उपस्थेयभेदात् प्रतिप्रधानमावर्त्तन्ते गुणा इति न्याय एवैष. न विरोधः । अयं तर्हि विरोधः । गार्हपत्ये उपस्थीयमाने अग्निवचन इन्द्रशब्दो गुणक्रियायोगं वाऽपेक्षमाणो भवितुमर्हति । इन्द्रे तूपस्थातव्ये निरपेक्ष इन्द्रवचन एव । गौणमुख्ययोश्च मुख्ये सम्प्रत्यय इति । नेति ब्रूमः । विरोधे मुख्येन गौणो बाध्येत । न च कश्चिद् विरोधः । युगपदभिधाने हि विरुद्ध्येयाताम् । इह चान्यस्मिन् प्रयोगेऽग्निवचनोऽन्यस्मिन्निन्द्रवचनः । अतस्तुल्यबले एते कारणे इति ॥ एवं प्राप्ते ब्रूमः ॥ श्रुतिलिङ्गयोः श्रुतिर्बलीयसी । कुतः । अर्थविप्रकर्षात् । किमिदमर्थविप्रकर्षादिति । अर्थस्य विप्रकर्षोऽर्थविप्रकर्षः । कः पुनरर्थः श्रुत्यर्थः । गार्हपत्यमुपतिष्ठते इति सन्निकृष्टः श्रुत्यर्थः, इन्द्र उपस्थेय इति विप्रकृष्टः । कथम् । कदा च नस्तरीरसीत्यनेन मन्त्रेणेन्द्र उपस्थातव्य इति न श्रूयते । सत्यपीन्द्राभिधानसामर्थ्ये वचनाभावादनुपस्थानीय इन्द्र इत्येव गम्यते ॥ नन्विदमुक्तं, प्रकरणाम्नानादङ्गमित्यवगम्यते, सामर्थ्याद् विनियोग इति । नैतदस्ति । उक्तमेवैतत् धर्मस्य शब्दमूलत्वाद् अशब्दमनपेक्षं स्यादिति । यदेतत् प्रकरणं लिङ्गं च उभयमप्येतदशब्दम् । न चातिक्रान्तप्रत्यक्षविषये एवँलक्षणके अर्थे शब्दमन्तरेण परिच्छेदोऽवकल्पते । अतो मन्यामहे, विप्रकृष्टं श्रुत्यर्थाल्लिङ्गमिति । यद्येवं श्रुतिर्यत्र विरोधिनी न विद्यते, तत्रापि न लिङ्गादर्थपरिच्छेदः । तत्रैतदेव नास्ति लिङ्गं प्रमाणमिति। कुत एवैतेन श्रुतिर्विरोत्स्यते इति । तत्र श्रुतिलिङ्गयोर्बलीयस्त्वं प्रति सम्प्रधारणैव नोपपद्यते इति ब्रूमः ॥ अत्रोच्यते । इतिकर्त्तव्यतार्थिनः प्रकरणवतोऽर्थस्य सन्निधावुपनिपतितो मन्त्र आम्नानसामर्थ्यादितिकर्त्तव्यताकाङ्क्षस्य वाक्यशेषतामभ्युपेत्य एतेन मन्त्रेण यजेतेति । किमुक्तं भवति । यागेन अभीप्सिते साध्यमानेऽनेन मन्त्रेणोपकुर्यादिति । न चान्तरणेन्द्राभिधानम्, अयं मन्त्र उपकर्त्तु शक्नोति । तेनैतदुक्तं भवति । अनेन इन्द्रोऽभिधातव्य इति । अतः श्रुतिमूल एवायमर्थः । यदि श्रुतिमूलो, न श्रुत्यन्तरेण बाधितुं शक्यः । तदेतल्लिङ्गं यदि वा नैव प्रमाणम् । यदि बा श्रुत्या विकल्पितुमर्हतीति ।

नाप्यप्रमाणं भविष्यति, नापि विकल्पिष्यते इति ब्रूमः। कथम्। श्रुतिलक्षणोऽयमर्थ इत्युपपादितम्। तस्माद् नाप्रमाणम्। यतस्तु खल्वानुमानिकीमेकवाक्यतां लिङ्गसामर्थ्यं चापेक्ष्य श्रौतोऽयमर्थो यदिन्द्रस्योपस्थानमनेन मन्त्रेणेत्यवगम्यते। प्रत्यक्षा तु श्रुतिर्गार्हपत्यमुपतिष्ठते इति। स एषोऽर्थविप्रकर्षः। प्रथमं तावल्लिङ्गज्ञानम्। ततः सामर्थ्याच्छब्देनायमर्थोऽभिहितो भवति। तदेतच्छ्रुतिविरोधे नावकल्पते। विस्पष्टं ह्यवगतमेतत्। अनेन मन्त्रेण गार्हपत्य उपस्थेय इति। तत्र विज्ञातमेतदेवमयमुपकरोति मन्त्र इत्येतस्मिंश्च निर्ज्ञाते कृतसामर्थ्ययोर्वाक्यप्रकरणयोर्नैतदेवं कल्पयितुं शक्यम्। इन्द्रोपस्थानं शब्देनाभिहितमिति। तस्मादर्थविप्रकर्षाच्छ्रुत्या लिङ्गं बाध्यते इति॥ विकल्पस्य चान्याय्यत्वात्॥ अन्याय्यश्च विकल्पः। तत्र हि अभावः पक्षे नित्यवच्च। ऐन्द्र्या गार्हपत्यमुपतिष्ठते इति श्रूयमाणे यदभावः पक्षे परिकल्प्यते, तदश्रुतं भवति। श्रुतं च हीयते। यावाँश्च श्रुतस्यार्थस्योत्सर्गे दोषस्तावानश्रुतपरिकल्पनायाम्। उभयत्र हि प्रसिद्धिर्बाध्यते। तस्मादन्याय्यत्वाद् विकल्पस्य श्रुतिलिङ्गयोः श्रुतिर्बलीयसीत्यवगच्छामः॥

अथ यदुक्तं, सति विरोधे न्याय्यो बाधः। न चात्रास्ति विरोध इति। अयमस्ति विरोधः। यदकृतसामर्थ्ययोर्वाक्यप्रकरणयोरिन्द्रोपस्थानवाचिनी श्रुतिर्भवति। कृतसामर्थ्ययोस्तु नावकल्पते। न च वाक्यप्रकरणाभ्यां युगपत् कृतसामर्थ्याभ्यामकृतसामर्थ्याभ्यां च शक्यं भवितुम्।तस्माद् विरोधः।विरोधे च श्रुतिर्लिङ्गाद् बलीयसीति॥

लिङ्गवाक्ययोर्विरोधे किमुदाहरणम्?। स्योनन्ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामि। तस्मिन् सीदाऽमृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान इति। अत्र सन्देहः। किं कृत्स्नो मन्त्र उपस्तरणे पुरोडाशासादने च प्रयोक्तव्यः। उत कल्पयाम्यन्त उपस्तरणे, तस्मिन् सीदेत्येवमादिः पुरोडाशासादने? इति। यदि वाक्यं बलीयः, ततः कृत्स्न उभयत्र। कथम्। सुशेवं कल्पयामीत्येतदपेक्ष्य। तस्मिन् सीदेत्येवमादिः पूर्वेणैकवाक्यतामुपैति। यत् कल्पयामि, तस्मिन् सीदेति। अथ लिङ्गं बलीयः, ततः कल्पयाम्यन्तः सदनकरणे। कथम्। स्योनन्ते सदनं कृणोमीति सदनकरणमभिवदितुमयमलमिति। तस्मिन् सीदेत्ययमपि पुरोडाशं सादयितुमिति सादने वि-

मित्युच्यते ॥ किं तावत् प्राप्तम् । तुल्यबले एते कारणे इति । यथा लिङ्गं प्रति श्रुतेर्बलीयस्त्वमुक्तं, न तथा वाक्यं प्रति लिङ्गस्योच्यते । अथ वा वाक्यमेव लिङ्गाद् बलीयः । कुतः । तद्धि श्रुत्यापि बाध्यते । न च बलीयः कारणं शक्यते बाधितुम् । तेनास्य भङ्गुरतामध्यवस्यामः । यस्त्वेकेन बाध्यते, शक्योऽसावन्येनापि बाधितुमिति ॥ एवं प्राप्ते ब्रूमः । लिङ्गवाक्ययोर्लिङ्गं बलीय इति । कुतः । अर्थविप्रकर्षात् । कोऽत्रार्थविप्रकर्षः । प्रकरणवतः सन्निधावाम्नानाद्दर्शपूर्णमासाङ्गमयं मन्त्र इत्यवगम्यते । तस्मिन् सीदेति पुरोडाशासादनाभिधानसामर्थ्यात् सादने विनियुज्यमाने कृतसामर्थ्यं मन्त्रान्तानमिति, नास्ति प्रमाणं येनोपस्तरणेऽपि विनियुज्येत । तथा, स्योनं ते सदनं कृणोमीत्येषोऽपि प्रकरणाम्नानसामर्थ्यादेव दर्शपूर्णमासाङ्गतामापन्नः सामर्थ्यादेवोपस्तरणे विनियोगात् कृतप्रयोजनो, न पुरोडाशासादने विनियोगमर्हति । न हि अस्मिन् विनियुज्यमानस्य किञ्चिदपि प्रयोजनमस्ति । एवमुपस्तरणे तस्मिन् सीदेत्यस्य नास्ति सामर्थ्यम् । पुरोडाशासादनेऽपि, स्योनं ते इत्यस्य । पूर्वेणैकवाक्यतामुपेत्योपस्तरणे सामर्थ्यम् । पूर्वस्य परेणैकवाक्यत्वात् सादने, न तु स्वरूपेणोभयोः । तदेषोऽर्थविप्रकर्षः ॥ यत्तु, स्योनं त इत्यस्य प्रत्यक्षं सदनकर्मणोऽभिधानसामर्थ्यं, तद् मुख्यम् । तस्मिन् सीदेत्यस्य पुनः पूर्वेण सहैकवाक्यतामुपगतस्य भवति जघन्यम् । तदत्र पूर्वस्य मन्त्रस्याभिधानसामर्थ्यादुपस्तरणे विनियोग उक्तो भवतीति । सन्निकृष्टो लिङ्गस्य श्रुत्यर्थः । उत्तरस्य तूपजनितेऽभिधानसामर्थ्ये ततः श्रुत्यर्थ इति लिङ्गान्तारितो विप्रकृष्टो भवति । एवमुत्तरस्य सादने सन्निकृष्टः पूर्वस्य च लिङ्गान्तरितः । तस्मादर्थविप्रकर्षाल्लिङ्गवाक्ययोर्लिङ्गं बलवत्तरम् । ततः स्योनमित्येष शब्दो यद्यप्युत्तरेण आकाङ्क्षित इति सादनेऽपि प्रयोगमर्हति, तथापि भित्त्वा वाक्यमुपस्तरण एव विनियोक्तव्यः, तस्मिन् सीदेत्येष च सादने॥ ननु स्योनं ते इत्यस्य शब्दस्य यथैवोपस्तरणाभिधानसामर्थ्यम्, एवमुत्तरेणैकवाक्यतामुपगन्तुं सामर्थ्यम् । सामर्थ्यं च लिङ्गमित्युच्यते । तस्माद्भिद्यमाने वाक्ये लिङ्गमेव बाधितं भवतीति । सत्यमेवम् । एतदपि लिङ्गम् । लिङ्गमपि खल्वेतदेवँल्लक्षणकं विप्रकृष्टार्थमेव भवति । लिङ्गादेकवाक्यता । तस्मादभिधानसामर्थ्यम् । ततः श्रुत्यर्थ इति विप्रकृष्टार्थता । विप्रकृष्टार्थता च बाधने

हेतुभूतात्तस्मान्नोत्तरेणैवाक्यतां यास्यतीति एवं तस्मिन् सीदेत्युत्तरं न पूर्वेणापि॥ अपि चोत्तरेणैकवाक्यतामुपगतस्य न किञ्चिदपि दृष्टमस्ति कार्यम्। उपस्तरणप्रत्यायनन्तु दृष्टम्। कुतः। श्रुतत्वादुपस्तरणस्य सादनस्य चापत्रमुत्तरस्य सादनप्रत्यायनं,नतु पूर्वेणैकवाक्यतायाम्। न चैतौ पूर्वोत्तराभ्यामेकवाक्यतामन्तरेण पृथग् यथार्थं कार्यं न कुरुतः। तस्मात् पूर्वः पूर्वत्र विनियोजनीयः, उत्तर उत्तरत्रेति॥

अथ यदुक्तं, श्रुत्यापि तद् बाधितमिति वाक्येनापि तद् बाधितव्यमिति नैतदेवम्। न हि बाधितस्यान्येनापि बाधनमेव न्याय्यम्। बाधितं हि अनुग्रहीतव्यमर्थवत्त्वाय, श्रुतिं प्रति विप्रकृष्टार्थं, वाक्यं प्रति सन्निकृष्टार्थम्। तस्माल्लिङ्गं बलीय इति॥

अथ वाक्यप्रकरणयोर्विरोधे कथमिति। किं पुनः प्रकरणं नाम। कर्त्तव्यस्येतिकर्त्तव्यताकाङ्क्षस्य वचनं प्रकरणम्। प्रारम्भो हि स तस्या वचनक्रियायाः। स एव विध्यादिर्विध्यन्तापेक्षः। वाक्यं तूक्तमेव। तयोर्विरोधे किमुदाहरणम्। सूक्तवाकनिगदः। तत्र हि पौर्णमासी देवता अमावास्यादेवताश्चाम्नाताः। ताः परस्परेणैकवाक्यतां नाभ्युपयन्ति। तत्र लिङ्गसामर्थ्यात् पौर्णमासीप्रयोगादिन्द्राग्निशब्द उत्कृष्टव्योऽमावास्यायां प्रयोक्तव्यः। अथेदानीं सन्दिह्यते। योऽस्य शेषः, अवीवृधेतां महोज्यायोऽक्रातामिति, स किं यावत्कृत्वः सूक्तवाके समाम्नातस्तावत्कृत्व उभयोः पौर्णमास्यमावास्ययोः प्रयोक्तव्यः, प्रकरणं बलवत्तरमिति? उत यत्रेन्द्राग्निशब्द उत्कृष्य नीतस्तत्रैव प्रयोक्तव्यः, वाक्यं बलवत्तरमिति। एवं सर्वेषु संशयः॥ किं तावत् प्राप्तम्। तुल्यबले एते कारणे इति। कुतः। इतरत्रापि आकाङ्क्षा, इतरत्रापि। तुल्यायामाकाङ्क्षायां नास्ति विनिगमनायां हेतुः, तस्मात्तुल्यबले इति। अथ वा वाक्यं दुर्बलम्। बाधितं हि तल्लिङ्गेन॥ इत्येवं प्राप्ते ब्रूमः। प्रकरणाद् वाक्यं बलीयः। कथम्। अर्थाविप्रकर्षात्। कोऽत्रार्थविप्रकर्षः। वाक्ये एकैकं पदं विभज्यमानं साकाङ्क्षं भवति, कृत्स्नं परिपूर्णं भवति। तत्र प्रत्यक्ष एकवाक्यभावः। प्रकरणे त्वप्रत्यक्षः। कथम्। इतिकर्त्तव्यताकाङ्क्षस्य समीपे उपनिपतितं पूर्णमिति तस्य प्रकृतस्य साकाङ्क्षत्वमगम्यते। नैकवाक्यभूतमित्यनुमीयते। एकवाक्यतया चाभिधानसामर्थ्यमवकल्प्य अभिहितोऽयमेवं भवतीति परिकल्पना। एषोऽत्रार्थविप्रकर्षो

यद् वाक्यस्य समासन्ना श्रुतिः। प्रकरणस्य विप्रकृष्टा। तस्मात् सूक्तवाकेन प्रहरतीति पौर्णमासीदेवतावाचिनाम् अमावास्यादेवतावाचिनां च निष्कृष्य प्रयोगे तच्छेषाणामपि निष्कृष्य प्रयोगः। तेन यद्यपि प्रकरणसामर्थ्यात् पौर्णमासीदेवतापदशेषाणां अमावास्यादेवतावाचिभिः सहैकवाक्यताऽनुमीयते, प्रत्यक्षा त्वमावास्यादेवतापदैः सह। न च प्रत्यक्षविरोधेऽनुमानं सम्भवति। अर्थवति च प्रकरणे सञ्जाते न निराकाङ्क्षाणामाकाङ्क्षा शक्योपपादयितुम्॥

अथ यदुक्तं, लिङ्गेनापि हि तद् बाध्यते। अतः प्रकरणेनापि बाधितव्यमिति। न, यदन्येनापि बाध्यते, तद् भङ्गुरमन्यत्रापीत्यवगन्तव्यम्। अथ भङ्गुरं, प्रमाणमेव नाभविष्यत्। किञ्चित् तु प्रति कस्यचित् प्रभावः। वाक्यस्य प्रकरणं प्रति बाधकशक्तिर्न तु लिङ्गं प्रति। लिङ्गं प्रति विप्रकृष्टार्थमेतत्, प्रकरणं प्रति सन्निकृष्टार्थम्। तेन वाक्येन प्रकरणं बाध्यते इति॥

अथ प्रकरणस्य क्रमस्य च विरोधे किमुदाहरणम्। राजसूयप्रकरणेऽभिषेचनीयक्रमे शौनःशेफाख्यानादि आम्नातम्। यदि प्रकरणं बलवत्, सर्वेषां तदङ्गम्। यदि क्रमः, अभिषेचनीयस्यैव। किं तावत् प्राप्तम्। तुल्यबले एते कारणे इति। कुतः। न तावद् विशेषमुपलभामहे, येनावगच्छाम इदं बलीय इति। तस्मात्तुल्यबले एते कारणे इति। अपि च प्रकरणं वाक्येन बाधितम्। तस्माद् बाध्येत क्रमेणापीति॥ एवं प्राप्ते ब्रूमः। प्रकरणं क्रमाद् बलीयः। कुतः। अर्थाविप्रकर्षात् कोऽत्रार्थविप्रकर्षः। प्रकरणवतः साकाङ्क्षत्वात् तत्सन्निधानाम्नातेन परिपूर्णेनाप्यवकल्पेतैकवाक्यत्वं, न तु क्रमवतः क्रमे आम्नातेन। अनेकस्याम्नायमानस्य सन्निधिविशेषाम्नानमात्रं हि क्रमः। तत्र सन्निधिविशेषाम्नानसामर्थ्यात् क्रमवतः सन्निधावाम्नातस्यानुपलभ्यमानमेव आकाङ्क्षावत्त्वम् अस्तीत्यवगन्तव्यम्। प्रकरणे तु प्रकरणवतः प्रत्यक्षम्। न च प्रकरणवता क्रमवता च यौगपद्येन एकवाक्यता सम्भवत्याम्नातस्येति विरोधः। तत्र प्रकरणे प्रत्यक्षं साकाङ्क्षत्वम्। क्रम आनुमानिकं बाधितुमर्हति। साकाङ्क्षत्वादेकवाक्यत्वम्। एकवाक्यत्वादभिधानसामर्थ्यम्। सामर्थ्याच्छ्रुत्यर्थ इति सन्निकृष्टः प्रकरणस्य श्रुत्यर्थो, विप्रकृष्टः क्रमस्य। तस्मात् क्रमप्रकरणयोः प्रकरणं बलवत्तरमिति॥अथ यदुक्तं,वाक्येना-

ऽपि हि तद् बाधितम्, अतोऽन्येनापि तद् बाधितव्यमिति। नैतत्। बाधितस्यानुग्रहो न्याय्यो, न बाधितं बाधितव्यमिति॥

अथ क्रमसमाख्ययोर्विरोधे किमुदाहरणम्। किं बलवत्तरमिति। पौरोडाशिकमितिसमाख्याते काण्डे सान्नाय्यक्रमे शुन्धध्वं दैव्याय कर्मणे इति शुन्धनार्थो मन्त्रः समाम्नातः। तत्र सन्दिह्यते। किं समाख्यानस्य बलीयस्त्वात् पुरोडाशपात्राणां शुन्धने विनियोक्तव्यः,उत क्रमस्य बलीयस्त्वात् सान्नाय्यपात्राणामिति। किं तावत् प्राप्तम्। तुल्यबले एते करणे स्याताम्। कुतः। अविशेषात्। यदि वा समाख्यैव बलीयसी बाधितो हि क्रमः प्रकरणेनापीति॥ एवं प्राप्ते ब्रूमः। क्रमो बलीयान्। कुतः। अर्थविप्रकर्षात्। कः पुनरत्रार्थविप्रकर्षः। निर्ज्ञाते प्रकरणेन केनापि सहैकवाक्यत्वे यत्सन्निधावाम्नायते, तत्राकाङ्क्षां परिकल्प्य तेनैकवाक्यतेत्यवगम्यते। लौकिकश्च शब्दः समाख्या। न च लोक एवंविधेष्वर्थेषु प्रमाणम्। तस्मात् क्रमो बलीयानिति॥ यद्येवं भवत्येवँल्लक्षणकेषु क्रमेण विनियोगो, न त्वर्थविप्रकर्षात् क्रमो बलीयान्। कथम्। द्वयोर्हि प्रमाणयोर्बलीयस्त्वं प्रति सम्प्रधारणम्। नचैवं सति समाख्याप्रमाणम्। लौकिकत्वाच्छब्दस्य। पुरुषस्य प्रमाणता भवतीति। नैष दोषः। नात्राङ्गभावः पुरुषप्रामाण्याद् गम्यते। पौरोडाशिकशब्द एतस्य काण्डस्येत्येतदत्र पुरुषप्रमाणकम्। भवति चास्मिन् अर्थे पुरुषः प्रमाणम्। यथा सान्नाय्यक्रमे आम्नानं पुरुषप्रमाणकम्। यथाप्रकरणमेकवाक्यत्वम्। वेदशब्दश्चायमिति। न हि एतेऽनिन्द्रियविषया अर्था उपपद्यन्ते। एष्वभियुक्तानां प्रामाण्यम्। ये त्वनिन्द्रियविषयास्तेष्वभियुक्ता न प्रमाणम्। तस्मात् समाख्या कारणम्। कारणत्वे च सति बलीयस्त्वं परीक्ष्यमिति॥

उच्यते। अर्थविप्रकर्षस्तर्हि वक्तव्यः समाख्यायाः। अयमर्थविप्रकर्षः। उपदिश्यते हि क्रमे समाम्नानात् सान्नाय्यसम्बन्धो, नोपदिश्यते समाख्यायाम्। शब्दमुच्चार्यमाणमुपलभ्यार्थापत्त्या नूनमस्तीति कल्प्यते। तस्मात् पूर्ववदेवार्थविप्रकर्षात् क्रमेण सामाख्या बाध्यते इति॥ अथ यत्तत्र तत्रोच्यते। इदमनेन बाध्यते, इदमनेन इति। तत्र यद् बाध्यते, तत् किं बाधकविषयं प्राप्तम्, उत अप्राप्तमिति। किं चातः। यद्यप्राप्तम्, किं बाध्यते। अथ प्राप्तम्, कथं

शक्येत बाधितुम् । प्राप्तं बाधकविषयं पूर्वविज्ञानमिति ब्रूमः । कथम् । सामान्यस्य कारणस्य विद्यमानत्वात् । अथ कथं निवर्त्तते । मिथ्याज्ञानमिति प्रत्ययान्तरं भवति । किन्तु खल्वमिथ्याज्ञानस्य स्वरूपम् । यस्य बाधकः प्रत्ययो विमृष्यमाणस्यापि नोपपद्यते, न तन्मिथ्या । तदेतेषां श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां पूर्वं पूर्वं यत् कारणं तत् परं परं प्रति बलीयो भवति । नैतस्योत्पन्नस्य विमृष्यमाणस्य बाधकं विज्ञानान्तरमस्ति । तस्मात् तेषां समवाये विरोधे परदौर्बल्यमर्थविप्रकर्षादिति ॥ १४ ॥ ॥ श्रुत्यादीनां पूर्वपूर्वबलीयस्त्वाधिकरणम् ॥ ७ ॥

अहीनो वा प्रकरणाद् गौणः ॥ १५ ॥

ज्योतिष्टोमं प्रकृत्य समामनन्ति, तिस्र एव साह्नस्योपसदो द्वादशाहीनस्येति । तत्र सन्देहः । किं द्वादशोपसत्ता ज्योतिष्टोमे, उत अहीने इति । किं तावत् प्राप्तम् । ज्योतिष्टोमे इति । कुतः । प्रकरणात् । एवं प्रकरणमनुगृहीतं भवति । ननु वाक्येन बाध्यते । न बाध्यते । अहीनशब्देन ज्योतिष्टोमं वक्ष्यामः । कुतः । न हीयते इति अहीनः । दक्षिणया क्रतुकरणैर्वा फलेन वा न हीयते । तेन ज्योतिष्टोमोऽहीनः । वाशब्देन संशयो निवर्त्यते ॥ १५ ॥ ॥ पूर्वपक्षः ॥

असंयोगात्तु मुख्यस्य तस्मादपकृष्यते ॥ १६ ॥

अपकृष्येत द्वादशोपसत्ता । कुतः । असंयोगाज्ज्योतिष्टोमेन । कथमसंयोगः । अहीनेनैकवाक्यत्वस्य प्रत्यक्षत्वात् । ननु ज्योतिष्टोमे एव गौणोऽहीनः । नेत्युच्यते । न हि मुख्यसम्भवे गौणग्रहणमर्हति । ननु नञ्समासो भविष्यति । नेति ब्रूमः । तथा सति आद्युदात्तोऽहीनशब्दोऽभविष्यत् । मध्योदात्तस्त्वयम् । तस्मात् प्रकरणं बाधित्वा अहीनस्य धर्म्मः ॥ अपि च व्यपदेशो भवति । तिस्र एव साह्नस्योपसदो द्वादशाहीनस्येति । यद्यन्यः साह्नोऽन्यश्चाहीनः । तत एवं व्यपदेशोऽवकल्पते । विद्यते च व्यपदेशवचनम् । तस्माद् अहीनस्येति॥१६॥॥सिद्धान्तः॥द्वादशोपसत्ताया अहीनाङ्गताधिकरणम्॥८॥

द्वित्वबहुत्वयुक्तं वा चोदनात्तस्य ॥ १७ ॥

ज्योतिष्टोमे श्रूयते । युवं हि स्थः स्वःपती इति । द्वयोर्यजमानयोः प्रतिपदं कुर्यात् । एते असृग्रमिन्दव इति बहुभ्यो यजमानेभ्य

इति । तत्र सन्देहः । ज्योतिष्टोमे एव निविशेते प्रतिपदौ, उत द्वियज्ञं कञ्चित् कुलायादिं बहुयज्ञञ्च द्विरात्रादिमुत्कृष्येयातामिति । किं प्राप्तम् । द्वित्वबहुत्वयुक्ते, ज्योतिष्टोमेनासंयोगादुत्कृष्येयातां प्रतिपदौ । न हि ज्योतिष्टोमस्य द्वौ यजमानौ श्रूयेते, यथा कुलायस्य । एतेन राजपुरोहितौ सायुज्यकामौ यजेयातामिति ॥ १७ ॥ ॥ सिद्धान्तः ॥

पक्षेणार्थकृतस्येति चेत् ॥ १८ ॥

इतिचेत् पश्यसि, प्रतिपदावुत्कष्टव्ये इति, नैतदेवम् । प्रकरणं हि बाध्येत । बाध्यताम् । असंयोगाद् द्वाभ्यां यजमानाभ्यां बहुभिश्च यजमानैर्ज्योतिष्टोमस्येति चेत् । असत्यपि वचनेऽर्थाद् द्वौ यजमानौ भविष्यतः । य एको न शक्ष्यति, ससहायः स उपक्रंस्यते । अवश्ययष्टव्ये सति यथा शक्यते, तथा यष्टव्यमिति । बाधित्वापि काञ्चित् प्राप्तिं यजमानः सहायमुपादास्यते । एवं प्रकरणे प्रतिपदौ भविष्यतः । तस्मान्नोत्कष्टव्ये इति ॥ १८ ॥ ॥ पूर्वपक्षः ॥

न प्रकृतेरेकसंयोगात् ॥ १९ ॥

प्रकृतिर्हि ज्योतिष्टोमः, प्रत्यक्षास्तत्र धर्मा आम्नाताः, न कुतश्चिच्चोदकेन प्राप्यन्ते । किमतो यद्येवम् । प्रत्यक्षश्रुता न शक्या बाधितुम् । विकृतौ तु चोदकप्राप्ताः सन्त आनुमानिका बाध्येरन्निति । विवक्षितं हि ज्योतिष्टोमे कर्त्तुरेकत्वं प्रत्यक्षश्रुतं न सामर्थ्येन बाध्येत । यत्रापि हि अवश्यकर्त्तव्यता श्रूयते, तत्राप्येक एव यजमानः श्रूयते । वसन्ते वसन्ते ज्योतिषा यजेतेति । तस्माज्ज्योतिष्टोमादुत्कष्टव्ये एते प्रतिपदाविति ॥ अथ कस्मात् पत्न्यभिप्रायमेतन्न भवति । एकस्यां पत्न्यां यजमाने च, युवं हि स्थः इति, द्वयोर्बहुषु वा पत्नीषु एते असृग्रमिन्दवः इति । यथा क्षौमे वसानावग्निमादधीयामिति क्षौमवसानपरं वचनमेवमिहापि प्रतिपद्विधानपरम् । उच्यते । असम्भवात् तत्र मुख्यस्य, लक्षणाशब्दः पुंसो वाचकः स्त्रियाम् । इह तु द्वियज्ञे बहुयज्ञे च सम्भवति न लक्षणाशब्दो भवितुमर्हति बहुभ्यो यजमानेभ्य इति । यदप्येतद् द्विवचनं द्वयोर्यजमानयोरिति, अत्रापि य एकशेषः, पुमान् स्त्रियेति, असावपि लक्षणाशब्द एव । अपि च, उपास्मै गायता नर इति प्रतिपदोर्निरवकाशत्वमेव स्यात् तस्मादुत्कष्टव्ये एते प्रतिपदाविति सिद्धम् ॥ १९ ॥ ॥ पूर्वपक्षनिरासः ॥

कुलायादौ प्रतिपदोरुत्कर्षाधिकरणम् ॥ ९ ॥

जाघनी चैकदेशत्वात् ॥ २० ॥

दर्शपूर्णमासयोः श्रूयते, जाघन्या पत्नीः संयाजयन्तीति । तत्र संशयः । किमेतद्विधानं दर्शपूर्णमासयोः ? उत पशौ इति । कथं दर्शपूर्णमासयोः, कथं च पशौ इति । यदि जाघन्यां पत्नीसंयाजा विधीयन्ते तत उत्कर्षः । अथ पत्नीसंयाजेषु जाघनी विधीयते ततो दर्शपूर्णमासयोरेव । किं प्राप्तम् । उत्कर्षः । कुत एतदुत्कृष्यते । जाघन्यां पत्नीसंयाजा विधीयन्ते इति । कथम् । शब्दात् पत्नीसंयाजानां विधानं, वाक्येन जाघन्याः । शब्दश्च बलवान् न वाक्यम् ॥ ननु पत्नीसंयाजा विहिता एव । सत्यं विहिताः, जाघन्यामिदानीं पुनर्विधीयन्ते । सा तत्सम्बद्धा कर्त्तव्येत्युच्यते । एवं सति दर्शपूर्णमासयोः पत्नीसंयाजा विनापि जाघन्या न विगुणाः । जाघनी तु तत्र प्रतिपाद्यते । तस्माद् यत्र जाघनी प्रयोजनवती तत्र तस्याः प्रतिपत्तिः, पशौ च सा, न दर्शपूर्णमासयोः । एकदेशश्च जाघनी प्रतिपाद्यमाना न पशुं प्रयोक्ष्यते, तस्मादस्य विधानस्योत्कर्ष इति ॥ २० ॥ ॥ पूर्व० ॥

चोदना वाऽपूर्वत्वात् ॥ २१ ॥

जाघनी वा पत्नीसंयाजानां गुणत्वेन विधीयते । कुतः । अपूर्वत्वात् । अप्राप्ता जाघनी पत्नीसंयाजानां गुणत्वेन । तत्र स्वशब्देन पत्नीसंयाजा विहिता जाघनीसम्बन्धस्तेषामविहितः । यत्र यत्र च सम्बन्धो विधीयते, तत्रान्यतरस्यान्यत्र विधानम् । सम्बन्धो नान्तरीयकः । यद्वा सम्बन्धस्य विधानं, नान्तरीयकौ सम्बन्धिनौ । यत्रोभौ लक्षणत्वेन, तत्र स्वशब्देन सम्बन्धो विधीयते । यत्र त्वन्यतरो लक्षणत्वेन, तत्रैकं लक्षयित्वाऽन्यतरो विधीयते, लक्षणत्वेन चात्र पत्नीसंयाजाः । कथमवगम्यते पत्नीसम्बन्धान्न सर्वो यागः । कश्चिदेव तु लक्ष्यते यस्य पत्न्यः साधनत्वेन ॥ अथ कस्मान्न जाघनीं लक्षयित्वा पत्नीसंयाजा विधीयन्ते । न अस्य अपूर्वस्य यागस्य पत्न्यः शक्यन्ते विधातुम् । जाघन्यां तु लक्ष्यमाणायां यागे सपत्नीके विधीयमाने वाक्यं भिद्येत । अस्ति त्वत्र विहितः सपत्नीको यागो यः पत्नीभिर्लक्ष्यते । तस्माद् यागं लक्षयित्वा जाघनी विधीयते । यत्तु वाक्येन जाघनीविधानं श्रुत्या यागस्येति, तदिह यागवि-

धानं न सम्भवतीत्युक्तम् । वाक्यभेदप्रसङ्गात् । तस्माज्जाघनीविधानम् । एवञ्चेद् दर्शपूर्णमासयोर्विना जाघन्या विगुणः पत्नीसंयजयागः स्यात् । तस्मादनुत्कर्ष इति ॥ २१ ॥ सि० ॥

एकदेश इति चेत् ॥ २२ ॥

अथ यदुक्तम्, एकदेशो जाघनी न पशुं प्रयोक्ष्यते । तस्मादुउत्कर्ष इति तत् परिहर्त्तव्यम् ॥ २२ ॥ ॥ आभासः ॥

न प्रकृतेरशास्त्रनिष्पत्तेः ॥ २३ ॥

न प्रकृतौ दर्शपूर्णमासयोर्जाघनी शास्त्रेणोच्यते । एवं पशोर्निष्पन्नया जाघन्या पत्नीसंयाजा यष्टव्या इति । अविशिष्टा जाघनी विधीयते । सा सम्भवति दर्शपूर्णमासयोः क्रीत्याप्यानीयमाना, तस्मादनुत्कर्ष इति ॥ २३ ॥ ॥ आ० नि० ॥ जाघन्याः प्रकरणादनुत्कर्षाऽधिकरणम् ॥ १० ॥

सन्तर्दनं प्रकृतौ क्रयणवदनर्थलोपात् स्यात् ॥२४॥

ज्योतिष्टोमे अभिषवणफलके प्रकृत्य श्रूयते, दीर्घसोमे सन्तृद्याद् धृत्या इति । तत्र सन्देहः । किं सन्तर्दनं ज्योतिष्टोमे एव, आहोस्विद्दीर्घकालेषु सोमेष्विति । उच्यते । नैतल्लुप्तार्थं प्रकृतौ, तस्मान्नोत्कृष्येतेति । आह । नन्वसन्तर्दनमपि श्रूयते असन्तृण्णं भवत इति । उच्यते । क्रयणवद् विकल्पिष्यते । यथा, हिरण्येन क्रीणाति, गवा क्रीणातीत्येवमादीनां विकल्पः । एवमत्रापि विकल्पो भविष्यति । सन्तर्दनम् असन्तर्दनं वा भविष्यतीति ॥ २४ ॥ ॥ पूर्वपक्षे पूर्वपक्षः ॥

उत्कर्षो वा ग्रहणाद्विशेषस्य ॥ २५ ॥

उत्कृष्यते वा सन्तर्दनम् । गृह्यते हि विशेषो, दीर्घसोमे सन्तृद्यादिति । ज्योतिष्टोममपेक्ष्य सत्राणि कालतो दीर्घाणि भवन्ति ॥२५॥ पूर्वपक्षे सिद्धान्तः ॥

कर्तृतो वा विशेषस्य तन्निमित्तत्वात् ॥ २६ ॥

नोत्कृष्येत वा सन्तर्दनं ज्योतिष्टोमात् । एवं प्रकरणमनुगृहीतं भवति । दीर्घसोमशब्दश्च कर्तृतो भविष्यति । दीर्घस्य यजमानस्य सोमो दीर्घसोम इति ॥ २६ ॥ ॥ आ० ॥

क्रतुतो वार्थवादानुपपत्तेः स्यात् ॥ २७ ॥

नचैतदस्ति, ज्योतिष्टोमे सन्निवेश इति । दीर्घकाले सोमे क्रियेत । क्रतुत एव दीर्घत्वं, न कर्तृत । कुतः । अथवादानुपपत्तेः । धृत्या इत्यर्थवादो भवति । धारणायेत्यर्थः । दीर्घकाले सोमे पुनःपुनर्ग्रावभिरभिहन्यमाने सोमाभिषवणफलकयोर्दारणशङ्कायां, धृत्या इत्यर्थवाद उपपद्यते । तस्मादुत्कर्ष इति ॥ २७ ॥ ॥ आ० नि० ॥

संस्थाश्च कर्तृवद्धारणार्थाविशेषात् ॥ २८ ॥

इदं पदोत्तरं सूत्रम् । कानि पदानि ? अथ किमर्थं संस्थासु न निवेशः । तथा सति प्रकरणमनुगृहीतं भविष्यति । दीर्घसोमशब्दश्च । दीर्घकालो हि अग्निष्टोममपेक्ष्योक्थ्यादिषु संस्थासु सोम इति । उच्यते । न संस्थासु दीर्घकालत्वेऽपि सोमेत्यर्थवाद उपपद्यते । तावानेव हि तत्र सोमो, दश मुष्टीर्मिमीते इति वचनात् । तत्र धारणं न विशेषः कश्चित् । तस्मादुत्कर्ष एव ॥ २८ ॥ पूर्वपक्षः ॥

उक्थ्यादिषु वार्थस्य विद्यमानत्वात् ॥ २९ ॥

नचैतदस्ति, उत्कर्ष इति । प्रकरणानुग्रहादनुत्कर्षः । दीर्घसोमशब्दश्च दीर्घकालत्वादुपपद्यते । तत्राप्यधिकोऽग्निष्टोमात् सोमः । प्रदानानि हि विवर्द्धन्ते । तान्यविवृद्धे प्रदेये न शक्यानि विवर्द्धयितुम् । पूर्णे च ग्रहे ग्रहशब्दो भवति । तेन न शक्यानि न्यूनानि पात्राणि ग्रहीतुम् । तस्माद्दारणाशङ्कायां धारणमाशंसितव्यं भवति । तत्र धृत्या इत्युपपद्यते इति ॥ २९ ॥ ॥ सि० ॥

अविशेषात् स्तुतिर्व्यर्थेति चेत् ॥ ३० ॥

इति चेत् पश्यसि, संस्थास्वपि अर्थवादोऽवकल्पते प्रदेयविवृद्ध्या इति । नैतदेवम् । व्यर्थैव हि स्तुतिर्भवेत् । कुतः । सोमाविशेषात् । यावानेवाग्निष्टोमे सोमस्तावानेवोक्थ्यादिष्वपि संस्थासु । उक्थ्यादिष्वपि दशमुष्टिरेव सोमो ग्रहीतव्यः । नन्वर्थात् प्रदेयं विवर्त्स्यतीति । दशमुष्टिः स कथं शक्येत विवर्द्धयितुम् । त्रिपर्वेति च पर्वसङ्ख्यानियमान्न शक्यो बहुपर्वा ग्रहीतुम् । तस्माद्धारणाविशेषादर्थवादानुपपत्तिः संस्थासु स्यात् । तस्मादुत्कर्षः ॥ ३० ॥ ॥ आ० ॥

स्यादनित्यत्वात् ॥ ३१ ॥

नैतदस्ति । उत्कर्ष इति संस्थासु स्यात् । प्रकरणानुग्रहात् । अर्थाच्च प्रदेयविवृद्ध्या दारणशङ्कायामर्थवाद उपपद्यते । केन प्रकारे-

ण प्रदेयं विवर्द्धिष्यते इति । विप्रकृष्टपर्वा सोमो ग्रहीष्यते । अपि च तृतीये सवनेंऽशुरेकोऽभिषूयते । तस्य प्रमाणं च नाम्नातम् । तमनेकपर्वाणं स्थूलपर्वाणं च ग्रहीष्यति । तेन प्रदेयविवृद्धिर्भविष्यति । अतोऽर्थवादोऽवकल्पिष्यते । तस्मात् संस्थासु निवेश इति सिद्धम् ॥३१॥ आ० नि० ॥ सन्तर्दनस्य संस्थानिवेशाधिकरणम् ॥ ११ ॥

सङ्ख्यायुक्तं क्रतोः प्रकरणात् स्यात् ॥ ३२ ॥

ज्योतिष्टोमे प्रवर्ग्यं प्रकृत्य समाम्नायते । न प्रथमयज्ञे प्रवृञ्ज्यात् द्वितीये तृतीये वा प्रवृञ्ज्यादिति । तत्र सन्देहः । किं ज्योतिष्टोमे सर्वेष्वेव प्रयोगेषु न प्रवर्जितव्यम्, उत प्रथमे प्रयोगे प्रतिषेध इति । किं तावत् प्राप्तम् । ज्योतिष्टोमे प्रतिषेधः । कुतः । यज्ञसंयोगात् । प्रथमशब्देन यज्ञोऽभिधीयते ज्योतिष्टोमः । तस्य हि प्रथमसंयोगः एवं समाम्नायते । एष वा व प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमो य एतेनानिष्ट्वा अथान्येन यजेतेति । यज्ञानां प्रथम इति कृत्वा प्रथमशब्देन ज्योतिष्टोमोऽभिधीयते । एवञ्च प्रकरणमनुगृह्यते । यदि क्रतोरेष वादः । तस्मात् संख्यायुक्तः प्रतिषेधो ज्योतिष्टोमस्य प्रवर्ग्ये प्रतिषेधेदिति ॥ ३२ ॥ ॥ पूर्वपक्षः ॥

नैमित्तिकं वा कर्तृसंयोगाल्लिङ्गस्य तन्निमित्तत्वात् ॥ ३३ ॥

न चैतदस्ति । यज्ञस्य एष वाद इति । चतुर्ष्वपि वेदेषु न, प्रथमयज्ञ-इत्येवंसंज्ञकः कश्चिद् यज्ञोऽस्ति । भवति तु प्रथमो यज्ञस्य प्रयोगः । कर्तृसंयोगात् । पूर्वस्य द्वितीयादीनपेक्ष्य प्रथमशब्दो भवति । स प्रयोगस्योपपद्यते, न क्रतोः । प्रयोगः श्रवणाद् गम्यते । क्रतुः प्रयोगसम्बद्धत्वात्, श्रुतिश्च बलीयसी न लक्षणा । तस्मात् प्रथमे प्रयोगे न प्रवर्जितव्यमिति ॥

अथ यदुक्तं, ज्योतिष्टोमेन सामानाधिकरण्यात् तद्वचन इति । लक्षणया सामानाधिकरण्यमिति तत् परिहृतम् । यत्तु प्रथमयज्ञ इति यज्ञशब्देन सामानाधिकरण्यं, तदपि यज्ञशब्दस्य यागवचनत्वादस्मत्पक्षस्य अबाधकम् ॥ ३३ ॥ सिद्धान्तः ॥ प्रवर्ग्यनिषेधस्य प्रथमप्रयोगविषयताधिकरणम् ॥ १२

पौष्णम्पेषणं विकृतौ प्रतीयेताचोदनात् प्रकृतौ ॥३४॥

दर्शपूर्णमासयोः समामनन्ति । तस्मात् पूषा प्रपिष्टभागोऽदन्तको हि स इति । तत्र सन्देहः । किं पौष्णं पेषणं प्रकृतौ, उत विकृताविति । किं प्राप्तम् । प्रकृताविति । कुतः । प्रकरणात् । ननु प्रकृतौ पूषणं न कस्यचिद् हविषो देवतां समामनन्तीति । उच्यते । प्राकृतीं काञ्चिद्देवतां पूषशब्दो वक्ष्यति॥ एवं प्राप्ते ब्रूमः । यत्र पौष्णं हविरस्ति, तत्र तस्य पेषणं विधातुं शक्यम् । न च प्रकृतौ पूषास्ति । तस्मादुत्क्रष्टव्यं पेषणमिति । यदुक्तं, काञ्चिद्देवतां पूषशब्दो वक्ष्यतीति । ब्रूयाद् यद्यन्यत्रापि मुख्यः पूषा न स्यात् । नन्वन्यत्र क्रियमाणे प्रकरणमुपरुद्ध्येत । उपरुद्ध्यताम् । वाक्यं हि अस्योपरोधकम् । अथ वा नैवात्र सन्देहः । एवमेव प्राप्तमुच्यते । पौष्णं पेषणं विकृतौ, न प्रकृताविति । नास्ति पूष्णः प्रकृतौ चोदनेति । किमर्थं प्राप्तमुच्यते । उत्तरत्र कथा वर्त्तिष्यते ॥ ३४ ॥ ॥ पौष्णपेषणस्य विकृतौ विनियोगाधिकरणम् ॥ १३ ॥

तत्सर्वार्थमविशेषात् ॥ ३५ ॥

पौष्णं पेषणं प्रकृतौ श्रूयमाणं विकृतावित्युक्तम् । तत्र सन्देहः । किं चरौ पशौ पुरोडाशे च, उत चरावेवेति । किं तावत् प्राप्तम् । तत् सर्वत्र स्याच्चरौ पशौ पुरोडाशे च । कुतः । अविशेषात् । न कश्चिद्विशेष आश्रीयते । तस्मात् सर्वत्रेति ॥ ३५ ॥ पूर्व० ॥

चरौ वाऽर्थोक्तं पुरोडाशेऽर्थविप्रतिषेधात् पशौ न स्यात् ॥ ३६ ॥

चरौ पौष्णं पेषणं विनियुज्यते । पुरोडाशे तावत् पेषणमर्थादेव प्राप्नोति। नैवान्यथा पुरोडाशो भवति। तदर्थं तावन्न वचनम् । पशौ च न स्यात् । हृदयादिषु पिष्यमाणेषु तेषामाकारविनाशः स्यात् । तत्र को दोषः । हृदयस्याग्रेऽवद्यतीति न हृदयादवदायिष्यते । तथान्यदप्यवदानं न यथाश्रुतादवदास्यते ॥ ननु शक्यते पिष्टेभ्योऽपि हृदयादिभ्योऽवदातुम् । नेति ब्रूमः । आकारा हृदयादयो, न मांसानि । उक्तमेतद्, आकृतिः शब्दार्थ इति । यद्यपि पुनस्तदाकृतिकः क्रियते, तथाप्यस्योत्सादनप्रदेशं प्रति मुह्येयुः । तस्माच्चरौ पौष्णं पेषणं भविष्यतीत्येवमर्थं वचनम् ॥ ३६ ॥ ॥ सि० ॥

चरावपीति चेत् ॥ ३७ ॥

२७

इति चेत् पश्यति भवान्, अर्थविप्रतिषेधान्न पश्वर्थमिति । ननु चरावत्यर्थविप्रतिषेधो, विशदसिद्धे ओदने चरुशब्दमुपचरन्ति, पिष्यमाणो हि पिष्टकं यवागूर्वा स्यात् खलिर्वा ॥ ३७ ॥ ॥ आ० ॥

न पक्तिनामत्वात् ॥ ३८ ॥

अत्रोच्यते सत्यं विशदसिद्धे ओदने चरुशब्दः प्रयुज्यते । विशदसिद्धश्चरुर्दीयते इति, न त्वस्य विशदसिद्धिर्निमित्तम् । यदि विशदसिद्धिर्निमित्तं स्याद्, न पिष्टसिद्धे प्रयुज्येत । तत्रापि हि प्रयुज्यते, पिष्टकचरुः साध्यते इति । अतोऽन्यदेतयोः सामान्यं, तन्निमित्तम् । तदेतदुच्यते, न पक्तिनामत्वादिति । न चरौ विप्रतिषेधः। कथम् । पक्तिनामत्वात् । पक्तिनामैतत्- चरुरिति । अनवस्रावितान्तरुष्मपाकेन अभिनिर्वर्त्यस्य भवति चरुशब्दो वाचकः । तेन पिष्टे ओदने विशदौदने च प्रयोक्तारो भवन्ति, चरुरिति । पक्षोक्तमेव प्रयोजनम् । पूर्वपक्षे पशावपि पेषणम् । सिद्धान्ते चरावेव ॥ ३८ ॥ ॥ आ० नि० ॥ पौष्णपेषणस्य चरावेव निवेशाधिकरणम् ॥ १४ ॥

एकस्मिन्नेकसंयोगात् ॥ ३९ ॥

पौष्णं पेषणं विकृतौ भवति चरावेवेत्युक्तम् । अथेदानीं सन्दिह्यते । किमेकदेवत्ये पौष्णे एतद्भवति, उत द्विदेवत्येऽपीति । किं द्विदेवत्य उदाहरणम् । राजसूये उत्तरे त्रिसंयुक्ते सौमापौष्णे एकादशकपाले ऐन्द्रापौष्णश्चरुः श्यावो दक्षिणा इति । तत्र ऐन्द्रापौष्ण उदाहरणम् । किं प्राप्तम् । एकदेवत्यस्यैव पेषणमिति । केवलसंयोगाद् यथा चतुर्धाकरणे ॥ ३९ ॥ ॥ सि० ॥

धर्म्मविप्रतिषेधाच्च ॥ ४० ॥

द्विदेवत्ये विप्रतिषिद्ध्येत धर्म्मः । पूष्णः पेषणं, नेतरस्य । तत्र यदि पूष्णो भागः पिष्येत, अपिष्ट इतरस्य स्यात् । तत्र विषमः पाको भवेत् । पाकनिमित्तश्च चरुशब्दः स विप्रतिषिद्ध्येत । अथ अविरोधं मन्यमाना अपरस्यापि भागं पिंष्युः, भागसंमोहः स्यात् । तत्र को दोषः । अन्यस्य भागोऽन्यस्मै अवदीयेत । तथा अयथाश्रुतं क्रियेत । तस्मादप्येकदेवत्ये पेषणमिति ॥ ४० ॥ ॥ हेतुः ॥

अपि वा सद्वितीये स्याद्देवतानिमित्तत्वात् ॥ ४१ ॥

देवतानिमित्तमेतत् पेषणं श्रूयते । पूषा प्रपिष्टभागः कर्त्तव्य

इति। स च द्विदेवत्येऽपि भागे पिष्यमाणे प्रपिष्टभागः कृतो भवति। न यथा चतुर्धाकरणे। तत्र हि तद्धितो निरपेक्षस्य भवति, न सद्वितीयस्य ऐन्द्रपीत इति समासोऽपि निरपेक्षस्य, न सद्वितीयस्य। इह तु प्रपिष्टशब्दस्य भागशब्देन सहान्यपदार्थो बहुव्रीहिः समासः। एषोऽपि समर्थयोरेव, न त्वत्र द्विदेवत्ये कश्चिदेवञ्जातीयको दोषः। तस्मादेकदेवत्ये द्विदेवत्येऽपि वा चरावस्य भागः पेष्टव्य एव ॥ ४१ ॥ ॥ पूर्वपक्षः ॥

लिङ्गदर्शनाच्च ॥ ४२ ॥

लिङ्गमप्येवं भवति, तस्मात् पूषा प्रपिष्टभागोऽदन्तको हीति, देवतानिमित्तं पेषणमिति स्तुतिर्दर्शयति। तथा सौमापौष्णं चरुं निर्वपेन्नेमापिष्टं पशुकाम इति नेमपिष्टतां दर्शयति। तथा अर्द्धं पिष्टमर्द्धमपिष्टं भवति, द्विदेवत्यत्वायेति देवतानिमित्तमेव पेषणं दर्शयति। ॥ ४२ ॥ ॥ हेतुः ॥

वचनात् सर्वपेषणं तं प्रति शास्त्रवत्त्वादर्थाभावात् द्विचरावपेषणं भवति ॥ ४३ ॥

इदं पदोत्तरं सूत्रं, नेमपिष्टं भवतीति। कस्मादेतद् न वचनमिति। उच्यते। यदि वचनमेतद् भवेत् सौमापौष्णमात्रमनूद्य सर्वत्र पेषणं विदध्याच्चरौ पशौ पुरोडाशे च। तत्र सौमापौष्णस्य चरुसम्बन्धे नेमपिष्टसम्बन्धे चोभयस्मिन् विधीयमाने वाक्यं भिद्येत। तस्माद् यो यः सौमापौष्णस्तत्र तत्र नेमपिष्टता। तं प्रति सौमापौष्णमात्रं प्रति शास्त्रवत्त्वमर्द्धपेषणस्य। पुरोडाशेऽर्थात् सर्वपेषणे प्राप्ते अर्थाभावाच्च पशौ चरौ वा अपेषणे प्राप्ते वचनमिदं भवेत्। तत्र चरुशब्दो न विवक्षितस्वार्थः स्यात्। प्रदर्शनार्थः कल्प्येत, पेषणानुवादपक्षे पुनर्नैष विरोधो भवति। तस्माद् भवत्येव लिङ्गम्। ननु अङ्गनाशभयात् पशोरपेषणम्। नेति ब्रूमः। अर्द्धपेषणे न अङ्गनाशः। अपिष्टाद्वदास्यते। पेषणञ्चादृष्टार्थम्॥४३॥पूर्वपक्षे आशङ्कानिरासः॥

एकस्मिन् वार्थधर्मत्वादैन्द्राग्नवदुभयोर्न स्याद्चोदितत्वात् ॥ ४४ ॥

एकदेवत्ये वा पौष्णं पेषणं भवितुमर्हति, न ऐन्द्रापौष्णे। कुतः। नैष देवताधर्मो विधीयते, पूष्णो भागः पिष्ट उपयोक्तव्य इति। कस्य

तर्हि । अर्थस्य धर्म्मः । कः पुनरर्थः । यागः । कथमवगम्यते ? न देवताधर्म्म इति । उच्यते । न हि तस्य भागोऽस्ति । ननु यद् देवतायै दीयते, तत् तस्या भागो भवति । उच्यते । एतद् हि देवतामुद्दिश्य त्यज्यते । न च त्यागमात्रेण देवतास्वत्वं भवति परिग्रहणेन हि स्वस्वामिसम्बन्ध आपद्यते । न च परिगृहीतं देवतयेति । किञ्च, न प्रमाणमस्ति । यच्च यं भजते, स तस्य भागः । न च हविर्देवता भजते । तस्मान्नास्ति पूष्णो भागः । अथापि कथञ्चिद् भवेद् भागः, तथापि न देवताया धर्म्मः पेषणं भवितुमर्हति । निष्प्रयोजनो हि तथा स्याद्, अयागधर्म्मत्वात् । कथं तर्हि प्रकरणान्तरे समाम्नातो यागधर्मो भविष्यतीति । उच्यते । वाक्यसंयोगात् । ननु च देवतया एष संयोगः श्रूयते, न यागेनेति । उच्यते । भागाभावादनर्थकत्वाच्च न देवतासंयोग इत्युक्तम् । तथापि तु यथा यागसम्बन्धो भवति, तथा वक्तव्यम् । तदुच्यते । अयमत्र पूष्णो भागो यः पूषणमुद्दिश्य त्यज्यते । यस्य द्रव्यस्य त्यागे पूषा देवता । न चैन्द्रापौष्णे भवति पूषा देवता, न स चरुः पूष्णः स्वत्वेन सम्बद्ध्यते । तस्मादैन्द्रापौष्णे न कश्चिदस्ति पूष्णश्चरुणा सम्बन्धः । केवले तु पूषणि देवताभूते तस्मै सङ्कल्पितो भागो भवति । कथम् । यमुद्दिश्य सङ्कल्पो भवति स तस्य भाग इति प्रसिद्धिरेषा । तेन यद्यपि पूषा स्वेनोच्चारणेन इन्द्रापूष्णोरुपकारकमुच्चारणं कुर्वन्नुपकारको भवेत्, तथापि न तस्य द्विदेवत्यो भाग इत्युच्यते । असङ्कल्पनात् । केवले पूषणि देवतायां चरोः पेषणं क्रियते, न ऐन्द्रापौष्णेषु द्विदेवत्येषु इति ॥ ४४ ॥ ॥ ॥ पूर्वपक्षनिरासः ॥

हेतुमात्रमदन्तत्वम् ॥ ४५ ॥

यदुक्तम्, अदन्तको हि इति देवताधर्म्मं दर्शयतीति । अर्थवाद एष इतरस्मिन्नपि पक्षे उपपद्यते ॥ ४५ ॥

वचनं परम् ॥ ४६ ॥

अथ अपरं यत्कारणमुक्तं, नेमपिष्टमिति द्विदेवत्ये पेषणं दर्शयति, अर्द्धपिष्टं भवत्यर्द्धमपिष्टं द्विदेवत्यत्वायेति, देवताधर्म्मं दर्शयतीति । अत्रोच्यते । एवं सति वचनमिदमप्राप्ते भवतीति । नन्वनेकार्थविधानमेकं वाक्यं प्राप्नोति । उच्यते । सति पक्षान्तरे अनेकार्थविधिः

पक्षान्तराश्रयणेन परिह्रियते। असति पुनः पक्षान्तरे उच्चारणानर्थक्य-प्रसङ्गपरिजिहीर्षयाऽनेकार्थं वाक्यमभ्युपगन्तव्यं भवति । तस्मान्न द्विदेवत्ये पेषणमिति सिद्धम् ॥४६॥ ॥ आशङ्कानिरासः॥ पौष्णपेषण-स्यैकदेवत्ये निवेशाऽधिकरणम् ॥ १५ ॥ इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये तृतीयस्याध्यायस्य तृतीयः पादः समाप्तः ॥ ३ ॥ ३ ॥

अथ तृतीये अध्याये चतुर्थपादः ॥ ३ ॥ ४ ॥

निवीतमिति मनुष्यधर्मः शब्दस्य तत्प्रधानत्वात् ॥१॥

दर्शपूर्णमासयोराम्नातं, निवीतं मनुष्याणां प्राचीनावीतं पितॄणामुपवीतं देवानामुपव्ययते देवलक्ष्ममेव तत् कुरुते इति । निवीतं मनुष्याणामित्यत्र सन्देहः । किमयं विधिरुतार्थवाद इति । यदा विधिस्तदा किमयं पुरुषधर्म्म उत कर्म्मधर्म्मः । अथ यत्प्रकरणे मनुष्याणां तत्र विधिः, उत मनुष्यप्रधाने कर्म्मणि निविशते इति ॥ किं प्राप्तम् ? विधिर्मनुष्यधर्म्मश्चेति । यदि विधिरेवमपूर्वमर्थं विदधदर्थवान् भवति । इतरथा अर्थवादमात्रमनर्थकम । विधिश्चेत् पुरुषधर्मो, निवीतं मनुष्याणामिति पुरुषप्रधानो निर्देशः। कथमवगम्यते ? नात्र मनुष्या विधीयन्ते, मनुष्याणां निवीतं विधीयते, न चाऽविहितमङ्गं भवति । यदि मनुष्या अपि विधीयेरन् वाक्यं भिद्येत । तस्मान्निवीतं मनुष्याणामुपकारकम् ॥ ननु प्रकरणाद्दर्शपूर्णमासयोरुपकारकम् । प्रकरणाद्धि वाक्यं बलवत्तरम् । अपि च गुणभूतेषु मनुष्येषु कारकसम्बन्धस्य विवक्षितत्वात् तृतीया भवेत् । षष्ठी त्वेषा सम्बन्धलक्षणा । तत्र गुणभूतेषु मनुष्येषु मनुष्यग्रहणं नैव कर्त्तव्यं स्यात् । मनुष्यैरेव तत् क्रियमाणं क्रियेत । मनुष्यप्रधानपक्षे तु कर्त्तव्यम् ॥ १ ॥ ॥ पूर्वपक्षः ॥

अपदेशो वाऽर्थस्य विद्यमानत्वात् ॥ २ ॥

अपदेश इति ज्ञायमानस्य वचनम् । स एष न विधिः । अनुवाद एषः । कुतः ? अर्थस्य विद्यमानत्वात् । प्राप्त एवार्थो, यन्निवीतं मनुष्याणाम् । निवीतं हि मनुष्याः प्रायशः स्वार्थं कुर्वन्ति । तस्मादऽनुवादः ॥ २ ॥ आशङ्कानिरासः ॥

विधिस्त्वपूर्वत्वात् स्यात् ॥ ३ ॥

विधिरेव भवेत् तथा प्रयोजनवान् । इतरथा वादमात्रमनर्थकम् ।

पूर्ववान् अनुवादो भवति । अयं त्वपूर्वो, यन्नियमेन निव्यातव्यमिति ॥ ३ ॥ ॥ आशङ्कानिरासः ॥

स प्रायात् कर्म्मधर्म्मः स्यात् ॥ ४ ॥

यदुक्तं विधिरिति, एतद् गृह्यते। यत्तु मनुष्यधर्म्म इति, तन्नानुमतम् । क्रतुधर्मोऽयं प्रकरणात् । प्रकृत्य एव हि कर्म्मप्रायेषु धर्मेषूच्यमानेष्वेतदभिधीयते । तस्मात् कर्म्मधर्म्मः ॥ ४ ॥

वाक्यशेषत्वात् ॥ ५ ॥

निवीतं मनुष्याणामित्यस्य वाक्यशेषः समाख्या, आध्वर्यवमिति । यदि दर्शपूर्णमासयोः शेषस्ततोऽध्वर्युणा कर्त्तव्यम् । तत्र समाख्याऽनुग्रहीष्यते ॥ ५ ॥

तत्प्रकरणे यत्तत्संयुक्तमविप्रतिषेधात् ॥ ६ ॥

उच्यते । प्रकरणात् समाख्यानाच्च धर्मकर्मौ विज्ञायते । वाक्यान्मनुष्यधर्मः । तस्मादुत्कर्षमर्हति । नेति ब्रूमः । प्रकरणे एवाभिनिविशमानस्य मनुष्यप्रधानताऽवकल्पिष्यते । कथम् । यद्दर्शपूर्णमासयोर्मनुष्यप्रधानं, तत्र निवेक्ष्यतेऽन्वाहार्यकर्म्मणि । प्रकरणं चैवमनुग्रहीष्यते, वाक्यञ्च ॥ ६ ॥

तत्प्रधाने वा तुल्यवत् प्रसङ्ख्यानादितरस्य तदर्थत्वात् ॥ ७ ॥

नैतदस्ति, प्रकरणे निवेश इति । मनुष्यप्रधाने कर्म्मणि निवीतं स्यादातिथ्ये । कुतः । तुल्यवत् प्रसङ्ख्यानात् । तुल्यानि चैतानि प्रसङ्ख्यायन्ते । यत्तावदुपवीतं देवतानामुपव्ययते इति, तत् प्रकृतयोर्दर्शपूर्णमासयोरुपवीतं विदधाति । यत् प्राचीनावीतं पितॄणामिति, तत् पितृप्रधाने कर्म्मणि प्राचीनावीतं विदधाति । यदप्येतद्, निवीतं मनुष्याणामिति, तदप्यातिथ्ये निरपेक्षं विदधाति । कथं गम्यते ? मनुष्यप्रधाने विदधातीति । मनुष्याणामिति षष्ठ्यन्तेन सम्बन्धात् । मनुष्याणामेव प्राप्नोति, न मनुष्यप्रधाने । उच्यते । मनुष्याणां कल्प्यमाने फलं कल्पनीयम् । मनुष्यप्रधाने पुनः षष्ठी भविष्यति, सम्बन्धश्चैवमवकल्पिष्यते, फलं चैवं न कल्पनीयम् । तदुक्तं, समेषु वाक्यभेदः स्यादिति ॥ ननु मनुष्यप्रधानेन सहैकवाक्यतां प्राप्तम्, पुनः प्रकृताभ्यां दर्शपूर्णमासाभ्यामेकवाक्यतां या-

स्यति । न हि द्वौ सम्बधावेकस्मिन् वाक्ये विधीयेते । भिद्येत हि तथा वाक्यम् । इतरस्य मनुष्यग्रहणस्य निवीतसम्बन्धार्थत्वात्तेनैव सहैकवाक्यता भविष्यति । प्रत्यक्षेण शब्देन, तदेकवाक्यतया चार्थवत्त्वे सति न प्रकृतेनैकवाक्यताऽवकल्प्यते । तस्मात् प्रकरणं बाधित्वा आतिथ्ये निवेक्ष्यते इति ॥ ७ ॥ ॥ पूर्व० ॥

अर्थवादो वा प्रकरणात् ॥ ८ ॥

नैतदस्ति, विधिः स च मनुष्यप्रधाने कर्म्मणीति । मनुष्याणामिति मनुष्यसम्बन्धोऽत्र श्रूयते, न मनुष्यप्रधानेन कर्म्मणा सम्बन्धः । मनुष्यप्राधान्ये च सति फलं कल्पनीयम् । आतिथ्यकर्म्मणा त्वनिर्दिष्टेनाप्रकृतेनानुमेयेन संवद्ध्येत । तत्र को दोषः । प्रकरणादुत्क्रष्येत सम्भवँस्तत्र । कथं सम्भव इति चेत् । अर्थवाद एवः । स प्रकृतं स्तुवन् प्रकरणे सम्भविष्यति, विधिः सन्नुत्कृष्येत । तस्मान्न विधिर्मनुष्यप्रधाने कर्मणीति ॥ ८ ॥ ॥ सि० ॥

विधिना चैकवाक्यत्वात् ॥ ९ ॥

इतश्च न विधिः । कुतः ॥ विधिनैकवाक्यत्वात् ॥ उपव्ययते देवलक्ष्ममेव तत् कुरुते इत्येष विधिः । अनेनास्य सहैकवाक्यता भवति । यदीतरोऽपि विधिः स्याद् वाक्यं भिद्येत । न हि विधेश्चैकवाक्यता भवति । वचनव्यक्तिभेदात् । तत्रैकवाक्यतारूपं बाध्येत । किमेकवाक्यतारूपम् । निवीतं मनुष्याणामिति प्राप्ताऽनुवादः । प्राप्तस्य किमर्थेन पुनर्वचनम् ? । उपवीतस्तुत्यर्थेन । कथमुपवीतस्तुतिः । निवीतमयोग्यं देवकर्म्मणि दर्शपूर्णमाससंज्ञके । मनुष्याणां हि तत् । तथा प्राचीनावीतं पितॄणां, न देवकर्म्मणि । उपवीतं तु तत्र योग्यम् । तस्मादुपव्यातव्यमिति । यथा, यादृशोऽस्य वेशस्तादृशो नटानां, यादृशो देवदत्तस्य तादृशो ब्राह्मणानामिति देवदत्तवेशप्रशंसार्थमितरवेशसङ्कीर्त्तनम् । एवमिहाप्युपव्यानस्तुत्यर्थेन निवीतसङ्कीर्त्तनम् । नास्त्यत्र विधायकः शब्दो, निवीतं मनुष्याणां कर्त्तव्यमिति । आतिथ्यप्रयोगवचनं, तस्य कर्त्तव्यताविधायकमिति चेत् । नैतदेवम् । स्तुत्यर्थेनार्थवत्त्वे सति न शक्यं कल्पयितुम् । परोक्षं हि तदानर्थक्यपरिजिहीर्षया कल्प्येत । परिहृते त्वानर्थक्ये इह पुनर्न किञ्चित् कल्पनीयम् । तस्मादर्थवादः । एवञ्च

वाक्येनाविरुद्धं प्रकरणम् अर्थवद् भवति ॥९॥ ॥ युक्तिः ॥ निवीतस्याऽर्थवादताधिकरणम् ॥ १ ॥

दिग्विभागश्च तद्वत् सम्बन्धस्यार्थहेतुत्वात् ॥ १० ॥

ज्योतिष्टोमं प्रकृत्य श्रूयते—प्राचीं देवा अभजन्त दक्षिणां पितरः, प्रतीचीं मनुष्या, उदीचीमसुरा इति। अपरेषाम्, उदीचीं रुद्रा इति। तत्र सन्देहः। किं विधिरुतार्थवादः। विधिः सन् किं मनुष्यधर्म्मः, उत कर्म्मधर्म्मः। अथ वा प्रकरणे मनुष्यप्रधाने कर्म्मणि निवेशः ? किं वा आतिथ्ये इति ॥ किं तावत् प्राप्तम् ॥ दिग्विभागश्च तद्वत् सम्बन्धस्यार्थहेतुत्वात् ॥ य एष दिग्विभागः, स निवीतवद् विचार्य्यः। यो निवीते पूर्वपक्षः स इह पूर्वपक्षो, यो मध्यमः स मध्यमः, यः सिद्धान्तः स सिद्धान्तः। अर्थवत्त्वाद् विधिर्मनुष्यसम्बन्धान्मनुष्यधर्म्म इति पूर्वपक्षः। प्रत्यङ्मुखा उदङ्मुखा वा पृष्ठत आदित्यं प्रांशु पदार्थाननुतिष्ठन्ति। मनुष्या इत्यनुवादः। विधिरेव प्रकरणानुग्रहाच्च ज्योतिष्टोमधर्म्मः। वाक्यप्रकरणानुग्रहाय ज्योतिष्टोमे मनुष्यप्रधाने दक्षिणाव्यापारे निवेश इत्यपरः पक्षः। भिन्नत्वाद् वाक्यानामातिथ्ये निवेश इति अपरं मतम्। अर्थवादोऽयं प्रकरणाऽनुग्रहाय। प्राचीनवंशं करोतीत्यनेन विधिनैकवाक्यत्वस्य प्रत्यक्षसिद्धत्वादिति सिद्धान्तः॥१०॥दिग्विभागस्याऽनुवादताधिकरणम्॥२॥

पुरुषि दितपूर्णघृतविदग्धश्च तद्वत् ॥ ११ ॥

दर्शपूर्णमासयोराम्नातं, यत् परुषि दितं तद्देवानां, यदन्तरा तन्मनुष्याणां, यत् समूलं तत् पितॄणामिति। तथा, यो विदग्धः स नैर्ऋतः। यो शृतः स रौद्रः, यः शृतः स सदेवत्यः। तस्माद् अविदहता श्रपयितव्यं सदेवत्वायेति। ज्योतिष्टोमे श्रूयते—यत् पूर्णं तन्मनुष्याणामुपरि, अधो देवनामधः पितॄणामिति। तथा, घृतं देवानां मस्तु पितॄणां निष्पक्वं मनुष्याणामिति। तत्र मनुष्यसम्बद्धेषु, रौद्रे च सन्देहः। किं मनुष्याणां धर्मा विधयः, उत कर्म्मधर्म्मा अनुवादाः। अथ यत् प्रकरणं मनुष्यप्रधानं, रौद्रं च तत्र निविशेरन्, उत आतिथ्ये, उत अर्थवादः ? इति ॥ किं तावत् प्राप्तम्। एतान्यपि तद्वत्। यो निवीते पूर्वः पक्षः, स एतेषां पूर्वः पक्षः। यो मध्यमः स मध्यमः। यः सिद्धान्तः स एव सिद्धान्तः। अर्थवत्त्वा-

न्मनुष्यसम्बन्धाच्च विधयो मनुष्यधर्म्माश्चेति पूर्वः पक्षः। उपरि मूले चानियमाल्लाघवम् । अभ्यक्तं रोगवत्त्वाद् रौद्रं, पूर्णेऽपि श्लक्ष्णत्वाल्लाघवम्। एवं घृतं शिरसि निहितं मनुष्याणां सुखकरमेव । अर्थप्राप्तत्वाद् अनुवाद इत्युत्तरः पक्षः । विधिः, कर्म्मधर्म्मप्रायात् समाख्यानाच्च कर्म्मधर्म्म इति पक्षः । अन्वाहार्ये दक्षिणासु चेति वाक्यप्रकरणानुग्रहात पक्षः । आतिथ्ये इति वाक्यभेदप्रसङ्गात्। अर्थवाद इति, प्रकरणाद् विधिनैकवाक्यत्वादिति। पर्वं प्रतिलुनाति उपरि विलाद् गृह्णाति नवनीतेनाभ्यङ्क्ते अविदहता श्रपयितव्यमित्येभिः सहैषामेकवाक्यभावः । तस्मादेते न विधयोऽर्थवादा इति ॥ ११ ॥ परुषि दितादीनामनुवादताधिकरणम् ॥ ३ ॥

अकर्म्म क्रतुसंयुक्तं संयोगान्नित्यानुवादः स्यात् ॥१२॥

दर्शपूर्णमासयोराम्नायते, नानृतं वदेदिति। तत्र सन्देहः। किमयं प्रतिषेधो दार्शपौर्णमासिकस्य पदार्थस्य प्रकरणे एव निवेशः, अथ प्रायेण प्राप्तस्य कर्म्मणः पुरुषं प्रति प्रतिषेधः, पुरुषधर्म्मोऽयम् ? इति। किं प्राप्तम् । पुरुषधर्म्मः स्यात्। पुरुषस्यायमुपदिश्यते, न दर्शपूर्णमासयोः। कुतः। पुरुषप्रयत्नस्य श्रवणात्। वदेदिति वदनमनुतिष्ठेदिति श्रुत्या गम्यते। तस्य पुरुषसम्बन्धः श्रुत्यैव। कर्म्मसम्बन्धः प्रकरणात्। श्रुतिश्च प्रकरणाद् बलीयसी । इतरथा वदनं भवतीत्येतावत्यर्थे वदनमनुतिष्ठेदित्यविवक्षितस्वार्थः परार्थो विध्यर्थो भवेत्। पुरुषस्योपदेशे पुनर्विवक्षितस्वार्थ एव शब्दः। तस्मात् पुरुषस्योपदेशः। यस्य चोपदेशस्तस्यायं प्रतिषेधः । स चायमर्थं उपनयनकाल एव पुरुषस्य प्रतिषिद्धः। तेन संयोगेन अयं नित्याऽनुवादः ॥ नन्वेषा श्रुतिस्तस्याः स्मृतेर्मूलम्। नैषा तस्या मूलं भवितुमर्हति। यदि इयं तन्मूलिका भवेत्, दर्शपूर्णमासयोरिति स्मर्येत। उपनयकाले एव चास्योपदेष्टारो भवन्ति। अपि च पुरुषधर्म्म इत्युपदिशन्ति। तस्मान्नैषा स्मृतिरतः श्रुतेरिति ॥ १२ ॥ ॥ पूर्व० ॥

विधिर्वा संयोगान्तरात् ॥ १३ ॥

विधिर्वाऽयं दर्शपूर्णमासयोर्नानृतं वदेदिति, नाऽनुवादः । कुतः॥ संयोगान्तरात् ॥ नियमानुष्ठानेन पुरुषस्य सम्बन्धः स्मर्यते, पदाऽर्थप्रतिषेधेनेह संयोगः पुरुषस्य कथमन्यच्छ्रूयमाणमन्यस्यानुवा-

धो भवष्यति । तस्माद् विधिः प्रतिषेधस्यायम् । आह । गृह्णीम एतद्, विधिरिति । पुरुषधर्म्म इति तु गृह्णीमः । पुरुषप्रयत्नस्य श्रुतत्वात् । अत्र ब्रूमः । सर्वेष्वाख्यातेषु क्रियानुष्ठानं श्रूयते, न कारकं किञ्चित् । कथमेतद् गम्यते । प्रत्ययाद्, यतः क्रियामनुष्ठेयां प्रतीमः ॥ ननु कर्त्तारमपि प्रतियन्ति । सत्यं प्रतियन्ति, न तु शब्दात् । कुतस्तर्हि । अर्थात् । यदा क्रिया अनुष्ठातव्या, विधीयते, तदाऽर्थात् कारकव्यापारो गम्यते । यश्चार्थाद् गम्यते । न स श्रौतः । यश्च न श्रौतो न स वाक्याद् गम्यते कथमसौ प्रकरणं बाधिष्यते ॥ आह । प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत इत्याचार्य्योपदेशात् कर्त्ता शब्दार्थः कर्म्म चेत्यवगम्यते । कर्त्तरि शप्, कर्म्मणि यगिति । प्रत्ययार्थं कर्त्तारं कर्म्म च समामनन्ति आचार्य्याः । तस्माच्छब्दार्थः कर्त्ता कर्म्म चेति ॥ उच्यते । न आचार्य्यवचनात् सूत्रकारवचनाद् वा शब्दार्थो भवति । प्रत्ययादसौ गम्यते । अनुष्ठेया च क्रिया प्रतीता सती कारकाणि प्रत्याययतीत्यवगतमेतत् । अपि च, नैव कर्त्ता प्रत्ययार्थः कर्म्म वेति आचार्य्या आहुः । ननु कर्त्तरि कर्मणि च लकारः श्रूयते । नासौ कर्त्तरि कर्मणि वा श्रूयते । किन्त्वेकस्मिन्नेकवचनं, द्वयोर्द्विवचनं, बहुषु बहुवचनमिति तत्रापरं वचनम् । तत्रैवमभिसम्बन्धः क्रियते- एकस्मिन् कर्त्तरि, द्वयोः कर्त्रोर्बहुषु कर्तृष्विति । एवं कर्मण्येकत्वादिसम्बन्धः । तत्र नैवं भवति । कर्त्तरि भवति, एकस्मिँश्चेति । कथं तर्हि । कर्त्तरि एकस्मिन्नेकवचनं, कर्त्तुरेकत्वे इत्यर्थः । एवं द्वित्वे बहुत्वे, कर्म्मणि च । एवं वर्ण्यमाने लौकिकन्यायानुगतः सूत्रार्थो वर्णितो भवति । सूत्राक्षराणि च न्यायानुगतानि भवन्ति । आगमोऽपि चायमेव । यदैकत्वादयो विभक्त्यर्थास्तदा कर्मादयो विशेषणत्वेनेति ॥ नन्वेतदप्यस्ति । यदा कर्मादयो विभक्त्यर्थास्तदा एकत्वादयो विशेषणत्वेनेति । उच्यते । अर्थप्राप्ता हि कर्मादयस्ते न भवन्ति शब्दस्याभिधेयभूताः । न त्वेकत्वादयोऽर्थात् प्राप्नुवन्ति । तेन ते शब्दार्थभूताः । तस्माद् यद्यपि विशेषणमेकत्वादयस्तथापि विशेषणमेवाभिधीयते । यथा, हिरण्यमालिन ऋत्विजः प्रचरन्तीति हिरण्यमालित्वं विशेषणत्वेन, तथापि तदेव विधीयते । तस्मात् कर्त्तुरेकत्वं शब्दार्थो, न कर्त्ता ॥ ननु कर्त्तुरेकत्वादेकवचनं, कर्त्तुर्द्वित्वाद् द्विवचनं, कर्त्तुर्बहुत्वाद् बहुवचनम् । तेन

नूनं कर्त्ता शब्दार्थ इतिं गम्यते । उच्यते । नैतदनुमानाच्छक्यम् । कर्त्ता अनुष्ठेयक्रियावगमादेवावगम्यते इति प्रत्यक्षम् । तत्ताव-त् केनचिन्न बाध्यते । एकवचननिर्देशे कर्त्रैकत्वं गम्यते, द्विवचन-निर्देशे कर्त्तृद्वित्वं, बहुवचननिर्देशे कर्त्तृबहुत्वम् । तदपि प्रत्यक्ष-म् । कतरदत्रानुमानं बाधितुमर्हतीति । यथा आकृतिवचने शब्दे द्विवचने द्रव्यभेदोऽवगम्यते, एकवचने द्रव्यैकत्वम्, एवमिहापि द्रष्टव्यम् । तस्मान्न श्रौतः । न चेच्छ्रौतो, न प्रकरणं बाधिष्यते ॥ य-त्तु पुरुषप्रयत्नोऽनर्थको भवति कर्मधर्मपक्षे प्रयोगवचनेन कर्त्तव्य-तावचनादिति । तदुच्यते । अङ्गं सत् प्रकरणेन गृह्येत । न चावि-हितमङ्गं भवति । तस्मादङ्गत्वाय विधातव्यमस्मिन्नपि पक्षे । अतो मन्यामहे, प्राकरणिकस्यायं निषेध इति । तस्मात् तदङ्गं, यदनृ-तं तद् न वाच्यमिति । तेन यत् सङ्कल्पितं, तदङ्गं तदेव कर्त्तव्यम् । व्रीहिमयं सङ्कल्प्य न यवमयः प्रदेयः ॥ आह । यदोभयोरपि पक्ष-योर्नानृतं वदितव्यं, तदा को विचारेणार्थ इति । उच्यते । पूर्वस्मि-न् पक्षे पुरुषधर्मः । तत्र भ्रंशे स्मार्त्तं प्रायश्चित्तम् । सिद्धान्ते दर्श-पूर्णमासधर्मः । तत्र भ्रंशे याजुर्वैदिकं प्रायश्चित्तम् ॥ १३ ॥ सिद्धा-न्तः ॥ अनृतवदननिषेधस्य क्रतुधर्मताधिकरणम् ॥ ४ ॥

अहीनवत् पुरुषस्तदर्थत्वात् ॥ १४ ॥

ज्योतिष्टोमे श्रूयते, अङ्गिरसो वा इत उत्तमाः सुवर्गं लोकमायन् तेऽप्सु दीक्षातपसी प्रावेशयंस्तीर्थे स्नाति तीर्थमेव हि सजाता-नां भवतीति । दर्शपूर्णमासयोराम्नायते, तस्माज्जञ्जभ्यमानोऽनुब्रू-यान्मयि दक्षक्रतू इति, प्राणापानावेवात्मन्धत्ते इति । तत्र सन्देहः । किमयं धर्मः प्रकरणे निविशते, उत पुरुषस्योपदिश्यते ? इति । किं तावत् प्राप्तम् । अहीनवत् पुरुषः । तदर्थत्वात् ! एष विधिः प्रकरणा-दुत्कृष्येत । कुतः । पुरुषश्रुतेः । ब्रूयादिति पुरुषप्रयत्नस्य विवक्षि-तत्वात् ॥ ननु प्रकरणं बाध्यते । उच्यते । बाध्यतां प्रकरणं, वाक्यं त्वस्य बाधकम् । जञ्जभ्यमानसंयोगात्, प्रकरणाद् दर्शपूर्णमासयो-रुपदिश्यते इति गम्यते, वाक्याज्जञ्जभ्यमानस्य । वाक्यञ्च प्रकर-णाद् बलीयः । तस्मादुत्कृष्येतेति । फलमप्यामनन्ति, प्राणापानावे-वात्मन्धत्ते इति । स च संयोगो बाध्यते । तस्मात् पुरुषधर्मः प्र-

करणादुत्कृष्येत । अहीनवत् । यथा अहीनसंयोगाद् द्वादशोपसत्ता प्रकरणादुत्कृष्यते । एवं जञ्जभ्यमानसंयोगान्मयि दक्षक्रतू इति वचनम् ॥ १४ ॥ ॥ पूर्व० ॥

प्रकरणविशेषाद्वा तद्युक्तस्य संस्कारो द्रव्यवत् ॥१५॥

न वोत्कष्टव्यम् । कुतः । प्रकरणविशेषात् । प्रकरणयुक्त एव जञ्जभ्यमानो वचनेन संस्क्रियते । यथा यवादिद्रव्यं प्रोक्षणादिना । ननु न शक्नोति प्रकरणं जञ्जभ्यमानशब्दमेकदेशेऽवस्थापयितुम् । वाक्यं हि प्रकरणाद् बलवत्तरमिति । उच्यते । न ब्रूमो जञ्जभ्यमानशब्दः प्रकरणेन अप्राकरणिकात् पुरुषान्निवर्त्यते इति । किन्तु फलं तत्र कल्पनीयम् । ननु प्रत्यक्षं श्रूयते फलं, प्राणापानावेवात्मन्धत्ते इति । नेति ब्रूमः । नात्र विधायकं शब्दमुपलभामहे । य एषः, प्राणापानावेवात्मन्धत्ते इति । वर्त्तमानापदेश एष, न विधायकः । स्तावकस्तु भवति मन्त्रवचनस्य । तस्माद्दर्शपूर्णमासाभ्यामन्यत्रैतन्न फलवत् । अतः पुरुषस्य दर्शपूर्णमासौ कुर्वतः संस्कारकर्म इति गम्यते ॥ आह । पुरुषसंस्कारकर्म इति गृह्यते, दर्शपूर्णमासावेव कुर्वत इत्येतद् न । कथम् । योऽपि ह्यन्यत्र दर्शपूर्णमासाभ्यां जञ्जभ्यते, सोऽपि जञ्जभ्यमानशब्देनोच्यते एव । न च प्रकरणेन व्यावर्त्यते इत्येतदुक्तम् । तस्मादुत्कृष्यते । अत्रोच्यते । नैव व्यावर्त्यते । संस्कृतेन तु तेन नाऽस्ति प्रयोजनम् । ननु प्रकरणे पुरुषसंस्कारेणापि नास्ति प्रयोजनम् । उच्यते । संस्कृतपुरुषो दर्शपूर्णमासावनुष्ठास्यति । आह । उत्कर्षेऽपि सति संस्कृतोऽन्यद् अनुष्ठास्यति । उच्यते । नान्यस्य संस्कारो गुणो भवति । अप्रकृतत्वात् । आह । प्रकृतस्यापि न गुणः । वाक्येन पुरुषधर्म इत्यवगमात् । उच्यते । आनर्थक्यान्न पुरुषधर्मोऽवगम्यते । तस्मादस्य प्रकृताभ्यां दर्शपूर्णमासाभ्यामेकवाक्यता, नान्येन फलवतापि कर्मणा । प्रकरणाभावात् । तस्मान्नोत्कर्षः ॥ यत्तु प्रकरणे निवेशः । एतस्मिन् पक्षे ब्रूयादित्यनुष्ठानवचनमविवक्षितस्वार्थमिति । एवं सति अत्यनुवादो भविष्यति, न पुरुषसम्बन्धविधानस्य प्रयोजनमस्तीति ॥ १५ ॥ ॥ सि० ॥

व्यपदेशादपकृष्येत ॥ १६ ॥

अथ यदुपवर्णितं, द्वादशोपसत्ता यथोत्कृष्यते, तथेदमप्युत्कृष्ट-

व्यमिति । उच्यते । तद्धि वाक्येन अहीनानां व्यपदिश्यते । फलवन्तश्च अहीनाः । न च तत्र ज्योतिष्टोमेऽहीनशब्दः । गौणत्वाद् व्यपदेशाच्च । तिस्र एव साह्नस्योपसदो द्वादश अहीनस्येति । ततो युक्तं, द्वादशोपसत्ता यत् प्रकरणादुत्कृष्यते । न त्विह पुरुषसम्बन्धो निष्प्रयोजनत्वात्, अन्यस्य च प्रयोजनवतः प्रकरणेऽभावात् ॥ १६ ॥

॥ आ० नि० ॥ जञ्जभ्यमानधर्माणां प्रकरणे निवेशाधिकरणम् ॥ ५ ॥

शंयौ च सर्वपरिदानात् ॥ १७ ॥

दर्शपूर्णमासयोः श्रूयते, देवा वै शंयुं बार्हस्पत्यमब्रुवन् हव्यं नो वह इति प्रकृत्य, वचनमिदं भवति– किं मे प्रजाया इति । तेऽब्रुवन् यो ब्राह्मणायावगुरेत् तं शतेन यातयात्, यो निहनत् तं सहस्रेण यातयात्, यो लोहितं करवत् यावतः प्रस्कन्द्य पांशून् संगृह्णात् तावतः संवत्सरान् पितृलोकं न प्रजानीयादिति । तस्मान्न ब्राह्मणायावगुरेद् न हन्याद् न लोहितं कुर्य्यादिति ॥ तत्र सन्देहः । किं दर्शपूर्णमासयोरवगोरणप्रतिषेधः, उत पुरुषस्य उपदिश्यते इति । किं प्राप्तम् । प्रकरणाद् दर्शपूर्णमासयोरवगोरणादिप्रतिषेधः । न दर्शपूर्णमासयोर्ब्राह्मणस्यावगोरितव्यं, वधो वा कार्य्यो, लोहितं वा प्रस्कन्दनीयम् । अन्य उपाय आस्थातव्य आनतये, तेनान्वाहार्येणानमन्तीति प्रकरणात् प्राप्नोति । एवं प्राप्ते ब्रूमः । शंयौ च प्रकरणादुत्कर्षः । कस्मात् ॥ सर्वपरिदानात् ॥ सर्वावस्थस्य ब्राह्मणस्यायं प्रतिषेध उक्तः । दर्शपूर्णमासगतेनैव नावगोरणादि कर्त्तव्यमिति । ननु प्रकरणाद्दर्शपूर्णमासधर्मोऽयम् । सत्यं प्रकरणात् । एवं वाक्येन अवगुरमाणस्य धर्म्मः, वाक्यञ्च प्रकरणाद् बलीयः ॥ ननु जञ्जभ्यमानस्येव प्रकरणे निवेशो भवेत् । नेत्युच्यते । तत्र फलं कल्पनीयम् । इह क्लृप्तम् । अस्ति ह्यत्र विधायकविभक्तिः । शतेन यातयात्, सहस्रेण यातयात्, स्वर्गं लोकं प्रजानीयादिति । तस्मादुत्कर्ष एवञ्जातीयकस्येति ॥ १७ ॥

॥ अवगोरणादीनां पुमर्थताधिकरणम् ॥ ६ ॥

प्रागपरोधान्मलवद्वाससः ॥ १८ ॥

दर्शपूर्णमासयोः श्रूयते, मलवद्वाससा न संवदेत्, नास्या अन्नम् अद्यादिति । तत्र सन्देहः, किं मलवद्वाससा सह दर्शपूर्णमासाङ्गस्य संवादस्य प्रतिषेधः, उत पुरुषस्य सर्वत्र प्रतिषेधः ? इति ।

किं प्राप्तम् ? प्रकरणाद् दर्शपूर्णमासयोः प्रतिषेधविधिः ॥ एवं प्राप्ते ब्रूमः । मलवद्वाससा सह संवाद उत्कृष्येत । प्रकरणात् । कस्मात् ॥ प्रागपरोधात् ॥ एवं श्रूयते, यस्य व्रत्येऽहनि पत्नी अनालम्भुका स्यात् तामपरुध्य यजेत इति । पत्न्या च सह संवादोऽध्वर्योर्दर्शपूर्णमासयोरस्ति, पत्नि एष ते लोक इति । प्रसज्ज्यमानः प्रतिषिद्ध्येत । स चाप्राप्त एव प्रागपरोधादपनीयतां यागमनुतिष्ठताम् । कथं संवादः प्रसज्ज्येत । यतः प्रतिषेधमर्हेत् । तस्मादुत्कृष्येत मलवद्वाससा सह संवादः ॥ १८ ॥ ॥ सि० ॥

अन्नप्रतिषेधाच्च ॥ १९ ॥

अन्नप्रतिषेधश्च भवति । नास्या अन्नमद्यादभ्यन्नं वै स्त्रिया अन्नमित्यपगमनप्रतिषेध एष विधीयते । स च प्रकरणे न प्रसक्त इति, प्रकरणादुत्कृष्टः पुरुषधर्म्म एव निश्चीयते ॥ १९ ॥ ॥ हेतुः ॥ मलवद्वासःसंवादनिषेधस्य पुरुषधर्मताधिकरणम् ॥ ७ ॥

अप्रकरणे तु तद्धर्मस्ततो विशेषात् ॥ २० ॥

अनारभ्य श्रूयते, तस्मात् सुवर्णं हिरण्यं भार्य्यं सुवर्णोऽस्य भ्रातृव्यो भवतीति । सुवाससा भवितव्यं रूपमेव बिभर्त्ति इति । तत्र किं प्रकरणधर्म्मः, उत पुरुषधर्म्म इति संशयः । अत्रोच्यते ॥ अप्रकरणे तु तद्धर्म्मः, ततो विशेषात् पुरुषधर्म एवञ्जातीयकः स्यात् । कुतः । ततः प्रकरणाधीताद् विशेषोऽस्य । नायं प्रकरणाधीतः । यदि अप्रकरणे समाम्नातः, सर्वप्रकरणधर्मः स्यात् । अप्रकरणे समाम्नानं न कञ्चिद् विशेषं कुर्य्यात् । तस्मादेवञ्जातीयकः पुरुषधर्म इति ॥ २० ॥ ॥ सि० ॥

अद्रव्यत्वात्तु शेषः स्यात् ॥ २१ ॥

तुशब्दः पक्षव्यावृत्तौ । न पुरुषधर्मो भवेत् । अग्निहोत्रादीनां शेषः स्यात् । कस्मात् । अद्रव्यत्वात् । नात्र द्रव्यदेवतं श्रूयते । तच्छ्रवणाद् भार्य्यं यष्टव्यमिति परिकल्प्येत । असति तु द्रव्यदेवतासम्बन्धे बिभर्त्तिरयं धारणावचनः संस्कारवाची । संस्कारश्च शेषभूतस्यावकल्पते, नान्यथा । तस्मात् कर्मणामग्निहोत्रादीनां शेषः । एवं सुवाससा भवितव्यमिति ॥ २१ ॥ ॥ पूर्वपक्षः ॥

वेदसंयोगात् ॥ २२ ॥

आध्वर्य्यवमिति वेदसंयोगः शेषभूतस्य युज्यते।शेषशेषभूतो हि अध्वर्युणा क्रियते, न पुरुषधर्मः।दर्शपूर्णमासादीनां हि कर्मणां साङ्गानामङ्गानामध्वर्य्युः कर्त्ता तस्मादपि कर्मधर्मा एवञ्जातीयका इति ॥२२॥

द्रव्यसंयोगाच्च ॥ २३ ॥

द्रव्यपरश्चात्र भवति निर्देशः। सुवर्णं भार्य्यमिति द्वितीयार्थसंयोगात् । द्रव्यसंस्कारश्च कर्मशेषपक्षे प्रयोजनवान्, अनर्थकः पुरुषधर्मे ॥ २३ ॥ ॥ पूर्वपक्षे युक्तिः ॥

स्याद्वाऽस्य संयोगवत् फलेन सम्बन्धस्तस्मात् कर्मैतिशायनः ॥ २४ ॥

स्याद् वा फलेन एवञ्जातीयकानां सम्बन्धः पुरुषधर्मं इत्यर्थः । सुवर्णस्य वाससो वा धर्मो भवन् निष्प्रयोजनः स्यात् ॥ ननु संस्कृतेन सुवर्णेन वाससा च कर्म संत्स्यति । नैतदेवम् । सुवर्णस्याङ्गं न कर्मण उपकुर्य्यात् । श्रुत्यादीनामभावान्न कर्माङ्गम् । तस्माद्, सुवर्णोऽस्य भ्रातृव्यो भवतीत्येवमादिना एवञ्जातीयकानां फलेन सम्बन्धः ॥ ननु वर्त्तमानापदेशोऽयम् । सत्यमेवमेतत् । आनर्थक्यपरिहाराय फलचोदनया सम्बन्ध एषितव्यो भवति । अन्यस्मान्नैषितव्यादेकवाक्यगतस्य विपरिणामो लघीयान् । कुतः । प्रत्यक्षा तेनैकवाक्यता, परोक्षाऽन्येन । विपरिणामश्च वर्त्तमानकालस्याविवक्षा । सम्बन्धस्य च तात्पर्य्याध्यवसानम् । तस्मादेवञ्जातीयकः प्रधानकर्मोपदेशः स्यात् । यथा प्रजापतिव्रतानां फलेन सम्बन्धः । एतावता हैनसाऽवियुक्तो भवतीति । एवमत्रापि द्रष्टव्यम् । तस्मादेवञ्जातीयकः पुरुषधर्म इति ॥ २४ ॥ ॥ पूर्वपक्षनिरासः ॥ सुवर्णधारणादीनां पुरुषधर्मताधिकरणम् ॥ ८ ॥

शेषोऽप्रकरणेऽविशेषात् सर्वकर्मणाम् ॥ २५ ॥

इह कर्मसंयुक्ता होमा जयादय उदाहरणम् । येन कर्मणा ईर्त्सेत् तत्र जयान् जुहुयात्, राष्ट्रभृतो जुहोतीति, अभ्यातानाञ्जुहोतीति । तत्रैते किं सर्वकर्मणां कृष्यादीनां शेषभूताः, उत वैदिकानाम् अग्निहोत्रादीनामिति । शेषत्वं तु निर्ज्ञातकर्मसम्बन्धात्, फलाश्रवणाच्च । किं तावत् प्राप्तम् । सर्वकर्मणां शेषाः, विशेषानभिधानादिति ॥ २५ ॥ पूर्वपक्षः ॥

होमास्तु व्यवतिष्ठेरन्नाहवनीयसंयोगात् ॥ २६ ॥

नचैतदस्ति, सर्वकर्मणां कर्षणादीनामपि अङ्गभूता इति होमा पने । अतो व्यवतिष्ठेरन्, आहवनीयसंयोगो भवति होमेषु । यदाहवनीये जुहोति तेन सोऽस्याभीष्टः प्रीतो भवतीति । तेन यस्याहवनीयस्तस्यैते अङ्गम् । न च कृष्यादीन्याहवनीये वर्त्तन्ते । न चैषां गार्हपत्योऽस्ति । यतः प्रणीते आहवनीयः स्यात् । तस्मान्न कर्षणादीनां जयादयः ॥ २६ ॥ ॥ सि० ॥

शेषश्च समाख्यानात् ॥ २७ ॥

इतश्च पश्यामो वैदिकानां शेषभूता इति । कुतः । समाख्यानात् । आध्वर्य्यवमिति हि समाख्याते वेदे जयादयः समाम्नाताः सन्तोऽध्वर्युणा करिष्यन्ते । कर्षणादिषु अध्वर्य्योरभावादनध्वर्युणापि क्रियमाणाः समाख्यां बाधेरन् । तस्माद् वैदिकानां शेषभूता इति ॥ ॥ २७ ॥ ॥ हेतुः ॥ जयादीनां वैदिककर्माङ्गताधिकरणम् ॥ ९ ॥

दोषात्त्विष्टिर्लौकिके स्याच्छास्त्राद्धि वैदिके न दोषः स्यात् ॥ २८ ॥

अस्त्यश्वप्रतिग्रहेष्टिः– वरुणो वा एतं गृह्णाति, योऽश्वं प्रतिगृह्णाति, यावतोऽश्वान् प्रतिगृह्णीयात्, तावतो वारुणाञ्चतुष्कपालान्निर्वपेदिति । तत्र सन्देहः । किं लौकिकेऽश्वप्रतिग्रहे इष्टिः, अथ वैदिके ? इति । कः पुनर्लौकिकोऽश्वप्रतिग्रहः, को वा वैदिक इति । लोके भिक्षमाणो वा अभिक्षमाणो वा यत्राश्वं लभते, तत्र लौकिकाश्वप्रतिग्रहः । वैदिकोऽपि, पौण्डरीकेऽश्वसहस्रं दक्षिणा ज्योतिष्टोमे गौश्चाश्वश्चेति ॥ तत्र उच्यते । वैदिकत्वसामान्याद् वैदिके इति प्राप्ते, उच्यते । दोषात्त्विष्टिर्लौकिके स्यात् । दोषो हि श्रूयते, वरुणो वा एतं गृह्णाति योऽश्वं प्रतिगृह्णातीति । स चायमनुवादो यत्र दोषस्तत्रेति । स च लौकिकेऽश्वप्रतिग्रहे शूद्रादन्यस्माद् वा पापकर्मणः कृतो भवतीत्युपपद्यते । दोषसंयोगाल्लौकिके इति गम्यते । आह । न दोषसङ्कीर्त्तनं प्रायश्चित्तविषयविशेषणं, किन्तु प्रायश्चित्तस्तुत्यर्थेन । उच्यते । दोषनिर्घातार्थे सत्येवं स्यात् । वरुणप्रमोचनमिदं कर्म तल्लौकिके भवितुमर्हति, लोके वरुणग्रहणस्य विद्यमानत्वात् । वैदिके त्वश्वप्रतिग्रहे तन्न स्यात्, शास्त्राद्धि वचनेन तस्य कर्त्तव्यता-

ऽवगम्यते । यदि च ततः पापं स्याद्, न तस्य कर्त्तव्यतावगम्येत, अकर्त्तव्यं हि पापफलम् ॥ ननु वैदिकेऽपि प्रतिग्रहे, अप्रतिग्राह्यात् प्रतिगृह्णतः पापमस्ति । उच्यते । भवेदेवं, यदि प्रतिग्रहस्य कर्तुरिष्टि-र्भवेत्, सा तु खलु यथा हेतुकर्तुस्तथोत्तराधिकरणे वक्ष्यामः । तस्मान्न वेदचोदितेऽश्वप्रतिग्रहे इष्टिरित्येतावदिह अधिकरणे सिद्धम ॥ २८ ॥ ॥ पूर्व० ॥

अर्थवादो वाऽनुपपातात् तस्माद्यज्ञे प्रतीयेत ॥ २९ ॥

न चैतदस्ति, यदुक्तं, यः शूद्रादन्यस्माद् वा पापकृतो लोकेऽश्वं प्रतिगृह्णीयात् स एतामिष्टिं निर्वपेत् । स हि वरुणगृहीत इत्युच्यते, जलोदरेण यो गृहीतो, यस्योदरं जलवृद्ध्या श्वयति । जलोदरमित्येव लोके तत् प्रसिद्धम् । न च तस्याश्वप्रतिग्रहो लौकिको निदानमिति प्रतिज्ञायते । न चानेन विधीयते । तस्मान्नाऽश्वप्रतिग्रहाज्जलोदरोपपातः ॥ अथ पापं वरुणशब्देनोच्यते, वृणीते इत्येषोऽभिप्राय इति । तदा प्रसिद्धौ त्यक्तायां क्लेशमात्रं, वृणवद्धरुणशब्देन उच्यते । तत्र याज्ञेऽपि प्रतिग्रहे वरुणगृहीतः स्यात् । रक्षणपोषणविचिकित्सादिना क्लेशेन नैष पक्षो व्यवतिष्ठेत । लौकिकेऽश्वप्रतिग्रहे इति प्रसिद्धिश्च बाध्येत । तस्मादर्थवाद एषः । यावद् वरुणगृहीतस्य वरुणोन्मोचने श्रेयः, तावदेतेनेति उपमानेन एषा स्तुतिः । योऽस्य प्रतिग्रहस्तद् वरुणग्रहणमिव, या इष्टिः सा तदुन्मोचनीव । यथा वरुणगृहीतेन उन्मोचनमवश्यकर्त्तव्यं, तादृगेवैतदिति । तस्माद् यज्ञे प्रतीयेत । लौकिके हि फलं कल्पनीयम् । वैदिके यस्मिन्नश्वप्रतिग्रहस्तस्याङ्गभूता भविष्यति । तत्र प्रयोगवचनेन सहैकवाक्यता सम्बन्धाद् अवकल्प्यमाना, परोक्षायाः फलवचनेन सहैकवाक्यताया लघीयसी इति युक्तम्, इष्टिर्वैदिके दाने इति ॥ २९ ॥ सिद्धान्तः ॥ वैदिकाऽश्वप्रतिग्रहे इष्टिकर्तव्यताधिकरणम् ॥ १० ॥

अचोदितं च कर्मभेदात् ॥ ३० ॥

यावतोऽश्वान् प्रतिगृह्णीयात् । तावतो वारुणान् चतुष्कपालान्निर्वपेदिति । तत्रैतत् समधिगत, वैदिके अश्वप्रतिग्रहे इष्टिरिति । अथेदानीं सन्दिह्यते । किं प्रतिग्रहकर्त्रा कर्त्तव्या, यस्मै दीयते । उत हेतुकर्त्रा, यो ददातीति । किं प्राप्तम् ॥ अचोदितं च कर्मभेदात् ॥ न

दानस्य कर्त्तुरिष्टिश्चोद्यते। प्रतिग्रहकर्त्तुस्तामवगच्छामः। यावतोऽश्वान् प्रतिगृह्णीयात् तावतश्चतुष्कपालान् वारुणान्निर्वपेदिति । तस्मात् प्रतिग्रहीत्रा ऋत्विजा कर्त्तव्या इति ॥ ३० ॥ ॥ पूर्व० ॥

सा लिङ्गादार्त्विजे स्यात् ॥ ३१ ॥

नैषा प्रतिग्रहकर्त्तुः, किं तर्हि हेतुकर्त्तुः स्यात् । कुतः । लिङ्गात् । किं लिङ्गम् । पूर्वपदानामुत्तरैः पदैर्यथार्थमभिसम्बन्धः । इदं श्रूयते। प्रजापतिर्वरुणायाऽश्वमनयादिति, प्रजापतिरश्वस्य दाता कीर्त्तितः। वरुणः प्रतिग्रहीता, स स्वां देवतामार्च्छदिति । स इति सापेक्षं पूर्वप्रकृतं वाक्यशेषमपेक्षते । स इति प्रजापतिं प्रतिनिर्दिशतीति तेन सहैकवाक्यतां याति सामानाधिकरण्याच्च प्रजापतेरेव प्रतिनिर्देशोऽवकल्पते, न तु वरुणस्य वैयाधिकरण्यात् । स पर्यदीर्यत इत्येषोऽपि प्रजापतिमेव प्रतिनिर्दिशति पूर्वप्रकृतम् । तेन च सहैकवाक्यतां याति । स एतं वारुणं चतुष्कपालमपश्यदिति प्रजापतिरेवेति निरवपत् प्रजापतिरेवेति, ततो वै स वरुणपाशादमुच्यत प्रजापतिः । वरुण एतं गृह्णातीति हेत्वपदेशोऽयम् । यस्मादेव प्रजापतिर्वरुणाय अश्वं दत्त्वा पर्यदीर्णः, तस्माद् याऽश्वं प्रतिगृह्णाति प्रयच्छति तं वरुणो गृह्णाति, स पर्यदीर्यते इति । यतस्तु वारुणेन प्रतिमुक्तस्तस्मादन्येनाप्यश्वं प्रयच्छता वारुणो निर्वप्तव्य इत्यश्वस्य दातुर्वारुणी इष्टिः प्रशस्यते कर्त्तव्या अनेनाख्यातेन । तस्मादश्वं दत्त्वा वारुणीमिष्टिं निर्वपेदिति ॥ आह । ननु योऽश्वं प्रतिगृह्णाति स निर्वपेदित्युच्यते । एवं सत्यन्यथोपक्रान्ते वाक्येऽन्यथोपसंहृते उपक्रमोऽप्यनर्थकः स्याद्, उपसंहारोऽपि । तस्मादुपक्रमे वा शब्दार्थ उपसंहारवशेन कल्पनीयः, उपसंहारे वोपक्रमवशेन ? तत्र प्रजापतिर्वरुणायाश्वमनयादिति, वरुणादश्वं प्रत्यगृह्णादिति उपसंहारानुरोधेन कल्प्येत । यद्वोपक्रमवशेनोपसंहारं, योऽश्वं प्रतिगृह्णातीति, योऽश्वं प्रतिग्राहयतीति । तत्र मुख्यं वा पूर्वं चोदनाल्लोकवदिति प्रथममनुग्रहीतव्यं विरोधाभावात् । पश्चात्तन तु विरोधाल्लक्षणया कल्पनीयम् ॥ अपि च, प्रजापतिर्वरुणाय अश्वमनयदिति वरुणादश्वं प्रत्यगृह्णादिति बह्वसमञ्जसं कल्पयितव्यम् । प्रतिगृह्णातीत्येष शब्दः, प्रतिग्राहयतीत्येतमर्थं शक्नोति यया कयाचिच्छक्त्या वक्तु-

म् । यो हि तदाचरति, येन च क्रिया प्रणाड्यापि सिद्धयति, स तस्याः क्रियायाः कर्त्तेति शक्यते वदितुम् । यथा षड्भिर्हलैः कर्षतीति संविधानं कुर्वन् विलेखनमकुर्वन्नप्युच्यते । तत्समर्थमाचरति इति । एवमिहापि स प्रतिग्रहसमर्थमाचरति यो ददाति । तस्माद् ददत् प्रतिगृह्णातीति शक्यते वदितुम् । तस्मादध्यवधार्य्येदमवक्लृप्तम् । ददत् प्रतिगृह्णातीत्युच्यते, तस्य च वारुणी इष्टिरिति ॥३१॥ सिद्धान्तः ॥ दातुर्वारुणीष्ट्यधिकरणम् ॥ ११ ॥

पानव्यापच्च तद्वत् ॥ ३२ ॥

इदं समामनन्ति, सौमेन्द्रं चरुं निर्वपेच्छ्यामाकं सोमवामिन इति । तत्र सन्देहः । लौकिकस्य सोमपानस्य वमने सौमेन्द्रश्चरुः ? उत वैदिकस्येति । किं लौकिकं सोमपानं, किञ्च वैदिकम् । उच्यते वैदिकं सोमपानं ज्योतिष्टोमे तद्विकृतिषु च, लौकिकं सोमपानं यत् सत्तरात्रेषु दशरात्रेषु धातुसाम्यार्थमासेव्यमाने सोमे । किं तावत् प्राप्तम् ॥ पानव्यापच्च तद्वत् ॥ लौकिके वमने इष्टिर्भवितुमर्हति, न वैदिके । तद्वद् इति पूर्वः पक्षः प्रतिनिर्दिष्टः । यथा तत्र दोषसंयोगेन श्रवणाल्लौकिकेऽश्वप्रतिग्रहे इत्युक्तम् । एवमिहापि दोषसंयोगेन श्रवणं भवति, इन्द्रियेण वा एष वीर्येण व्यृध्यते यः सोमं पिबतीति लोके धातुसाम्यार्थमासेविते वमनेन विनष्टे धातुसाम्यव्यापदा इन्द्रियेण व्यृद्धिरुपपद्यते । शास्त्राद्धि वैदिके न दोषः स्यात् । तत्र, शेषः पातव्य इति शब्दाच्चोदिते निर्वृत्ते नास्ति दोषः । यद्यपि वस्यते, तथापि पानक्रिया तत्र निर्वर्त्तिता, कृतो वचनार्थ इति न दोषः स्यात् । तस्माल्लौकिकस्य सोमपानस्य व्यापदि सौमेन्द्रः स्यात् ॥ ३२ ॥ ॥ पूर्व० ॥

दोषात्तु वैदिके स्यादर्थाद्धि लौकिके न दोषः स्यात् ॥ ३३ ॥

वैदिकस्य पानस्य व्यापदि भवितुमर्हति, न लौकिकस्य । कस्मात् । दोषात् । दोषसम्बन्धोऽत्र श्रूयते । इन्द्रियेण वा एष वीर्येण व्यृध्यते इति । लौकिके पुनर्धातुसाम्याद्यर्थं क्रियमाणे न किञ्चिद् दुष्यति, वमनायैव हि तं पिबन्ति लोके । अथापि अयमर्थवादः, तथापि फलकल्पनापरीहाराय वैदिके एवेति कल्पना न्याय्या ॥ ३३ ॥

सिद्धान्तः ॥ वैदिकपानव्यापदि सौमेन्द्रचरुविधानाधिकरणम् ॥१२॥

तत्सर्वत्राविशेषात् ॥ ३४ ॥

तदेतत् सोमपानव्यापदि सौमेन्द्रं कर्म, सर्वत्र वमने स्यादार्त्विजे याजमाने च । कुतः । अविशेषात् । न विशेषः कश्चिद् आश्रीयते । अस्य वमने स्यान्नास्येति । तस्मात् सर्वत्र भवेत् ॥ ३४ ॥ ॥ पूर्व० ॥

स्वामिनो वा तदर्थत्वात् ॥ ३५ ॥

स्वामिनो वा वमने स्यात् । कुतः । तदर्थत्वात् । तदर्थं कर्म्म यजमानार्थम् । यत्र सोमो वम्यते, यत् त्वत्र सौमेन्द्रं कर्म्म । तदपि तदर्थमेव । इदं हि सोमवामिन उपकाराय श्रूयते । तत् सोमवामिनो यद् यजमानस्योपकर्त्तुं शक्नोति, नार्त्विजः । न हि तद् ऋत्विगर्थं कर्म, यत्र सोमो वम्यते । अथोच्येत, सोमवामिनोऽध्वर्य्योर्होतुर्वा आत्मीया ऋत्विजस्तदीयेष्वग्निषु निर्वर्त्तयिष्यन्तीति । तथा सति यदि वा व्यृद्धसोमस्य कर्म्मणो नाङ्गं, न सोमवामिनोऽध्वर्य्योः होतुर्वा । तत्र अत्यन्तगुणभूता अध्वर्य्वादयः स्वैर्ऋत्विग्भिः कारयन्तो न फलं प्राप्नुवन्ति । तदर्थं च क्रियमाणं न यजमानस्य उपकारे वर्त्तते इति न ऋत्विजो वमने क्रियेत ॥ ३५ ॥ ॥ सि० ॥

लिङ्गदर्शनाच्च ॥ ३६ ॥

लिङ्गं च भवति, यजमानस्य सोमवामिन इति । कथम् ॰सोमपीथेन वा एष व्यृद्ध्यते यः सोमं वमतीति । यजमानः सोमसंस्कारे विनष्टे विगुणमस्य कर्म्मेति व्यृद्ध्येत, न कथञ्चिद् ऋत्विजो व्यृद्धिः । ऋत्विजो यस्य सोमं वमन्तीति वमनेन सम्बन्धः स्याद्, न यः सोमं वमतीति । तस्मादपि पश्यामो यजमानस्य वमने सौमेन्द्रमिति ॥ ॥३६॥ हेतुः ॥ सौमेन्द्रचरोर्यजमानपानव्यापद्विषयताधिकरणम् ॥१३॥

सर्वप्रदानं हविषस्तदर्थत्वात् ॥ ३७ ॥

स्तो दर्शपूर्णमासौ । तत्र समाम्नायते, यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवतीति । तत्र सन्देहः । किं कृत्स्नं हविरग्नये प्रदातव्यम्, उत शेषयितव्यं किञ्चित्, किञ्चिद् दातव्यमिति । किं प्राप्तम् । कृत्स्नं हविः प्रदीयेत । कुतः । तदर्थत्वात्, पुरोडाश आग्नेयः कर्त्तव्य इति वचनम् । तस्मात् सर्वं प्रदातव्यमिति ॥ ३७ ॥ ॥ पूर्वपक्षः ॥

निरवदानात्तु शेषः स्यात् ॥ ३८ ॥

निष्कृष्यावदानं निरवदानम् । तद्धि श्रूयते, द्विर्हविषोऽवद्यतीति । अपरमपि वचनं, द्व्यवदानं जुहोतीति । तेन द्व्यवदानमात्रं होतव्यम्, अन्यत् परिशेषणीयम् ॥ ३८ ॥ ॥ सिद्धान्तः ॥

उपायो वा तदर्थत्वात् ॥ ३९ ॥

न चैतदस्ति, द्व्यवदानमात्रं होतव्यमिति । यज्जुहोति तद् द्विरवखण्डनेन संस्कर्त्तव्यमिति होतव्ये द्विरवखण्डनमात्रं विधीयते, न अद्विरवखण्डितस्य होमः प्रतिषिद्ध्यते । कृत्स्नं च होतव्यमिति तदेवं न्याय्यं, नान्यथा ॥ ३९ ॥ ॥ आशङ्का ॥

कृतत्वात्तु कर्म्मणः सकृत् स्याद् द्रव्यस्य गुणभूतत्वात् ॥ ४० ॥

उच्यते । यदा द्विरवखण्डनविशिष्टं होमे श्रुतं, तदा सकृदवदानं यावच्छ्रुतं तत्सर्वं कृतम् । तदा नापरं द्रव्यमस्तीति पुनर्यागो नाऽऽवर्त्तितव्यः । कथम् । तद्धि द्रव्यं यागनिर्वृत्त्यर्थं, न द्रव्यं यागेन सम्बन्धयितव्यमिति । यदि हि यागेन हविः सम्बन्धयितव्यं स्यात्, ततो यागेन द्व्यवदाने सम्बन्धिते अपरमपि सम्बन्धनीयमस्तीति, तत्सम्बन्धार्थं पुनर्याग आवर्त्तेत । न तु यागो द्रव्यसम्बन्धार्थः । किं तर्हि, द्रव्यं यागे गुणभूतं, यागः कथं निर्वृत्तिमुपेयादिति द्रव्यमुपादीयते । तेन निर्वृत्ते यागे सिद्धे च पुरुषार्थे, न नियोगेन गुणानुरोधेन प्रधानावृत्तिर्युक्तेति ॥

कथं न द्रव्यं प्रधानं, येनावृत्तिर्न भवेत् । यतो यागात् फलम् । भूतभव्यसमुच्चारणे भूतं भव्यायोपदिश्यते इति । न च यागेन द्रव्यस्योपकारो निर्वर्त्यते प्रत्यक्षः कश्चित् । तस्माद् द्व्यवदानं हुत्वा शेषयितव्यमिति । यत्तूक्तम् । आग्नेयं हविरिति वचनात्, सर्वं होतव्यमिति गम्यते इति । तत्रानुमानिको होमसम्बन्धः । इह तु प्रत्यक्षो द्विरवदाने । अपि चाकृत्स्नसम्बन्धेऽपि तद्धितस्योपपत्तिः । ततो ग्रहीतव्यमिति । सामान्यं खल्वाग्नेय इति, द्व्यवदानं जुहोतीति विशेषः । तस्माच्छेषयितव्यं किञ्चिदिति ॥ ४० ॥ ॥ आ० नि० ॥

शेषदर्शनाच्च ॥ ४१ ॥

शेषादिड़ामवद्यति शेषात् स्विष्टकृतं यजतीत्यनुवादादस्ति शेष इति पश्यामः ॥ ४१ ॥ ॥ हेतुः ॥ आग्नेयाष्टाकपालचरोर्द्ध्वदानमात्रस्य होतव्यताधिकरणम् ॥ १४ ॥

अप्रयोजकत्वादेकस्मात् क्रियेरञ्छेषस्य गुणभूतत्वात् ॥ ४२ ॥

स्तो दर्शपूर्णमासौ, तत्र शेषकार्याणि ऐड़प्राशित्रसौविष्टकृदादीनि । तत्र सन्देहः । किं हाविषां हविषः कर्त्तव्यानि, उतैकस्माद्धविष इति । किं प्राप्तम् ' अप्रयोजकत्वादेकस्मात् क्रियेरन् । अप्रयोजकानि शेषकार्य्याणि हविषाम् । यदि शेषकार्यैः प्रयुक्तानि, भवेयुः सर्वाणि प्रयुक्तानीति सर्वेभ्यः क्रियेरन् । अन्यार्थानि त्वेतानि, नाऽवश्यं शेषकार्येषु विनियोक्तव्यानि । सन्निधानात्तु यतः कुतश्चिदनुष्ठातव्यानि । शेषो हि साधनममीषामिति ॥ ४२ ॥ ॥ पूर्व० ॥

संस्कृतत्वाच्च ॥ ४३ ॥

सकृच्चैवञ्जातीयकेन शेषकार्येण संस्कृतं प्रधानमिति कृत्वा नाऽपरस्मादपि कर्त्तव्यमिति ॥ ४३ ॥ ॥ हेतुः ॥

सर्वेभ्यो वा कारणाविशेषात्, संस्कारस्य तदर्थत्वात् ॥ ४४ ॥

सर्वेभ्यो वा हविर्भ्यः शेषकार्य्याणि कर्त्तव्यानि । कुतः । कारणाविशेषात् । यदेकस्य हविषः शेषकार्य्यक्रियायां कारणं, तत् सर्वेषाम् । स हि शेषः प्रतिपादयितव्यः । यस्यैव न प्रतिपाद्यते, तस्य तेन संस्कारेण वर्जनं स्यात् । तस्मात् सर्वेभ्यः कर्त्तव्यानीति ॥ ४४ ॥ सि० ॥

लिङ्गदर्शनाच्च ॥ ४५ ॥

लिङ्गं च दृश्यते— देवा वै स्विष्टकृतमब्रुवन् हव्यं नो वह इति, सोऽब्रवीत् वरं वृणै भागोऽस्त्विति, वृणीष्वेति तेऽब्रुवन्, सोऽब्रवीत् उत्तरार्द्धादेव मह्यं सकृत् सकृदवद्यादिति वीप्सादर्शनम् । तस्मात् सर्वेभ्यः शेषकार्य्याणीति ॥ ४५ ॥ ॥ हेतुः ॥ सर्वशेषैः स्विष्टकृदनुष्ठानाधिकरणम् ॥ १५ ॥

एकस्माच्चेद् यथाकाम्यविशेषात् ॥ ४६ ॥

अथ कृत्वाचिन्ता । यदैकस्माद् भवेयुः, किं तदा यतः कुतश्चि-

युत प्रथमादिति । किं प्राप्तम् । यतः कुतश्चिदिति । कुतः । न कश्चिद् विशेष आश्रीयते इति । तस्मादनियम इति ॥ ४६ ॥ पूर्व० ॥

मुख्याद्वा पूर्वकालत्वात् ॥ ४७ ॥

मुख्याद्वा कर्त्तव्यानि । कुतः । पूर्वकालत्वात् । ततः कर्त्तव्येषु नास्ति निमित्तविघातः । असति निमित्तविघाते नैमित्तिकं कर्त्तव्यमिति । ततः कृतेषु द्वितीयादीनां निमित्तविघात इत्यक्रिया । तस्मान्मुख्यादेव क्रियेरन्निति ॥ ४७ ॥ ॥ ॥ सिद्धान्तः ॥ प्राथमिकशेषात् स्विष्टकृदाद्यनुष्ठानाधिकरणम् ॥ १६ ॥

भक्षाश्रवणाद्दानशब्दः परिक्रये ॥ ४८ ॥

दर्शपूर्णमासयोः श्रूयते, इदं ब्रह्मणः, इदं होतुः, इदमध्वर्योः, इदमग्नीध इति । तत्र सन्देहः । किमयम् ऋत्विजां विभागः परिक्रयाय, उत भक्षणायेति । किं प्राप्तम् । परिक्रयार्थो विभागः । कुतः । भक्षाश्रवणात् । न श्रूयते, भक्षयितव्यमिति । य एव श्रुतस्योत्सर्गे दोषः, स एवाश्रुतपरिकल्पनायाम् । कर्मकरेभ्यश्च दीयते । तस्मात् परिक्रय एषः ॥ ४८ ॥ ॥ पूर्व० ॥

तत्संस्तवाच्च ॥ ४९ ॥

एषा वै दर्शपूर्णमासयोर्दक्षिणेति दक्षिणासंस्तवाच्च परिक्रयार्थं मन्यामहे ॥ ४९ ॥ हेतुः ॥

भक्षार्थो वा द्रव्ये समत्वात् ॥ ५० ॥

भक्षार्थ एष विभागः । कुतः । दानस्याभावात् । कथमभावः । प्रभवता हि शक्यं दातुं, नाप्रभवता । कथं न प्रभुत्वम् । सङ्कल्पितं हि यजमानेन, देवतायै एतदिति । न च देवतायै सङ्कल्पितेन शिष्टाः स्वेनैव व्यवहरन्ति । तस्माच्छिष्टाचारमनुवर्त्तमानेन अशक्यं प्रभवितुम् । तस्मान्न परिक्रयः ॥ अथ यदुक्तं, न श्रूयते, भक्षयितव्यमिति । यावाँश्च श्रुतस्योत्सर्गे दोषस्तावान् अश्रुतपरिकल्पनायामिति । उच्यते । इदं ब्रह्मण इत्येवमादिभिर्ब्रह्मादीनां भागैरभिसम्बन्धः । तत्र भागा ब्रह्मादीनामुपकुर्य्युर्ब्रह्मादयो वा भागानाम् । ब्रह्मादिभिर्भागानामुपकुर्वद्भिर्न किञ्चिद् दृष्टमस्ति, भागैस्तु ब्रह्मादीनामुपकारकैः शक्यते केनचित् प्रकारेण दृष्ट उपकारः कर्तुं भक्ष्यमाणैः । तस्माद् भक्षणाय विभाग इति । कः पुनरुपकार इति चेत्, तृप्तानां कर्मशेष-

परिसमापने सामर्थ्यं भवतीति ॥ ५० ॥

व्यादेशाद्दानसंस्तुतिः ॥ ५१ ॥

अथ यद् दक्षिणासंस्तव इति व्यादेशसामान्यात्, तदपरिक्रयार्थेऽपि भविष्यतीति ॥ ५१ ॥ ॥ ॥ सिद्धान्तः ॥ पुरोडाशविभागस्य भक्षार्थताधिकरणम् ॥ १७ ॥ इति श्रीशबरस्वामिकृते मीमांसाभाष्ये तृतीयस्याध्यायस्य चतुर्थः पादः ॥ ३ ॥ ४ ॥

अथ तृतीये अध्याये पञ्चमः पादः ॥ ३ ॥ ५ ॥

आज्याच्च सर्वसंयोगात् ॥ १ ॥

स्तो दर्शपूर्णमासौ, तत्र श्रूयते–उत्तरार्द्धात् स्विष्टकृते समवद्यतीति । तथा इडामुपह्वयतीति तथा अन्यानि शेषकार्याणि । तत्र सन्देहः । किमाज्यादुपांशुयाजद्रव्यात् स्विष्टकृदिडमवदातव्यम्, उत न इति । किं प्राप्तम् । अवदातव्यमिति । कुतः । सर्वसंयोगात् । साधारणप्रकरणसमाम्नात् सर्वेषां शेषकार्याणि । अपि च सर्वसंयोगो भवति । तद्यत् सर्वेभ्यो हविर्भ्यः समवद्यतीति । तस्मादाज्यादपि शेषकार्य्याणि क्रियन्ते ॥ १ ॥ पूर्वपक्षः ॥

कारणाच्च ॥ २ ॥

कारणं श्रूयते– देवा वै स्विष्टकृतमब्रुवन् हव्यं नो वह इति, सोऽब्रवीद्वरं वृणै भागो मेऽस्त्विति, वृणीष्वेत्यब्रुवन्, सोऽब्रवीदुत्तरार्द्धादेव मह्यं सकृत् सकृदवद्यादिति, तुल्यं कारणमन्येषाम् आज्यस्य चाऽर्थवादे सङ्कीर्त्यते । तस्मादप्याज्याद् अवदातव्यमिति ॥ २ ॥

एकस्मिन् समवत्तशब्दात् ॥ ३ ॥

आदित्ये चरौ प्रायणीये श्रूयते, अग्नये स्विष्टकृते समवद्यतीति । आज्यादेकस्माच्च हविषोऽवद्यतीति, मिश्रस्य अन्येन हविषा समवद्यतीति । यदि चाज्यादपि स्विष्टकृतेऽवदीयेत, ततश्चोदकेन प्रापणीये आज्यावदाने क्रियमाणे समवद्यतीत्युपपद्यते । इतरथा चरोरेकस्माद् अवद्यतीत्यभविष्यत् ॥ ३ ॥

आज्ये च दर्शनात् स्विष्टकृदर्थवादस्य ॥ ४ ॥

ध्रौवे च आज्ये स्विष्टकृदर्थवादो भवति, अवदाय अवदाय ध्रुवां प्रत्यभिघारयति । स्विष्टकृतेऽवदाय न ध्रुवां प्रत्यभिघारयति ।

न हि ततः परामाहुतिं यस्यन् भवति इति, प्रत्यभिघारणस्य एतत् प्रयोजनं दर्शयति, ततः परामाहुतिं होष्यति इति । सौविष्टकृते वृत्ते ततः पराहुतिर्नास्ति इति न प्रत्यभिघार्येत । स्विष्टकृदर्थं ध्रुवायां भवति प्रत्यभिघारणमिति दर्शयति ॥ ४ ॥ ॥ हेतुः ॥

अशेषत्वात्तु नैवं स्यात् सर्वादानादशेषता ॥ ५ ॥

नैव, ध्रौवाज्यात् स्विष्टकृदिड्म् अवदातव्यमिति । कस्मात् । अशेषत्वात् । कुतो न अस्य शेषः । सर्वादानात् ॥ ५ ॥ ॥ सि० ॥

साधारण्यान्न ध्रुवायां स्यात् ॥ ६ ॥

ननु उपांशुयाजार्थे गृहीते यद् ध्रुवायां शिष्टं, तत् शेषभूतम् । नैतत् । साधारणं हि तत्, उपांशुयाजाय, अन्येभ्यश्च प्रयोजनेभ्यः । यावद् आज्येन यष्टव्यं, तत् तद् आज्यं प्रयोजयति । यस्य यस्याज्यं, तस्य तस्यैवं ग्रहीतव्यं संस्कर्त्तव्यञ्चेति । तस्मात् साधारणं ध्रौवम् आज्यम् । दर्शयति च, सर्वस्मै वा एतद् यज्ञाय गृह्यते यद् ध्रुवायाम् आज्यम् इति । किमतो यद्येवम् इति । यत् साधारणम् उपांशुयाजाय भवत्तं ध्रुवायामाज्यं, तेन अन्यानि प्रयोजनानि कार्य्याणि, न तु तत् प्रतिपाद्यं, यद्धि कृतप्रयोजनम् आकीर्णकरमवतिष्ठते, तत्, प्रतिपादयितव्यमिति । क्वचिच्च, यत् प्रतिपादयितव्यं, तद् एवं प्रतिपादयितव्यम् । तस्माद् न ध्रुवायामुपांशुयाजस्य सौविष्टकृतश्च कश्चित् शेषः प्रतिपादनीयः । यथा यत्रैकस्यामुखायां बहूनामोदनः श्रृतो भवति, तत्र एकस्मिन् भुक्तवति, न तस्य शिष्टं भृत्येभ्यः प्रतिपादनीयमुखायामस्तीति गम्यते । प्रयोजनवद्धि तत् । एवमुपांशुयाजाज्येऽपि द्रष्टव्यमिति ॥ आह जुह्वां तर्हि आज्यस्य शेषो भविष्यति, चमसवत् । यथा चमसेषु ग्रहेषु च सोमस्य चोदनयेति ॥ ६ ॥

तत्र प्रत्याह—

अवत्तत्वाच्च जुह्वां तस्य च होमसंयोगात् ॥ ७ ॥

ध्रुवायां तावद् नास्ति शेषः, उपांशुयाजस्य साधारणत्वादित्युक्तम् । अथ कस्मान्न जुह्वां यच्छिष्टं तेन शेषकार्य्यं, यथा होमार्थे चमसे शेष इति । उच्यते । यज्जुह्वामवत्तं तत् सर्वं होमेन सम्बद्धं, तस्माद् न जुह्वां शेषः ॥ ७ ॥ ॥ आ० नि० ॥

चमसवदिति चेत् ॥ ८ ॥

इति पुनर्यदुक्तं, तत्परिहर्त्तव्यम् ॥ ८ ॥ ॥ आभासः ॥

न चोदनाविरोधाद्धविःप्रकल्पनत्वाच्च ॥ ९ ॥

नैतदेवम् । कुतः । चोदनाविरोधात् । सोमस्याग्नेर्वीहीत्यनुवषट् करोतीति तत्र चोदना । अपि च, तत्रैन्द्रवायवं गृह्णातीत्येवमादीनि ग्रहणानि न सोमसंयुक्तानि, हविःप्रकल्पनान्येव । इह पुनर्होमसंयोगः, चतुर्गृहीतं जुहोतीति ॥ ९ ॥

उत्पन्नाधिकारात् सति सर्ववचनम् ॥ १० ॥

अथ यदुक्तं, तत् यत्सर्वेभ्यो हविर्भ्यः समवद्यतीति । उच्यते । उत्पन्नं शेषमधिकृत्य एतदुच्यते, न अविशेषणम् । तस्माद् ये इह शेषास्तेभ्यः सर्वेभ्य इति । यथा सर्व ओदनो भुक्तः, सर्वे ब्राह्मणा भुक्तवन्त इति प्रकृतापेक्षः सर्वशब्दः, एवमत्रापीति ॥ १० ॥

जातिविशेषात् परम् ॥ ११ ॥

अथ यदुक्तं, प्रायणीये केवले चरौ समवत्तशब्दो नावकल्पते । यदि न तत्र चोदकेन आज्यादपि स्विष्टकृदवदानमिति । उच्यते । असत्यप्याज्याच्छेषकार्ये समवत्तशब्दो जातिविशेषापेक्ष उपपद्यते, ओदनजातिमाज्यजातिं चापेक्ष्य । अनुवादो हि सः । यथासम्भवं चानुवादः कल्प्येत ॥ ११ ॥

अन्त्यमरेकार्थे ॥ १२ ॥

अथ यदुक्तं, स्विष्टकृदर्थे ध्रुवायामभिघारणं दर्शयतीति न तत् स्विष्टकृदर्थं, शेषाभावादित्युक्तम् । तस्मादयं तस्यार्थः । न हि तत्राहुतिं यक्ष्यन् भवतीति न रेक्ष्यते, ध्रुवातो यद्याहुतिरपरा होतव्या भवेत् । न च प्रत्यभिघार्येत । ध्रुवातः किल रिच्येत । न रेक्ष्यते । अपरस्या आहुतेरभावात् किं प्रत्यभिघारणेनेति ॥ १२ ॥ ॥ आ० नि० ॥ ध्रुवाज्यादिभिः स्विष्टकृदाद्विशेषामनुष्ठानाधिकरणम् ॥ १ ॥

साकं प्रस्थायीये स्विष्टकृदिडञ्च तद्वत् ॥ १३ ॥

दर्शपूर्णमासयोः श्रूयते, साकंप्रस्थायीयेन यजेतेति । तत्र सन्देहः । किं स्विष्टकृदिडमस्ति, नास्ति ? इति । अस्तीति ब्रूमः । कुतः । दर्शपूर्णमासविकारो हि साकंप्रस्थायीयमिति । एवं प्राप्ते ब्रूमः । नास्तीति । कुत । अशेषत्वात् । सर्वादानाच्च अशेषता । कथम् । एवं

तत्र श्रूयते । आज्यभागाभ्यां प्रचर्य्य आग्नेयेन पुरोडाशेनाग्नीध्रे स्रुचौ प्रदाय सह कुम्भीभिरभिक्रामन्नाहेति। तस्मान्न ततः शेषकार्यमिति ॥ १३ ॥ साकम्प्रस्थाय्यीये शेषकर्माननुष्ठानाधिकरणम् ॥ २ ॥

सौत्रामण्याञ्च ग्रहेषु ॥ १४ ॥

अस्ति सौत्रामणी । तत्र ग्रहाः श्रूयन्ते, आश्विनसारस्वतैन्द्राः । तत्र चोदकेन स्विष्टकृदिदं प्राप्तम् । अथ इदानीं सन्देहः । किं निवर्त्तते, उत नेति । किं प्राप्तम् । चोदकानुग्रहाय कर्त्तव्यमिति । एवं प्राप्ते ब्रूमः । सौत्रामण्यां च ग्रहेषु न कर्त्तव्यमिति चशब्देनातिदिश्यते । कुतः । अशेषत्वात् सर्वांशनाद्शेषता । तत्रापि हि ग्रहैरेवं होतुं प्रतिष्ठन्ते, यत् पयोग्रहाश्च सुराग्रहाश्च गृह्यन्ते इति । ग्रहस्थं खल्वपि तद् द्रव्यम् । अभिगृहीतमभ्यनुक्रममभ्याश्रावितं देवतां प्रति । यथा, गृहीतान् ग्रहानृत्विज आददते, आश्विनमध्वर्युः, सारस्वतं ब्रह्मा, ऐन्द्रं प्रतिप्रस्थातेति होमार्थमशेषदानं भवति । होमसंयोगश्चैषां श्रूयते । उत्तरेऽग्नौ पयोग्रहाञ्जुहोति, दक्षिणेऽग्नौ सुराग्रहाञ्जुहोतीति ॥ १४ ॥

तद्वच्च शेषवचनम् ॥ १५ ॥

एतमेव न्यायं, शेषवचनमुपोद्बलयति । उच्छिनष्टि, न सर्वं जुहोतीति । सर्वहोमे प्राप्ते प्रतिषेधोऽवकल्पते । वाचनिकत्वाच्च स्विष्टकृदिदं न भवति । तस्यान्यत्रोपयोगवचनाद् ब्राह्मणं परिक्रीणीयादुच्छेषणस्य पातारमिति । अपरस्यापि शेषस्य वाचनिको विनियोगः, शतातृणायां विक्षारयन्तीति ॥ १५ ॥ युक्तिः ॥ सौत्रामण्यां शेषकर्माननुष्ठानाधिकरणम् ॥ ३ ॥

द्रव्यैकत्वे कर्म्मभेदात् प्रतिकर्म्म क्रियेरन् ॥ १६ ॥

अस्ति सर्वपृष्ठेष्टिः— इन्द्राय राथन्तराय, इन्द्राय बार्हताय, इन्द्राय वैरूपाय, इन्द्राय वैराजाय, इन्द्राय शाक्करायेति । तत्र पुरोडाशो बहूनां कर्म्मणां साधारणः । तत्र सन्देहः । किं प्रति कर्म स्विष्टकृदिदं कर्त्तव्यं, सकृदेव वेति । किं प्राप्तम् । चोदनानुग्रहात् प्रति कर्म, कर्त्तव्यम् । एकस्मिन्नपि द्रव्ये बहुत्वात् कर्मणाम् ॥ १६ ॥ ॥ पूर्व० ॥

अविभागाच्च शेषस्य सर्वान् प्रत्यविशिष्टत्वात् ॥ १७ ॥

सकृदेव कर्त्तव्यमिति ब्रूमः ॥ अविभागाच्छेषस्य ॥ नात्र वि-

भागः सर्वेषां कर्मणां पुरोडाशस्य । उत्तरार्द्धात् स्विष्टकृत्वदातव्यम् । एकश्चासौ उत्तरार्द्धः, ततोऽवदीयमाने न गम्यते विशेषः। कस्यावत्तं, कस्य नेति । एवमिडायामपि । तस्मात् सकृद् अवदातव्यमिति ॥ १७ ॥ ॥ सिद्धान्तः ॥ सर्वपृष्ठेष्टौ स्विष्टकृदिडादीनां सकृदनुष्ठानाधिकरणम् ॥ ४ ॥

ऐन्द्रवायवे तु वचनात् प्रतिकर्म्म भक्षः स्यात् ॥ १८ ॥

अस्ति ज्योतिष्टोमः । ज्योतिष्टोमेन स्वर्गकामो यजेतेति । तत्र ऐन्द्रवायवे ग्रहे सन्देहः । किं सकृद् भक्षणम्, उत द्विरिति सोमसंस्कारार्थत्वात् सकृदिति प्राप्ते ब्रूमः। ऐन्द्रवायवे द्विर्भक्षयितव्यमिति। कुतः ॥ वचनात ॥ वचनमिदं भवति, द्विरैन्द्रवायवस्य भक्षयति, द्विर्ह्येतस्य वषट् करोतीति। नास्ति वचनस्यातिभारः॥१८॥ ऐन्द्रवायवग्रहे द्विःशेषभक्षणाधिकरणम् ॥ ५ ॥

सोमेऽवचनाद्भक्षो न विद्यते ॥ १९ ॥

ज्योतिष्टोमे समामनन्ति सोमान् । तेषु सन्देहः । किं तेषां शेषो भक्षयितव्यः, उत नेति । किं प्राप्तम् । सोमे भक्षो न विद्यते । कस्मात् ॥ न शक्यमसति वचने अध्यवसातुं भक्षणम् । तस्मात् सोमशेषो न भक्षयितव्यं इति ॥ १९ ॥ ॥ पूर्व० ॥

स्याद् वाऽन्यार्थदर्शनात् ॥ २० ॥

भवेद् वा भक्षः । अन्यार्थे हि वचनं भक्षं दर्शयति । सर्वतःपरिहारमाश्विनं भक्षयति । भक्षिताप्यायितांश्चमसान् दक्षिणस्यानसोऽवलम्बे सादयन्तीति । नासति भक्षणे एवञ्जातीयका भक्षविशेषाः सम्भवन्ति ॥ २० ॥ ॥ सि० ॥

वचनानि त्वपूर्वत्वात्तस्माद् यथोपदेशं स्युः ॥ २१ ॥

ननु दर्शनमिदं, प्राप्तिर्वक्तव्या । उच्यते । वचनानि तर्हि भविष्यन्ति । सर्वतःपरिहारमाश्विनं भक्षयति । तस्मात् सर्वा दिशः शृणोतीति विशिष्टं भक्षणं विधीयते । अपूर्वत्वाद् भक्षानुवादो नावकल्पते । अपिचैवमपूर्वमर्थं विदधतोऽर्थवत्ता भविष्यति । तस्माद् यत्रैव विशिष्टं भक्षणं श्रूयते, तत्रैव भवति, नातिप्रसज्ज्यते ॥ २१ ॥ ॥ आ० नि० ॥ सोमे शेषभक्षणाधिकरणम् ॥ ६ ॥

चमसेषु समाख्यानात् संयोगस्य तन्निमित्तत्वात् ॥२२॥

ज्योतिष्टोमे एव श्रूयते, प्रैतु होतुश्चमसः प्र ब्रह्मणः प्रोद्गातॄणां प्रयजमानस्य प्रयन्तु सदस्यानामिति । तत्र सन्देहः । किं चमसिनामस्ति भक्षः, न ? इति । किं प्राप्तम् । नेति ब्रूमः । नातिप्रसज्ज्यते इत्युक्तम् ॥ एवं प्राप्ते ब्रूमः । चमसेष्वस्ति भक्ष इति । कुतः ॥ समाख्यानात् ॥ होतुश्चमसो ब्रह्मणश्चमस उद्गातुश्चमस इति समाख्यया निर्दिश्यते । होता यत्र चमति चमिष्यति अचमीद्वा स होतुश्चमसः। यद्यत्र होता न चमेद्, न होतुश्चमसो भवेत् । तस्माच्चमतीति ॥ आह । काऽस्य लिङ्गस्य प्राप्तिरिति सामर्थ्यमिति ब्रूमः । होतुश्चमसेन प्रैतव्यम् । यदि चात्र होता न चमेद्, न शक्यं भवेद्धोतुश्चमसेन प्रैतुम् । न चात्रान्यद् होता ओदनादि चमिष्यति । सोमचमस इति हि तं समाचक्षते । अपि च, न तद्धोतुर्द्रव्यं, यजमानस्य तद् द्रव्यम् । होतुस्तत्र चमनं कर्त्तव्यम् । सोमे च भक्ष्यमाणे तेन होमोऽवकल्पते । पवित्रं हि सोमो, न तस्मिन् भक्षिते पात्रं व्यापद्यते । तत्र चमसेन शक्यते होतुम् । वचनप्रामाण्यादुच्छिष्टेन होष्यतीति चेद्, नैतदेवम् । असति अवकाशे वचनं बाधकं भवति । अस्ति चावकाशः सोमभक्षणम् । तस्माच्चमसिभिर्भक्षयितव्यः सोम इति ॥ अथ तक्षणादीन्याश्रीयेरन् । तथा सम्बन्धापह्नवाद् अतच्चमसतैव स्यात्, द्रव्यान्तरं स्यात् । तस्माच्चाब्राह्मणस्य सोमं प्रतिषेधति । स यदि राजन्यं वैश्यं वा याजयेत्, स यदि सोमं विभक्षयिषेत्, न्यग्रोधस्तिभीराहृत्य ताः संपिष्य दधनि उन्मृज्य तमस्मै भक्षं प्रयच्छेत्, न सोममिति भक्षानिवृत्तिं दर्शयति । सा एषा भक्षाशङ्कैवं सत्युपपद्यते, यदि चमसिनोऽस्ति भक्षः । तस्मादस्तीति मन्यामहे ॥ २२ ॥ ॥ चमसिनां शेषभक्षाधिकरणम् ॥ ७ ॥

उद्गातृचमसमेकः श्रुतिसंयोगात् ॥ २३ ॥

अस्ति ज्योतिष्टोमः । ज्योतिष्टोमेन स्वर्गकामो यजेतेति । तत्रास्ति, प्रैतु होतुश्चमसः प्र ब्रह्मणः प्रोद्गातॄणामिति । तत्रास्ति समाख्यानाद् भक्ष इत्युक्तम् । तत्र सन्देहः । किमेक एवैनं चमसमुद्गाता भक्षयेद्, उत सर्वे भक्षयेयुः । अथ सुब्रह्मण्यवर्जिताश्छन्दोगा भक्षयेयुः, अथ वा सह सुब्रह्मण्यनेति । किं तावत् प्राप्तम् । एको भक्षयेदुद्गातैव । कुतः ॥ श्रुतिसंयोगात् ॥ उद्गातैकः श्रुत्या संयुज्य-

ते । चमसेन प्रोद्गातॄणामिति ॥ ननु बहुवचनं श्रूयते, तेन बहवो भक्षयेयुः । उच्यते । श्रूयते बहुवचनं, तत्तूद्गातृप्रातिपदिकगतं, तद् विवक्षितं सदुद्गातृबहुत्वं ब्रूयात् । एकश्चोद्गाता, तत्र बहुत्वं श्रूयमाणमपि न शक्नुयादुद्गातृभेदं कर्तुम् । तस्माद् अविवक्षितं बहुवचनम् । अनुमानं हि एतद्, बहूनां चमस इति । कथम् । यद् बहुषु प्रातिपदिकं वर्त्तते, ततो बहुवचनं भवति । बहुवचनं तु ततो दृश्यते, प्रोद्गातॄणामिति । तस्मान्नूनं, बहूनां चमस इत्यनुमानम् । प्रत्यक्षं त्वेक उद्गाता, न द्वितीयः, न तृतीयः । अनुमानाच्च प्रत्यक्षं कारणं बलवद् भवतु । तस्मादेकस्य चमसः, स चोद्गातुरिति ॥ २३ ॥

सर्वे वा सर्वसंयोगात् ॥ २४ ॥

सर्वे वा भक्षयेयुः । एकस्मिन्नुद्गातरि भक्षयति बहुवचनं प्रमादादधीतमिति गम्यते । न हि तद् अनूद्यते, न विधीयते इति । ननु सर्वेष्वपि भक्षयत्सु उद्गातृशब्दः प्रमादो गम्यते । उच्यते । लक्षणाऽर्थोऽपि तावत् सम्भविष्यति, उद्गातृप्रभृतय इति ॥ २४ ॥

स्तोत्रकारिणां वा तत्संयोगाद् बहुश्रुतेः ॥ २५ ॥

उच्यते । नैतदस्ति, बहूनां चमस इति । कुतः । उद्गातृशब्दस्य चमसेन सम्बन्धः प्रत्यक्षेण वाक्येन । बहुवचनस्य पुनरुद्गातृशब्देन श्रुत्या संबन्धः । अन्येन ऋत्विजा तु बहुवचनस्य नैव कश्चिदस्ति सम्बन्धः । तस्माद् बहूनां चमस इत्यनुपपन्नमिति । अत्रोच्यते । शक्नोत्ययमुद्गातृशब्दो बहुत्वं वदितुं क्रियायोगेन, उद्गायन्ति इत्युद्गातारः । के ते प्रस्तोता उद्गाता प्रतिहर्त्ता इति । तदेतेन बहुवचननिर्देशेन आनुमानिकक्रियायोगनिमित्त उद्गातृशब्दो विवक्षित इत्यवगमिष्यामः । बहुवचनं हि एवमवक्लृप्तं भविष्यति, उद्गातृशब्दश्च । तस्मात् स्तोत्रकारिणां चमस इति ॥ २५ ॥ ॥ पूर्वपक्षः ॥

सर्वे तु वेदसंयोगात् कारणादेकदेशे स्यात् ॥ २६ ॥

सर्वे छन्दोगाः सहसुब्रह्मण्या भक्षयेयुः । किमिति । गानसंयोगादिति नायं पक्ष उपपद्यते । कथम् । एकस्तत्रोद्गानेन सम्बन्धः, इतरो गानेन । अन्यद्धि गानमन्यदुद्गानम् । गीतिमात्रं गानं लौकिकं वैदिकञ्च । द्वितीयं साम्नः पर्व, उत्पूर्वस्य गायतेरभिधेयं प्रसिद्धम् । तत्रैक एवोद्गीथं करोतीत्येक एवोद्गाता, न बहवः । तस्मादुद्गानसं-

योगाद् बहवो भविष्यन्तीत्येतदपि नोपपद्यते । कथं तर्हि ॥ वेदसंयोगात् ॥ औद्गात्रं नाम प्रवचनम् । तथा, औद्गात्राणि कर्माणि । औद्गात्रस्य कर्त्ता वा, अध्येता वोद्गातेत्युच्यते। कथम् ?। उद्गातुः कर्म, औद्गात्रमिति प्रसिद्धम् । एवञ्चेद् व्यक्तम् । औद्गात्रस्य कर्त्ता, उद्गातेति गम्यते । यस्योद्गाता प्रसिद्धस्तद्विशिष्टं कर्म अनाख्यातमपि औद्गात्रमिति वदति । शब्दश्च, यस्य औद्गात्रं प्रसिद्धं, स तस्य कर्त्तारमुद्गातेति वदति, अनाख्यातमपि । यथा यस्यौदमेघः प्रसिद्धः, स तस्यानाख्यातमप्यपत्यमौदमेघिरिति ब्रूते। यस्यौदमेघिः, स तस्य पितरमनाख्यातमप्युदमेघं प्रतिपद्यते । एवमौद्गात्रसम्बन्धादुपपद्यते उद्गातृशब्दः, प्रस्तोतापि उद्गातापि प्रतिहर्त्तापि सुब्रह्मण्योऽपि । एवं बहुवचनमुद्गातृशब्दश्चोभयमप्युपपन्नं भविष्यति । न चान्यः कश्चिद्दोषः ॥ तस्मादौद्गात्रेण सम्बद्धाश्चत्वार उद्गातृचमसं भक्षयेयुरिति । यत्र कारणमस्ति, तत्रापि सुब्रह्मण्या उद्गातारः । यथोद्गातृशब्दो, विनिषद्योद्गातारः साम्ना स्तुवते इति स्तोत्रकारिषु । यथेदमपि वचनम्, उद्गातारो नापव्याहरेयुरुत्तमायामेषोत्तमा इति अपसुब्रह्मण्यानामेव ॥ २६ ॥ ॥ सिद्धान्तः ॥ उद्गातृणां सहसुब्रह्मण्येन भक्षाधिकरणम् ॥ ८ ॥

ग्रावस्तुतो भक्षो न विद्यतेऽनाम्नानात् ॥ २७ ॥

ज्योतिष्टोमे ग्रावस्तुन्नामहोतृपुरुषः । तत्र सन्देहः । किं स सोमं भक्षयेद्, न ? इति । उच्यते । ग्रावस्तुद् न भक्षयेत् । कुतः । यतोऽस्य भक्षं नामनन्ति । हारियोजने चमसिनामधिकार इति मन्यमान एवं ह स्माह, नास्याम्नायते भक्ष इति ॥ २७ ॥ ॥ पूर्व० ॥

हारियोजने वा सर्वसंयोगात् ॥ २८ ॥

हारियोजनस्य वा ग्रावस्तुतं भक्षयितारं मन्यामहे । एवं हि आमनन्ति । यथाचमसमन्यांश्चमसांश्चमसिनो भक्षयन्ति। अथैतस्य हारियोजनस्य सर्वे एव लिप्सन्ते इति । यदा हारियोजनस्य सर्वे लिप्सन्ते, तदा ग्रावस्तुदपीति ॥ २८ ॥ ॥ सि० ॥

चमसिनां वा सन्निधानात् ॥ २९ ॥

वाशब्दः पक्षं व्यावर्त्तयति । नैतदस्ति ग्रावस्तुतो हारियोजने भक्ष इति चमसिनां तत्राधिकारो, न सर्वेषाम्। कथम् । चमसिनामेव

विभागः । चमसिनोऽन्याँश्चमसान् यथाचमसं भक्षयन्ति इत्यनूद्य चमसिन एव वदति । अथैतस्य हारियोजनस्य सर्व एव लिप्सन्ते इति । एकं हीदं वाक्यम् । अथैतस्येत्यथशब्दप्रयोगादनन्तरवृत्तमपेक्षते । अथ सर्व एवेत्येवशब्दः, सामर्थ्यात् सर्वान् पूर्वप्रकृतानपेक्षते । अतो मन्यामहे—यथाचमसमन्याँश्चमसाँश्चमसिनो भक्षयन्तीत्यनेन पूर्वेण, अथैतस्य हारियोजनस्येत्येतस्य एकवाक्यता भवतीति । तेन चमसिनां सन्निहितानामेष विभागो, यथा चमसमन्यत्र, हारियोजने तु सर्वे एवेति ॥ २९ ॥ ॥ आ० ॥

सर्वेषां तु विधित्वात्तदर्था चमसिश्रुतिः ॥ ३० ॥

तुशब्दः पक्षं व्यावर्त्तयति । नैतदस्ति, चमसिन एव हारियोजने लिप्सन्ते इति । सर्वे तु विधीयन्ते हारियोजने । सर्वे भक्षयन्तीति, न पुनश्चमसिन इति सम्बन्धः शक्यते विधातुम् । द्वौ हि सम्बन्धावस्मिन् वाक्ये अपूर्वौ न शक्येते विधातुम् । तस्मादन्या वचनव्यक्तिः ॥ का पुनरसौ ? यथाचमसमन्यांश्चमसाँश्चमसिनो भक्षयन्ति इत्यनुवादः । चमसिनश्चमसान् भक्षयन्त्येव । ते भक्षयन्तो यथाचमसमेव, अथैतस्य हारियोजनस्य न केवलं चमसिनः, सर्वे एवेति । किमेवं भविष्यति । सर्वशब्दश्च सर्वान् वदन् नैकदेशे कल्पितो भविष्यति । न च द्वौ सम्बन्धावपूर्वौ एकस्मिन् वाक्ये भविष्यतः । तस्माद् एष पक्षो ज्यायानिति तदर्था हि एषा चमसिश्रुतिः । हारियोजनस्य प्रशंसार्था चमसिनः कीर्त्यन्ते हारियोजनं प्रशंसितुम् । कथम् । महाभागो हि हारियोजनः । यस्मात् तत्र सर्वे लिप्सन्ते, अन्याँश्चमसानेकैकः, न ते महाभागाः, न्यूना हारियोजनादिति ॥३०॥ आ० नि० ॥ ग्रावस्तुतोऽपि सोमभक्षाधिकरणम् ॥९॥

वषट्काराच्च भक्षयेत् ॥ ३१ ॥

अथ किं समाख्यैवैका भक्षकारणम् ? । नेति ब्रूमः । वषट्काराच्च भक्षयेत् । वषट्कारश्च भक्षणे निमित्तम् । कथम् । वचनात् । एवं हि श्रूयते, वषट्कर्त्तुः प्रथमभक्ष इति । भक्षणस्य अप्राप्तत्वान्न प्राथम्यविधानार्थ एष शब्दः । प्राथम्यविशिष्टं भक्षणमेव विदधाति इति ॥ ३१ ॥ वषट्करणस्य भक्षनिमित्तताधिकरणम् ॥ १० ॥

होमाभिषवाभ्याञ्च ॥ ३२ ॥

अपरमपि कारणं होमाभिषवौ । कथम् । हविर्धाने ग्रावभिरभिषुत्याहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षान् भक्षयन्तीति । न तावदेष क्रमो विधीयते । होमे निर्वृत्ते ततो भक्षणस्याप्राप्तत्वात् । द्वयोश्च क्रमयोर्विधानात् । अभिषुत्य हुत्वेति वाक्यम्भिद्येत । अर्थेन च प्राप्तत्वादस्य क्रमस्य । न ह्यकृते प्रयोजने कश्चित् प्रतिपादनमर्हति । न च भक्षणाङ्गभावेन होमाभिषवौ चोद्येते । अभिषवस्य होमाऽर्थत्वात् । होमस्य च फलार्थत्वात् । तस्माद् होमाभिषवयोः कर्तृणां भक्षणं विधीयते । येऽभिषुण्वन्ति जुह्वति च, ते भक्षयन्ति इति ॥ ३२ ॥ होमाभिषवयोरपि भक्षनिमित्तताधिकरणम् ॥ ११ ॥

प्रत्यक्षोपदेशाच्चमसानामव्यक्तः शेषे ॥ ३३ ॥

इदं श्रूयते, प्रैतु होतुश्चमसः प्र ब्रह्मणः प्रोद्गातॄणामिति । तत्र सन्देहः । चमसेषु होमाभिषवयोः कर्त्तारो वषट्कर्त्तारश्च किं भक्षयेयुरुत नेति । किं प्राप्तम् । न भक्षयेयुः । प्रत्यक्षोपदेशाच्चमसानां चमसिनः प्रति । प्रैतु होतुश्चमस इत्येवमादिभिर्विशेषवचनैः, होमाभिषवकारिणां सामान्यवाक्येन, यः सोमो भक्षणेन संस्कर्त्तव्यः स चमसेषु चमसिभिरिति । अथेदानीमन्यन्निमित्तं क्व भविष्यति । अव्यक्तः सामन्यनिमित्तः क्व ? । शेषे भविष्यति, यत्र न चमसिनः ॥ ३३ ॥ ॥ पूर्व० ॥

स्याद् वा कारणभावादनिर्देशश्चमसानां कर्त्तुस्तद्वचनत्वात् ॥ ३४ ॥

स्याद् वा चमसेषु वषट्कर्त्रादीनां भक्षः । प्राप्यते हि तेषां तच्च कारणम् । न च प्रतिषिध्यते । ननु चमसिनां प्रत्यक्षोपदेशान्निवर्त्तेरन् । उच्यते । अनिर्देशश्चमसानां कर्त्तुस्तद्वचनत्वात् । प्रैतु होतुश्चमस इत्येवमादयः शब्दाः न शक्नुवन्ति वषट्कर्त्रादीन् प्रतिषेद्धुम् । उपदेष्टारो हि ते, न प्रतिषेद्धारः । तस्माद् वषट्कर्त्रादयोऽपि चमसेषु भक्षयेयुः ॥ ३४ ॥ ॥ सि० ॥

चमसे चान्यदर्शनात् ॥ ३५ ॥

चमसे चान्याँश्चमसिनो दर्शयति । चमसाँश्चमसाध्वर्य्यवे प्रयच्छति । तान् स वषट्कर्त्रे हरतीति । एको हि स्वश्चमसो वषट्कर्त्रे ह्रियते तेन बहुहरणदर्शनं नावकल्पते । यदि वषट्कर्त्रादयो न चमसेषु

भक्षयेयुः । तस्माद् भक्षयन्तीति ॥ ३५ ॥ ॥ युक्तिः ॥ वषट्कर्त्रादीनां चमसे सोमभक्षाधिकरणम् ॥ १२ ॥

अथ यत्रैकस्मिन् पात्रे बहवो भक्षयन्ति, कस्तत्र क्रम इति । उच्यते-

एकपात्रे क्रमादध्वर्युः पूर्वो भक्षयेत् ॥ ३६ ॥

तस्य हि क्रमो भक्षयितुं, यस्य हस्ते सोमः ॥ ३६ ॥ ॥ पूर्व० ॥

होता वा मन्त्रवर्णात् ॥ ३७ ॥

होता वा पूर्वो भक्षयेत् ॥ मन्त्रवर्णात् ॥ मन्त्रवर्णो हि तथा, होतुश्चित् पूर्वे हविरद्य माशत इति । तथा, होतेव नः प्रथमः पाहीति ॥ ३७ ॥ ॥ सि० ॥

वचनाच्च ॥ ३८ ॥

वचनमिदं भवति, वषट्कर्तुः प्रथमभक्ष इति । वचनमेवेदम् । न मन्तव्यम्, अनेकगुणविधानादविवक्षितं प्राथम्यमिति । अप्राप्तत्वात् प्राथम्यस्य, नायमनुवादः । विधिरेव । समासेन च विदधतो नानेकगुणविधानं दुष्करम् ॥ ३८ ॥

कारणानुपूर्व्याच्च ॥ ३९ ॥

प्रथमं हि वषट्करणं निमित्तं होतुः । ततो होमोऽध्वर्य्योर्निमित्तम् । निमित्तानुपूर्व्याच्च नैमित्तिकानुपूर्व्ये क्रमानुरोधः ॥ ३९ ॥ ॥ हेतुः ॥ होतुः प्रथमभक्षाधिकरणम् ॥ १३ ॥

वचनादनुज्ञातभक्षणम् ॥ ४० ॥

अथ य एकपात्रे सोमोऽनेकेन भक्ष्यते, किं तत्रानुज्ञाप्य अननुज्ञाप्य वा भक्षयितव्यम्, उत अनुज्ञाप्यैवेति । लाघवादनियमे प्राप्ते । उच्यते । अनुज्ञाप्य भक्षयितव्यमिति । कस्मात् । वचनात् । इदं वचनं भवति, तस्मात् सोमो नानुपहूतेन पेय इति । उपह्वानं चानुज्ञापनम् । प्राप्तिसूत्रमेतत् ॥ ४० ॥ भक्षस्यानुज्ञापूर्वकत्वाधिकरणम् ॥ १४ ॥

अथानुज्ञातेन भक्षयितव्यमिति स्थिते, किं लौकिकेन वचनेनानुज्ञापयितव्यम्, उत वैदिकेनेति । अनियमाल्लौकिकेनेति प्राप्ते उच्यते-

तदुपहूत उपहूयस्वेत्यनेनानुज्ञापयेल्लिङ्गात् ॥ ४१ ॥

अनुज्ञापनलिङ्गोऽयं मन्त्रः ॥ लिङ्गात् ॥ अनुज्ञापने समाम्नातः, सामर्थ्याद् विनियुज्यते । तत्र कृतेऽर्थे लौकिको निवर्त्तते ॥ ४१ ॥ वैदिकवचनेनानुज्ञापनाधिकरणम् ॥ १५ ॥

तत्रार्थात् प्रतिवचनम् ॥ ४२ ॥

एतदवगतं, तत्रुपहूत उपहूयस्वेत्यनेनानुज्ञापयेदिति । अथ प्रतिवचने सन्देहः । किं लौकिकं प्रतिवचनमुत एतदेवेति । किं प्राप्तम् । एतद् वैदिकं, प्रश्ने विनियुक्तम् । लौकिकमन्यत् प्रतिवचनं भवितुमर्हति । एवं प्राप्ते ब्रूमः । तत्रैतदेव प्रतिवचनमिति ।

ननु प्रश्नलिङ्गमेतद् उपहूयस्वेति । उच्यते । यदस्य पूर्वमुपहूत इति प्रतिवचनस्य समर्थं, तत् प्रतिवचनकार्यं भविष्यति । आह । विपरीतमेतत् समाम्नानम् । पूर्वं हि प्रश्ने भवितव्यं, ततः प्रतिवचनेन । उच्यते । अर्थात्, पूर्वं प्रतिवचनकार्यं भविष्यति । अर्थो हि क्रमाद् बलीयानिति ॥४२॥ वैदिकवाक्येन प्रतिवचनाधिकरणम् ॥१६॥

तदेकपात्राणां समवायात् ॥ ४३ ॥

इदं सन्दिह्यते । किं यः कश्चिद् अनुज्ञापयितव्यः ? उत समानपात्र इति । अविशेषाभिधानाद् यः कश्चिद् इति प्राप्ते । उच्यते । तत् खल्वनुज्ञापनमेकपात्राणां स्यात् । कुतः । अनुज्ञापनमिहाङ्गम् । अनुज्ञापनस्य चैतद्रूपम् । यत्रान्येन कर्त्तव्यमन्यश्चिकीर्षेत्, सोऽनुमन्यस्वेति ब्रूते, सहभोजनादि वा आचरितुकामश्चित्तमन्यस्यानुकूलयति । तदेतद् नानापात्रेषु नैव सम्भवति । न हि तत्रान्येन कर्त्तव्यम्, अन्यो वा चिकीर्षतीति । सहभोजनादौ वा पदार्थे सम्मानयति । एकपात्रे तु सोमे साधारणे संस्कर्त्तव्ये न्यायेन समो विभागः प्राप्नोति । तत्राविभज्य पीयमाने कदाचिदन्येन पातव्यमन्यः पिबेत् । तत्रानुज्ञापनं सम्भवति, त्वया अर्द्धं पातव्यं, मया अर्द्धम् । कदाचिदहमभ्यधिकं न्यूनं वा पिबेयं, तदनुज्ञातुमर्हसीति । एकपात्रे वा पानं त्वया सहाचरन्नहं तव चित्तप्रसादनं व्याहन्यामिति सम्भवत्यनुज्ञापना । तस्मादेकपात्रेष्वेवैतत् स्यादिति ॥४३॥ ॥ एकपात्राणामनुज्ञापनाधिकरणम् ॥ १७ ॥

याज्यापनयेनापनीतो भक्षः प्रवरवत् ॥ ४४ ॥

अस्ति ज्योतिष्टोमः, तत्र ऋतुयागेषु श्रूयते, यजमानस्य याज्या सोऽभिप्रेष्यति होतरेतद् यजेति, स्वयं वा निषद्य यजतीति । यदा स्वयं यजति, तदा सन्देहः । किमस्य भक्षोऽस्ति, नास्तीति । तदु-

च्यते । याज्यायामपनीयमानायां नापनीयेत भक्षणम् । होतुरेव तु भक्षणं स्याद्, न यजमानस्येति । कुतः । अन्या हि याज्या, अन्यद् भक्षणम् । न चान्यस्मिन्नपनीयमानेऽन्यदपनीयते । यथा तस्यामेव याज्यायामपनीयमानायां प्रवरो नापनीयते, तद्वदेतदपीति ॥ ननु याज्याया अधि वषट्करोतीति, यत्र याज्या तत्र वषट्कारः । यत्र वषट्कारस्तत्र भक्षणमपीति । नेत्युच्यते । न तावद् याज्यायामवयवभूतो वषट्कारो, येन याज्याऽग्रहणेनाऽसौ न गृह्येत । यत्तु तस्या अधि वषट्करोति, अन्येनापि प्रयुज्यमानाया उपरि होता वषट् करिष्यति । याज्यापनयो हि वचनात् । न वषट्कारापनयः । यावद्वचनं, वाचनिकं भवत्येव । वचनं हि तद्विषयमेव ॥ ४४ ॥ ॥ पूर्व० ॥

यष्टुर्वा कारणागमात् ॥ ४५ ॥

यष्टुर्वा भक्षः स्यात् । कुतः ॥ कारणागमात् ॥ भक्षस्य कारणं वषट्कारः । स च याज्यायामागच्छन्त्यामागच्छति । एवं हि श्रूयते, याज्याया अधि वषट्करोतीति ॥ नन्वेतदुक्तं, यजमानेनापि प्रयुज्यमानायां होता अधि वषट्करोतीति । नैष समाधिः । अनवानता यष्टव्यं, वषट्कारेण यागः क्रियते, न याज्यामात्रेण । तस्माद् आ वषट्काराद् न अवानितव्यं यजमानेन । अन्यश्चेद् वषट् कुर्याद् अवान्याद् याजमानः । न च यजेत । यष्टव्ये चासौ चोद्यते । न याज्यामात्रवचने । स्वयं निषद्य यजतीति साङ्गस्य निषद्ययागे विधानात् ॥ ४५ ॥ ॥ सि० ॥

प्रवृत्तत्वात् प्रवरस्यानपायः ॥ ४६ ॥

अथ यदुक्तं, यथा प्रवरो नापनीयते, एवं भक्षोऽपीति । उच्यते । अशक्यत्वात् । प्रवरो नापनीयते । अतिक्रान्तो हि स कथमपनीयेत होतुः । भ्रष्टे चावसरे, अनुष्ठीयमानो यजमानस्य विगुणः स्यात् । न च विगुणः कथञ्चिदर्थं साधयेत् । नात्र चोदकेन प्राप्नोति । अथोच्येत, यच्छक्यं तच्चोदकेन प्रापितं, यद् न शक्यं तत् प्रापितमिति । प्रकृतिरियम् । अपूर्वस्यात्र विधानं, यादृशमुक्तं, तादृशं यदि शक्यते कर्त्तव्यम् । यदि न शक्यते, यत्रैव शक्यते तत्रैव कार्य्यम् । न यत्र विगुणमिति । तस्मात् प्रवरस्यानपायो युक्तो, न भक्षस्येति ॥ ४६ ॥ ॥ आ० नि० ॥ स्वयंयष्टुर्भक्षास्तिताधिकरणम् ॥ १८ ॥

फलचमसो नैमित्तिको भक्षविकारः श्रुतिसंयोगात्॥४७॥

ज्योतिष्टोमे श्रूयते– स यदि राजन्यं वा वैश्यं वा याजयेत्, स यदि सोमं बिभक्षयिषेत्, न्यग्रोधस्तिभीराहृत्य ताः सम्पिष्य दधनि उन्मृज्य तमस्मै भक्षं प्रयच्छेन्न सोममिति । तत्र सन्देहः । किं फलचमसो भक्षविकारः, उत इज्याविकार इति । किं फलचमसं भक्षयेदित्यर्थः, उत फलचमसेन यजेतेति । किं प्राप्तम् । फलचमसो नैमित्तिको भक्षविकारः । भक्षणेन हि श्रुतेन एकवाक्यता भवतीति । तमस्मै भक्षं प्रयच्छेदिति, न तेन यजेतेतिशब्दोऽस्ति । तस्माद् भक्षविकारः ॥ ४७ ॥ ॥ पूर्व० ॥

इज्याविकारो वा संस्कारस्य तदर्थत्वात् ॥ ४८ ॥

इज्याविकारो वा फलचमसः । फलचमसेन यजेतेत्यर्थः । कथम् । यद्देतद् भक्षणम् । एतत् सोमसंस्कारार्थं, फलचमसस्यापि यदि भक्षणं फलचमससंस्कारार्थं, फलचमसस्यान्यत्रानुपयोगादनर्थकम् । अथ भक्षणं प्रधानम् । तथा न सोमामित्यनुवादो नावकल्पते । यदि त्विज्याविकारो भवेत्, ततः फलचमससंस्कारोऽवकल्पते । तस्मादिज्याविकारः ॥ आह । कथं यजिसम्बन्धेऽसति इज्याविकारो भविष्यतीति । उच्यते । अस्ति यजिसम्बन्धः । कथमिति । यदि राजन्यं वा वैश्यं वा याजयेद् न्यग्रोधस्तिभीः सम्पिष्य तमस्मै भक्षं प्रयच्छेद्, याजयितुमिति गम्यते । भक्षसम्बन्धे हि न पूर्वमुत्तरेण सम्बध्यते । यदि सोमं भक्षणेन संस्कर्तुमिच्छेन्न्यग्रोधस्तिभीः संस्कुर्यादिति । तस्मान्न भक्षणसम्बन्धः । यागो हि प्रकृतोऽस्ति, तेन सह सम्भन्त्स्यते, न दोषो भविष्यति ॥ ननु तमस्मै भक्षं प्रयच्छेदिति वचनाद् भक्षसाधनमिति गम्यते, न यागसाधनमिति । भक्षशब्दानन्तर्य्यात् । उच्यते । श्रूयमाणे सम्बन्धे अनर्थकमिति कृत्वा प्रकृतसम्बन्ध इत्युच्यते । कथं तु भक्षसम्बन्ध इति । यद्धि यागद्रव्यं भक्षयितव्यं, तच्चोदकेन भवति, तस्माद् भक्षसम्बन्धं लभते, भक्षसम्बन्धेन च यागसम्बन्ध एव लक्ष्यते । यदि तेनेज्यते, ततः स भक्षो भवति । तस्माद् भक्षवचनात् सुतरां तेनेज्यते इति गम्यते । सैषा व्यवधारणकल्पना । तमस्मै भक्षं प्रयच्छेत्, तमस्मै भक्षं कुर्य्यादित्यर्थः । यथा स भक्षो भवति, तथा कुर्य्यादिति । यदि च

तेनेज्यते, ततोऽयं भक्षो भवति। तस्मात् तेन यष्टव्यमिति ॥ ४८ ॥ सि० ॥

होमात् ॥ ४९ ॥

होमविशेषवचनं भवति, यदान्यांश्चमसाञ्जुहोति अथैतस्य दर्भतरुणकेनोपहत्य जुहोति इति । इज्याविकारे सति दर्भतरुणकेनेति जुहोतौ गुणवचनमवकल्पते । तस्मादपीज्याविकारः ॥ ४९ ॥

चमसैश्च तुल्यकालत्वात् ॥ ५० ॥

यदान्यांश्चमसानुन्नयन्ति, अथैनं चमसमुन्नयन्तीति । इज्याविकारे सति उन्नयनदर्शनं युज्यते, न भक्षविकारे । तस्मादपीज्याविकारः ॥ ५० ॥

लिङ्गदर्शनाच्च ॥ ५१ ॥

इतश्च पश्यामः, इज्याविकार इति । कुतः । लिङ्गदर्शनात् । किं लिङ्गं भवति । सोमप्रतिषेधानुवादः । तमस्मै भक्षं प्रयच्छेद्, न सोमम् इति । इज्याविकारे सति सोमो न भक्ष्यते । तस्मात् पश्याम इज्याविकार इति ॥ ५१ ॥ ॥ हेतुः ॥ फलचमसस्य इज्याविकारताऽधिकरणम् ॥ १९ ॥

अनुप्रसर्पिषु सामान्यात् ॥ ५२ ॥

अस्ति राजसूये दशपेयः, तत्र श्रूयते । शतं ब्राह्मणाः सोमान् भक्षयन्ति, दशदशैकैकचमसमनुप्रसर्पन्तीति । अत्र राजन्यचमसे सन्देहः । किं तं राजन्या अनुप्रसर्पेयुः, उत ब्राह्मणा इति । किं प्राप्तम् । राजन्या इति । कथम् । दशदशैकैकं चमसमनुप्रसर्पेयुरिति अनुप्रसर्पतां सङ्ख्या विधीयते । एकस्यां राजन्यजातौ दशसङ्ख्या विधीयते । राजन्यजातिः सैव । तेन तं दश राजन्या अनुप्रसर्पेयुः । एवं शतं ब्राह्मणा राजन्याश्च । तेषु शतशब्दोऽनुवादः । अनुवादसरूपश्च, शतं भक्षयन्तीति । तस्माद् राजन्या राजन्यचमसमनुप्रसर्पेयुरिति । केचिदाहुः । ब्राह्मणराजन्यानामेकस्मिँश्चमसे भक्षणं विरुद्ध्यते इति न स दोषः । न हि सोमेनोच्छिष्टा भवन्तीति श्रूयते ॥ ५२ ॥ ॥ पूर्व० ॥

ब्राह्मणा वा तुल्यशब्दत्वात् ॥ ५३ ॥

ब्राह्मणा वा राजन्यचमसमनुप्रसर्पेयुः । कथम् । शतं ब्राह्मणाः सोमं भक्षयन्तीति विधिः श्रुत्या ब्राह्मणगतामेव सङ्ख्यामाह । तस्मात्

शतं ब्राह्मणाः । तेषां भक्षणार्थमनुप्रसर्पतामेकैकस्मिँश्चमसे दशदशोपदिश्यन्ते । तस्माद् ब्राह्मणशतस्य दश ब्राह्मणा राजन्यचमसमनुप्रसर्पेयुरिति ॥ ५३ ॥ ॥ सिद्धान्तः ॥ ब्राह्मणानामेव राजन्यचमसाऽनुप्रसर्पणाधिकरणम् ॥ २० ॥ इति श्रीशबरस्वामिकृते मीमांसाभाष्ये तृतीयस्याध्यायस्य पञ्चमः पादः समाप्तः ॥ ३ ॥ ५ ॥

अथ तृतीये अध्याये षष्ठः पादः ॥ ३ ॥ ६ ॥

सर्वार्थमप्रकरणात् ॥ १ ॥

अनारभ्य किञ्चिदुच्यते । यस्य खादिरः स्रुवो भवति स छन्दसामेव रसेनावद्यति । सरसा अस्य आहुतयो भवन्ति । यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीत्येवमादि । तत्र सन्देहः । किं, खादिरता स्रुवे, पालाशता जुह्वां, प्रकृतौ निविशते ? उत प्रकृतौ विकृतौ चेति । किं प्राप्तम् ॥ सर्वार्थम् अप्रकरणात् ॥ प्रकृतिविकृत्यर्थमेवञ्जातीयकम् । कुतः । अप्रकरणात् । न कस्यचित् प्रकरणे श्रूयन्ते । तानि वाक्येन सर्वत्र भवेयुरिति ॥ १ ॥ ॥ पूर्व० ॥

प्रकृतौ वाऽद्विरुक्तत्वात् ॥ २ ॥

प्रकृतौ वा निविशेरन्ननारभ्याधीतानि पात्राणि । कुतः । अद्विरुक्तत्वात् । एवमद्विरुक्तं भविष्यतीति । द्विरुक्ततायां को दोषः । असम्भव इति ब्रूमः । यद्धि प्रकृतौ विकृतौ च भवति अस्ति तत् प्रकृतौ । प्रकृतौ चेदस्ति, चोदकेनैव विकृतिं प्राप्नोति । ततो नानारभ्यविधिमाकाङ्क्षति । तस्मादनाकाङ्क्षितत्वादनारभ्य विधिर्न तत्र विदधाति । तेन ब्रूमः । प्रकृत्यर्थ एवेति ॥ २ ॥ ॥ सि० ॥

तद्वर्जन्तु वचनप्राप्ते ॥ ३ ॥

अप्रकरणात् प्रकृतिविकृत्यर्थमेवेत्युच्यते । यत्तु, चोदकेन प्राप्नोतीति । अनारभ्यविधिना प्राप्ते न चोदकमाकाङ्क्षति । तस्मादनारभ्यविधिवर्जं चोदकः प्रापयिष्यति । अनारभ्यविधिवाक्येन प्रत्यक्षेण स्रुवे खादिरता, चोदकवाक्येन आनुमानिकेन विकृतौ । आनुमानिकाच्च प्रत्यक्षं बलवत् । तस्मात् प्रकृतिविकृत्यर्थोऽनारभ्यविधिः ॥ ३ ॥

दर्शनादिति चेत् ॥ ४ ॥

यदि अनारभ्य विधिश्चोदकाद् बलीयान्, अनारभ्यविधिना प्रा-

सेन चोदकमाकाङ्क्षति। निराकाङ्क्षे वैकृते कर्म्मणि चोदको नैव प्राप्नोति। तत्र प्रयाजादीनां दर्शनं नैवोपपद्येत। दृश्यन्ते च प्रयाजादयः क्वचित्, प्रयाजे प्रयाजे कृष्णलं जुहोतीति। अथ चोदको बलीयाँस्तत एतद्दर्शनमुपपद्यते। तस्मात् प्रकृत्यर्थोऽनारभ्यविधिः ॥ ४ ॥ आ० ॥

न चोदनैकार्थ्यात् ॥ ५ ॥

न प्रकृत्यर्थः, सर्वार्थ इति ब्रूमः। अप्रकरणे समाम्नानात्। यदुक्तम्, अनारभ्य विधिना निराकाङ्क्षस्य न चोदक इति। तन्नोपपद्यते। न हि अनारभ्य विधिश्चोदनां निराकाङ्क्षीकरोति। प्राप्ते हि चोदके न स्रुवे खादिरता अनारभ्यविधिना शक्या विधातुम्। असति चोदकेऽनारभ्यविधिरपि नास्ति। न चानारभ्य विधिः स्रुवं प्रापयति, तस्य च खादिरताम्। कुतः ॥ चोदनैकार्थ्यात् ॥ एकार्था हि चोदना, यस्य खादिरः स्रुवो भवतीति। न चात्र स्रुवः खादिरता चोभयं विधीयते। स्रुवस्य सतः खादिरतामेष शब्द आह। स च चोदकेन प्राप्तः। तस्मादस्ति चोदकः। स हि अनारभ्य विधिवाक्यस्य प्रत्यक्षत्वात् तं वर्जयित्वा अन्यं प्रापयति। तस्मात् प्रकृतिविकृत्यर्थोऽनारभ्य विधिः ॥ ५ ॥ ॥ आ० नि० ॥

उत्पत्तिरिति चेत् ॥ ६ ॥

इति चेत् पश्यसि, उत्पत्तिरेषां प्रकृतिविधिभिस्तुल्या, प्रकृतावङ्गानि सङ्क्षेपेण विस्तारेण चोद्यन्ते। पञ्च प्रयाजान् यजतीति सङ्क्षेपेण। समिधो यजतीत्येवमादिना विस्तरेण। इहापि यस्य खादिरः स्रुवो भवति इत्येवमादिर्विस्तारः, यस्यैवंरूपः स्रुव इति सङ्क्षेपः। एवंरूपः प्रकृतौ विधिर्दृष्टः, अयमप्येवंरूपः। तस्मात् प्राकृत इति सामान्यतो दृष्टानुमानम्। तस्मात् प्रकृत्यर्थोऽनारभ्यविधिरिति ॥ ६ ॥ ॥ आ० ॥

न तुल्यत्वात् ॥ ७ ॥

नैतदेवम्। न हि एवञ्जातीयकं सामान्यतो दृष्टं साधकं भवति। केवलमत्र प्राकृतविधिसारूप्यं, न तु प्रकृतावेतद् भवतीति प्रमाणमस्ति। अपि च विकृतावपि सङ्क्षेपविस्ताराभ्यामङ्गानि विधीयन्ते। तिस्र आहुतीर्जुहोतीति सङ्क्षेपः। आमनमस्यामनस्य देवा इति विस्तारः। अतो वैकृतैरप्यनारभ्यविधयस्तुल्याः। तस्मादयमहेतुः प्रकृतिनिवेशस्य ॥ ७ ॥

चोदनार्थकार्त्स्न्यात्तु मुखविप्रतिषेधात् प्रकृत्यर्थः ॥ ८ ॥

तुशब्दः पक्षं व्यावर्त्तयति । न सर्वार्थोऽनारभ्यविधिः । प्रकृत्यर्थः स इति ब्रूमः । कुतः । चोदनार्थकार्त्स्न्यात् । कृत्स्नं चोदकः प्रापयति, नानारभ्य विधिना वैकृतमपूर्वं निराकाङ्क्षम् । पात्राणां हि तद् वाक्येन, न यागानाम् । यागाश्चोदनालिङ्गसंयोगात् प्रकृतिमपेक्षन्ते, तया सहैकवाक्यतां यान्ति । प्राकृताश्च ताञ्छक्नुवन्ति निराकाङ्क्षीकर्त्तुं, नाऽनारभ्यविधयः । तस्मादवश्यं चोदक उत्पादयितव्यः । स चेदुत्पाद्यते, नार्थोऽनारभ्यविधिना । न चासौ प्रकरणादीनामभावात् प्रवर्त्तमानोऽपि वैकृतेन यागेन सम्बध्येत । तस्माद् वैकृतेन कर्म्मणा नानारभ्यविधिः सम्बध्यते । तस्य वैकृतस्य मुख्यस्यानारभ्यविधिर्वाक्यशेषः । प्रकृतौ वेति प्रतिषेधे चोदकसामर्थ्यात् प्राकृते वाक्यशेषे प्राप्ते अनारभ्य विधिर्न भविष्यति । तस्माद् अनारभ्य विधिः प्रकृत्यर्थः ॥ ८ ॥ ॥ आ० नि० ॥ स्रुवादिषु खादिरतादिविधेः प्रकृतिगामिताधिकरणम् ॥ १ ॥

प्रकरणविशेषात्तु विकृतौ विरोधि स्यात् ॥ ९ ॥

अनारभ्य किञ्चित् सामिधेनीनां परिमाणमाम्नातं, सप्तदश सामिधेनीरनुब्रूयादिति । तत्र सन्देहः । किमेतत् प्रकृतौ, उत विकृताविति । किं प्राप्तम् । पूर्वेण न्यायेन प्रकृताविति प्राप्तम् । प्रकृतौ च पाञ्चदश्यमाम्नातं, तेन विकल्प इति ॥ एवं प्राप्ते ब्रूमः । विकृतावेवञ्जातीयको विधिः स्यात् । कस्मात् । प्रकृतेः पाञ्चदश्येन निराकाङ्क्षत्वात् । ननु विकल्पो भविष्यतीत्युक्तम् । प्रकरणविशेषात् पाञ्चदश्येन न विकल्पः । विषमशासनात् । विकृतौ तु आनुमानिकं पाञ्चदश्यं बाधित्वा, अनारभ्यविधिवाक्येन प्रत्यक्षेण साप्तदश्यं निवेक्ष्यते । अभिरुक्तं चैतत् प्रयोगवचनमुपसंहरिष्यति । तस्मादेवञ्जातीयकं विकृत्यर्थम् ॥ ९ ॥ ॥ सामिधेनीनां सप्तदशसंख्याया विकृतिगामिताऽधिकरणम् ॥ २ ॥

नैमित्तिकं तु प्रकृतौ तद्विकारः संयोगविशेषात् ॥ १० ॥

दर्शपूर्णमासयोराम्नातं, गोदोहनेन पशुकामस्य प्रणयेदिति । तथा, अग्नीषोमीये पशौ श्रूयते यूपं प्रकृत्य, वैल्वो ब्रह्मवर्चसकामेन कर्त्तव्य इति । एवञ्जातीयकेषु सन्देहः । किं प्रकृतौ निवेशो, विकृतौ

चेति । किं प्राप्तम् । विकृताविति । प्रकृतिरन्येन पात्रेण यूपेन च निराकाङ्क्षा । एवं प्राप्ते ब्रूमः । प्रकृतौ नैमित्तिकं निविशते । निमित्तसंयोगेन विधानात् । खादिरपालाशरौहितका अविशेषेणोक्ताः, चमसश्च । गोदोहनं वैल्वश्च विशेषविहितौ । विशेषविधिना चाऽविशेषविधिर्बाध्यते । प्रकरणं सामान्यं, निमित्तसंयोगो विशेषः । सामान्येन यत् प्राप्नोति तत् परोक्षं लक्षणया । यत्तु विशेषेण, तत् प्रत्यक्षं श्रुत्या । श्रुतिश्च लक्षणाया बलीयसी, प्रत्यक्षं च परोक्षात् । तस्मात् प्रकृतावेव स्यात् ॥ १० ॥ गोदोहनादीनां प्रकृतिगामिताधिकरणम्॥३॥

इष्ट्यर्थमग्न्याधेयं प्रकरणात् ॥ ११ ॥

सन्ति पवमानेष्टयः, अग्नये पवमानायाष्टाकपालं निर्वपेत्, अग्नये पावकायाग्नये शुचये इति । तासां प्रकरणं समाम्नातं ब्राह्मणो वसन्ते अग्निमादधीतेति । तत्र सन्देहः । किम् अग्न्याधेयं पवमानेष्ट्यर्थम्, उत नेति । किं प्राप्तम् । इष्ट्यर्थमिति । कुतः ॥ प्रकरणात् ॥ तासां प्रकरणे श्रूयते । अतस्तदर्थम् ॥ ११ ॥ ॥ पूर्व० ॥

न वा तासां तदर्थत्वात् ॥ १२ ॥

पवमानेष्टयो हि अग्न्यर्थाः । यदि अग्निरिष्ट्यर्थः स्यात्, ततस्तदर्थमग्न्याधेयमिष्टीनामुपकुर्यात् । निष्फलास्तु इष्टयः । तदर्थमग्न्याधेयमपि निष्फलं स्यात् । कथं पुनरग्न्यर्थता पवमानेष्टीनाम् ? । निष्प्रयोजनत्वादेव, प्रयोजनवत्त्वाच्चाग्नीनाम् । भावयितव्या अपि इष्टयो भूतानामग्नीनामर्थेन क्रियेरन् । तस्मादग्न्याधेयं न पवमानेष्ट्यर्थम् ॥ १२ ॥ ॥ सि० ॥

लिङ्गदर्शनाच्च ॥ १३ ॥

लिङ्गं दर्शयति, यथा अग्न्यर्थाः पवमानेष्टय इति । किं लिङ्गम् । जीर्यति वा एष आहितः पशुर्यदग्निः, तदेतान्येव अग्न्याधेयस्य हवींषि संवत्सरे निर्वपेत् । तेन वा एष न जीर्यति । तेनैनं पुनर्नवं करोति तच्च सूक्ष्ममिति ॥ १३ ॥ ॥ युक्तिः ॥ आधानस्य पवमानेष्ट्यऽनङ्गताधिकरणम् ॥ ४ ॥

तत्प्रकृत्यर्थं यथान्येऽनारभ्यवादाः ॥ १४ ॥

तदेतदाधानं किं प्रकृत्यर्थम्, उत सर्वकर्मार्थमिति सन्देहः । किं प्राप्तम् । उच्यते तत् प्रकृत्यर्थम् । कथम् । यथाऽन्ये अनारभ्य-

वादाः प्रकृत्यर्थाः, तेनैव हेतुना ॥ १४ ॥ ॥ पूर्व० ॥

सर्वार्थं वाऽऽधानस्य स्वकालत्वात् ॥ १५ ॥

सर्वकर्मार्थं वाऽऽधानम् कोऽर्थः । सर्वकर्मार्थं यदग्निद्रव्यं, तदर्थमाधानं, न प्रकृत्यर्थम् । न प्रकृतीः प्रकृत्य श्रूयते । न च श्रुत्यादयोऽस्य सन्ति, येऽङ्गभावमुपपादयन्ति । अन्येष्वनारभ्य वादेष्वन्यतो निर्ज्ञातऽङ्गभावे ततो विचारः । किं प्रकृतेरङ्गभूतानि विकृतेरिति । तस्मात्तेषु युक्तम् । इह त्वङ्गभावे न कारणमस्ति । तस्मादग्निप्रयुक्तमाधानं, न कर्म्मप्रयुक्तम् । सर्वकर्मार्था अग्नय इति सर्वार्थमित्युच्यते ॥ अपि चास्य स्वतः कालो विधीयते, स न विधातव्यः । यदा ज्योतिष्टोमस्य प्रयोगस्तदा इदं कर्त्तव्यम् । तदा च वसन्तः । एवं यदा दर्शपूर्णमासयोः प्रयोगः, तदा कर्त्तव्यम् । तदा पौर्णमासी अमावास्या वा । अप्रकृत्यर्थन्तु न प्रकृतिप्रयोगे क्रियेत । तत्र कालवचनं युक्तम् । तस्मान्न प्रकृत्यर्थम् ॥ १५ ॥ आधानस्य सर्वार्थताऽधिकरणम् ॥ ५ ॥

तासामग्निः प्रकृतितः प्रयाजवत् स्यात् ॥ १६ ॥

सन्ति पवमानेष्टयः, अग्नये पवमानायेत्येवमाद्याः । तत्र सन्देहः । किं पवमानेष्टिसंस्कृतेऽग्नौ पवमानेष्टयः कर्त्तव्याः, उत नेति । किं प्राप्तम् । तासां खलु पवमानेष्टीनां पवमानेष्टिसंस्कृतोऽग्निः प्रकृतितः स्यात् । कुतः । चोदकसामर्थ्यात्, प्रयाजवत् । यथा तासु प्रयाजा भवन्ति चोदकेन, एवं पवमानेष्टिसंस्कृता अग्नयोऽपि भवेयुः ॥ १६ ॥ ॥ पूर्व० ॥

न वा तासां तदर्थत्वात् ॥ १७ ॥

न वा इष्टिसंस्कारोऽग्नीनां पवमानेष्टिषु स्यात् । कस्मात् । तासां तदर्थत्वात् । ताः पवमानेष्टयोऽग्निसंस्कारार्था इत्युक्तम् । यच्च नामाङ्गभूतं तच्चोदकेन गृह्यते । अग्निप्रयुक्तश्च पवमानेष्टिसंस्कारो, न दर्शपूर्णमासप्रयुक्तः । तेन न चोदकेनाकृष्यते । अपिच पवमानेष्टय इष्टिसंस्कारवर्ज्जितां प्रकृतिमपेक्षन्ते । अविहितत्वात्तस्यामवस्थायां पवमानेष्टीनाम् ॥ १७ ॥ ॥ सिद्धान्तः ॥ पवमानेष्टीनामसंस्कृतेऽग्नौ कर्तव्यताधिकरणम् ॥ ६ ॥

तुल्यः सर्वेषां पशुविधिः प्रकरणाविशेषात् ॥ १८ ॥

ज्योतिष्टोमे, पशुः अग्नीषोमीयो यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति, तथा सवनीयोऽनुबन्ध्यश्च । सन्ति च पशुधर्म्माः- उपाकरणम्, उपानयनम्, अक्ष्णया बन्धो, यूपे नियोजनं, संज्ञपनं, विशसनमित्येवमादयः । ते, किं सर्वेषामग्नीषोमीयसवनीयानुबन्ध्यानामुत अग्नीषोमीयस्य सवनीयस्य वा, उताग्नीषोमीयस्यैवेति । किं प्राप्तम् । अविशेषात् सर्वपशूनाम् । कथमविशेषः । ज्योतिष्टोमप्रकरणे सर्वे पशवः समाम्नाताः । तत्प्रकरणापन्नत्वात् सर्वे पशुधर्म्माः सम्बद्ध्यन्ते । न चैषां तत्र कश्चिद्विशेषः ॥ एवं प्राप्ते ब्रूमः । सवनीयस्यैते धर्म्मा भवेयुः । तुल्यः सर्वेषां पशुविधिः स्याद्, यदि प्रकरणे विशेषो न भवेत् । भवति तु प्रकरणे विशेषः । सवनीयानां प्रकरणे पशुधर्म्माः समाम्नाताः । आग्नेयः पशुरग्निष्टोमे आलभ्यः । आग्नेयो हि अग्निष्टोमः । ऐन्द्राग्नः पशुरुक्थ्ये आलभ्यः । ऐन्द्राग्नानि हि उक्थ्यानि । ऐन्द्रो वृष्णिः षोडशिनि आलभ्यः । ऐन्द्रो वै वृष्णिः ऐन्द्रः षोडशी । सारस्वती मेषी अतिरात्रे आलभ्या । वाग् वै सरस्वती इति प्रकृत्य पशुधर्म्मा आम्नाताः । तस्मात् सवनीयस्य प्रकरणाद् भवितुमर्हति ॥ १८ ॥

स्थानाच्च पूर्वस्य ॥ १९ ॥

यदुक्तं, प्रकरणात् सवनीयार्था इति । एतद् गृह्णीमः । क्रमात्त्वाग्नीषोमीयस्य । तस्य हि क्रमे औपवसथ्ये अहनि समाम्नातम् । तस्माद् द्वयोरपीति ॥ १९ ॥ ॥ पूर्व० ॥

श्वस्त्वेकेषां तत्र प्राक्श्रुतिर्गुणार्था ॥ २० ॥

एकेषां शाखिनां श्वः सवनीयानामाम्नानम् । तदपेक्ष्य इयमेषां गुणार्था पुनः श्रुतिः । कः पुनर्गुणो, यदर्थैषा श्रुतिः । उच्यते । पशून् सङ्कीर्त्य, यथा वै मत्स्योऽविदितो जनमवधुनुते, एवं वा एते अप्रज्ञायमाना जनमवधुन्वते इति एषामविज्ञाने दोषमभिधाय, एभिः कथं सवनानि पशुमन्तीति प्रश्नरूपकेण वपाप्रचारो गुणो विधीयते । तदर्थैषा श्रुतिः । वपाप्रचारेणैकवाक्यत्वात् । किमतो यद्येवम् । न सवनीयानां प्रकरणेन पशुधर्म्माः, क्रमादग्नीषोमीयार्था एवेति । किं पुनस्तत् । श्व आम्नानम् । आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयं पशुमुपाकरोतीति ॥ २० ॥ ॥ सि० ॥

तेनोत्कृष्टस्य कालविधिरिति चेत् ॥ २१ ॥

नैतदस्ति। क्रमादग्नीषोमीयार्था एवेति। प्रकरणात् सवनीयार्थाः। पूर्वेद्युरेवाम्नानं विधानार्थम्। आश्विनवाक्यं कालगुणविधानार्थम्। कथम्। तेन वपाप्रचारेण उत्कृष्टस्य काल एव विधीयते प्रातः सवने वपाप्रचारे चोदिते सति पश्वालम्भोऽपि तत्रैव प्राप्नोति। तत्र कालानियमे प्राप्ते आश्विनं ग्रहं गृहीत्वेति कालमात्रं विधीयते। त्रिवृता यूपं परिवीयोपाकरोतीत्यनुवादः। इतरथा हि परिव्याणस्य कालो विधीयेत, उपाकरणस्य च। तत्रानेकगुणविधानाद् वाक्यं भिद्येत। तस्मात् सवनीयार्थाः पशुधर्म्मा इति ॥ २१ ॥ ॥ आ० ॥

नैकदेशत्वात् ॥ २२ ॥

नैतदेवम्, अग्नीषोमीयार्था एवैते क्रमात्। आश्विनकालं हि आम्नानं विधानार्थम्। गुणार्थे एतस्मिन् वाक्यं भिद्येत, न विधानार्थं। न हि वपाप्रचारेणोत्कृष्टस्य कालविधिः सम्भवति। एकदेशो हि वपाद्रव्यम्। तेन सन्निपातिनो वपासंस्कारादुत्कर्षेणोपाकरणम् ॥ ॥ २२ ॥ ॥ आ० नि० ॥

अर्थेनेति चेत् ॥ २३ ॥

आह। अर्थेन तर्हि उत्कृष्टस्य कालो विधीयते। मुष्टिना पिधाय वपोद्धरणमासीत आ वपाहोमादिति श्रूयते। पूर्वेद्युर्वपोद्धरणं मुष्टिना पिधाय न शक्नुयादेतावन्तं कालमासीनेन अवस्थातुम्। अवश्यमाहारविहारावयस्तेन कर्त्तव्या इति ॥ २३ ॥ ॥ आ० ॥

न श्रुतिविप्रतिषेधात् ॥ २४ ॥

नैतदेवं, श्रुतिविप्रतिषेधो भवेदेवम्। न च श्रुतिविप्रतिषेधः। तृणमुष्टिना पर्णमुष्टिना वा पिधायिष्यते। ननु आस्ते इत्युपवेशने भवति। नाऽवश्यमुपवेशने एव, औदासीन्येऽपि दृश्यते। तद् यथा—धान्यानि परिगृह्य आस्ते, क्षेत्राणि परिगृह्य आस्ते इत्यनुपवेशनेऽपि भवति व्यापारनिवृत्तौ। इहापि तृणमुष्टिना पर्णमुष्टिना वा पिधाय आ वपाहोमादुदासिष्यते। तस्मादाश्विनकालमाम्नानं विधानार्थं, न सवनीयानां प्रकरणे पशु धर्म्माः। तस्मान्न सवनीयार्थाः ॥ २४ ॥

स्थानात्तु पूर्वस्य संस्कारस्य तदर्थत्वात् ॥ २५ ॥

नास्ति सवनीयानां प्रकरणमित्येवं सति पूर्वेणैव हेतुना स्थानेन

पूर्वस्याग्नीषोमीयस्य भवितुमर्हति । संस्कारोऽयं पशुयागप्रयुक्तः, न ज्योतिष्टोमप्रयुक्तः । ज्योतिष्टोमप्रयुक्तत्वे न विशेषः पशूनां स्यात् । पशुयागा अपि हि धर्म्मान् प्रयोक्तुमपूर्वत्वात् समर्थाः प्रकरणवन्तश्च । तस्मात् क्रमादग्नीषोमीयधर्म्मा इति ॥ २५ ॥ ॥ उपसंहारः ॥

लिङ्गदर्शनाच्च ॥ २६ ॥

इतश्च पश्यामोऽग्नीषोमीयार्थाः पशुधर्म्मा इति । कुतः । लिङ्गदर्शनात् । लिङ्गमस्मिन् अर्थे भवति । वपया प्रातःसवने चरन्ति, पुरोडाशेन माध्यन्दिने सवने इति पशुपुरोडाशं दर्शयति । इतरथा समानविधानेषु सर्वेषु पशुष्वग्नीषोमयोर्देवतयोः संस्कारार्थः सन् पुरोडाशः सामर्थ्यादग्नीषोमीयस्य भवेद्, न सवनीयस्य । तयोर्देवतयोरभावात् । दर्शयति च । तस्मादग्नीषोमीयार्था इति ॥२६॥ ॥ हेतुः ॥

अचोदना गुणार्थेन ॥ २७ ॥

इदं परोत्तरं सूत्रम् । आह । ननु छिद्रापिधानार्थः पशुपुरोडाशः । नेति ब्रूमः । अचोदना गुणार्थेन । तस्य छिद्रापिधानार्थेन न चोदना । अर्थवादः स इत्युक्तम् । तस्माद्देवतासंस्कारार्थः । तस्मादग्नीषोमीयार्थत्वे, सवनीये पुरोडाशस्य दर्शनमुपपद्यते, न साधारण्ये । तस्मादग्नीषोमीयार्थाः पशुधर्म्मा इति ॥ २७ ॥ ॥ उपाकरणादीनामग्नीषोमीयधर्मताधिकरणम् ॥ ७ ॥

दोहयोः कालभेदादसंयुक्तं शृतं स्यात् ॥ २८ ॥

अस्ति सायं दोहः । तथा अस्ति प्रातर्दोहः । सन्ति तु दोहधर्माः शाखाहरणं, गवां प्रस्थापनं, प्रस्तावनं, गोदोहनमित्येवमादयः । ते किं सायं दोहार्थाः, उत उभयार्था इति । किं तावत् प्राप्तम् । दोहयोस्तयोरसंयुक्तं धर्म्मैः शृतं भवेत् । कस्मात् सायं दोहस्य हि क्रमे औपवसथ्येऽहनि शाखाहरणादीन् समामनन्ति । तस्मिन्नेवाहनि सायं दोहः तस्मात् क्रमात् सायं दोहार्था दोहधर्म्मा इति ॥ २८ ॥ ॥ पूर्व० ॥

प्रकरणाविभागाद्वा तत्संयुक्तस्य कालशास्त्रम् ॥ २९ ॥

प्रकरणं हि साधारणम् । यथैव दध्नः, एवं पयसः । क्रमाच्च प्रकरणं बलवत्तरम् । तस्मादुभयार्था दोहधर्माः । अपिच, न सायं दोहस्य पूर्वेद्युराम्नानम् । क्व तर्हि ? उत्तरेद्युः । कथम् । एवमामनन्ति-ऐन्द्रं दध्यमावास्यायाम्, ऐन्द्रं पयोऽमावास्यामिति । अमावास्यायां

हि उभयं साङ्गं चोद्यते । स एष सायं दोहोऽर्थात् पूर्वेद्युरनुष्ठीयते । स्वभाव एष दध्नो, यत् पूर्वेद्युरुपक्रान्तमपरेद्युरभिनिर्वर्त्तते । तस्मात् सायं दोहस्य क्रमे आम्नाता इत्येतदेव तावन्नास्ति । अत उभयार्था दोहधर्मा इति ॥ २९ ॥ ॥ सिद्धान्तः ॥ शाखाहरणादीनामुभयदोहधर्मताधिकरणम् ॥ ८ ॥

तद्वत् सवनान्तरे ग्रहाम्नानम् ॥ ३० ॥

अस्ति ज्योतिष्टोमः, ज्योतिष्टोमेन स्वर्गकामो यजेतेति । तत्रैन्द्रवायवाद्या ग्रहाः प्रातःसवने दश आम्नाताः । तत्र धर्मा श्रूयन्ते, उपोप्तेऽन्ये ग्रहाः साद्यन्ते, अनुपोप्ते ध्रुवाः । दशापवित्रेण ग्रहं समार्ष्टीति । सन्त्यपरे माध्यन्दिने सवने, अपरे तृतीयसवने ग्रहाः । तेषु माध्यन्दिनीयेषु तार्त्तीयेषु च सवनेषु सन्देहः । किं सर्वेषु ग्रहधर्माः कर्त्तव्याः, उत प्रातःसवने ये ग्रहास्तेष्विति । किं प्राप्तम् । प्रातःसवनग्रहेषु भवेयुः । तेषां क्रमे समाम्नानाद्, नेतरेषाम् ॥ एवं प्राप्ते ब्रूमः । सवनान्तरे प्रातःसवनान्माध्यन्दिने तृतीयसवने च ग्रहाम्नानं तद्वदेव भवितुमर्हति । सर्वेषां हि तुल्यं प्रकरणम् । यत्रैते धर्माः समाम्नाताः वाक्येन ग्रहमात्रस्य विधीयन्ते । क्रमाच्च वाक्यप्रकरणे बलीयसी । तस्मात् सर्वार्था ग्रहधर्मा इति ॥ ३० ॥ ॥ सादनादीनां सवनत्रयधर्मताधिकरणम् ॥ ९ ॥

रशना च लिङ्गदर्शनात् ॥ ३१ ॥

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः, यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति । तत्र रशना श्रूयते, रशनाधर्माश्च । त्रिवृद् भवति दर्भमयी भवति प्रपिष्टानां कर्त्तव्या चेति । तत्र सन्देहः । किमेते धर्मा अग्नीषोमीयरशनायाः सवनीयरशनायाश्च साधारणाः ? उताग्नीषोमीयरशनाया एवेति । किं प्राप्तम् । प्रकरणादग्नीषोमीयरशनाया इति ॥ एवं प्राप्ते ब्रूमः । उभयोः साधारणा इति । कुतः ॥

लिङ्गदर्शनात् । लिङ्गं भवति । एवमाह, आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं पशुमुपाकरोतीति सवनीयपरिव्याणे रशनां दर्शयति । सा यदि साधारणी, तत एतद्दर्शनमवकल्पते । यद्यग्नीषोमीयायाः, ततोऽप्राकृतात् सवनीयपरिव्याणान्निवर्त्तेत । सवनीये च परिव्याणान्तरमप्राकृतं यत्र त्रिवृत्त्वं दृश्यते । कथम् स-

वै आश्विनं ग्रहं गृहीत्वोपनिष्क्रम्य यूपं परिव्ययतीति । तत्र यदि न साधारणी रशना, वाससा परिव्याणं प्राप्नोति । रशनां तु दर्शयति । तस्मात् साधारणी रशना, तत्साधारण्याच्च तद्धर्मा अपि साधारणाः । तदेतल्लिङ्गाद् रशनासाधारण्यम् । कोऽत्र खलु न्यायः ? इति । उच्यते । प्रकरणादग्नीषोमीयस्य, वाक्याद् यूपमात्रस्येति ॥ ॥ ३१ ॥ रशनात्रिवृत्त्वादीनां पशुधर्मताधिकरणम् ॥ १० ॥

आराच्छिष्टमसंयुक्तमितरैः सन्निधानात् ॥ ३२ ॥

दूराद् यच्छिष्यते ज्योतिष्टोमस्य, यथौपसदानुवाक्याकाण्डे अंश्वदाभ्यौ । तत्र सन्देहः । किं ज्योतिष्टोमसमाम्नाता ग्रहधर्माः कर्त्तव्याः ? उत नेति । किं प्राप्तम् । न कर्त्तव्याः । असन्निधानात् । यथा, पयसा मैत्रावरुणं श्रीणातीति वचनान्मैत्रावरुणस्यैव श्रपणं, न सर्वेषाम् । एवमिदमपि धर्म्मजातं प्रकरणस्थानामेव, न सर्वेषामिति ॥ ३२ ॥ ॥ पूर्व० ॥

संयुक्तं वा तदर्थत्वाच्छेषस्य तन्निमित्तत्वात् ॥ ३३॥

संयुक्तं वा धर्मैरेवञ्जातीयकं स्यादप्रकरणस्थमपि । कुतः । यतः प्रकरणाद् वाक्यं बलीयः । नन्वन्यत्र क्रियमाणा ज्योतिष्टोमस्य नोपकुर्युः । उच्यते । उपकरिष्यन्ति । अंश्वदाभ्ययोस्तदर्थत्वाज्ज्योतिष्टोमार्थत्वाच्छेषोऽयं ग्रहधर्म्मः । ग्रहनिमित्तो ज्योतिष्टोमस्योपकारकः । यावान् ग्रहो ज्योतिष्टोमस्योपकरोति, तस्य सर्वस्य भवितुमर्हति । तस्माद् अंश्वदाभ्ययोरपि ग्रहधर्माः कर्त्तव्या इति॥३३॥सि०॥

निर्देशाद् व्यवतिष्ठेत ॥ ३४ ॥

यदुक्तम्, यथा मैत्रावरुणं पयसा श्रीणातीति । तद् युक्तम् । श्रपणे वचनात् प्रकरणं बाधित्वा व्यवस्थानम् । इह तु विपरीतम् । तत्र सर्वेषु ग्रहेषु प्रकरणं, विशिष्टेषु वाक्यम् । इह तु सर्वेषु ग्रहेषु वाक्यं, विशिष्टेषु प्रकरणम् । तस्मादप्रकरणस्थस्यापि धर्मा इति ॥ ॥ ३४ ॥ ॥ आ० नि० ॥ अंश्वदाभ्ययोरपि सादनादिधर्मवत्त्वाऽधिकरणम् ॥ ११ ॥

अग्न्यङ्गमप्रकरणे तद्वत् ॥ ३५ ॥

अनारभ्याग्निमुच्यते । चित्रिणीरुपदधाति, वज्रिणीरुपदधाति, भूतेष्टका उपदधातीति । सन्ति तु प्रकरणे इष्टकाधर्माः । अखण्डा-

मकृष्णलामिष्टकां कुर्यादिति । तथा, भस्मना इष्टकाः संयुज्यादिति । तत्र सन्देहः । किमप्रकरणे समाम्नातानामिमे धर्माः कर्त्तव्याः ? उत नेति । किं प्राप्तम् । न कर्त्तव्याः । कुतः । असन्निधानादिति प्राप्ते । उच्यते । अग्न्यङ्गमेवञ्जातीयकं तद्वदेव स्याद्, यद्वद् ग्रहाः । प्रकरणाद्धि वाक्यं बलवत् । अमूषां चेष्टकानामग्न्यर्थत्वात् ॥ ३५ ॥ चित्रिण्यादीष्टकानामग्न्यङ्गताधिकरणम् ॥ १२ ॥

नैमित्तिकमतुल्यत्वादसमानविधानं स्यात् ॥ ३६ ॥

ज्योतिष्टोमे श्रूयते– स यदि राजन्यं वा वैश्यं वा याजयेत्, स यदि सोमं विभक्षयिषेत्, न्यग्रोधस्तिभीराहृत्य ताः सम्पिष्य दधनि उन्मृज्य तमस्मै भक्षं प्रयच्छेन्न सोममिति । ज्योतिष्टोमे सन्ति सोमधर्मा, मानम् उपावहरणं क्रयोऽभिषव इत्येवमादयः । तत्र सन्देहः । किं समानविधाना इमे धर्माः सोमस्य फलचमसस्य च ? उत सोमधर्माः, फलचमसस्य तु तद्विकारत्वादिति । गुणकामानां प्रवृत्तिरप्रवृत्तिर्वा प्रयोजनमधिकरणचिन्तायाः ॥

किं प्राप्तम् । समानविधानाः प्रकरणाविभागादिति प्राप्ते । उच्यते । नैमित्तिकमेवञ्जातीयकमसमानविधानं स्यात् । कुतः । अतुल्यत्वात् । अतुल्यः सोमेन फलचमसः । सोमो नित्यवदाम्नातः । फलचमसो नैमित्तिकः । किमतः । यद्येवं, धर्म्मा अपि नित्यवदाम्नाताः न शक्या अनित्यवत् कर्त्तुम् । यदि साधारणाः । तत्र अनारभ्योऽर्थो विधीयेत । अपि च नैमित्तिकः फलचमसः । स सोमधर्म्मान् गृह्णाति । तत्र धर्म्माः साधारणाः सन्तो द्विरुक्ता इत्युच्येरन् । तस्माद् असमानविधानाः ॥ ३६ ॥ मानोपावहरणादीनां सोममात्रधर्मताऽधिकरणम् ॥ १३ ॥

प्रतिनिधिश्च तद्वत् ॥ ३७ ॥

अस्ति प्रतिनिधिः, श्रुते द्रव्येऽपचरति । यथा व्रीहिष्वपचरत्सु नीवाराः । तत्र सन्देहः । किं नीवाराः समानविधानाः ? उत नेति । किं प्राप्तम् ॥ प्रतिनिधिश्च तद्वत् ॥ यथा नैमित्तिकं नित्येन असमानविधानम्, एवं प्रतिनिधिरतुल्यत्वात् । का अतुल्यता । व्रीहीणां विहिताः, न नीवाराणाम् । इयम् अतुल्यता । व्रीहीणां विहिताः, नीवाराणाम् अर्थापत्त्या भवन्ति ॥ ३७ ॥ ॥ पूर्व० ॥

तद्वत् प्रयोजनैकत्वात् ॥ ३८ ॥

नैतदस्ति, असमानविधानः प्रतिनिधिरिति । तद्वत् स्याद्, यद्वत् श्रुतः । न प्रकृतिविकारभावः । कुतः । व्रीहित्वं हि व्रीहिधर्म्माणां व्रीहिव्यक्तौ निमित्तं, न च, व्रीहित्वस्य, स्थाने नीवारत्वं भवतीति श्रूयते । तस्मान्न प्रकृतिविकारभावः । कथं तर्हि नीवारेषु धर्म्मा भवन्तीति । उच्यते । या व्रीहित्वेन परिच्छिन्ना व्रीहिव्यक्तयः, नीवारेषु ताः सन्ति । तासामर्थेन ते धर्म्माः क्रियन्ते । तासां च व्यक्तीनामन्यासां च व्रीहिगतानां तुल्य एव विधिः । का तुल्यता । उभयेऽपि व्रीहित्वलक्षिता इति । तस्मात् समानविधाना इति ॥ ३८ ॥ ॥ सि० ॥

अशास्त्रलक्षणत्वाच्च ॥ ३९ ॥

इतश्च न प्रतिनिधेः श्रुतेन सह प्रकृतिविकारभावः । कुतः ? । अर्थलक्षणत्वात् । अर्थाद्धि प्रतिनिधिः क्रियते, न चाऽर्थेनैतदवगन्तुं शक्यते । व्रीहित्वस्य स्थाने नीवारत्वं भवतीति । तस्मान्न प्रतिनिधेः श्रुतेन सह प्रकृतिविकारभावो भवतीति ॥ ३९ ॥ ॥ युक्तिः ॥ प्रतिनिधिष्वपि मुख्यधर्मानुष्ठानाधिकरणम् ॥ १४ ॥

नियमार्था गुणश्रुतिः ॥ ४० ॥

अथ यः श्रुतः प्रतिनिधिः । तत्र किं सामानविध्यमुत नेति । यथा, यदि सोमं न विन्देत पूतीकानभिषुणुयादिति । असामानविध्यमिति ब्रूमः । अश्रुताद्ध्येतद्विपरीतम् । एवं प्राप्ते, उच्यते ॥ नियमार्था गुणश्रुतिः ॥ अत्राप्यर्थलक्षण एव प्रतिनिधिः । सोमे अविद्यमाने सोमसदृशं द्रव्यं प्राप्तम् तत्र सुसदृशे द्रव्ये प्राप्ते ईषत् सदृशं नियम्यते । अन्यस्मिन् प्रतिनिधातव्येऽन्यत् प्रतिनिधीयते श्रुतस्य स्थाने । न यागद्रव्यत्वेन ॥ ४० ॥ ॥ श्रुतेष्वपि प्रतिनिधिषु मुख्यधर्मानुष्ठानाऽधिकरणम् ॥ १५ ॥

संस्थास्तु समानविधानाः प्रकरणाविशेषात् ॥४१॥

आस्त ज्योतिष्टोमः । तत्र संस्थाः समाम्नाताः । अग्निष्टोमः, उक्थ्यः, षोडशी, अतिरात्र इति । तत्र दीक्षणीयादयो धर्म्माः । तेषु सन्देहः । किं सर्वसंस्थं ज्योतिष्टोमं प्रकृत्य दीक्षणीयादयो धर्म्मा उक्ताः, उताग्निष्टोमसंस्थामभिप्रेत्येति । किं प्राप्तम् । सर्वसंस्थासु

समानं विधानम् । कुतः । प्रकरणाविशेषात् । नास्ति प्रकरणं विशेषो येन ज्ञायेत अग्निष्टोमसंस्थं प्रकृत्य इति । तस्मात् समानविधानाः संस्था इति ॥ ४१ ॥ ॥ पूर्व० ॥

व्यपदेशश्च तुल्यवत् ॥ ४२ ॥

तुल्य इव प्रकरणे व्यपदेशो भवति । यदि अग्निष्टोमो जुहोति, यदि उक्थ्यः परिधिमनक्ति, यदि अतिरात्रः एतदेव यजुर्जपन् हविर्धानं प्रतिपद्येतेति सर्वावस्थस्य विशेषवचनाद् अवगम्यते । यदपि सामान्यं, तदपि सर्वावस्थस्यैवेति, यदि हि न समानं विधानम्, अग्निष्टोमसंस्थस्यैव स्यात् । नेह अग्निष्टोमं सङ्कीर्त्तयेद् । असङ्कीर्त्यमानेऽपि धर्म्मसम्बन्धो भवतीति, सर्वावस्थस्य कीर्त्तनात् सर्वावस्थप्रकरणमित्यवगच्छामः ॥ अपि च श्रूयते, आग्नेयमजमग्निष्टोमे आलभेत, ऐन्द्राग्नं द्वितीयमुक्थ्ये, ऐन्द्रं वृष्णिं तृतीयं षोडशिनीति । द्वितीयस्य तृतीयस्य च दर्शनं सामानाधिकरण्ये घटते । उक्थ्ये हि द्वौ निमित्ते स्तः, अग्निष्टोमस्तोत्रमुक्थ्यस्तोत्रञ्चेति । तत्र द्वौ नैमित्तिकौ आग्नेयः पशुः, ऐन्द्राग्नश्चेति । तेन द्वितीयदर्शनं तत्र युज्यते । एवं षोडशिनि अतिरात्रे च प्रकृतिविकारभावे तु प्रत्यक्षश्रुतैरैन्द्राग्नादिभिरतिदेशेन प्राप्त आग्नेयो बाध्येत । तत्र द्वितीयादिदर्शनं नोपपद्येत । भवति च । तस्मात् सर्वावस्थस्य ज्योतिष्टोमस्य दीक्षणीयादयो धर्म्मा इति ॥ ४२ ॥ ॥ युक्तिः ॥

विकारास्तु कामसंयोगे नित्यस्य समत्वात् ॥ ४३ ॥

नैतदस्ति, समानविधाना इति । किं तर्हि उक्थ्यादयः संस्थाविकारभूताः स्युः । अग्निष्टोमसंस्थमुरीकृत्य दीक्षणीयादयो धर्म्माः समाम्नाताः । कुतः । उक्थ्यादीनां कामसंयोगेन श्रवणात् । पशुकाम उक्थ्यं गृह्णीयात्, षोडशिना वीर्य्यकामः स्तुवीत, अतिरात्रेण प्रजाकामं याजयेदिति । काम्यो गुणः श्रूयमाणो नित्यमर्थं विकृत्य निविशते । कथम् । गुणादेवज्ञातीयके काम्ये फलनिर्वृत्तिः । पशुकाम उक्थ्यं गृह्णीयाद्, न ज्योतिष्टोमकाम उक्थ्यग्रहणकामो वा यथा पशवो भवन्ति, तथा गृह्णीयादित्यर्थः । कथमिति । तत्रावश्यमितिकर्त्तव्यता अपेक्षितव्या, सन्निधानान्नित्यस्येतिकर्त्तव्यतयेति गम्यते । कथं पुनर्येयमितिकर्त्तव्यता, सा नित्यस्येत्यवधार्य्यते, न पुनरस्यैव

काम्यस्य, साधारणी वेति । उच्यते । यत्र यत्र गुणे कामो भवति तत्र तत्र क्रियायां साध्यमानायां, नान्यथा । सा तत्रेतिकर्त्तव्यता या अन्तिकमुपनिपतति, सा साधनस्य वा साध्यस्य वेति सन्दिह्यमाना साध्यस्य भवितुमर्हति, नासौ साध्यस्याभवन्ती साधनेन सम्बध्यते। एवं हि स इतिकर्त्तव्यताविशेषश्चोद्यते । अनेन साधने साधकमुपकुर्यादिति । न चास्ति स प्रकारो, येनासाध्यमानायां क्रियायां तत्र साधकः कृतो भवेत् । तस्मात् साधकस्यापि इतिकर्त्तव्यताविशेषमभ्युपगच्छता, साध्यस्यापीत्येतदभ्युपगमनीयम् । साध्यश्च ज्योतिष्टोमः, साधिकाः संस्थाः । तस्माज्ज्योतिष्टोमस्य तावत् सा इतिकर्त्तव्यतेति सिद्धम् ॥ अथ कस्मान्न साधारणी । नित्यवदाम्नानात्, यदैव ज्योतिष्टोमः, तदैव दीक्षा । यदा तु ज्योतिष्टोमे पशुकामस्तदोक्थ्यसंस्थाः । सर्वदा ज्योतिष्टोमे धर्माः कर्त्तव्याः, एकदा उक्थ्यसंस्थाः । तत्र सर्वदा ज्योतिष्टोमस्य धर्माः कर्त्तव्याः । ते चोक्थ्यादिसंस्थस्य अर्थेनेति पूर्वमुत्तरेण विरुध्यते, यदि सर्वदा नोक्थ्यादीनामर्थेन । अथोक्थ्यादीनामर्थेन न सर्वदा, उभयं विप्रतिषिद्धम् । तस्मान्न साधारणी । नित्यवदाम्नानं च यदि अनित्यस्य स्यात्, नित्यवदाम्नानं तद् अनित्यं क्रियेत । तत्र नित्यवदाम्नानं बाध्येत। तस्मान्नित्यसंस्थस्य ज्योतिष्टोमस्य, न काम्यस्योक्थ्यादिसंस्थस्येति ॥ ४३ ॥ ॥ सि० ॥

अपि वा द्विरुक्तत्वात् प्रकृतेर्भविष्यन्तीति ॥ ४४ ॥

नन्वग्निष्टोमसंस्थापि काम्या श्रूयते । द्वे हि तत्र आम्नाते । एकं नित्यवद् एकं काम्यम् । तत्र द्वयोर्वाक्ययोः सामर्थ्यान्नित्य एव सकामो भविष्यति । नित्यताविघातो नास्तीत्यग्निष्टोमसंस्थस्य ज्योतिष्टोमस्य दीक्षणीयादयो धर्मा भविष्यन्तीति ॥ ४४ ॥ ॥ युक्तिः ॥

वचनात्तु समुच्चयः ॥ ४५ ॥

अथ यदुक्तं, द्वितीयतृतीयदर्शनं समानविधित्वेऽवकल्पते, नान्यथेति । वचनं तद् भविष्यति, न दर्शनम् । ऐन्द्राग्न उक्थ्ये द्वितीयो विधीयते । तथैन्द्रः षोडशिनि तृतीयः ॥ ४५ ॥ ॥ आ० नि० ॥

प्रतिषेधाच्च पूर्वलिङ्गानाम् ॥ ४६ ॥

इतश्च पश्यामः प्रकृतिविकारभाव इति । कुतः । प्रतिषेधात् पूर्व-

लिङ्गानाम् । यदि अग्निष्टोमो जुहोति, यदि उक्थ्यः परिधिमनक्ति, न जुहोतीति होमाभावदर्शनं न स्यात् । प्राप्ते निमित्ते वचनप्रामाण्यात् सामान्यविधेः ॥ ४६ ॥ ॥ युक्तिः ॥

गुणविशेषादेकस्य व्यपदेशः ॥ ४७ ॥

अथ यदुक्तं, व्यपदेश इति । एकस्यैवाधिकृतस्य यथोक्तेन न्यायेन अयमनधिकृतेन गुणेन व्यपदेशः । अग्निष्टोमग्रहणञ्चानुवाद इति ॥ ४७ ॥ ॥ आ० नि० ॥ दीक्षणीयादिधर्माणामग्निष्टोमाङ्गताधिकरणम् ॥ १६ ॥ इति श्रीशबरस्वामिकृतौ मीमांसाभाष्ये तृतीयस्याऽध्यायस्य षष्ठः पादः ॥ ३ ॥ ६ ॥

अथ तृतीये अध्याये सप्तमः पादः ॥ ३ ॥ ७ ॥

प्रकरणविशेषादसंयुक्तं प्रधानस्य ॥ १ ॥

स्तो दर्शपूर्णमासौ, तत्र बर्हिर्बर्हिर्धर्माश्च, तथा वेदिर्वेदिधर्माश्च । तत्र सन्देहः । किं बर्हिरादयो बर्हिरादिधर्माश्च प्रधानस्य, उत अङ्गप्रधानानामिति । किं तावत् प्राप्तम् ॥ प्रकरणविशेषादसंयुक्तं प्रधानस्य ॥ प्रधानस्य एवञ्जातीयका धर्माः । कस्मात् ? । प्रकरणविशेषात् । प्रधानानां हि प्रकरणं, नाङ्गानाम् । प्रकरणेन चैषां सम्बन्धः । तस्मात् प्रधानस्य ॥ १ ॥ ॥ पूर्वपक्षः ॥

सर्वेषां वा शेषत्वस्यातत्प्रयुक्तत्वात् ॥ २ ॥

सर्वेषां वाऽङ्गप्रधानानामिमे धर्माः । नात्र शेषत्वं प्रकरणाद् भवति । उपकारलक्षणं हि तत् । यद् यस्योपकरोति, तत्तस्य शेषभूतम् । सर्वेषां चाङ्गप्रधानानामिमे धर्मा उपकुर्वन्ति । कथमवगम्यते ? । वाक्यात् । वेद्यां हवींषि आसादयतीति हविर्मात्रं वाक्याद् गम्यते । प्रधानहवींषि प्रकरणात् । वाक्यं च प्रकरणाद् बलीयः । तस्माद् बर्हिषि हवींष्यासादयतीति ॥ आह । यदि प्रकरणं वाक्येन बाध्यते, लोकेऽपि बर्हिषामिमे धर्मा उक्ता भवन्ति । तत्र को दोषः । सर्वत्र धर्माः कर्त्तव्याः प्राप्नुवन्ति । उच्यते । प्रकरणाद्दर्शपूर्णमासयोरुपकारका एवेति गम्यते । तस्माल्लौकिकेषु न कर्त्तव्याः । एवं चेद्, अङ्गान्यपि न दर्शपूर्णमासशब्दकानि । तस्मात्तेष्वपि न प्राप्नुवन्ति । उच्यते । यद्यप्यङ्गानि न दर्शपूर्णमासशब्दकानि, दर्शपूर्णमासयोरुप-

कारकाणि । एषु क्रियमाणा धर्मा दर्शपूर्णमासयोरुपकरिष्यन्ति। तस्मादङ्गप्रधानेषु कर्त्तव्या इति ॥ २ ॥ ॥ सिद्धान्तः ॥

आरादपीति चेत् ॥ ३ ॥

पिण्डपितृयज्ञेऽपि बर्हिर्धर्मैर्युज्येत । सोऽपि दाते बर्हिषि वर्त्तते । तस्य चाऽपि बर्हिषाऽस्ति प्रयोजनम् । तदप्याराच्छिष्टधर्म्मवत् स्यात् ॥ ३ ॥ ॥ आशङ्का ॥

न तद् वाक्यं हि तदर्थत्वात् ॥ ४ ॥

न तस्य बर्हिरेतैर्धर्मैर्धर्मवत् । वाक्यं हि एकं दर्शपूर्णमासाभ्यां सह धर्माणाम् : तेन दर्शपूर्णमासयोरुपकारका धर्माः, यद् दर्शपूर्णमासार्थं, तत्र प्राप्नुवन्ति, नान्यत्र । तस्मात् पिण्डपितृयज्ञबर्हिषो न भविष्यन्ति ॥ ४ ॥ ॥ आ० नि० ॥

लिङ्गदर्शनाच्च ॥ ५ ॥

लिङ्गं भवति । एवमाह । स वै ध्रुवामेवाग्रेऽभिघारयति, ततो हि प्रथमावाज्यभागौ यक्ष्यन् भवतीत्यभिघारणस्य आज्यभागार्थतां दर्शयति ॥ ५ ॥ ॥ हेतुः ॥ बर्हिरादीनां दर्शपौर्णमासतदङ्गोभयाङ्गताऽधिकरणम् ॥ १ ॥

फलसंयोगात्तु स्वामियुक्तं प्रधानस्य ॥ ६ ॥

ज्योतिष्टोमे केशश्मश्रुणोर्वपनं पयोव्रतानि तपश्चाम्नातानि । तेषु सन्देहः । किमङ्गप्रधानार्थानि, उत प्रधानार्थानि ? । किं तावत् प्राप्तम् । अङ्गप्रधानार्थानीति पूर्वेण न्यायेन प्राप्तम् ॥ एवं प्राप्ते ब्रूमः । स्वामियुक्तमेतत् । तस्मात् प्रधानस्य । कस्मात् । फलसंयोगात् । पुरुषस्य यागेन अयं सम्बन्धः । यागोऽपूर्वस्य दाता । पुरुषः प्रतिग्रहीता । नन्वपरोऽप्यस्ति सम्बन्धः । यागो निर्वर्त्यः, पुरुषोऽभिनिर्वर्त्तक इति । फलेन तु सम्बन्धो भविष्यतीत्येवमर्थः पुरुषः श्रूयते न हि यागं स साधयति । यागः सत्तया सम्भन्त्स्यते इति । किमिति तर्हि निर्वर्त्तयतः फलं भवतीति । संस्काराश्च संस्कुर्वन्तीत्युच्यन्ते । यत् तस्य संस्कर्त्तव्यस्य प्रयोजनं, तत्र सामर्थ्यं जनयन्तीति । फलं च ग्रहीतुं पुरुषस्य प्रयोजनं, न यागमभिनिर्वर्त्तयितुम् । तस्माद् ये पुरुषसंस्कारास्ते पुरुषं फलप्रतिग्रहणसमर्थं कुर्वन्ति, न यागनिर्वृत्तिसमर्थम् । आह । यदि याग-

निर्वृत्तौ न सामर्थ्यं जनयन्ति, कथं तर्हि यागधर्मास्ते भवन्ति। उच्यते। यागस्य स्वार्थं साधयतः साहाय्ये वर्त्तन्ते। कश्च तस्य स्वार्थः। यदस्य कर्त्ता फलेन सम्बद्ध्यते। तस्मात् स्वामिसंस्काराः प्रधानार्था इति ॥ ६ ॥ ॥ स्वामिसंस्काराणां प्रधानार्थताधिकरणम् ॥ २ ॥

चिकीर्षया च संयोगात् ॥ ७ ॥

ज्योतिष्टोमे श्रूयते, षट्त्रिंशत्प्रक्रमा प्राची चतुर्विंशतिरग्रेण त्रिंशज्जघनेन इयति शक्ष्यामहे इति। तत्र सन्देहः। किमेषा वेदिरङ्गप्रधानार्था, उत प्रधानार्था ? इति। किं तावत् प्राप्तम्। चिकीर्षया च संयोगात् प्रधानार्थेति। का चिकीर्षा। इयति शक्ष्यामहे इति। यच्चिकीर्षितं, तस्यार्थेनैषा श्रूयते, शक्ष्यामहे अस्यां कर्त्तुमिति। प्रधानं च तस्य चिकीर्षितं, नाङ्गानि। प्रधानं हि फलवद्, नाङ्गानि। आह। यदि अङ्गानि न चिकीर्षितानि, किमर्थं क्रियन्ते इति। उच्यते। अचिकीर्षितान्यप्यङ्गानि क्रियन्ते, यद्यपि तानि न चिकीर्ष्यन्ते, तथापि तैरचिकीर्षितैरन्यच्चिकीर्ष्यते। तस्मात् तानि क्रियन्ते इति। यच्चिकीर्षितं तस्य वेदिः। तस्मात् प्रधानार्थेति। स्थितं तावदपर्यवसितम् ॥ ७ ॥ ॥ सौमिकवेद्यादीनामङ्गप्रधानोभयाङ्गताऽधिकरणस्य पूर्वपक्षः ॥

तथाभिधानेन ॥ ८ ॥

स्तो दर्शपूर्णमासौ। तत्र श्रूयते, चतुर्होत्रा पौर्णमासीमभिमृशेत् पञ्चहोत्रा अमावास्यामिति। तत्र सन्देहः। किमङ्गप्रधानार्थमभिमर्शनमुत प्रधानार्थमिति। किं तावत् प्राप्तम्। प्रधानार्थमिति। प्रधाननामधेयञ्चैतत् पौर्णमासी अमावास्येति च। तस्मात् प्रधानस्याभिमर्शनमिति ॥ ८ ॥ ॥ पूर्व० ॥

तद्युक्ते तु फलश्रुतिस्तस्मात् सर्वचिकीर्षा स्यात् ॥ ९ ॥

स्थितादुत्तरम् ॥ यदुक्तं प्रधानं चिकीर्षितं नाङ्गानि। तस्मात् प्रधानस्य वेदिरिति। तन्न। तद्युक्ते फलश्रुतिः। साङ्गात् फलं श्रूयते। तस्मात् साङ्गं चिकीर्षितम्। यद्यप्यङ्गानि न चिकीर्षितानि, तथापि वेद्यां कर्त्तव्यानि। अन्यथा न साङ्गं वेद्यां कृतं भवति ॥ ९ ॥ निरुक्ताऽधिकरणसिद्धान्तः ॥ ३ ॥

गुणाभिधानात् सर्वार्थमभिधानम् ॥ १० ॥

यदुक्तं, प्रधाननामत्वात् पौर्णमासीशब्दस्यामावास्याशब्दस्य च, प्रधानहविषामभिमर्शनमिति । नैतदेवम् । अङ्गहविषामप्यभिमर्शनं स्यात् । कुतः । गुणाभिधानात् । गुणोऽभिमर्शनमित्यभिधानं भवति । कतमत् तदभिधानम् । यद् गुणोऽभिमर्शनमिति ब्रूते । पौर्णमासीममावास्यामिति च द्वितीयान्तं पौर्णमास्यर्थमभिमर्शनं कर्त्तव्यम्, अमावास्यार्थमभिमर्शनं कर्त्तव्यमिति । अतो यत्र यत्र क्रियमाणं पौर्णमास्याममावास्यायां वोपकरोति, तत्र तत्र कर्त्तव्यम् । यद् यत् पौर्णमास्याममावास्यायां वाभिसम्बध्यते, साक्षात्, प्रणाड्या वा, तत्र तत्र क्रियमाणं तयोरुपकरोति । तस्मात् प्रधानहविषामङ्गहविषां च कर्त्तव्यमिति ॥ १० ॥ ॥ सि० ॥ अभिमर्शनस्याङ्गप्रधानोभयाङ्गताधिकरणम् ॥ ४ ॥

दीक्षादक्षिणं तु वचनात् प्रधानस्य ॥ ११ ॥

ज्योतिष्टोमे दीक्षाः श्रूयन्ते । तिस्रो दीक्षा इति । तथा दक्षिणाः श्रूयन्ते । तस्य द्वादशशतं दक्षिणा इति । तत्र सन्देहः । किं दीक्षादक्षिणमङ्गप्रधानार्थमुत प्रधानानामिति । किं प्राप्तम् । पुरुषाणामङ्गप्रधानार्थत्वाद्दीक्षादक्षिणस्याङ्गप्रधानार्थतेति । एवं प्राप्ते ब्रूमः । दीक्षादक्षिणं प्रधानस्य । कुतः । वचनात् । वचनं हि भवति । दीक्षाः सोमस्य, दक्षिणाः सोमस्येति । न हि वचनस्यातिभारो नाम कश्चित् । तस्माद्दीक्षादक्षिणं वचनात् सोमस्येति ॥ ११ ॥

निवृत्तिदर्शनाच्च ॥ १२ ॥

निवृत्तिं दीक्षाणां दर्शयति । कथम् । अध्वर्य्यो यत् पशुना अयाक्षीरथ कास्य दीक्षेति, यत् षड्ढोतारं जुहोति सास्य दीक्षेति । असत्यामपि दीक्षायां वचनं भवति । तस्माद्, अङ्गानां दीक्षादक्षिणमिति ॥ १२ ॥ युक्तिः ॥ दीक्षादक्षिणयोः प्रधानार्थताधिकरणम् ॥ ५॥

तथा यूपस्य वेदिः ॥ १३ ॥

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः । यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति । तत्र यूपं प्रकृत्य श्रूयते, वज्रो वै यूपो यदन्तर्वेदि मिनुयात्तन्निर्दहेत्, यद् बहिर्वेद्यनवरुद्धः स्यादर्द्धमन्तर्वेदि मिनोति अर्द्धं बहिर्वेदि अवरुद्धो भवति, न निर्दहतीति ॥ तत्र सन्देहः । किमन्तर्वेदि इति यूपाङ्गभावेन वेदिरुपदिश्यते ?उत अर्द्धम् अन्तर्वेदि

अर्द्धं बहिर्वेदीति देशलक्षणार्थम् उच्यते ? इति । कथं यूपाऽङ्गभावेन कथं वा देशलक्षणेति । यदि यूपार्द्धस्य वेद्यन्तरस्य च सम्बन्धो विवक्षितः, एवं वेदिसम्बद्धो यूपः कर्त्तव्यः, ततो यूपाङ्गभावेन । अथ यस्मिन् देशे मीयमानस्यार्द्धं वेद्यभ्यन्तरे, अर्द्धं च बहिः, स देश उपदिश्यते । ततो देशलक्षणा ॥ किं प्राप्तम् । तथा यूपस्य वेदिर्यथा दीक्षादक्षिणं प्रधानस्य, तथा यूपस्य वेदिः, तथा यूपो मातव्यः, तथा मीयमानस्यार्द्धं वेद्यभ्यन्तरे भवति । एवं वेदिश्रुतिरप्यनुग्रहीष्यते, इतरथा वेदिशब्दो लक्षयेद्देशम् । श्रुतिलक्षणाविषये श्रुतिर्न्याय्या, न लक्षणा । तस्माद् यूपाङ्गभावेन वेदिर्निर्दिश्यते ॥१३॥ पूर्व० ॥

देशमात्रं वाऽशिष्येणैकवाक्यत्वात् ॥ १४ ॥

देशमात्रं वा वेदिशब्देन लक्ष्यते, न वेदियूपाङ्गम् । कुतः ? ॥ अशिष्येणैकवाक्यत्वात् ॥ अर्द्धमन्तर्वेदि मिनोत्यर्द्धं बहिर्वेदीत्येतेनैकवाक्यता या, सा शासितव्येन, यदि देशलक्षणा । अथ यूपाऽङ्गभावेन वेद्या निर्देशः, ततो न शासितव्यो बहिर्वेदिनिर्देशो भवति । वेद्यां यूपस्याङ्गभावेनोपदिश्यमानायाम्, अर्द्धं बहिर्वेदि इत्येतदुच्चार्यमाणं न कस्मिँश्चिदुपकारे वर्त्तते ॥ अथ बहिर्वेदिदेशमपि यूपाऽङ्गभावेनोपदिशेद्वाक्यम्भिद्येत । तस्माद् यूपाङ्गभावेन वेद्या निर्देशो बहिर्वेदिशब्दः सर्वथा न शासितव्यः । यदि तु देशलक्षणा, ततो विशिष्टे देशे लक्ष्यमाणेऽवश्यवक्तव्यो बहिर्वेदिशब्दो भवति । अनुच्यमाने वेद्यभ्यन्तरे यस्मिन् कस्मिंश्च प्रदेशे यूप इति गम्यते । अथ पुनर्बहिर्वेदिशब्दे श्रूयमाणे, यतरस्मिन् देशे मीयमानस्यार्द्धमन्तर्वेदि अर्द्धं बहिर्वेदि, स देशो लक्षयितुमिष्टो भवति । स च बहिर्वेदिशब्देन विना न शक्यते लक्षयितुमित्यवश्यं शासितव्यो भवति । तस्माद्देशलक्षणेति ॥ १४ ॥ सि० ॥ अन्तर्वेदेर्यूपानङ्गताधिकरणम्॥६॥

सामिधेनीस्तदन्वाहुरिति हविर्द्धानयोर्वचनात् सामिधेनीनाम् ॥ १५ ॥

ज्योतिष्टोमे श्रूयते, उत यत् सुन्वन्ति सामिधेनीस्तदन्वाहुरिति । हविर्द्धानयोर्यस्मिन् हविर्द्धाने सुन्वन्ति, तत् सामिधेनीभिः सम्बन्धयेदित्यर्थः । तत्र सन्देहः । किं सामिधेनीनामङ्गभावेन हविर्द्धानं चोद्यते, हविर्द्धानविशिष्टाः सामिधेन्योऽनुवक्तव्याः ? उत हवि-

र्धानेनामूषामनूच्यमानानां देशो लक्ष्यते ? इति । किं तावत् प्राप्तम् । सामिधेनीनामङ्गत्वेन हविर्धानं चोद्यते । यस्मिन् हविर्धाने सुन्वन्ति, तत् सामिधेनीभिः सम्बन्धयेदिति । तेन हविर्धानसम्बद्धाः सामिधेन्योऽनुवक्तव्या इति वचनात् सामिधेन्यङ्गभावे सति हविर्धानश्रुतिरनुग्रहीष्यते । इतरथा देशं लक्षयेदिति । तस्मात् सामिधेन्यङ्गं हविर्धानम् ॥ १५ ॥ ॥ पूर्वपक्षः ॥

देशमात्रं वा प्रत्यक्षं ह्यर्थकर्म सोमस्य ॥ १६ ॥

देशलक्षणार्थं वा एतदुच्यते । यस्मिन् सुन्वन्ति, तस्मिन् देशे सामिधेन्योऽनुवक्तव्या इति । प्रत्यक्षं हि अर्थकर्म सोमस्य तेन क्रियते । दक्षिणे हविर्धाने सोममासादयतीति, सोमासादनार्थं तावदेतदुपादेयम् । सामिधेन्योऽपि अग्निसमिन्धनार्थमुपादेया इति । इह त्वेतावच्छ्रूयते, यस्य हविर्धानस्य समीपे सुन्वन्ति तत्सम्बद्धाः सामिधेन्योऽपि अग्निसमिन्धनार्थमुपादेया इति । तत्र न ज्ञायते, किं सामिधेन्यः सम्बद्धाः हविर्धानस्योपकुर्वन्ति ? किं हविर्धानं सामिधेनीनामिति । तदुच्यते । सामिधेन्यस्तावद्धविर्धानस्य नोपकुर्वन्ति । न हि तावद् विधीयन्ते, सामिधेन्योऽनुवक्तव्या इति । किं तर्हि ? हविर्धानविशेषसम्बन्धस्तासां विधीयते । न चाविहितमङ्गं भवति । नाप्येवं विधीयते, हविर्धानमासामनूच्यमानानामुपादातव्यं सम्बन्धयितुमिति । कथं तर्हि ? हविर्धानविशेषसम्बन्धः सामिधेनीनां श्रूयते । हविर्धानसम्बन्धो विधीयते । न च सामिधेनीसम्बन्धो हविर्धानस्य प्राप्तः, यो विशेषार्थमनूद्येत । केन तर्हि हविर्धानस्य सम्बन्धः । प्रत्यक्षं हि अर्थकर्म सोमस्य, न तु सामिधेनीकर्म प्रत्यक्षं हविर्धानस्य । भवति तु देशस्य सामिधेनीसम्बन्धः । अपरेण वेदिमिति होतुर्देशो लक्षितः । स उत्तरस्य दक्षिणस्य वा हविर्धानस्य समासन्नः । तत्र यत् सुन्वन्ति, तदन्वाहुरित्युपपद्यते वचनम् । तस्माद्देशलक्षणार्थं हविर्धानग्रहणम् ॥

अथैवमभिसम्बन्धः कस्मान्न भवति । यस्मिन् हविर्धाने सुन्वन्ति, तस्य हविर्धानस्य सामिधेनीसम्बन्ध इति । नैवं शक्यम् । एवं द्वावर्थौ विधातव्यौ भवतः । हविर्धानसम्बन्धो, हविर्धानविशेषसम्ब-

न्धश्च । तत्र वाक्यमिद्यते । तस्मान्नैवमभिसम्बन्ध इति ॥१६॥ सि०॥

समाख्यानं च तद्वत् ॥ १७ ॥

समाख्यानं च तद्वदेव भवति । यथाऽस्माभिर्न्याय उपदिष्टः सोमार्थं हविर्धानमिति ॥१७॥ ॥ युक्तिः ॥ हविर्धानस्य सामिधेन्यऽनङ्गताधिकरणम् ॥ ७ ॥

शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात् तस्मात् स्वयं प्रयोगे स्यात् ॥ १८ ॥

इह कर्माण्युदाहरणम् । अग्निहोत्रं जुहुयात् स्वर्गकामः, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत, ज्योतिष्टोमेन स्वर्गकामो यजेतेति । तत्र सन्देहः । किमेतानि कर्माणि स्वयमनुष्ठातव्यानि, उतान्योत्सर्गमात्रं स्वयं कुर्य्यात्, शेषमन्यः स्वयं वा ? उत शेषमन्य एवेति । किं प्राप्तम् । स्वयं प्रयोगे स्यात् । कुतः । यतः स्वयं प्रयुञ्जानस्य फलं भवति । कथमवगम्यते ॥ तल्लक्षणत्वात् ॥ शब्दोऽस्यार्थस्य लक्षणं, स्वयं प्रयुञ्जानस्य फलं भवतीति । कतमः स शब्दः । स्वर्गकामो यजेतेति । यः स्वर्गं कामयते, स एवोच्यते, यागे कर्त्ता भवन् फलं साधयेदिति । साङ्गे च कर्त्ता भवन् फलं प्राप्नोति । तस्मात् स्वयंप्रयोगे स्यात् ॥ १८ ॥

उत्सर्गे तु प्रधानत्वात् शेषकारी प्रधानस्य, तस्मादन्यः स्वयं वा स्यात् ॥ १९ ॥

उत्सर्गे प्राधान्यमस्ति । कथम् । य उत्सर्गं करोति तेन सर्वं कृतं भवति । कथम् । परिक्रय उत्सर्गः । तेन आनताः सर्वं कुर्वन्ति । तस्माद् यः परिक्रयं करोति तेन स्वयमेव सर्वं कृतं भवति । तस्मादुत्सर्गमात्रं स्वयं कुर्य्यात् । शेषमन्यः स्वयं वा ॥ १९ ॥ ॥ पूर्व० ॥

अन्यो वा स्यात् परिक्रयाम्नानाद्विप्रतिषेधात् प्रत्यगात्मनि ॥ २० ॥

शेषस्यान्य एव स्यात् कर्त्ता । कुतः परिक्रयस्याम्नानत्वात् । पुरुषानतिप्रकारेषु बहुषु प्राप्तेषु परिक्रयो नियतः । तस्मात् परिक्रयेणानतैः सर्वे पदार्थाः कर्त्तव्या इति । विप्रतिषिद्धश्चात्मनि परिक्रयः । यदि स्वयं कुर्य्याद् अपरिक्रीतेन कृतं स्यात् । तत्र परिक्रयाम्नानान-

र्थक्यम् । अदृष्टार्थो वा प्रतिज्ञायेत । तस्मादन्यैः परिक्रीतैः शेषाः पदार्थाः कर्त्तव्या इति । उत्सर्गे तु स्वयं कुर्वता सर्वं स्वयं कृतं भवति ॥ २० ॥ ॥ सि० ॥ अङ्गानामन्यद्वाराऽनुष्ठानाधिकरणम् ॥ ८ ॥

तत्रार्थात् कर्तृपरिमाणं स्यादनियमोऽविशेषात् ॥ २१॥

तत्र तैः परिक्रीतैः कर्त्तव्येष्वनियमेन कर्तृपरिमाणं स्यात् । कुतः । अविशेषात् । न कर्तृपरिमाणे विशेषः कश्चिदाम्नायते । अर्थेन तत्परिमाणं यावद्भिरसाविति कर्त्तव्यता निर्वर्त्तते, तावतो वृणीते ॥ ॥ २१ ॥ ॥ पूर्व० ॥

अपि वा श्रुतिभेदात् प्रतिनामधेयं स्युः ॥ २२ ॥

यावन्ति कर्तृनामधेयानि कर्माणि श्रूयन्ते, तावन्तो वरीतव्या भिद्यन्ते । तानि च नामधेयश्रवणानि । तान् पुरोऽध्वर्युर्विभजति, प्रतिप्रस्थाता मन्थिनं जुहोति, नेष्टा पत्नीमभ्युदानयति, उन्नेता चमसाननुन्नयतीति । तथा प्रस्तोता प्रस्तौति, उद्गाता उद्गायति, प्रतिहर्त्ता प्रतिहरति, सुब्रह्मण्यः सुब्रह्मण्यामाह, होता प्रातरनुवाकमनुब्रूते, मैत्रावरुणः प्रेष्यति, चानुचाह, अच्छावाको यजति, ग्रावस्तुद् ग्रावस्तोत्रीयामन्वाह । एतावद्भिः कर्माणि प्रयोजनम् । तेन तेऽवश्यमेतानि यथाश्रुतानि कर्त्तुं वरीतव्याः । एतद्व्यतिरिक्तोऽन्यः पदार्थो न विद्यते । योऽपि वाक्येन नोपदिष्टः, स समाख्यया गम्यते । तस्मादेतावतो वृणीत इति ॥ २२ ॥ ॥ सि० ॥

एकस्य कर्मभेदादिति चेत् ॥ २३ ॥

एवं चेत् प्रतिज्ञायते, एतावतो वृणीत इति । तन्न । यो यस्तत्कर्म करिष्यतीति सङ्कल्पते, स स तत्तच्छब्दाभिधेयो भवति । एकोऽपि बहून् पदार्थान् कर्त्तुं बहुभिर्नामधेयैरुच्येत । तस्मादनियमः ॥२३॥आ०॥

नोत्पत्तौ हि ॥ २४ ॥

नैतदेवम्, उत्पत्तौ पुरुषाणाम् । उत्पाद्यमानेषु पुरुषेषु नामधेयानि भिद्यन्ते । ब्रह्माणं वृणीते, होतारं वृणीते, उद्गातारं वृणीते, अध्वर्युं वृणीते इत्येवमादि । तस्मात् कर्माणि तैरेवन्नामकैः प्रयोजनम् । अवश्यं ते वरीतव्याः । तस्माद् एषां वरणे सङ्कीर्त्तनं न विधिः । प्रयोजनस्याभावान्नानुवादः । न वेदे तावन्तो वरीतव्या इति ब्रूयात् । अनर्थकमेव स्यात् । शक्नोति चेदं प्रत्याययितुं सङ्ख्याविशेषम् । त-

स्मादू यः सङ्ख्याविशेष एषां प्रतीयते तदर्थमेतद्वचनम्। तस्मात् षोडश कर्त्तारो वरीतव्याः, सोमस्तावत्कर्तृकश्च स्यात् । एवं दर्श-पूर्णमासयोरपि ॥ २४ ॥ ॥ आ० नि० ॥ परिक्रीतानाम् ऋत्विजां संख्याविशेषनियमाधिकरणम् ॥ ९ ॥

चमसाध्वर्यवश्च तैर्व्यपदेशात् ॥ २५ ॥

सन्ति ज्योतिष्टोमे चमसाध्वर्यवः । चमसाध्वर्यून् वृणीत इति । तेषु सन्देहः । किमेषामन्यतमाः, उतैतेभ्योऽन्ये ? इति । किं तावत् प्राप्तम् । एतावतां संकीर्तनादेषामेवान्यतमा इति प्राप्ते, ब्रूमः । चमसाध्वर्यवश्चापरे भवेयुस्तेभ्योऽन्ये इति । कुतः । तैर्व्यपदेशात् । तैः परिगणितैरेषां व्यपदेशो भवति । मध्यतःकारिणां चमसाध्वर्यवो, होत्रकाणां चमसाध्वर्यव इति ॥ ननु य एव प्रकृतास्ते चमसाध्वर्य्यवो भवेयुः । नेति ब्रूमः । कुतः ॥ तैर्व्यपदेशात् ॥ मध्यतःकारिणां चमसाध्वर्य्यवो होत्रकाणां चमसाध्वर्य्यव इति । षष्ठी सम्बन्धे सति भवति । ऋत्विग्भिस्ते व्यपदिश्यन्ते । ऋत्विजस्तेषां स्वामिनो, न यजमानः। यजमानपुरुषेभ्यश्चैतेऽन्य इति नः प्रतिज्ञातम् । न यजमानेन चमसाध्वर्य्यवं कर्त्तुं वरीतव्याः, ऋत्विग्भिस्ते वरीतव्या इति । अपिचैषामुत्पत्तिवाक्ये एव भेदः । चमसाध्वर्यून् वृणीत इति ॥ २५ ॥ चमसाध्वर्यूणां पृथक्त्वाधिकरणम् ॥ १० ॥

उत्पत्तौ तु बहुश्रुतेः ॥ २६ ॥

तेष्वेव सन्देहः । किमनियमः, एको द्वौ बहवो वा ? उत बहव एवेति । अनियम इति प्राप्ते, उच्यते । बहव इति । कुतः ॥ उत्पत्तौ बहुश्रुतेः ॥ चमसाध्वर्य्यव इत्येषामुत्पत्तौ बहुश्रुतिर्भवति । तस्माद् बहव इति ॥ २६ ॥ चमसाध्वर्यूणां बहुत्वनियमाधिकरणम् ॥ ११ ॥

दशत्वं लिङ्गदर्शनात् ॥ २७ ॥

ज्योतिष्टोमे चमसाध्वर्यवः । ते च बहव इत्युक्तम् । कियन्तो बहव इति सन्देहे । त्रयो बहुवचनसामर्थ्यादिति प्राप्ते ब्रूमः ॥ दशत्वं लिङ्गदर्शनात् ॥ ते दश भवेयुः । तथाहि । लिङ्गं ज्योतिष्टोमविकारे दशपेये श्रूयते, दश चमसाध्वर्यवो दश दश एकैकं चमसमनुसर्पन्तीति । एतस्मात् कारणाद्दशपेयो भवतीति ब्रुवन् दश चमसाऽध्वर्यून् दर्शयति । यदि त्रयो भवेयुरेतद्दर्शनं नोपपद्येत ।

तस्मात् त्रीनतीत्यैषा सङ्ख्या। यदि च दश न भवेयुर्नोपपद्येतैतद्दर्शनम्। तस्माद् भवन्ति दश। दश चैषां स्वामिनः। तस्मात् प्रयोजनभावाद्दशसङ्ख्योपादीयते। तस्यां चोपादीयमानायामपरापि सङ्ख्याऽनुगृह्यते। तेनापि दश भवेयुः ॥ २७ ॥ ॥ चमसाध्वर्यूणां दशसंख्यानियमाधिकरणम् ॥ १२ ॥

शमिता च शब्दभेदात् ॥ २८ ॥

अस्ति शमिता, शमितारमुपनयीतेति। स किं सङ्कीर्त्तितानामन्यतमः, उत अन्यस्तेभ्य इति। किं प्राप्तम्। तेषां वरणे सङ्कीर्त्तनात्, तेषामन्यतम इति प्राप्ते, उच्यते ॥ शमिता च शब्दभेदात् ॥ शब्दो भिद्यते। एवंसंज्ञकेनेदं कर्म कर्त्तव्यमिति। तस्मादेवंसंज्ञक उत्पादयितव्यः। अस्य सङ्कीर्त्तनात् सङ्ख्याविवृद्धिर्गम्यते। तस्मादन्यः शमिता स्यात्। अपि च, क्लोमा चोर्द्धं वैकर्त्तनं च शमितुः। तद् ब्राह्मणाय दद्याद् यद्यब्राह्मणः स्यादिति अब्राह्मणाशङ्का भवति। सा ऋत्विजि नोपपद्यते ॥ २८ ॥ ॥ पूर्व० ॥

प्रकरणाच्चोत्पत्त्यसंयोगात् ॥ २९ ॥

सत्यं सङ्ख्याविवृद्धिर्गम्यते, न तूत्पद्यमानेषु। या त्वनुत्पत्तिस्तेषु गम्यते, तत्रैकस्य कर्मभेदादित्येवमप्यवकल्पते। यत्तूक्तम्, अब्राह्मणाशङ्का भवतीति। यजमानाभिप्राया सा, यदि अब्राह्मणो यजमानः स्यादिति। ननु यदि अब्राह्मणः स्यादिति प्रकृतः शमिता सम्बद्ध्यते। उच्यते। शमयतीति शमिता। यौगिक एष शब्दः प्रकृतेष्वप्यवकल्पते। शामित्रमप्याध्वर्यवे समाम्नानादध्वर्युणा कर्त्तव्यम्। तस्मात्, शमनादध्वर्युः शमिता। एवं सति अप्रकृतो यजमानः सम्बध्यते ॥ २९ ॥ ॥ सि० ॥ शमितुरपृथक्त्वाधिकरणम् ॥ १३ ॥

उपगाश्च लिङ्गदर्शनात् ॥ ३० ॥

ज्योतिष्टोमे सन्त्युपगा नाम, ते शब्दभेदात् सङ्ख्याविवृद्धिं प्रत्याययन्तीत्यध्वर्य्वादिभ्योऽन्ये इति प्राप्ते ब्रूमः। तेषामेव केचित् स्युरिति। कस्मात्। उत्पत्तौ परिगणनाद् यौगिकत्वाच्च शब्दस्य। लिङ्गमिदं भवति। नाध्वर्युरुपगायेदिति। यद्येभ्योऽन्ये भवेयुर्नाध्वर्युं प्रतिषेधेत्, अप्राप्तत्वात्। यतस्तु प्रतिषेधति, अतोऽवगच्छामः– उत्पत्तौ सङ्कीर्त्तितानामेवान्यतम इति ॥ ३० ॥ उपगाऽपृथक्त्वाऽधिकरणम् ॥ १४ ॥

विक्रयी त्वन्यः कर्मणोऽचोदितत्वात् ॥ ३१ ॥

अस्ति सोमविक्रयी । तत्र सन्देहः । स किमध्वर्य्वादीनामन्यतमः, उतैभ्योऽन्य इति । किं प्राप्तम् । तेषां सङ्कीर्त्तनात्तेषामन्यतम इति प्राप्ते ब्रूमः । विक्रयी त्वन्यः स्यादिति । विक्रयो न चोद्यते, क्रयश्चोद्यते । तत्र अर्थाद्विक्रयः । ज्योतिष्टोमस्य च पदार्थान् कर्त्तुमध्वर्य्वादय उत्पाद्यन्ते, न तु विक्रयो ज्योतिष्टोमस्य श्रूयते । तस्मान्नाध्वर्य्वादीनामन्यतम इति ॥ ३१ ॥ ॥ सोमविक्रेतुः पृथक्त्वाधिकरणम् ॥ १५ ॥

कर्म्मकार्य्यात् सर्वेषां ऋत्विक्त्वमविशेषात् ॥ ३२ ॥

ये एते पुरुषा ज्योतिष्टोमस्य श्रूयन्ते, ते किं सर्वे एते ऋत्विजः, उत केचिदेषामिति । किं प्राप्तम् । सर्वे । कुतः । कर्म्मकार्य्यात् । सर्वे यागस्य साधनं कुर्वन्ति, तस्मात् सर्वे ऋतौ यजन्ति । ये च ऋतौ यजन्ति ते ऋत्विजः । न कश्चिद्विशेष आश्रीयते– इमे एव ऋतौ यजन्तीति ऋत्विजः, इमे नेति । तस्मात् सर्वेषाम् ऋत्विक्त्वम् ॥ ननु परिसङ्ख्या श्रूयते, सौम्यस्याध्वरस्य यज्ञक्रतोः सप्तदश ऋत्विज इति । उच्यते । परिसङ्ख्यायां बहवो दोषाः सन्तीत्यवयुत्यवादोऽयं भविष्यति ॥ ३२ ॥ ॥ पूर्व० ॥

न वा परिसङ्ख्यानात् ॥ ३३ ॥

न वा सर्वे । कस्मात् ? ॥ परिसङ्ख्यानात् ॥ एवं हि श्रूयते, सौम्यस्य अध्वरस्य यज्ञक्रतोः सप्तदश ऋत्विज इति । स एष न विधिः । बहुतराणां प्राप्तत्वात् । नानुवादः । प्रयोजनाभावात् । न चेत् परिसङ्ख्यापि, आनर्थक्यमेव स्यात् । ननु परिसङ्ख्यायां स्वार्थहानं परार्थकल्पना प्राप्तबाधश्च । उच्यते । स्वार्थहानमदोषः प्राप्तत्वात् । परार्थकल्पना च प्रत्ययात् । बहूनाम् ऋत्विक्त्वे ज्ञाते पुनः सप्तदशर्त्विज इत्युच्यते । सप्तदशभिर्ऋत्विक्शब्दस्य सम्बन्धः पुनः प्रकाश्यते, अधिकैश्च न प्रकाश्यते । तत्र विज्ञायते एतत्– ऋत्विक्शब्दस्य पुरुषैः सम्बन्धे पुनः प्रकाश्यमाने सप्तदशभ्योऽभ्यधिका वर्जिता इति गम्यते तत्र किं सप्तदशभिः सम्बन्धो विवक्षितः, किं वा अधिकानां वर्जनमिति । सप्तदशसम्बन्धस्याप्रयोजकत्वादधिकानां वर्जनं विवक्षितमिति गम्यते । आह । ननु प्रतिषिद्ध्यमानेष्व-

ऽत्यधिकेषु प्रतिषेधो न प्राप्नोति । न हि ते ऋतौ न यजन्ति । न वा ऋतौ यजन्तो न ऋत्विजः स्युः । उच्यते । सत्यम् । न, प्रतिषेधाद् ऋत्विक्शब्देन न सम्बद्ध्यते, किन्तु प्रतिषेधसामर्थ्याद्धि ऋत्विक्कार्यं न भवन्ति । किं पुनर्ऋत्विक्कार्यम् । ऋत्विज उपवसन्तीति, ऋत्विजो वृणीते, ऋत्विग्भ्यो दक्षिणा ददातीति । आह । यद्यृत्विजां कार्यं, कथं तत् केषाञ्चिदृत्विक्शब्दकानां न स्यात् । उच्यते । एवं तर्हि द्विविधोऽयं ऋत्विक्शब्दः— ऋतुयजननिमित्तो, वरणभरणनिमित्तश्च । तत्र यागनिमित्तस्य ग्रहणमनर्थकम् । तस्माद् वरणभरणनिमित्तो गृह्यते इति ॥ आह । नन्वितरेतराश्रयमेवं भवति । ये ऋत्विजस्ते वरीतव्याः, ये व्रियन्ते ते ऋत्विज इति । तदितरेतराश्रयम् । उच्यते । न हि ऋत्विजो वृणीते इत्ययमर्थः, ऋत्विजः सन्तो वरीतव्या इति । कथं तर्हि । वरणेन ऋत्विजः क्रियन्ते इति । एवं द्वितीयानिर्देशो युक्तो भविष्यति । अध्वर्युं वृणीते इत्येवँलक्षणः । दृष्टार्थता च वरणस्य भविष्यति ॥ कथमात्मेच्छया अध्वर्युर्भवतीति चेत् कश्चिद् ब्रूयात्, भवतीति ब्रूयाम् । कथम् । एवंशब्दकेनाऽयं पदार्थः कर्त्तव्य इति, नास्त्येवंशब्दकः । यश्च नास्ति, स यदि शक्यते कर्त्तुं, कर्त्तव्यो भवति । यथा, जुह्वा जुहोतीति अविद्यमाना जुहूः क्रियते । एवमेतदपि द्रष्टव्यम् । तत्रार्थादनियमेन ऋत्विक्शब्दसम्बन्धे कर्त्तव्ये, करणविशेषेण कर्त्तव्य इति नियम्यते । तस्मान्नेतरेतराश्रयम् । तस्मात् सप्तदशैव ऋत्विजः कर्त्तव्या इति परिसङ्ख्या । सप्तदश ऋत्विजः संस्कारैः कर्त्तव्या इति ॥ ३३ ॥ ॥ सि० ॥

पक्षेणेति चेत् ॥ ३४ ॥

एवं चेन्मन्यसे, यथोक्तपक्षेणैतदेवमुच्येत । अवयुत्यवादपक्षेण सप्तदशर्त्विज इति । तत् परिहर्त्तव्यम् ॥ ३४ ॥ ॥ आ० ॥

न सर्वेषामनधिकारः ॥ ३५ ॥

नैतदेवम् । नात्र सर्वेषां पुरुषाणां वचनं, यानधिकृत्य अवयुत्यवादो भविष्यति । यत्र परा सङ्ख्या कीर्त्यते तत्राऽवयुत्यवादो भवति । यथा द्वादशकपाले यदष्टाकपालो भवतीति । न चेह परा सङ्ख्या कीर्त्यते । तस्मान्नाऽवयुत्यवाद इति ॥ ३५ ॥ ॥ आ० नि० ॥ ऋत्विगितिनाम्नोऽसर्वगामिताधिकरणम् ॥ १६ ॥

नियमस्तु दक्षिणाभिः श्रुतिसंयोगात् ॥ ३६ ॥

सप्तदश ऋत्विज इति समधिगतम् । कतमे ते सप्तदश इति इदं चिन्त्यते । किं प्राप्तम् । अज्ञानम् । एवं प्राप्ते ब्रूमः ॥ नियमस्तु दक्षिणाभिः श्रुतिसंयोगात् ॥ दक्षिणासम्बन्धेन नियम्येरन् । एवं ह्याम्नायते । ऋत्विग्भ्यो दक्षिणां ददातीति । एवमभिधाय दक्षिणादानक्रमपरे वाक्ये ब्रह्मादयः श्रूयन्ते । अग्नीधेऽग्रे ददातीति, ततो ब्रह्मणे, ततोऽमुष्मै च अमुष्मै चेति केचिदेव विशिष्टाः श्रूयन्ते । एवं ये श्रूयन्ते ते तावद् ऋत्विजः । ततोऽभ्यधिका नान्ये भवितुमर्हन्ति । दक्षिणाभिर्नियम इति ॥ ३६ ॥

उक्त्वा च यजमानत्वं तेषां दीक्षाविधानात् ॥ ३७ ॥

ये ऋत्विजस्ते यजमाना इत्येवमभिधाय ब्रह्मादीनां दीक्षाक्रमपरे च वाक्ये दीक्षां दर्शयति । कथम् । अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति, तत उद्गातारं, ततो होतारम् ।

ततस्तं प्रतिप्रस्थाता दीक्षयित्वा अर्द्धिनो दीक्षयति, ब्राह्मणाच्छंसिनं ब्रह्मणः, प्रस्तोतारम् उद्गातुः, मैत्रावरुणं होतुः । ततस्तं नेष्टा दीक्षयित्वा तृतीयिनो दीक्षयति, अग्नीधं ब्रह्मणः, प्रतिहर्त्तारम् उद्गातुः, अच्छावाकं होतुः । ततस्तमुन्नेता दीक्षयित्वा पादिनो दीक्षयति, पोतारं ब्रह्मणः, सुब्रह्मण्यम् उद्गातुः, ग्रावस्तुतं होतुः । ततस्तमन्यो ब्राह्मणो दीक्षयति, ब्रह्मचारी वाचार्य्यप्रेषित इति । दीक्षा च यजमानसंस्कारः । तस्माद् ब्रह्मादय ऋत्विजः सप्तदश इति ॥ ३७ ॥ ॥ युक्तिः ॥ दीक्षादक्षिणावाक्योक्तानामेव ब्रह्मादीनां सप्तदशर्त्विक्त्वाऽधिकरणम् ॥ १७ ॥

स्वामिसप्तदशाः कर्मसामान्यात् ॥ ३८ ॥

एतदुक्तं, सप्तदश ऋत्विज इति, ते च ब्रह्मादयः । तत्र सन्देहः । किमेषां सदस्यः सप्तदशः, उत गृहपतिः । किं तावत् प्राप्तम् । सदस्य इति । स हि कर्म्मकरः । इतरः स्वामी । यश्च कर्म्मकरः स परिक्रेतव्यः । ऋत्विजश्च परिक्रीयन्ते । तस्मात् सदस्यः सप्तदश ऋत्विगिति । अपि च, तस्य चमसमामनन्ति वरणं च । ऋत्विग् वरितव्यो न स्वामी । तस्मात् सदस्यः सप्तदश इति प्राप्ते, उच्यते ॥ स्वामिसप्तदशाः कर्म्मसामान्यात् ॥ स्वामी एषां सप्तदशः स्यात् । कुतः ।

कर्म्मसामान्यात्, यज्ञे कर्त्तार ऋत्विजो भवन्ति । यज्ञे च कर्त्ता गृहपतिः, तस्माद् ऋत्विक् । यज्ञकर्म्मसामान्यात् । यदुक्तं, तं समामनन्ति, तस्य चमसमामनन्ति वरणं च । तस्मात् सदस्यः सप्तदश इति । उच्यते । ब्रह्माणमेव ते समामनन्ति, वरणमपि चमसश्च ब्रह्मण एव । स हि सदसि भवः । तस्मात् स्वामिसप्तदशाः ॥ ३८ ॥ ऋत्विजां स्वामिसप्तदशत्वाधिकरणम् ॥ १८ ॥

ते सर्वार्थाः प्रयुक्तत्वादग्नयश्च स्वकालत्वात् ॥ ३९ ॥

स्वामिसप्तदशा ज्योतिष्टोमस्य ऋत्विजः समधिगताः । अत्रेदानीमयं सन्देहः । किं सर्वं पुरुषकार्य्यं तैः कार्य्यम्, अग्निभिश्च गार्हपत्यादिभिरग्निकार्य्यम्, उत काचिद् व्यवस्थेति । किं तावत् प्राप्तम् ॥ ते सर्वार्थाः, प्रयुक्तत्वाद् अग्नयश्च स्वकालत्वात् ॥ ते वृताः सर्वस्मै पुरुषकार्य्याय स्युः । अग्नयश्चाग्निकार्य्याय । कुतः । तैः कार्य्यैराकाङ्क्षितत्वात् । प्रति स्वं ग्रहणमेषामनुवादः, स्वकालत्वादग्नयश्च सर्वार्था इति । समधिगतमेतत् ॥ ३९ ॥ अग्नेः प्रकृतिविकृतिसर्वार्थताधिकरणम् ॥ १९ ॥ ॥ ॥ आध्वर्यवादिष्वध्वर्य्वादीनां कर्तृतानियमाधिकरणस्य पूर्वपक्षः ॥

तत्संयोगात् कर्मणो व्यवस्था स्यात् संयोगस्याऽर्थवत्त्वात् ॥ ४० ॥

तत्संयोगाद् विशिष्टपुरुषसंयोगाद् व्यवतिष्ठते । ये येन पुरुषेण समाख्यायन्ते, ते तेन कर्त्तव्याः । एवं तेषां पुरुषसंयोगोऽर्थवान् भविष्यति । आध्वर्य्यवमध्वर्युणा, हौत्रं होत्रा, औद्गात्रमुद्गात्रेति ॥ ४० ॥ सि० ॥ आध्वर्यवादिष्वेवाध्वर्य्वादीनां कर्तृतानियमाधिकरणम् ॥ २० ॥

तस्योपदेशसमाख्यानेन निर्देशः ॥ ४१ ॥

किमेष एवोत्सर्गः, सर्वं समाख्यातं समाख्यातपुरुषैः कर्त्तव्यमिति । नेति ब्रूमः । तस्योपदेशाद्विशेषसमाख्यानाच्च निर्देशः । यथोपदेशः । तस्मान्मैत्रावरुणः प्रेष्यति चानु चाहेति । समाख्या, पोत्रीया नेष्ट्रीयेति । एष समाख्यायाश्चापवाद इति ॥ ४१ ॥

तद्वच्च लिङ्गदर्शनम् ॥ ४२ ॥

यत्र होतुः प्रातरनुवाकमनुब्रुवत उपशृणुयादिति होत्रे प्रातरनु-

वाक्ये समाख्यया प्राप्तं होतारं दर्शयति । तथेदमपरं लिङ्गं भवति, उद्गीथ उद्गातॄणाम् ऋचः प्रणवः उक्थशंसिनां प्रतिहारो अध्वर्यूणामिति समाख्याकृतं भेदं दर्शयति । तथेदमपि लिङ्गं भवति । यो वाध्वर्यो. स्वं वेद स्ववानेव भवति । एतद् वाध्वर्योः स्वं यदाश्रावयतीति समाख्याकृतं नियमं दर्शयति ॥ ४२ ॥ ॥ समाख्याऽऽयातकर्तृत्वस्यापि क्वचिद् बाधाधिकरणम् ॥ २१ ॥

प्रैषानुवचनं मैत्रावरुणस्योपदेशात् ॥ ४३ ॥

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः । यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति । तत्रेदं समामनन्ति । तस्मान्मैत्रावरुणः प्रेष्यति चानु चाहेति । तत्र संशयः । किं सर्वानुवचनेषु सर्वप्रैषेषु च मैत्रावरुणः स्याद्, उत यत्रानुवचने प्रैष इति । किं तावत् प्राप्तम् । सर्वाऽनुवचनेषु, अविशेषात् । न हि कश्चिद्विशेष आश्रीयते । अस्मिन्ननुवचने मैत्रावरुणोऽस्मिन्नेति । तस्मात् सर्वानुवचनेषु सर्वप्रैषेषु च मैत्रावरुणः स्यात् ॥ ४४ ॥ ॥ पूर्व० ॥

पुरोऽनुवाक्याधिकारो वा प्रैषसन्निधानात् ॥ ४४ ॥

पुरोऽनुवाक्यां वा मैत्रावरुणोऽनुब्रूयात् । कुतः । यत्र प्रैषश्चानुवाक्या च सहोच्येते तत्र मैत्रावरुणः । यत्र केवलानुवाक्या न तत्र मैत्रावरुणः । यत्र वा केवलः प्रैषस्तत्रापि न । यत्रोभे समुच्चीयेते, तत्र स भवेत् । तथा हि समुच्चितयोस्तं समामनन्ति । तस्मान्मैत्रावरुणः प्रेष्यति चाऽनु चाहेति । चशब्दात् समुच्चितयोरिति गम्यते ॥ ४६ ॥ ॥ सि० ॥

प्रातरनुवाके च होतृदर्शनात् ॥ ४५ ॥

इतश्च पश्यामो न सर्वानुवचनेषु मैत्रावरुण इति । कुतः । यतः प्रातरनुवाके होतारं दर्शयति । कथम् । यत्र होतुः प्रातरनुवाकमनुब्रुवत उपशृणुयात् तदाध्वर्युर्गृह्णीयादिति । तस्मान्न सर्वानुवचनेषु मैत्रावरुण इति ॥४५॥ ॥युक्तिः॥ समुच्चितयोरनुवचनप्रैषयोर्मैत्रावरुणकर्तृकत्वाधिकरणम् ॥ २२ ॥

चमसांश्चमसाध्वर्य्यवः समाख्यानात् ॥ ४६ ॥

सन्ति चमसाध्वर्यवस्तेषु सन्देहः । किं चमसाध्वर्यवश्चमसाञ्जुहुयुरुताध्वर्युरिति । चमसाध्वर्यव इति ब्रूमः । कस्मात् । चमसेषु

आध्वर्यवं ते कुर्वन्तीति चमसाध्वर्यवः । तस्मात्ते जुहुयुरिति ॥ ४६ ॥ ॥ पूर्व० ॥

अध्वर्य्युर्वा तन्न्यायत्वात् ॥ ४७ ॥

अध्वर्युर्वा जुहुयात् । एष हि न्यायः । यदाध्वर्यवपदार्थमध्वर्युः कुर्याद्, आध्वर्यवश्च होमः । तस्मादध्वर्युर्जुहुयात् । ननु चमसाध्वर्यव इति विशेषसमाख्यानाच्चमसाध्वर्यवो होष्यन्तीति । नेत्युच्यते । चमसेष्वेतेऽध्वर्युवद्भवन्तीति चमसाध्वर्यवः । यदि तैरध्वर्य्युर्जुहोति, ततस्तैश्चमसाध्वर्युभिरपि होतव्यम् । यदि चमसाध्वर्यवो जुह्वति, नाध्वर्युस्तदा ते न तद्वत् स्युश्चमसाध्वर्यवः । तस्मान्न जुहुयुरिति ॥ ॥ ४७ ॥ ॥ सि० ॥

चमसे चान्यदर्शनात् ॥ ४८ ॥

चमसे चान्यं चमसाध्वर्योर्दर्शयति । कथम् । चमसाँश्चमसाऽध्वर्यवे प्रयच्छति, तान् स वषट्कर्त्रे हरति, अन्यो हुत्वा चमसाध्वर्य्यवे प्रयच्छतीति गम्यते । कथम् । स वषट्कर्त्रे हरति, भक्षयितुमिति गम्यते । तस्माद् हुतस्य चमसाध्वर्य्यवे प्रदानम् । यो जुहोति, स प्रयच्छति । तस्मादन्यो जुहोतीति । अपि च । यो वाऽध्वर्योः स्वं वेद स्ववानेव भवति । स्रुग्वा अध्वर्योः स्वं वायव्यमस्य स्वं चमसोऽस्य स्वमिति । न तावदस्य चमसः स्वम् । यजमानस्य हि सः । चमसोऽस्य स्वमिति ब्रुवन्नध्वर्योश्चमसेन होमं दर्शयति ॥४८॥ युक्तिः॥

अशक्तौ ते प्रतीयेरन् ॥ ४९ ॥

अथ कथं चमसाध्वर्यव इति समाख्यानम् । उच्यते । अशक्तौ ते प्रतीयेरन् । यदा व्यापृतत्वान्न शक्नोति अध्वर्युर्होतुं तदा समाख्यासामर्थ्यात्ते होष्यन्ति ॥ ४९ ॥ ॥ आ० नि० ॥ चमसहोमेऽध्वर्य्योः कर्तृताधिकरणम् ॥ २३ ॥

वेदोपदेशात् पूर्ववद्वेदान्यत्वे यथोपदेशं स्युः ॥५०॥

अस्ति औद्गात्रे समाख्यातः श्येनः, आध्वर्यवे वाजपेयः । तत्र सन्देहः । किं श्येने उद्गातृभिरेव पदार्थाः कर्त्तव्याः, वाजपेये अध्वर्युभिः? उत उभयत्र नानर्त्विग्भिरिति । किं प्राप्तम् ॥ वेदोपदेशात् ॥ समाख्यानादित्यर्थः ॥ पूर्ववत् ॥ यथा, आध्वर्यवमिति समाख्यानात् पदार्थानध्वर्युः करोति, एवमेव वेदान्यत्वे यथोपदेशं स्युः ।

यो येन समाख्याते वेदे उपदिष्टस्तस्य पदार्थास्तेनैव कर्त्तव्याः । साङ्गः स तत्रोपदिश्यते । तस्माच्छयेने उद्गातृभिर्वाजपेये चाऽध्वर्युभिः पदार्थाः कर्त्तव्या इति ॥ ५० ॥ ॥ युक्तिः ॥

तद्ग्रहणाद्वा स्वधर्मः स्यादधिकारसामर्थ्यात् सहाऽङ्गैरव्यक्तः शेषे ॥ ५१ ॥

तद्ग्रहणात् प्राकृतधर्म्मग्रहणाद् वा स्वधर्म्मः चोदकप्राप्तः संयुक्तः स्यात् । चोदकसामर्थ्यात् सहाङ्गैः कुर्यादिति श्रूयते । तानि चाङ्गानि ज्योतिष्टोमे सन्त्यपेक्ष्यन्ते । तत्र ज्योतिष्टोमे नानार्त्विजस्तैरस्य सहैकवाक्यता । ननु प्रत्यक्षा समाख्या, चोदक आनुमानिकः । उच्यते । सत्यं प्रत्यक्षा समाख्या । लौकिकी तु सा । तत्रानुमाय वैदिकं शब्दं तेनैकवाक्यता स्यात् ।

चोदकेन पुनर्विप्रकृष्टाधीतया प्रत्यक्षया इतिकर्त्तव्यतया सहैकवाक्यता । तस्माच्चोदको बलवत्तरः ॥ यत्तूक्तं, समाख्यानादिति । तत्रोच्यते । अव्यक्तः शेषे समाख्यातो भविष्यति । यः पदार्थो न चोदकेन प्राप्नोति, तत्र समाख्यया नियमो भविष्यति । यथा, श्येने कण्टकैर्वितुदन्तीति उद्गातारो वितोत्स्यन्ति, वाजपेये चोषपुटैरर्पयन्तीत्यध्वर्यवोऽर्पयिष्यन्ति ॥ ५१ ॥ ॥ सि० ॥ श्येनवाजपेययोरनेककर्तृकताऽधिकरणम् ॥ २४ ॥ ॥ इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये तृतीयस्याध्यायस्य सप्तमः पादः समाप्तः ॥ ३ ॥ ७ ॥

अथ तृतीये अध्याये अष्टमः पादः ॥ ३ ॥ ८ ॥

स्वामिकर्म परिक्रयः कर्मणस्तदर्थत्वात् ॥ १ ॥

अस्ति परिक्रयो, ज्योतिष्टोमे द्वादशशतं, दर्शपूर्णमासयोरन्वाहार्यम् । तत्र सन्देहः । किमध्वर्युणा परिक्रेतव्या ऋत्विजः ? उत स्वामिनेति । किं प्राप्तम् । समाख्यानादध्वर्य्युणेति प्राप्ते ब्रूमः । स्वामिकर्म्म परिक्रयः । कस्मात् । कर्म्मणस्तदर्थत्वात् । फलकामो हि यजमानः । यश्च फलकामस्तेन स्वयं कर्त्तव्यम् । स यदि परिक्रीणीते, ततः स्वयं सर्वं करोतीति गम्यते । अथ न परिक्रीणीते न सर्वं कुर्यात् । तस्मात् स्वामी परिक्रीणीते इति ॥ १ ॥

वचनादितरेषां स्यात् ॥ २ ॥

किमेष एवोत्सर्गः । नेत्युच्यते ॥ वचनादितरेषां स्यात् ॥ यत्र वचनं भवति तत्र वचनप्रामाण्याद् भवति परिक्रयः । य एतामिष्टकामुपदध्यात् स त्रीन् वरान् दद्यादिति ॥ २ ॥ ॥ क्रयस्य स्वामिकर्मताऽधिकरणम् ॥ १ ॥

संस्कारास्तु पुरुषसामर्थ्ये यथावेदं कर्मवद् व्यवतिष्ठेरन् ॥ ३ ॥

ज्योतिष्टोमे श्रूयते— केशश्मश्रू वपते, दतो धावते, नखानि निकृन्तते, स्नातीति । तत्र सन्देहः । किमेवञ्जातीयका अध्वर्युणा कर्त्तव्याः, उत यजमानेनेति । किं प्राप्तम् ? । अध्वर्युणा कर्त्तव्याः संस्कारा यथावेदं व्यवतिष्ठेरन् समाख्यानात् पुरुषेण कर्म्मवत् । यथा, अन्ये पदार्था यस्मिन् वेदे आम्नातास्तत्समाख्यातेन पुरुषेण क्रियन्ते, एवमेतेऽपीति ॥ ३ ॥ ॥ पूर्व० ॥

याजमानास्तु तत्प्रधानत्वात् कर्मवत् ॥ ४ ॥

यजमानेन वा कर्त्तव्याः । कुतः । पुरुषप्रधानत्वात् । कथं पुरुषप्राधान्यम् । कर्त्रभिप्रायं क्रियाफलं गम्यते, तस्मात् पुरुषस्य कर्म्मकरणसामर्थ्यमुपजनयन्ति । न च कश्चिद् येन कर्म्मकरणेन सामर्थ्यमुपजन्यते तदर्थं पुरुषान् क्रीणातीति । ईप्सितेभ्यः पदार्थेभ्यः क्रीणाति । येन यस्य सामर्थ्यं भवति, तत् तेनैव कर्त्तव्यम् । कर्म्मवत् । यथा प्रधानकर्म्माणि पुरुषार्थानि यजमानस्य भवन्त्येवमेतदपीति ॥ ४ ॥ ॥ सि० ॥

व्यपदेशाच्च ॥ ५ ॥

परस्मैपदव्यपदेशश्च भवति । तमभ्यनक्ति, शरेषीकयाऽनक्तीति च । अन्यो यजमानस्याञ्जनमभ्यञ्जनं करोतीति गम्यते ॥५॥ ॥ हेतुः ॥

गुणत्वे तस्य निर्देशः ॥ ६ ॥

यदुक्तं समाख्यानाद् यथावेदमिति । नैतदेवम् । गुणत्वे तस्य निर्देशः । तत्र वयं समाख्यां नियामिकामिच्छामो, यत्र कर्म्मणः प्राधान्यम् । यदर्थं क्रेतव्याः पुरुषाः प्राप्तास्तत्र समाख्यया नियमः । कल्प्यो हि सम्बन्धो वपनादिभिः पुरुषाणामदृष्टार्थत्वात् । फलम्

आराद्रुपकारकैः । न च कल्प्ते उपपद्यमाने कल्प्यः शक्यः कल्पयितुम्। तस्मान्न पुरुषाप्राधान्ये समाख्या नियामिका स्यात्॥६॥ आ०॥

चोदनां प्रति भावाच्च ॥ ७ ॥

चोदनेत्यपूर्वं ब्रूमः। अपूर्वं प्रति संस्कारा विधीयन्ते ते ह्यसम्भवाद् द्रव्येषु कल्प्यन्ते । सन्निकृष्टद्रव्याभावे च विप्रकृष्टेषु भवेयुः। यदा तु सन्निकृष्टे द्रव्ये सम्भवन्ति तदा न विप्रकृष्टेषु प्रयोक्तव्याः। कृतार्थत्वात्। तस्माद् याजमाना इति ॥ ७ ॥ ॥ हेतुः ॥

अतुल्यत्वादसमानविधानाः स्युः ॥ ८ ॥

इदं पदोत्तरं सूत्रम्। अथ कस्मान्न समानविधाना भवन्ति ?। अविशेषविधानाद्धि पुरुषमात्रस्य प्राप्नुवन्ति। तदुच्यते। नैतत् समानं सर्वपुरुषाणां विधानम्। कुतः। अतुल्यत्वात्। अतुल्या एते एतद्विधानं प्रति। का अतुल्यता। यद् यजमानस्य विहिता न ऋत्विजाम्। कथं यजमानस्य विहिता इत्यवगम्यते। अर्थात् स्वयं प्रयोगे स्यादिति॥ नन्वविशेषाद् ऋत्विजामपि विहिताः। प्रयोजनाऽभावादविहिता इति पश्यामः। कथं प्रयोजनाभावः। ऋत्विग्भिः क्रियमाणा, न यजमानेन कृता न कारिताः। अतदर्थत्वात् परिक्रयस्य। स्वयंकृताश्च नार्थिन उपकुर्वन्ति। तस्मादप्रयोजनाः। अत ऋत्विजामऽविहिताः। एतदतुल्यत्वम्। तस्मान्न समानविधाना इति ॥ ८ ॥ ॥ आ० नि० ॥ वपनादिसंस्काराणां याजमानताधिकरणम् ॥ २ ॥

तपश्च फलसिद्धित्वाल्लोकवत् ॥ ९ ॥

तपः श्रूयते– द्व्यहं नाश्नाति, त्र्यहं नाश्नातीति। तत्र सन्देहः। किमार्त्विजं तपः, याजमानमिति। किं प्राप्तम्। समाख्यानादार्त्विजं तप इति प्राप्तम्। एवं प्राप्ते ब्रूमः। याजमानं तप इति। कुतः। फलसिद्धित्वात्। फलसिद्ध्यर्थं तपः। तपःसिद्धस्य यागफलं सिद्ध्यति। कथमेतदवगम्यते। दुःखं हि तपः। दुःखं चाधर्म्मफलम्। अधर्मो यागफलस्य प्रतिबन्धको भवति। अश्रेयस्करो हि सः। तस्मिन् सति न श्रेयो भवितुमर्हति। तस्मात् सोऽपनेतव्यः। फलभोगेन न विरुद्ध्येते धर्माधर्मौ। तस्माद् दुःखफलभोगाय धर्मः श्रूयते। यत्नेन दुःखमुत्पादयितव्यमिदं तदिति। एवं दृष्टार्थं भवति, नादृष्टं कल्पयितव्यम्। तेन फलोपभोगेन क्षीणेऽधर्मेऽप्रतिबद्धो यागः फलं

दास्यतीति। फलसिद्धिश्च यजमानस्य कर्त्तव्या, नर्त्विजाम् । तस्माद् याजमानं तप इति ॥ ९ ॥

वाक्यशेषश्च तद्वत् ॥ १० ॥

एतमेवार्थं वाक्यशेषोऽपि द्योतयति । यदा वै पुरुषे न किञ्चनान्तर्भवति, यदास्य कृष्णं चक्षुषो नश्यति, अथ मेध्यतम इति । यदा अनशनं तदा मेधार्ह इति। मेधश्च यज्ञो, यज्ञश्च त्यागः।त्यागं कर्तुमर्हः तपसा क्रियते इति वाक्यशेषो भवति। त्यागी च यजमानः। तस्माद् याजमानं तप इति ॥ १० ॥ ॥ युक्तिः ॥

वचनादितरेषां स्यात् ॥ ११ ॥

किमेष एवोत्सर्गः, सर्वं तपो याजमानमिति ॥ वचनादितरेषाम् ॥ यत्र वचनं, तत्र ऋत्विजाम । यथा सर्वे ऋत्विज उपवसन्तीति ॥ ११ ॥ ॥ विशेषः ॥ तपसो याजमानताधिकरणम् ॥ ३ ॥

गुणत्वाच्च वेदेन न व्यवस्था स्यात् ॥ १२ ॥

अथ यदुक्तं, समाख्यानादार्त्विजं तप इति । गुणत्वान्न समाख्यया गृह्यते । यत्र पुरुषस्य गुणभावस्तत्र समाख्या नियामिका ॥ एवं वा श्येने श्रूयते–लोहितोष्णीषा लोहितवसना ऋत्विजः प्रचरन्तीति। तथा वाजपेये श्रूयते, हिरण्यमालिन ऋत्विजः प्रचरन्तीति । तत्र सन्देहः । किं श्येने उद्गातृभिर्लोहितोष्णीषता कर्त्तव्या, वाजपेये चाऽध्वर्युभिर्हिरण्यमालित्वम् ? उत उभयमपि सर्वर्त्विजामिति । किं तावत् प्राप्तम् । समाख्यानात् । श्येने उद्गातृभिर्वाजपेये अध्वर्युभिरिति। एवं प्राप्ते ब्रूमः । गुणत्वाच्च वेदेन न व्यवस्था स्यात् । गुणो लोहितोष्णीषता हिरण्यमालित्वं च पुरुषः प्रधानम् । अतो लोहितमुष्णीषं हिरण्यमाला च पुरुषविशेषणत्वेन श्रूयते, न कर्त्तव्यतया । तस्मात् पुरुषप्राधान्यम् । किमतो यद्येवं, पुरुषाणां प्रधानभावे समाख्या न नियामिका इत्येतदुक्तम् । अपि च, गुणत्वश्रवणात् सर्वपुरुषाणामेतद्विधानमिति गम्यते।प्रधानसन्निधौ हि गुणः शिष्यमाणः प्रतिप्रधानमुपदिष्टो भवति ।तत्र वचनेन प्राप्तं, कथं समाख्यया विद्यमानयापि नियन्तुं शक्येत । तस्मादुभयत्र सर्वर्त्विग्भिरेवञ्जातीयको धर्मः क्रियेतेति ॥ १२ ॥ ॥ आकाङ्क्षानिरासः ॥ लोहितोष्णीषताऽऽदीनां सर्वर्त्विग्धर्मताधिकरणम् ॥ ४ ॥

तथा कामोऽर्थसंयोगात् ॥ १३ ॥

ज्योतिष्टोमे समामनन्ति, यदि कामयेत वर्षेत् पर्जन्य इति नीचैः सदो मिनुयादिति । तत्र सन्देहः । किम् आर्त्विजः कामोऽथ याजमान इति । किमेवं, यदि कामयेताध्वर्युरिति ? उत यजमान इति एवं संशयः । किं प्राप्तम् । आर्त्विजः कामः । समाख्यानात् । अर्थी प्रकृतोऽध्वर्युः । स वाक्येन सम्बद्ध्यते, मिनुयादिति । तस्माद् आर्त्विजः काम इति । एवं प्राप्ते ब्रूमः । तथा कामः स्यात् । यथा तपः । याजमानः काम इत्यर्थः । कुतः । अर्थसंयोगात् । अर्थेन यागस्य साऽङ्गस्य, यजमानः फलेन सम्बद्ध्यते इति गम्यते । उपग्रहविशेषाज्ज्योतिष्टोमेन स्वर्गकामो यजेतेत्युपग्रहविशेषाच्च मिनुयादित्यध्वर्युः परार्थमिति गम्यते । अथ यदुक्तं, प्रकृतेनार्थिना सहैकवाक्यत्वादिति । उच्यते । एवमपि प्रकृतेन वाक्येन सहैकवाक्यता । यजमाने कामयमाने मिनुयादिति ॥ १३ ॥

व्यपदेशादितरेषां स्यात् ॥ १४ ॥

यत्र भवति व्यपदेशस्तत्रार्त्विजः कामो भवति । यथा, उद्गाता आत्मने वा यजमानाय वा यं कामं कामयते, तमागायतीति । यद्यात्मने इति यजमानायेति परिकल्प्येत, यजमानग्रहणं वाशब्दश्च न समर्थितौ स्याताम् । तस्माद् यजमानव्यपदेशादात्मानमेवोद्गाता प्रतिनिर्दिशतीति गम्यते ॥ १४ ॥ ॥ विशेषः ॥ ॥ वृष्टिकामनाया याजमानताधिकरणम् ॥

मन्त्राश्चाकर्मकरणास्तद्वत् ॥ १५ ॥

इहैवञ्जातीयका मन्त्रा उदाहरणम्– आयुर्दा अग्ने आयुर्मे देहीति, वर्चोदा अग्ने असि वर्चो मे देहीति । एषु सन्देहः । किम् आर्त्विजा उत याजमाना इति । समाख्यानादार्त्विजा इति प्राप्तम् ॥ एवं प्राप्ते ब्रूमः । मन्त्राश्चैते तद्वद् भवेयुर्यथा कामः । एवमात्माभिधायिपदं युक्तं भवति । आयुर्मे, वर्चो मे इति । आयुर्वर्च इत्येवमादिभिः कर्म्मफलमभिधीयते । अग्ने त्वं कर्म्मफलं मे साधयेति । तदिह कर्म्मफलमुत्साहार्थं सङ्कीर्त्यते । यजमानश्च तेन उत्सहते, नान्यः । यद् ऋत्विजः कर्म्मफलं, न तदर्थोऽग्निः । सिद्धं हि तत् । यद् यजमानस्य तदर्थोऽग्निः । तच्चासिद्धम् । सद् आशासितव्यं, यदुत्साहं जनय-

त्यऽवैगुण्याय । ऋत्विगपि सिद्धे यवुन्सहते, तद् यजमानस्यैव कर्मफलायोत्सहते । तत्रात्माभिधायिपदं नावकल्पते । यजमाने चात्माऽभिधायिपदं कल्प्यमानमगौणं भवति, तस्माद् याजमानाः ॥ १५ ॥

विप्रयोगे च दर्शनात् ॥ १६ ॥

विप्रयोगे चाग्नीनां प्रवासे उपस्थानमस्ति । इह एव सन् तत्र सन्तं त्वाग्ने इति । न च प्रोषितोऽग्निभ्य ऋत्विग् भवति । कर्म कुर्वत एष वाचकः शब्दः । भवति तु यजमानोऽग्निभ्यः प्रोषितोऽपि । यजमानः संविधाय सोऽग्निहोत्राय प्रवसति । शक्यते च विदेशस्थेनापि त्यागः कर्तुम् । स एव प्रोषितस्योपस्थानविशेषं ब्रुवन् यजमानस्योपस्थानं दर्शयति । तेनैव एवञ्जातीयका यजमानस्य भवेयुरिति ॥ १६ ॥ ॥ युक्तिः ॥ आयुर्दादिमन्त्राणां याजमानताधिकरणम् ॥ ६ ॥

द्व्याम्नातेषूभौ द्व्याम्नानस्यार्थवत्त्वात् ॥ १७ ॥

स्तो दर्शपूर्णमासौ, तत्र द्व्याम्नाता मन्त्रा आध्वर्यवे काण्डे याजमाने च । आज्यं यैर्गृह्यते पञ्चानां त्वा वातानां यन्त्राय धर्त्राय गृह्णामीत्येवमादयः । तथा स्रुग्व्यूहनमन्त्राः । स्रुचौ व्यूहति, वाजस्य मा प्रसवेनेति । तत्र सन्देहः । किं ते उभाभ्यामपि कर्त्तव्या उत अध्वर्युणैवेति । किं प्राप्तम् । समाख्यानादाध्वर्यवा इति । इति प्राप्ते, उच्यते । उभावपि तान् प्रयुञ्जीयातामिति । कुतः । द्व्याम्नानस्यार्थवत्त्वात् । द्वाभ्यां समाख्यानाद् द्वावपि कर्त्तारौ गम्येते । तस्माद् द्वौ ब्रूयाताम् । अध्वर्युः- एतेन प्रकाशितमनुष्ठास्यामीति । यजमानो— न प्रमदिष्यामीति ॥१७॥ द्व्याम्नातस्योभयप्रयोज्यताधिकरणम् ॥७॥

ज्ञाते च वाचनं न ह्यविद्वान् विहितोऽस्ति ॥१८॥

वाजपेये श्रूयते- क्लृप्तीर्यजमानं वाचयति, उज्जितीर्यजमानं वाचयतीति । अत्र सन्देहः । किं ज्ञश्चाज्ञश्च सर्वो वाचयितव्य, उत ज्ञ एवेति । किं प्राप्तम् । अविशेषाज्ज्ञश्चाज्ञश्चेति । इति प्राप्ते, ब्रूमः । ज्ञ एवेति । कुतः । न ह्यविद्वान् विहितोऽस्ति । यो ह्यविद्वान्नासावधिकृतः । सामर्थ्याभावात् । ननु प्रयोगकाले शिक्षित्वा प्रयोक्ष्यते, सामर्थ्यादधिक्रियेतेति । नेति ब्रूमः । वेदाध्ययनादुत्तरकाले प्रयोगः श्रूयते । न प्रयोगश्रुतिगृहीतं वेदाध्ययनम् । कुतः । अनारभ्य कर्मणि वेदे श्रूयते । तस्मात् स्वाध्यायोऽध्येतव्य इति । सत्येतस्मिन् व-

चने, अग्निहोत्रं जुहुयादित्येवमादिभिर्वेदोऽध्येतव्य इत्येतदुक्तं भवतीति न शक्यते कल्पयितुम् । तत्र होममात्रे चोदिते वेदाध्यायी शक्त इत्यधिक्रियते, नाविद्वान् । कियता पुनर्विदितेन विद्वानधिक्रियते ? इति । यावता विदितेन शक्तो भवति यथोक्तं क्रतुमभिनिर्वर्त्तयितुम् । तस्मात् तावद् यो वेद स तेन क्रतुनाऽधिक्रियते ॥ ननु वेदमधीयीतेति वचनात् कृत्स्नो वेदोऽध्येतव्य इति भवति, न वेदावयवेनाधिक्रियते इति। उच्यते । क्रतूनां ज्ञानार्थं वेदाध्ययनं कार्य्यम् । तत्रान्यस्मिन् क्रतौ कर्त्तव्येऽन्यक्रतुज्ञानं न दृष्टाय भवति । तस्मात् क्रत्वन्तरज्ञानमधिकारे नाद्र्त्तव्यम् । क्रत्वन्तरज्ञानाय क्रत्वन्तरग्रन्थः सर्वे क्रतवः कथं ज्ञायेरन् । पृथक् पृथगिति कृत्स्नस्य वेदस्याध्ययनं श्रूयते । तस्मात् स्वपदार्थज्ञोऽधिक्रियेतेति । तेनास्वपदार्थज्ञस्य कर्मैव नास्ति । कथमसौ वाच्येत ? तस्मात् साध्वभिधीयते । ज्ञ एव वाचयितव्य इति ॥ १८ ॥ अभिज्ञस्यैव वाचयितव्यताधिकरणम् ॥ ८ ॥

याजमाने समाख्यानात् कर्माणि याजमानं स्युः ॥१९॥

स्तो दर्शपूर्णमासौ । तत्र कर्माण्याम्नातानि द्वादश– वत्सं चोपावसृजति, उखाश्चाधिश्रयति, अव च हन्ति, दृषदुपले च समाहन्ति, अधि च वपते, कपालानि चोपदधाति, पुरोडाशं च अधिश्रयति आज्यं च, स्तम्बयजुश्च हरति अभि च गृह्णाति, वेदिं परिगृह्णाति, पत्नीं च सन्नह्यति, प्रोक्षणीश्चासादयति आज्यं च । तानि द्वादश द्वन्द्वानि दर्शपूर्णमासयोरिति । अत्र सन्देहः । किमेतान्यध्वर्योः कर्म्माणि, उत यजमानस्येति । किं प्राप्तम् । याजमाने समाख्यानात् कर्म्माणि याजमानं स्युः । विशेषसमाख्यानाद् याजमानानीति गम्यते । यथा पोत्रीयं नेष्ट्रीयमिति ॥ १९ ॥ ॥ पूर्व० ॥

अध्वर्य्युर्वा तदर्थो हि न्यायपूर्वं समाख्यानम् ॥२० ॥

अध्वर्युर्वा कुर्यादेतानि । तदर्थो हि अध्वर्युः परिक्रीत इति समाख्यानाद् अवगम्यते । आध्वर्यवे एव सर्वे इमे पदार्थाः समाम्नाताः । याजमाने एषां द्वन्द्वतोच्यते । द्वन्द्वता च समभ्यासक्रिया । तत्राध्वर्युः पदार्थान् करिष्यति, यजमानेनापि समभ्यासीकरणमित्येतदशक्यम् । तत्र अङ्गगुणविरोधे च तादर्थ्यादिति द्वन्द्वतागुणो

बाधितव्यः । तस्मादाध्वर्यवा एते पदार्था इति ॥ यदुक्तं, समाख्याना-दिति । तत् परिहर्त्तव्यम् । उच्यते । न्यायपूर्वं समाख्यानं, समाख्यानाद् यजमानेन द्वन्द्वता सम्पादयितव्या । इदं चेदं च सम्पादयेति यजमानो ब्रूयात् । केषुचिच्चात्र पदार्थेषु यजमानस्यानुमन्त्रणम् । तन्निमित्ता समाख्या भविष्यति । अपूर्वं त्वपकृष्येत । यदुक्तं, यथा पोत्रीयं, नेष्ट्रीयमिति, एवमत्रापीति । तदुच्यते । युक्तम् । तत्र विशेषसमाख्यानात् । इह तु द्वन्द्वता याजमानीया, पदार्थास्तु आध्वर्यवा एव । तस्माद् अदोषः ॥ २० ॥ सि० ॥ ॥ द्वादशद्वन्द्वानाम् आध्वर्यवत्वाधिकरणम् ॥ ९ ॥

विप्रतिषेधे करणः, समवायविशेषादितरमन्यस्तेषां यतो विशेषः स्यात् ॥ २१ ॥

अस्ति ज्योतिष्टोमे पशुरग्निषोमीयः । तस्य यूपस्य परिव्याणे मन्त्रौ । एकः— अध्वर्योः परिवीरसीति करणः । अपरो— होतुर्युवा सुवासा इति क्रियमाणानुवादी । तयोश्चोदकपरम्परया कुण्डपायिनामयनं प्राप्तयोर्भवति सन्देहः । कः पुनरसौ । तत्र ऋत्विक्समास आम्नातः, यो होता सोऽध्वर्युरिति । किं करणमाध्वर्यवं होता कुर्यात् ? किं हौत्रं क्रियमाणानुवादिनमिति । किं प्राप्तम् । अनियम इति ॥ इति प्राप्ते, उच्यते । विप्रतिषेधे करणः स्याद् आध्वर्य्यवः परिवीरसी इति । न क्रियमाणानुवादी, होतुर्युवा सुवासा इति । कुतः । समवायविशेषात् । द्वौ तत्र समवायौ होतुश्चोदकेन हौत्रेषु, प्रत्यक्षश्रवणेन आध्वर्यवेषु, यो होता सोऽध्वर्युरिति । एवं प्रत्यक्षमध्वर्योः कार्ये चोद्यते । प्रत्यक्षं चानुमानाद् बलीयः । तस्माद् आध्वर्यवं करणं परिवीरसीति होता कुर्यात् । अथ हौत्रं विरुद्धं कः कुर्यात् । इतरमन्यः । तेषां यतो विशेषः स्यात् । अन्यो होतृपुरुष एव स्यात् । यस्याव्यापृतता, प्राधान्यविशेषो वा ॥ २१ ॥ होतुराध्वर्यवकरणमन्त्रानुष्ठातृत्वाधिकरणम् ॥ १० ॥

प्रैषेषु च पराधिकारात् ॥ २२ ॥

स्तो दर्शपूर्णमासौ । तत्र प्रैषः समाम्नातः । प्रोक्षणीरासादय, इध्मा बर्हिरुपसादय, स्रुचः सम्मृड्ढि, पत्नीं सन्नह्य आज्येनोदेहीति । तत्र सन्देहः । किं य एव प्रैषे, स एव प्रैषार्थे ? उतान्यश्च प्रैषे·

ऽन्यश्च प्रैषार्थे इति । किं प्राप्तम् । एक एव प्रैषप्रैषार्थयोरिति । कुतः । समाख्यानात् । अन्य इति चाश्रुतत्वात् ॥ नन्वात्मनः प्रैषो विप्रतिषिद्ध्यते । उच्यते । न प्रैषो भविष्यति । प्राप्तकाले लोटं वक्ष्यामः । आह । प्राप्तकालेऽपि सति युष्मदादिष्वेवोपपदेषु मध्यमादयो व्यवस्थिताः । न पुरुषसङ्करो भवति । उच्यते । सत्यां विवक्षायां युष्मदादिषु मध्यमादयः । यदा तव प्राप्तः काल इति विवक्ष्यते, तदा युष्मद्येव मध्यमो नास्मदि शेषे वा । यदा खलु क्रियायाः प्राप्तः काल इत्येतावद् विवक्ष्यते, न तव मम वेति, न तदा युष्मदादीनामनुरोधेन मध्यमादयो भवितुमर्हन्ति । न चेदं युगपद् विवक्षितुं शक्यते । पदार्थस्य प्राप्तः कालः, तव चेति । भिद्येत हि तथा वाक्यम् । तेन, यदि वा निर्ज्ञाते पदार्थकाले तव काल इति शक्यते वदितुं, यदि वा तवेति निर्ज्ञाते पदार्थस्य काल इति । तत्र पदाऽर्थस्य कालो वदितव्यो, न तु युष्मदर्थस्य । तेन हि स्मृतेन प्रयोजनम् । स हि कर्त्तव्य इत्यवगतो, न तु युष्मदर्थस्तथा । तस्मात् समाख्यानादध्वर्योरेव प्रैषप्रैषार्थौ इति । इति प्राप्ते, ब्रूमः । प्रैषेष्वन्योऽन्यस्तदर्थेष्विति । कुतः । पराधिकारात् । परस्मिन् हि प्रैषे उपपद्यते, नात्मनीति । आह । ननूक्तं प्राप्तकाले भविष्यतीति । उच्यते । न, सम्भवति प्रैषे, प्राप्तकालता न्याय्या । तस्या हि युष्मदर्थो गम्यमानो न विवक्षित इत्युच्यते, सम्भवति चात्र प्रैषार्थः । तस्मात् प्रैषः । प्रेषश्चेद्, अन्यः प्रैषार्थ इति सिद्धम् ॥ २२ ॥ प्रैषप्रैषार्थयोः पृथक्कर्तृकत्वाधिकरणम् ॥ ११ ॥

अध्वर्युस्तु दर्शनात् ॥ २३ ॥

अथैवं गते, इति सन्दिह्यते । किमध्वर्युरग्नीधं प्रेष्येद्, उताग्नीदध्वर्युमिति । अनियमोऽविशेषादिति प्राप्ते, ब्रूमः । अध्वर्युरुक्तप्रैषार्थकारी स्यात् । कुतः । दर्शनात् । दर्शनं भवति, तिर्यञ्चं स्फ्यं धारयेत् यदन्वञ्चं धारयेत् वज्रो वै स्फ्यो वज्रेणाध्वर्युं क्षिण्वीतेति । यः प्रेष्यति तस्य हस्ते स्फ्यः । स्फ्येनाध्वर्युं क्षिण्वीतेत्यन्यमध्वर्युं प्रेषकारं दर्शयति । तस्मादग्नीदध्वर्युं प्रेष्येदिति ॥ २३ ॥ ॥ पूर्व० ॥

गौणो वा कर्मसामान्यात् ॥ २४ ॥

नैतदस्ति, अग्नीधः प्रैषोऽध्वर्योः प्रैषार्थ इति । किं खलु अध्वर्यु-

रेवाग्नीध्रं प्रेष्येत् । एवमध्वर्युणा प्रैषः प्रैषार्थश्चोभावपि कृतौ भविष्यतः । तत्र आध्वर्यवमिति समाख्याऽनुगृहीष्यते । तस्मादध्वर्युरेव मुख्यः स्यात् । किमस्य मुख्यत्वम् ? । यदनेन सर्वं कर्त्तव्यं समाख्यानादिति । अथ यदुक्तमध्वर्युः प्रचरिता दृश्यत इति । तदुच्यते । सत्यं दृश्यते । न त्वस्य प्रैषार्थकरणे प्रमाणमस्ति चिन्त्यमानम् । तस्मादेतन्मिथ्यादर्शनम् । यस्य हि दर्शनस्य प्रमाणं नास्ति, व्यामोहः सः । तथा शुक्तिकायां रजतविज्ञानम् । अस्ति तु अग्नीध्रः प्रैषार्थकरणे प्रमाणम् । तस्माद् अग्नीध्रः प्रचरिता । प्रचरितरि चाऽध्वर्युशब्दो दृश्यते । तस्माद् गौणः, आध्वर्यवे वेदे समाम्नातान् पदार्थान् करोतीति कृत्वाऽध्वर्युरित्युच्यते, आग्नीध्र इति । तस्माद् आध्वर्यवः प्रैषः, आग्नीध्रः प्रैषार्थ इति ॥ २४ ॥ सि० ॥ प्रैषप्रैषार्थयोर्यथाक्रममाध्वर्यवाग्नीध्रताधिकरणम् ॥ १२ ॥

ऋत्विक्फलं करणेष्वर्थवत्त्वात् ॥ २५ ॥

दर्शपूर्णमासयोरामनन्ति, ममाग्ने वर्चो विहवेष्वस्तु इति पूर्वमग्निं गृह्णातीति । तत्र सन्देहः, किम् ऋत्विक् फलमाशासितव्यम्, अग्ने वर्चो विहवेष्वस्तु इति ? उत यजमानस्येति । किं प्राप्तम् । अध्वर्योरेवेति । कुतः । एवं श्रुतिरादृता भविष्यति । इतरथा लक्षणा स्यात् । आत्मना यजमानं लक्षयेत् । तस्माद् ऋत्विक्फलमाशासितव्यमिति । कोऽर्थः । अनया समिधा धार्यमाणेऽग्नौ यागः सम्भविष्यति । तत्र विहवेषु स्पर्द्धास्थानेषु अहं वर्चस्वी भविष्यामीत्यध्वर्योर्वचनम् । एवमुत्साही भविष्यतीति ॥ २५ ॥ ॥ पूर्व० ॥

स्वामिनो वा तदर्थत्वात् ॥ २६ ॥

यजमानस्य वा वचनं, तदर्थत्वात् कर्म्मणः । यजमानार्थं हीदं कर्म्म साङ्गम् । उपग्रहविशेषात्, साङ्गस्यास्य प्रयोजनं यजमानस्य फलनिष्पत्तिर्नाध्वर्योः सुप्रचरितुरपि यशः । यदि पतो यद्येवं फलसङ्कीर्त्तनात् फलकर्त्तव्यता गम्यते । तदेतदग्न्यन्वाधानं यजमानस्य फलसङ्कीर्त्तनं क्रियमाणेऽनेन मन्त्रेण फलसम्बन्धात् प्रकाशितं कृतं भवति, नाऽध्वर्युयशःकीर्त्तनेन । तस्माद् यजमानफलमाशासितव्यमिति । अथ कस्मान्न यजमान एव मन्त्रो भवतीति । उच्यते । अग्न्यन्वाधानं समाख्यया आध्वर्यवम् । तच्चैवंगुणो मन्त्रो करोत्या-

ध्वर्यवः । स उच्यतेऽनेन मन्त्रेणेति । तस्माद् आध्वर्यवो मन्त्रः । मम वर्चोऽस्त्वित्यपि यजमानस्य वर्चो ममेति व्यपदिशति लक्षणया । यथा, राजनि जयं वर्त्तमानं सैनिका अस्माकमिति व्यपदिशन्त्येवम् ॥ २६ ॥ ॥ सि० ॥

लिङ्गदर्शनाच्च ॥ २७ ॥

लिङ्गमप्यमुमर्थं दर्शयति । एवं हि आह । यां वै काञ्चन ऋत्विज आशिषमाशासते यजमानस्यैव सेत्याशिषो यजमानार्थकतां दर्शयति । तस्मादपि ब्रूमो यजमानफलमाशासितव्यमिति । पक्षोक्तमेव प्रयोजनमिति ॥ २७ ॥ ॥ हेतुः ॥ करणमन्त्रेषु स्वामिफलस्याशासितव्यताधिकरणम् ॥ १३ ॥ वर्चोन्यायः ॥

कर्मार्थन्तु फलन्तेषां स्वामिनं प्रत्यर्थवत्त्वात् ॥ २८ ॥

इदं समधिगतं, करणेषु मन्त्रेषु स्वामिनः फलमाशासितव्यमिति । किमेष एवोत्सर्गः । नेत्याह । क्वचित् ऋत्विजामपि फलमाशासितव्यमिति, यत्र कर्मार्थं फलम् । यथा, अग्नाविष्णू मावक्रमिषं विजिहाथां मा मा सन्ताप्तमिति । असन्तप्तोऽध्वर्य्युः कर्म्म शक्नोति कर्त्तुम् । कर्म्मसिद्धिर्यजमानस्योपकारिकेति ऋत्विक्फलमाशासितव्यमत्रेति ॥ २८ ॥

व्यपदेशाच्च ॥ २९ ॥

यत्र च व्यपदेशो भवति, तत्रार्त्विजम् । दक्षिणस्य हविर्द्धानस्याधस्ताच्चत्वार उपरवाः प्रादेशमुखाः प्रादेशान्तरालाः । तत्र हस्तौ प्रवेश्याध्वर्युर्यजानमाह, किमत्रेति । स आह, भद्रमिति । तन्नौ सहेत्यध्वर्युः प्रत्याहेति व्यपदेशो भवत्यध्वर्योर्यजमानस्य च । तन्नौ सहेत्युभयोर्वचनमध्वर्युयजमानयोः । तस्मादध्वर्युफलमाशासितव्यमत्रेति ॥ २९ ॥ ॥ ॥ करणमन्त्रेषु कर्मार्थफलस्य ऋत्विग्धर्मताऽधिकरणम् ॥ १४ ॥

द्रव्यसंस्कारः प्रकरणाविशेषात् सर्वकर्मणाम् ॥ ३० ॥

दर्शपूर्णमासयोर्बर्हिर्धर्मा वेदिधर्माश्च । तेषु सन्देहः । किमङ्गप्रधानार्थाः, उत प्रधानार्था इति । प्रकरणात् प्रधानार्था इति । इति प्राप्ते, उच्यते । नैवं, द्रव्यसंस्कारोऽङ्गप्रधानार्थो, यथा व्याख्यातमेवोत्तरविवक्षया प्राप्तिरेषा क्रियते इति ॥ ३० ॥ द्रव्यसंस्कारस्याङ्ग-

प्रधानार्थताधिकरणम् ॥ १५ ॥

निर्देशात्तु विकृतावपूर्व्वस्यानधिकारः ॥ ३१ ॥

ज्योतिष्टोमे पशुरग्नीषोमीयो, यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति । तत्र श्रूयते । बर्हिषा यूपावटमवस्तृणाति, आज्येन यूपमनक्तीति । तत्र संशयः । किं तयोराज्यबर्हिषोराज्यबर्हिर्धर्मा प्राकृताः कर्त्तव्याः, उत नेति । किं प्राप्तम् । कर्त्तव्या इति । कुतः । वाक्यं हि बर्हिर्मात्रस्याज्यमात्रस्य च धर्म्माणां विधायकम् । तदिहाऽपि वाक्यं चोदकेन प्राप्तम् । न चैतद्बर्हिराज्यं निष्प्रयोजनम् । तस्मादत्र धर्म्माः क्रियेरन्निति ॥ एवं प्राप्ते ब्रूमः । निर्देशाद् विकृतावऽपूर्वस्यानधिकारः । निर्द्दिष्टा एते धर्म्माः प्रकृतौ । यत्र प्रधानस्योपकुर्वन्ति प्राकृतकार्य्ययोराज्यबर्हिषोः । ये च प्रधानस्योपकारिणो धर्म्मास्ते इहातिदिश्यन्ते । प्रधानं हि चोदकोऽपेक्षते, न धर्म्मान् । प्रधानस्य हि चोदकेन सामान्यं, न धर्म्माणाम् । अपि च । न अन्यार्ऽथ इति ज्ञातेन सन्निहितेनाप्येकवाक्यता भवति अन्यसम्बन्धोपपत्तौ सत्याम् । यथा भार्या राज्ञः, पुरुषो देवदत्तस्येति । किमङ्ग पुनर्विप्रकृष्टेन, निर्ज्ञातं खल्वङ्गत्वं प्रधानापेक्षायां भवति । केवलमिहाऽतिदेशः क्रियते । पदार्थापेक्षायामङ्गत्वमपि साधयितव्यं स्यात् । धर्म्माश्चापेक्ष्यमाणाः साधारणा भवेयुः । तथा ऊहो नावकल्पेत । लिङ्गविशेषदर्शनाच्च व्यवतिष्ठेरन् धर्म्माः । तत्र दर्शनं नोपपद्येत । वपया प्रातः सवने चरन्ति, पुरोडाशेन माध्यन्दिने सवने इति । तथा न पिता वर्धते, न माता, न नाभिः, प्राणो हि स इति । तस्माद् यद्द्वारा प्रकृतौ कृताः, तद्द्वारैव विकृतौ, नान्यद्वारा । न च यूपावटस्तरणं प्रकृतावस्ति यूपाञ्जनं वा । तस्मान्न तत्र प्राकृता धर्म्मा भवेयुरपूर्वत्वात् ॥ ३१ ॥ ॥ अपूर्वप्राकृतधर्माणां विकृतावसम्बन्धाऽधिकरणम् ॥ १६ ॥

विरोधे च श्रुतिविशेषादव्यक्तः शेषे ॥ ३२ ॥

दर्शपूर्णमासयोरामनन्ति, समावप्रच्छिन्नाग्रौ दर्भौ प्रादेशमात्रौ पवित्रे करोति, तथा अरत्निमात्रे विधृती करोतीति । तत्र संशयः । किं वेदिस्तरणार्थाद् बर्हिषो विधृती पवित्रे, उतान्यत इति । किं तावत् प्राप्तम् । वेदिस्तरणार्थाद् बर्हिषः कार्ये । किं कार-

णम्। तद्धि प्रकृतं, धर्म्माश्चाविशेषात् सर्वबर्हिषामर्थेन। तस्मात् तत इति प्राप्त। ब्रूमः। अन्यतः क्रियेत। कुतः। विरोधात्। कथं विरोधः। श्रूयते हि, त्रिधा तु पञ्चधा तु वा वेदींस्तृणातीति। तद् येनास्तीर्यते, कथं तद् विधृति पवित्रं क्रियेत। न हि सम्भवत्येकं स्तरणाय विधृतिपवित्राय च। तदेतदुपदिष्टवचनमनेकगुणत्वं चोभे अप्यसम्भाविनी प्रतिज्ञाते स्याताम्। तस्मान्न ततः क्रियेतेति। यदि न ततः, कुतस्तर्हि। अव्यक्त एवञ्जातीयकः शेषे। अस्ति तत्र परिभोजनीयं नाम बर्हिः, ततः कर्त्तव्यम् ॥ ३२ ॥ ॥ विधृतिपवित्रयोः परिभोजनीयबर्हिषा कर्त्तव्यताधिकरणम् ॥ १७ ॥

अपनयस्त्वेकदेशस्य विद्यमानसंयोगात् ॥ ३३ ॥

ज्योतिष्टोमे श्रूयते, पुरोडाशशकलमैन्द्रवायवस्य पात्रे निदधाति, धाना आश्विनपात्रे, पयस्यां मैत्रावरुणपात्रे इति। तत्र संशयः। किमन्यत एवं क्रियेत, उत प्रकृतेभ्य इति। किं प्राप्तम्। पूर्वेण न्यायेनाऽन्यत इति। तत्रोच्यते। तत एकदेशस्यापनयः। कुतः। विद्यमानसंयोगात्। विद्यते हि तत्र पुरोडाशो धानाः पयस्या च। तत्संयोग एव न्याय्यो नान्यसंयोग इति। पुरोडाशादीनामेव संस्कारो, नैन्द्रवायवादीनाम्। कुतः। पुरोडाशादिषु द्वितीयादर्शनात्। प्रत्यक्षश्चैकदेशापनयेन उपकारो, नैन्द्रवायवादिसम्बन्धेन। एवं प्रकृतानुग्रहो भविष्यति। तस्मात् प्रकृतस्योपदेशेन तत् क्रियेत। न चात्रोपदिष्टो देश आशङ्क्योऽनेकगुणभावश्चान्येन शकलेन होमोऽन्यश्च प्रतिपाद्यते इति ॥ ३३ ॥ ॥ प्राकृतपुरोडाशादीनां निधानाधिकरणम् ॥ १८ ॥

विकृतौ सर्वार्थः शेषः प्रकृतिवत् ॥ ३४ ॥

इदमामनन्ति। यन्नाथर्वणं वै काम्या इष्टयः, ता उपांशु कर्त्तव्या इति। अत्र संशयः। किमङ्गप्रधानार्थमुपांशुत्वम्, उत प्रधानार्थमिति। किं प्राप्तम्। विकृतौ सर्वार्थः शेषः स्यात्। अविशेषादङ्गानां प्रधानानां च प्रकृतिवत्। यथा प्रकृतौ वेदिधर्म्मा आज्यधर्म्माश्चाङ्गप्रधानार्थाः, एवमत्रापि ॥ ३४ ॥ पूर्व० ॥

मुख्यार्थो वाऽङ्गस्याचोदितत्वात् ॥ ३५ ॥

प्रधानार्थो वा एष विकृतिषु स्यात्। एवमिदं सर्वार्थमुच्येत, प्रकरणं बाधित्वा वाक्येनाङ्गप्रधानार्थमिति। तदेवेदानीं वाक्यं वि-

शेषितं, काम्या इष्टय इति । काम्याश्च प्रधानयागाः, अङ्गयागाः प्रधानार्थाः । तस्माद् अङ्गमचोदितम् । यत् कामेन फलवच्चोद्यते, तदेवानया उपांशुत्वेतिकर्त्तव्यतयाऽनुबद्ध्यते । तस्मात् प्रधानार्थमुपांशुत्वम् ॥ ३५ ॥ ॥ सि० ॥ काम्येष्टिषूपांशुत्वधर्मस्य प्रधानार्थताऽधिकरणम् ॥ १९ ॥

सन्निधानविशेषादसम्भवे तदङ्गानाम् ॥ ३६॥

श्येने श्रूयते, हृतनवनीतमाज्यमिति । तत्र सन्देहः । किं नवनीतं प्रधानस्य, उताङ्गानामिति । किं प्राप्तम् । प्रधानस्य । तस्य हि प्रकरणमिति वचनप्रामाण्यान्नवनीतेन प्रधानं निर्वर्त्तयितव्यमिति । एवं प्राप्ते ब्रूमः । असम्भवे एतस्मिँस्तदङ्गानां श्येनाङ्गानां स्यात् । कथमसम्भवः ? । सोमद्रव्यकत्वात् प्रधानस्य । ननु वचनान्नवनीतं भविष्यति । न श्येने नवनीतं भवतीत्येष वाक्यार्थः । कस्तर्हि ? । श्येने नवनीतमाज्यं भवतीति नवनीताज्यसम्बन्धो विधीयते, श्येनाज्यसम्बन्धोऽनूद्यते । न च साक्षाच्छ्येनस्याज्यसम्बन्धोऽस्ति, श्येनाङ्गानां तु विद्यते । यस्यास्ति, तस्यानूद्य नवनीतं विधीयते सन्निधानविशेषात् ॥ ३६ ॥

आधानेऽपि तथेति चेत् ॥ ३७ ॥

एवं चेद् इष्यते, श्येनाङ्गानां नवनीतमिति, आधानेऽपि पवमानेष्टिषु स्यात् । ता अपि हि श्येनस्योपकुर्वन्ति, तत्संस्कृतेऽग्नौ श्येनो निर्वर्त्तते इति ॥ ३७ ॥ ॥ आ० ॥

नाप्रकरणत्वादङ्गस्य तन्निमित्तत्वात् ॥ ३८ ॥

न श्येनस्य प्रकरणे पवमानेष्टयोऽग्न्याधानं वा श्रूयते । किमतो यद्येवम्, आधानस्य च श्येनस्य च न कश्चिदस्ति सम्बन्धः, अग्नीनामाधानम्, अग्नयश्च श्येनस्य । तस्मान्न पवमानहविःषु नवनीतम् । नैतच्छ्येनाङ्गत्वे निमित्तं, यदाधानमग्नीनामुपकरोति । यदि प्रकरणादीनामन्यतमदस्ति, तन्निमित्तं भवेत् । तस्मान्न श्येनाग्न्याधानयोः सम्बन्धोऽस्तीति ॥ ३८ ॥ आ० नि० ॥ श्येनाङ्गानां नवनीताऽऽज्यताधिकरणम् ॥ २० ॥

तत्काले वा लिङ्गदर्शनात् ॥ ३९ ॥

इदमिदानीं सन्दिह्यते, किं सुत्याकालानामङ्गानां नवनीतमुत

सर्वेषामिति । सुत्याकालानां स्यात् । लिङ्गदर्शनात् । इदं श्रूयते । सह पशूनालभन्त इति । तत्र पुनर्वचनम्–अग्नीषोमीयस्य स्थानेऽग्नीषोमीयः पुरोडाशः,अनुबन्ध्यायाः स्थाने मैत्रावरुणीयस्येति द्वे स्थाने शून्ये दर्शयति । तेनाऽवगम्यते श्येनस्य वचनं सुत्याकालानामङ्गानां विशेषं विदधातीति ॥ ३९ ॥ ॥ पूर्व० ॥

सर्वेषां वाऽविशेषात् ॥ ४० ॥

सर्वेषामेव चाङ्गानां नवनीतं स्यात् । कुतः । अविशेषात् । असति विशेषे सर्वेषामप्यङ्गानामिति ॥ ४० ॥ ॥ सिद्धान्तः ॥

न्यायोक्ते लिङ्गदर्शनम् ॥ ४१ ॥

यदुक्तं लिङ्गं, तत्परिहरणीयम् । नास्ति तावत् प्रमाणं यच्छ्येनस्य वचनं सुत्याकालानामङ्गानामिति । किन्तु दर्शनम् । तदप्रमाणमूलत्वान्मिथ्यादर्शनं मृगतृष्णावत् । कथं तु मध्ये पशूनामालम्भ इति । न्यायात् । को न्यायः । क्रमानुग्रहः । एवं वचनवर्जितः क्रमोऽनुगृहीतो भवतीति । तस्मात् सर्वेषामङ्गानां नवनीतमिति ॥ ४१ ॥ आ० ७ नि० ॥ सर्वेषामेव श्येनाङ्गानां नवनीताज्यताधिकरणम् ॥ २१ ॥

मांसन्तु सवनीयानां चोदनाविशेषात् ॥४२॥

शाक्यानामयनं षट्त्रिंशत्संवत्सरम् । तत्रेदं समामनन्ति– संस्थिते संस्थितेऽहनि गृहपतिर्मृगयां याति, स तत्र यान् मृगान् हन्ति, तेषां तरसाः पुरोडाशाः सवनीया भवन्तीति । तत्र सन्देहः । किं सवनीयानामन्येषाञ्च सम्भवतां पुरोडाशानां स्थाने तरसा, उत सवनीयानामेवेति । किं प्राप्तम् । सर्वपुरोडाशानां मांसमयता स्यात् । न शक्यते पुरोडाशानां च मांसमयता विधातुम् । सवनीयशब्देन च पुरोडाशान् विशेषयितुम् । भिद्येत हि तथा वाक्यम् । तस्मात् सर्वपुरोडाशानां मांसमयतेति । इति प्राप्ते, उच्यते ॥ मांसं तु सवनीयानां स्यात् । तरसाः सवनीया भवन्तीति तरससवनीयसम्बन्धो विधीयते, तरसाः पुरोडाशा भवन्ति इत्ययं त्वनूद्यते । कुतः एतत् । सर्वपुरोडाशेषु सवनीयशब्दोऽनुवादो न घटते, पुरोडाशशब्दस्तु सवनीयेष्ववकल्पते । तस्मात् पुरोडाशशब्दोऽनुवाद इति । तस्मात् सवनीयानां धानादीनां स्थाने मांसं चोदनाविशेषादिति ॥ ४२ ॥

भक्तिरसन्निधावन्याय्येतिचेत् ॥ ४३ ॥

इति चेत् पश्यसि, सवनीयेषु पुरोडाशशब्दोऽनुवादो भविष्यतीति । धानादिषु पुरोडाशशब्दो न वर्त्तते । भक्तिश्चान्याय्या मुख्ये सम्भवति ॥ ४३ ॥ ॥ आ० ॥

स्यात् प्रकृतिलिङ्गत्वाद् वैराजवत् ॥ ४४ ॥

प्रकृतौ ज्योतिष्टोमे धानादिष्वयं पुरोडाशशब्दो भाक्तः, सन्निहिते प्रयुक्तः । इहापि भाक्त एव प्रयोक्ष्यते । अत्रापि हि सवनीयशब्देन ते सन्निहिताः । प्रकृतौ लिङ्गसमवायाच्छब्दप्रवृत्तिर्विकृतावपि तथैव । यथा, छत्रिणो गच्छन्ति, ध्वजिनो गच्छन्तीति । यथा उक्थ्यो वैरूपसामा एकविंशः षोडशी वैराजसामा इति प्रकृतिलिङ्गेन सामशब्देन वैरूपपृष्ठो वैराजपृष्ठ इति गम्यते । एवमिहापि सवनीयानां मांसमयतेति ॥ ४४ ॥ ॥ आ० नि० ॥ ॥ सवनीयानां मांसमयताऽधिकरणम् ॥ २२ ॥

इति श्रीशबरस्वामिविरचिते मीमांसाभाष्ये तृतीयस्याऽध्यायस्याऽष्टमश्चरणः ॥ ३ ॥ ८ ॥ सम्पूर्णश्च तृतीयोऽध्यायः ॥ ३ ॥

शाबरभाष्ये तृतीयाध्यायचतुर्थचरणे नवमसूत्रानन्तरं षण्णां सूत्राणां व्याख्या नोपलब्धेति तेषां वार्तिकमेव मुद्रितं वेदितव्यम् ॥

उपवीतं लिङ्गदर्शनात् सर्वधर्मः स्यात् ॥ १ ॥

अतः परं षट् सूत्राणि भाष्यकारेण न लिखितानि तत्र व्याख्यातारो विवदन्ते । केचिदाहुर्विस्मृतानि । लिखितो ग्रन्थः प्रलीन इत्यपरे । फल्गुत्वादुपेक्षितानीत्यन्ये । अनार्षत्वादित्यपरे । तथाच, दिग्विभागश्च तद्वदिति निवीताधिकरणातिदेशस्तदानन्तर्यादुपपद्यत इति । वृत्त्यन्तरकारैस्तु सर्वैर्व्याख्यातानि । सन्ति च जैमिनेरेवम्प्रकाराण्यप्यनत्यन्तसारभूतानि सूत्राणि । व्यवहितातिदेशाश्च पानव्यापच्च तद्वदित्यादिष्वाश्रिताः । तस्मात् सूत्रमात्रं व्याख्येयम् । तत्र कैश्चित्त्रीण्यधिकरणानि कल्पितानि । अपरैश्चत्वारि । प्रथमं तावदिदं चिन्त्यते । यदेतत्पूर्वाधिकरणे दर्शपूर्णमासयोर्विधीयमानत्वेनोपवीतमुदाहृतं तत्र सन्देहः । किं तद्दर्शपूर्णमासयोरेवावतिष्ठते अथ वा सर्वकर्मार्थमिति । ये त्वधिकरणत्रयं समर्थयन्ते तेषामेवं सन्देहः । किं दर्शपूर्णमासयोरवस्थानं विधिश्चाथ सर्वकर्मार्थत्वमनुवादश्चेति॥ किं प्राप्तम् । सर्वधर्मः स्यात् । कुतः॥ कर्मान्तरेऽनुवादोऽस्य सिद्धवद्यः प्रतीयते * सोऽन्यथानुपपत्त्यैतां लिङ्गत्वात् प्रक्रियां जयेत्॥मृताग्निहोत्रे हि पितृदेवत्ये श्रूयते, प्राचीनावीती दोहयेत्,यज्ञोपवीती हि देवेभ्यो दोहयतीति। यद्यदि सर्वार्थमुपवीतं ततोऽयं पित्र्येऽग्निहोत्रसम्बन्धी नित्यवद् यज्ञोपवीताऽनुवादोऽवकल्पते । न चाऽयं दर्शपूर्णमासस्थस्यैवानुवादः । विप्रकृष्टत्वात्। हेतुवन्निगदार्थवादानर्थक्याच्च।यदि हि तस्मिन्नेव कर्मण्यन्यावस्थेयं धर्मो भवति, ततश्च तदवस्थापरिजिहीर्षया हेतुवन्निगदोऽवकल्पते । न तु क्रत्वन्तरस्थं परिहर्त्तव्यमत्यन्तविप्रकर्षेणैवाप्रसक्तत्वात् । न च देवेभ्य इति बहुवचनं दर्शपूर्णमासयोरवकल्पते । वैकल्पिकेन्द्रमहेन्द्रैकदेवत्यत्वात् सान्नाय्यस्य । अग्निहोत्रे तु सायम्प्रातर्दैवतालोचनेनोपपन्नं बहुत्वम् । तस्मादग्निहोत्रस्थोपवीतानुवादान्यथानुपपत्तेः सर्वधर्मत्वमिति ॥१॥

न वा प्रकरणात्तस्य दर्शनम् ॥ २ ॥

न वा सर्वधर्मः । कुतः । प्रकरणाद्दर्शपौर्णमासार्थत्वप्रतीतेः । अथ यदुक्तं लिङ्गदर्शनादिति । परिहृतं तत् । तस्यैवैतद्दर्शनं दर्शपूर्णमासस्थस्येति । सन्निकृष्टानुवादासम्भवे च विप्रकृष्टानुवादोऽप्याश्रीयते । यथाप्राप्त्यपेक्षो हि स भवति । बहुवचनं चाविवक्षितम् । अथ वा प्रकृतिविकृतिदेवतालोचनेनोपपत्स्यते । ततश्चायमर्थो भवति । यस्माद्देवयुक्तकर्मान्तरधर्मोऽयमतः पित्र्येऽग्निहोत्रे न कर्त्तव्य इति ॥ २ ॥ ॥ उपवीतस्य दर्शपूर्णमासाङ्गताधिकरणम् ॥ १ ॥

विधिर्वा स्यादपूर्वत्वात् ॥ ३ ॥

तदेवोदाहरणमुपन्यस्यते केवलक्रममेव तत्कुरुत इति । तत्र विधिरनुवाद इति सन्देहः । कथं पुनरनवधारिते विधित्वे सर्वार्थत्वदर्शपूर्णमासार्थत्वविचारो वृत्तः । सिद्धेन व्यवहारादिदमर्थतोऽधिकरणं पूर्वं द्रष्टव्यम् । किं प्राप्तम् । अनुवाद इति । कुतः ॥ स्मृतिभिः पुरुषो नित्यं कृतो यज्ञोपवीतवान् * वर्त्तमानापदेशाश्च न विधावुपपद्यते ॥ नित्योदकी नित्ययज्ञोपवीतीति हि सर्वदा यज्ञोपवीतं प्राप्तं क्रतावप्यस्ति । न चैष विधिसरूपः शब्दः । तस्मादनुवाद इति । एवञ्च निवीतप्राचीनावीताभ्यामवैलक्षण्यं भविष्यतीत्येवं प्राप्ते ब्रूमः॥ विधिरेष भवेदेवमपूर्वोऽर्थो विधास्यते * सर्वानुवादो व्यर्थो हि स्तुतेश्च विधिकल्पना॥ न हि समस्तानुवादवाक्यस्य किञ्चित् फलमस्ति । निवीतप्राचीनावीतसङ्कीर्त्तनमपि च विधीयमानोपवीतस्तुत्यर्थत्वेनैवार्थवद्भविष्यति । वर्त्तमानापदेशानामपि च तदाभासत्वात्प्रयोगवचनाऽर्थवादपञ्चमलकारेभ्यो विधिशक्तिर्व्याख्याता । तस्माद्विधिः । यत्तु स्मृतेरेव प्राप्तमिति । तत्राप्यपूर्वत्वादिदमेवोत्तरम् । अन्य एव ह्यसौ पुरुषधर्मे प्राप्तोऽन्यश्चायमपूर्वः क्रतुधर्मो विधीयते।तस्मान्नानुवादः । अस्य च प्रयोजनं कर्त्रधिकरणे वक्ष्यामः। एवं वा, यत्तु मृताग्निहोत्रे श्रूयते— प्राचीनावीती दोहयेत् । यज्ञोपवीती हि देवेभ्यो दोहयतीति । तत्रैवं विचार्यते । किमिदमहीनस्थितमिव द्वादशत्वं दर्शपौर्णमासगतमेव स्तुत्यर्थमुक्तम् ? उत जीवदग्निहोत्रे विधानार्थमिति । किं प्राप्तम्।ततः पूर्ववदेव सूत्रं व्याख्यातव्यम् । एवञ्च सति प्रकरणबहुवचनयोरनुग्रहो भविष्यति । तस्मात् सत्यप्यनुवादसरूपत्वेऽर्थवत्त्वाय प्रयोगवचनादिभ्यो विधित्वं कल्पनीयम् । एतस्मिंश्च व्या-

ख्याने स्थितं तावदपर्यवसितमित्येवमुत्तरमधिकरणमारब्धव्यम्॥३॥ उपवीतस्य विधित्वाधिकरणम् ॥ २ ॥

उदक्कं वाऽपूर्वत्वात् ॥ ४ ॥

तस्मिन्नेव मृताग्निहोत्रे श्रूयते । ये पुरोदञ्चो दर्भास्तान् दक्षिणाऽग्रांस्तृणीयादिति । केचित्तु महापितृयज्ञे श्रूयत इत्युदाहरन्ति । ये पुरोदञ्च इत्यत्र सन्देहः । किं विधिरनुवाद इति । किं प्राप्तम् । ततश्च शब्देनान्वादिश्यते । अयमपि विधिरपूर्वत्वादिति । प्राप्तिपूर्वको ह्यनुवादो भवति।न चास्य पुरुषार्थतयाऽपि प्राप्तिरस्ति । न चाऽस्य स्तुत्यऽर्थताऽपि युज्यते । हिशब्दाद्यप्रयोगात् । तस्मात् सिद्धवदुक्ताऽन्यथाऽनुपपत्त्यैवास्यापि विधित्वमिति ॥ ४ ॥

सतो वा लिङ्गदर्शनम् ॥ ५ ॥

आचारप्राप्तस्योदगग्रत्वस्य द्योतकमात्रं लिङ्गदर्शनमेतन्न विधिः । कुतः ॥ लिङादिरहिते वाक्ये तदा विधिरूपंयते * न कथञ्चिद्यदा युक्त्या प्राप्तिलेशोऽपि गम्यते ॥ यच्छब्दयोगाद्राख्याततद्विशेषरहितत्वाच्च स्फुटमिहानुवादत्वमवधारितम् । तद्यथा कथञ्चिदपि प्राप्तौ सत्यां नातिक्रमितव्यम् । अस्ति चात्र प्राप्तिरप्रवन्ति प्रागग्राणि उदगग्राणि वाऽपवर्गवान्ति प्रागपवर्गाण्युदगपवर्गाणि वेति स्मृतेः । तस्मात्तत्समानार्थं पदार्थं सिद्धवदनुवादः । तथैव च स्तुत्यर्थः । पुरा ह्येतदुक्तं, न तु साम्प्रतं मृतावस्थायामिति । स्थितादप्येतदेवोत्तरम् । हिशब्दवदाख्यातेन यतः कुतश्चित् प्राप्तेरपेक्षितत्वात् । प्रकरणे च तदभावात् किमनवगम्यमानमेव विधित्वं कल्पितम् ? उत यत्रतत्रस्था प्राप्तिराश्रीयतामिति । तत्र प्राप्त्याश्रयणमपेक्षितं, न तु विधित्वमिति तदेव ज्यायः। प्रकरणबहुवचनयोश्चोक्तम्, अस्त्येव चान्योऽत्र विधिरिति नानर्थक्यम् ॥ तस्मादनुवाद इति नित्येऽग्निहोत्रे दोहे, विनाऽप्युपवीतेनाऽवैगुण्यम् ॥ ५ ॥ ॥ ॥ उपवीतोदगग्रत्वयोरनुवादताऽधिकरणम् ॥ ३ ॥

विधिस्तु धारणेऽपूर्वत्वात् ॥ ६ ॥

इदानीमेवंविधशब्दाभावेऽनुवादत्वस्यातिप्रसक्तस्याऽपवाद आरभ्यते । तत्रैव दिष्टगताग्निहोत्रे महापितृयज्ञे वा श्रूयते, अधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयतीति । तत्रोपरि हि

देवेभ्य इत्यत्र पूर्ववदेव विध्यनुवादत्वसन्देहे हिशब्दयोगाद् वर्त्तमानापदेशाद्विध्यन्तरेण चैकवाक्यत्वादाचारतश्च प्राप्तेरनुवाद इति प्राप्नोति। कथमाचारतः प्राप्तिरिति चेत्। उच्यते ॥ सर्वमभ्यर्हितं द्रव्यं प्रच्छादनमपेक्षते * यत्र क्वचन च प्राप्ते समित्तत्र नियम्यते ॥ देवार्थस्य स्रुचि प्रक्षिप्तस्य हविषः आहवनीयदेशं नीयमानस्यावश्यमेव हस्तो वाऽन्यद्वा किञ्चिद् द्रव्यम् आचारादुपरि दातव्यम्। तत्र प्रत्यासत्तेः समिन्नियम्यते। स्रुग्दण्डे समिधमुपगृह्यानुद्रवतीति चास्यापि विधेराचारापेक्षितार्थविधानादेतदेव फलं विज्ञायते। सव्यमादुपरिधारयतीति प्राप्तस्योपवीतादेरिवाऽनुवादः। सतो वा लिङ्गदर्शनमिति प्राप्ते, अभिधीयते ॥ धारणे विधिरेव स्याद् न हि प्राप्तिः कुतश्चन * समित्प्रच्छादनाशक्तेर्नाचारादुपरिस्थता ॥ सत्यमाचारात् प्रच्छादनं कर्त्तव्यं, न तु तत्र समित् पक्षेऽपि प्राप्नोति या सन्निधेर्नियम्येत। हस्ताद्येव हि तत्र योग्यत्वात् प्राप्नुयान्न समित्। ननु च सोमचमसादीनां वचनसामर्थ्याद्या काचिदानत्यर्थता भवत्येवमत्रापि या काचित् प्रच्छित्तिर्भविष्यतीति। भवेदेवं यदि तदीयदक्षिणासंयोगवदिहापि प्रच्छादनसंयोगः श्रूयेत। न तु श्रूयते। उपसङ्ग्रहमात्रविधानात्। यदि सोमचमसेऽपि दक्षिणासंयोगरहितं दानमात्रमश्रोष्यत ततो नैवानत्यर्थत्वमाश्रयिष्यत। स्रुग्दण्ड इति च देशनियमात् सुतरां हविषः प्रागसौ धारयितव्या। तेनोपरिधारणमप्राप्तम् ॥ न चाऽप्राप्तं हेतुवन्निगदेन वर्त्तमानापदेशेन वाऽनुवदितुं शक्यम्। अतोऽस्य व्यवधारणकल्पनयाऽनुवादसरूपत्वं भङ्क्त्वा वाक्यं भित्त्वा विधित्वमाश्रीयते। पित्र्ये होमेऽधस्तात् स्रुग्दण्डस्य समिद्धारयितव्या। दैवे च पुनरुपरिष्टादिति। विधित्वे चैवमादीनामुक्तः कल्पनाप्रकारः। तस्माद्विधिरिति ॥ ६ ॥ ॥ समिद्धारणस्य विधिताधिकरणम् ॥ ४ ॥

पुस्तक विवरण की तिथि नीचे अंकित है। इस तिथि सहित ३० वें दिन पुस्तक पुस्तकालय में वापस आ जानी चाहिए अन्यथा ५० पैसे प्रतिदिन हिसाब से विलम्ब दण्ड लगेगा।